॥ हरिः ओं

अद्वैतसिद्धान्तगुरुचन्द्रिकायाम् ।

	श्लोकाः
प्रथमं स्वात्मनि जगदध्यासनिरूपणम्	१३४
द्वितीयं स्वात्मजगतोरेकसत्तावादादिनिरूपणम्	२९७
तृतीयं सोपाधिकस्यापि जीवस्य विभुत्वनिरूपणम्....	६९
चतुर्थं लक्ष्यैक्यमात्राविरोधि जगत्सत्यत्वपरं प्रतिकर्म-व्यवस्थाख्यसृष्टदृष्टिनिरूपणम्	७३
पञ्चमं वाच्याद्यैक्यानुकूलं जगन्मिथ्यात्वनिरूपणम्....	२०४
षष्ठं दृष्टिसृष्टिनिरूपणम्	७६
सप्तमं एकजीववादनिरूपणम्	११६
अष्टमं एकविज्ञानेन सर्वविज्ञाननिरूपणम्	५१३
नवमं वाच्यैक्यनिरूपणम्	१०७
दशमं लक्ष्यैक्यनिरूपणम्	५३

॥ आहत्य अशीत्युत्तरशताधिकसहस्रश्लोकाः ॥

विषयसूचकं वचनम् ।

[प्रथमतः एतच्छास्त्रप्रभावाभिज्ञानां महापण्डितानामिमे त्रयोदशश्लोका उदाश्रियन्ते ।]

[दशानां निरूपणानाम्मध्ये कतमस्मिन्कतमस्मिन्निरूपणे कतमस्मात्कतमस्मात् श्लोकादारभ्य कः को विषय उक्त इति चेत्सूच्यते ।]

[शास्त्रारम्भे चन्द्रिकाचार्ये आत्मेति तूपगच्छन्ति ग्राहयन्तीति सूत्रोक्ताचार्यधर्मोऽवगम्यते ।]

प्र १. आत्मानात्मविचारप्रवर्त्तकं यावदध्यात्मशास्त्रं सूत्रयति
प्र २. शिष्याणां तत्सूत्रार्थगतविशेषप्रश्नं दर्शयति
प्र ११॥. एतच्छास्त्रप्रभावान्दर्शयति
प्र १६. परमतनिराकरणपूर्वकं जगतः स्वात्मन्याध्यासिकत्वमुपदिशति
प्र १९. शुक्तेः तदवयवरजतावयवाभ्यामारब्धत्ववादं दूषयति
प्र २१. प्रतिनिधिद्रव्यस्य विहितद्रव्यसमानावयवारब्धत्वं दूषयति
प्र २९. तमसो मीमांसकोक्तनैल्यादिक्रियाश्रयत्वं खण्डयति
प्र ५०॥. अध्यासलक्षणमुपदिशति
प्र ५१. पञ्चाध्यासानुपदिशति ।
प्र ५६. परस्परविरोधेन स्वात्मपरसिद्धान्तसूत्रकृदादीनामभिप्रायं दर्शयति
प्र ५७. प्रतीच्येव जगज्जन्मादिकारणत्वलक्षणयोजकाचार्यान्प्रदर्शयति
प्र ६७. सर्वत्र लक्ष्ये लक्षणयोजनप्रकारादेशः
प्र ७३. आधिदेविके लक्षणयोजने बाधमाह
प्र ७४. ईश्वरे द्विविधप्रकृतित्वं दर्शयति
प्र ७६. तस्य त्रिविधप्रकृतित्वाभावमुपदिशति
प्र ८१. जीवे द्विविधप्रकृतित्वं दर्शयति
प्र १०७. स्वात्मजगतोरेकसत्तावादे सकर्मकवाक्यानां तात्पर्यं दर्शयति
१२६. परीक्षितशिष्याणां ज्ञानं प्रदर्शयति
१३२. शिष्यकृतार्थतां प्रदर्शयति

[द्वितीयनिरूपणे प्रथमादिश्लोकादारभ्य तत्तत्यविषयाः सूच्यन्ते]

द्वि १. स्वात्मजगतोरेकसत्तादिहेतूपदेशः

द्वि ३. अत्र प्रतिपादनीयविषयप्रदर्शकानां नवानां क्रमोपदेशः

द्वि ७॥. तत्र एकैकस्मिन्नपि प्रदर्शके पक्षत्रयप्रतिज्ञा

तत्र प्रथमप्रदर्शके

द्वि ८॥. प्रथमपक्षे स्वाज्ञाने स्वप्राक्कालिकज्ञानस्याभावत्वोपदेशः

द्वि १९. एकोनविंशेन श्लोकेन तद्व्याख्यानेन च प्रध्वंसाद्यभावत्रयनिषेधं प्राक्कालिकस्याभावः प्रागभाव इत्यत्र श्रुत्याचार्याणां सम्मतिं लक्षणञ्च दर्शयति

द्वि ९. द्वितीयादिपक्षेऽज्ञानस्य भावत्वमुपदिशति

द्वि १०. तत्र प्रथमपक्षे उपपत्तिमुपदिशति

द्वि १५. प्राक्कालिकज्ञानस्याभावानुभवं शक्तिमाययोरनुवादशास्त्रञ्च दर्शयति

द्वि ६५. पक्षभेदेनोक्ताज्ञानत्रयप्रमाणानां प्राबल्यादिकं दर्शयति

द्वि ६९. एकोनसप्ततितमादिश्लोकतद्व्याख्यानाभ्यां स्वात्मन्यध्यासिकभावरूपाज्ञाननिषेधपूर्वकं सान्तं ज्ञानाभावं भ्रमकारणत्वेनोपदिशति

द्वि ९२. पूर्णस्वात्मानन्दस्य निरावृतत्वमुपदिशति

द्वि ९६. जगतः स्वात्ममात्रसत्ताकत्वेन तद्विवर्त्तत्वे लक्षणमाह

द्वि १३९. ज्ञानाभावे आवरणशक्तित्वादिभ्रमप्रतीतौ प्रमाणोपदेशः

द्वि १४७. पक्षभेदेन दर्शिताज्ञानानां लक्षणोपदेशः

द्वि १५२. अधिकारभेदाभिज्ञश्रुत्याचार्यकृततत्त्वोपदेशानां पूर्वोत्तरविरोधेऽपि नावरेणोत्तमस्य बाध इत्याह

द्वि १५६. आचार्येण कर्त्तव्योपदेशभेदविधिन्दर्शयति

द्वि १७५. प्रत्यगात्मनः अद्वितीयत्वे वैदिकावैदिकागमानां तात्पर्यन्दर्शयति

द्वि १८२. पक्षभेदेन दर्शिताज्ञानानां क्रमाद्धेतुत्वविशेषन्दर्शयति

द्वि १८८. प्रतिबन्धकस्यात्यन्ताभावस्येव प्रागभावध्वंसयोरपि हेतुत्वोपदेशः

द्वि २२१. पक्षभेदेनोक्ताज्ञानत्रयानुगुण्येन तत्तत्कार्याणां स्वरूपभेदन्दर्शयति

द्वि २२३. मिथ्याशब्दार्थत्रैविध्यं पूर्वपूर्वमतेन उत्तरोत्तरमतस्य बाधनीयत्वं दर्शयति

द्वि २३९. मुमुक्षुणा भोगार्थिना च क्रमात् ग्राह्याणि मतानि दर्शयति

द्वि २४३. मतभेदेन कार्यस्वरूपत्वे च सदसतोः तादात्म्येच प्रमाणान्याह
द्वि २६९. पक्षभेदेन दर्शिताज्ञानत्रयकार्याणां लयभेदन्दर्शयति
द्वि २७७. पक्षत्रयाभिमतकार्याणां साधारणलक्षणं भ्रमादिस्वरूपं तद्विषयञ्च दर्शयति
द्वि २९१. एतच्छास्त्रश्रवणाधिकारिणां दुर्लभत्वादिकं दर्शयति
द्वि २९३. द्वितीयनिरूपणं सङ्गृह्णाति

तृतीयनिरूपणे प्रथमादिश्लोकादारभ्य तत्रत्यविषयाः सूच्यन्ते

तृ १. अवस्थात्रयवतो जीवस्य शरीरत्रयेण अवेष्टितत्वमाह
तृ १४. जीवस्यान्तःकरणेन परिवेष्टितत्वाद्विच्छिन्नब्रह्मत्वदोषमाह
तृ १९. अन्तःकरणे जीवस्य ब्रह्मप्रतिबिम्बत्वे दोषमाह
तृ २०. अविद्यायां जीवस्य ब्रह्मप्रतिबिम्बत्वादौ दोषमाह
तृ २४. उक्तदोषासंस्पृष्टजीवस्वरूपमुपदिशति
तृ ५५. जीवभेदभ्रमस्य निर्विषयत्वमुपदिशति

[चतुर्थनिरूपणे प्रथमादिश्लोकादारभ्य तत्रत्यविषयाः सूच्यन्ते]

च १. अपूर्वतत्फलयोः सत्यत्वमुपदिशति
च ५. अपूर्वस्य द्रव्यत्वं प्रकृतित्वञ्चोपदिशति
च २३. अपूर्वतत्फलयोः सत्यत्वे श्रुत्यादिकं प्रमाणयति
च ४९. जगतो गुणापूर्वनिमित्तकत्वेऽपि सत्यत्वमाह
च ५०. प्रतिकर्मव्यवस्थेतिशब्दार्थमाह
च ५३. प्रतिकर्मव्यवस्था सिद्धान्तञ्च दृष्टिसृष्टिवा दात्तद्वैलक्षण्यञ्च दर्शयति
च ५६. प्रतिकर्मव्यवस्थावादस्य द्वैतवादाद्वैलक्षण्यं दर्शयति
च ६१. जगतः सत्तात्रयविभाजकञ्च तदानुगुण्येन स्वात्मपरिमाणभेदञ्च दर्शयति
च ७०. द्वैतिनः प्रतिकर्मवादिनश्च जगन्मिथ्यात्वमाक्षिपन्ति
आहत्य नवविषयाः

[पञ्चमनिरूपणे प्रथमादिश्लोकादारभ्य तत्रत्यविषयाः सूच्यन्ते]

प १. जगतः अनित्वत्वरूपमिथ्यात्वातिरिक्तद्विविधमिथ्यात्वप्रदर्शनाय कर्मजत्वं वारयति
प ३. कर्मजत्वस्य जगति मायिकत्वश्रुत्या बाधन्दर्शयति

प १०. जगतः आविद्यकत्वश्रुतेरनेकसहायवत्वात्तया कर्मजत्वश्रुतेर्बाधं दर्शयति

॥ जगतः कर्मजत्वाविद्यकत्वपरश्रुत्योः मध्ये आविद्यकत्वश्रुतेरेव ॥

प ११. स्वप्नावस्थावतो जीवात् स्थूलजगत्सृष्टिपरागमेन सहायवत्वं दर्शयति

प १५. स्वप्नावस्थावति जीवे स्थूलजगल्लयपरागमेन च सहायवत्वं दर्शयति

प १७. सुषुप्त्यवस्थावति निखिलजगल्लयपरागमेन च सहायवत्वं दर्शयति

प २०. सौषुप्ताभिन्नविज्ञानमयान्निखिलजगत्सृष्टिपरागमेन सहायत्वं दर्शयति

प २८. स्वात्मज्ञानादेवाविद्यातत्कार्यजगन्निवृत्तिपरागमेन च सहायवत्वं दर्शयति

प ३०. अज्ञानविशिष्टस्वात्मविज्ञानेन सर्वविज्ञानप्रतिज्ञाश्रुत्या च सहायवत्वं दर्शयति

प ३७. आध्यात्मिकेश्वर एव साक्षात् जीवभावं प्राप्नोतीति शास्त्रेण च सहायवत्वं दर्शयति

प ४२. अन्तर्यामिणश्चौतादन्यस्य जीवस्य निषेधपरेण शास्त्रेण च सहायनत्वं दर्शयति

प ४४. अवस्थितेरिति काशकृत्स्न इति सूत्रतद्भाष्याभ्याञ्च सहायवत्वंदर्शयति

प ५४. लोकवत्तु लीलाकैवल्यमित्यधिकरणसिद्धान्तभाष्येण सहायवत्वं दर्शयति

॥ बहुस्यामित्यादीक्षणं तावत् स्वात्मनः किमात्मकमिति प्राप्ते तस्य ॥

प ५८. जिजागरिषात्मकत्वं दर्शयति

प ६०. तत्र भाष्यकारसम्मतिन्दर्शयति

प ६२. विद्यारण्याचार्यसम्मतिञ्चदर्शयति

[एवं जगतः कर्मजन्यत्वपरश्रुतेः बहुविधश्रुत्यादिभिर्बाधितत्वादकर्मजत्वे सति स्वात्मावारकाविद्याजन्यत्वे]

प ६६. श्रीब्रह्मसम्मतिन्दर्शयति

प ७१. श्रीरामसम्मतिन्दर्शयति

प ८७. श्रीशिवसम्मतिन्दर्शयति

[यजेतेत्यादिलिङादेः परिसङ्ख्यापरत्वे]

प ८८. भाष्यकारादीनां सम्मतिन्दर्शयति

प ९२. तत्र सूत्रकारसम्मतिञ्च दर्शयति

[कर्मापेक्ष आधिदैविको जगत्सृजतीति पक्षे तस्य केवलनिमित्त-कारणत्वमेवेत्यत्र]

प ९७. सूत्रकारादिसम्मतिन्दर्शयति

[कर्मनिरपेक्षतया स्वसिन्नविद्यया जगदारोपकस्य स्वात्मनः अभिन्ननिमित्तोपादानत्वे]

प १०८. गौडपादाचार्यसम्मतिं दर्शयति

प १२१. अपरोक्षानुभूतिनामकशास्त्रसम्मतिञ्च दर्शयति

प १३२. भगवत्पादीयविवेकचूडामणिसम्मतिञ्च दर्शयति

प १३८. कर्मशास्त्राणामनुवादकत्वेऽनेकाचार्यश्रुतिसम्मतिञ्च दर्शयति

प १४३ आविद्यके कर्मजत्वभ्रमं दृष्टान्तेन प्रत्याययति

प १४९. अविद्यायाः स्वकार्योत्पादने कर्मानपेक्षत्वं दृष्टान्तेन प्रत्याययति

प १६१. इन्द्रजालस्य सभ्यजनकल्पितत्वं दर्शयति

प १७६. क्षणिककर्मापेक्षेश्वरस्य स्रष्टृत्वेऽपि दोषं दर्शयति

प १७८. स्रष्टुः कर्मापेक्षत्वे जीवेशफलभेदस्य वास्तवत्वापत्तिं दर्शयति

प १८०. जीवस्येशप्रतिबिम्बत्वादावपीशस्य फलदातृत्वाभावापत्तिं दर्शयति

प १८२. स्वाप्रिकगजादेरकर्मजत्वे प्रमाणानि दर्शयति

प १८३. कर्मापेक्षेशशरीरस्य, कर्मायत्ततां दर्शयति

प १८४. कर्मणा विनावासनया जगद्वैचित्र्यं दर्शयति

प १८५. स्वस्य कर्ममार्गोच्छेदकत्वाभावं दर्शयति

प १८६. वेदवाक्यानां प्रामाण्यतारतम्यं दर्शयति

प १८७. विधीनां निवृत्तिपरत्वाग्राहिणो बाधं दर्शयति

प १९१. श्रुतीनामुदीरितविरोधपरिहारे न्यायं दर्शयति

प १९५. श्रुतीनां प्रामाण्यतारतम्यानभ्युपगमे बाधं दर्शयति

प १९६. जगतः स्वाविद्यकत्ववेदनफलं दर्शयति

प १९७. एतत्पञ्चमनिरूपणश्रवणजन्यं शिष्यानुभवं दर्शयति

सृष्टिनिरूपणे प्रथमादिश्लोकादारभ्य तत्रत्यविषयाः सूच्यन्ते

[जगतो दृष्टिरूपत्वे]

ष १. कैवल्यश्रुतिमुपमानञ्च प्रमाणयति

ष ८. स्मृतिञ्च प्रमाणयति

ष न तत्र उपपत्तिमाह

ष ९. पक्षभेदेन निर्दिष्टाज्ञानत्रयानुसारेण तत्कार्यदृष्टिस्वरूपविषयान्दर्शयति

ष १५. पक्षभेदेन दृष्टेः सत्ताद्वयं दर्शयति

ष १६. तत्र गौडपादाचार्यसम्मतिं दर्शयति

ष १८. श्रुतिसूत्रभाष्यानुमानोपमानानि दर्शयति

ष २१. रामानन्दीयञ्च प्रमाणयति

ष २२. सूत्रकारस्य तात्पर्यं प्रमाणयति

ष २९. माण्डूक्यभाष्यं प्रमाणयति

ष ३१. सिद्धान्तमुक्तावळ्यादिकं प्रमाणयति

ष ३३. उपलब्ध्यधिकरणे परमतदूषणे तात्पर्याभावमाह

ष ३६. वेदानुसारित्वे तान्त्रिकसिद्धान्तस्याप्यङ्गीकार्यत्वमाह

ष ३८. दृष्ट्या सहाविद्यकदृश्योत्पत्तौ बाधमाह

ष ३९. दृष्टिं विना साक्षिवेद्यमात्रोत्पत्तौ बाधमाह

ष ४१. शुक्त्यादिकं विनैव रजतादिभ्रमोत्पत्तिं दर्शयति

ष ५१. जगतो दृष्टिरूपत्वे वाचारम्भणश्रुत्यादिकं प्रमाणयति

ष ५६. विषयवैचित्र्यं विना दृष्टिवैचित्र्यं दर्शयति

ष ५८. अद्वैतिना कर्तव्यमुपदिशति

ष ५९. विज्ञानवादाद्वैतवादयोर्वैलक्षण्यं दर्शयति

ष ६०. वाचारम्भणवेदाभिमतज्ञानातिरिक्तकार्याभावस्य दूषणे तात्पर्याभावन्दर्शयति

ष ६३. सूत्रकारादीनां विज्ञानवादनिरसने तात्पर्याभावमाह

ष ६८. अस्य दृष्टिरूपत्वे अनुमानान्तरन्दर्शयति

ष ७०. सृष्टदृश्यपेक्षया दृष्टिसृष्टेः प्राशस्त्यमाह

सप्तमनिरूपणे प्रथमादिश्लोकादारभ्य तत्रत्यविषयाः सूच्यन्ते

सप्तमे स्वात्मनः

स १. सजातीयराहित्यमुपादिशति
स २. एकजीववादतात्पर्यगोचरत्वमुपदिशति
स ८. परकीयसुखाद्यपरोक्ष्यापत्तिं परिहरति
स १०. सजातीयराहित्ये प्रमाणं दर्शयति
स १३. सर्वनियन्तृत्वादिकं दर्शयति
स १७. स्वकल्पितजीवानामाभासत्वं दर्शयति
स १८. कल्पकस्य स्वस्यैव बन्धमोक्षाधिकारित्वं दर्शयति
स २०. ईशाद्युपनिषदामाधिदैविकेश्वरे समन्वयं विना आध्यात्मिके स्वस्मिन्नेव समन्वयं दर्शयति
स २८. वस्तुतत्पुरुषभेदेन बन्धमुक्त्यभ्युपगमे बाधमाह
स ३७. जीवानामुपाधिकृतभेदमाश्रित्य बन्धाद्यङ्गीकारे बाधं दर्शयति

एकजीववादे

स ४८. बन्धमुक्तिव्यवस्थोपपत्तिं दर्शयति
स ५१. तत्र केनोपनिषदर्थकब्रह्मवाक्यं प्रमाणयति
स ५७. माण्डूक्यार्थनिर्णायकं गौडपादवाक्यं प्रमाणयति
स ६१. भगवद्गीतां प्रमाणयति
स ६३. छान्दोग्यार्थनिर्णायकब्रह्मगीतां प्रमाणयति
स ६६. [आनन्दमयस्य द्विविधत्वं दर्शयति]
स ६८. तत्रोपनिषद्वाष्यादिकं प्रमाणयति
स ७५. शिवगीतां प्रमाणयति
स ८०. ब्रह्मवल्ल्याद्युक्तानन्दमयवाक्यतात्पर्यं दर्शयति
स ८५. तत्र गौडपादाचार्यादिसम्मतिं दर्शयति
स ९४. कार्योपाधिकस्यापि जीवस्य स्थूलजगत्प्रकृतित्वमाह
स ९७. सौषुप्तस्थानीश्वरत्ववादिनां तात्पर्यं दर्शयति
स ९९. एकजीववादे सम्भविष्यत्सकलशङ्कानिवर्त्तकं दर्शयति
स १०५. सृष्टिश्रुतेः पुरुषतन्त्रत्वपरत्वाभावं दर्शयति
स १०८. तत्र छान्दोग्यार्थपरब्रह्मगीतां दर्शयति
स ११३. एकजीववादे ज्ञानसौलभ्यं दर्शयति

अष्टमनिरूपणे प्रथमादिश्लोकादारभ्य तत्रत्यविषयाः सूच्यन्ते

अ १. एकविज्ञानेन सर्वविज्ञानवाक्यस्य चतुर्विधतात्पर्यमाह

तेषु प्रथमतात्पर्ये

अ ५. आगममुपमानञ्च दर्शयति
अ १०. नानाचार्यसम्मतिञ्च दर्शयति

द्वितीयतात्पर्ये

अ १४. आगममुपमानञ्च दर्शयति

तृतीयतात्पर्ये

अ १८. आगममुपमानञ्च दर्शयति
अ १९. प्रथमतात्पर्यापेक्षया क्रमात् द्वितीयतृतीयतात्पर्ययोरवरत्वं दर्शयति
अ २१. तत्र ब्रह्मगीतां प्रमाणयति

चतुर्थतात्पर्ये

अ २४॥. आगममुपमानञ्च प्रमाणयति
अ २७. प्रथमादितात्पर्यापेक्षया चतुर्थतात्पार्ये अरुचिं दर्शयति
अ ३२. प्रथमनिष्ठाफलन्दर्शयति

तत्र

अ ३३. ब्रह्मगीतां प्रमाणयति
अ ३६. उपपत्तिपरम्ब्रह्मवाक्यं प्रमाणयति
अ ४०. द्वितीयतात्पर्यनिष्ठाफलन्दर्शयति
अ ४२. तृतीयतात्पर्यनिष्ठाफलन्दर्शयति
अ ४३. द्वितीयतृतीयनिष्ठाफलविषये आगमादिकं प्रमाणयति
अ ५०. चतुर्थतात्पर्यनिष्ठाफलन्दर्शयति

नवमनिरूपणे प्रथमादिश्लोकादारभ्य तत्रत्यविषयाः सूच्यन्ते

न १. आचार्यवन्दनपूर्वकं वाच्यैक्यप्रश्नन्दर्शयति

तद्वाच्यैक्यम्

न ४. उपमानप्रमाणेन दर्शयति
न ६. आधिदैविकस्य ईश्वरत्ववाद्यभिमतेनोपमानेन दर्शयति

न ११. अनुमानप्रमाणेन दर्शयति
न १२. आगमप्रमाणेनाप्युपदिशति
न १३. जीवेशयोर्ब्रह्मप्रतिबिम्बत्वपक्षेऽपि तदृर्शयति
न १५. जीवेशयोरंशांशित्वपक्षेऽपि तदृर्शयति
न १६. सूत्रनाभ्योक्तानुमानतोऽपि तदृर्शयति
न २०. सृष्टेः दृष्टिसृष्तमयत्वप्रक्रिययापि तदृर्शयति
न २२. एकविज्ञानेन सर्वविज्ञानपरशास्त्रतः तदृर्शयति
न २४. सूत्रतद्भाष्याभ्यां तदुपदिशति
न २५. माण्डूक्यतैत्तिरीयविद्यारण्यवचनैर्लोकानुभवैरपि तदृर्शयति
न २८. श्रीभगवत्पादवचनेनापि तदुपदिशति
न २९. श्रुतिसंक्षेपाचार्यार्द्वैतसिद्धिकारवचनैरपि तदुपदिशति
न ३२. गौडपादाचार्यवचनेनापि उपाधिविशिष्टयोरैक्यमुपदिशति
न ३७. आध्यात्मिकाधिदैविकभेदभ्रमनिरसनेन वाच्यैक्यत्रयमुपदिशति
न ३९. तत्त्वंपदवाच्ययोः भेदाभावे सति तद्वाक्येनापि वाच्यैक्यं सदृष्टान्तमुपदिशति
न ४१. कठवल्लीवाक्येनापि तदुपदिशति
न ४२. तत्कठवल्लीवाक्यमूलकब्रह्मगीतयापि तदुपदिशति
न ४३. बृहदारण्यतद्भाष्याभ्याञ्च तदुपदिशति
न ४४. अनेकश्रुतिसूत्रादिभिरपि तदुपदिशति
न ५३. दृष्टान्तेन च तदृर्शयति
न ५६. श्रुतीनामवगतिसामान्येनापि तदुपदिशति
न ५८. अन्तर्यामिब्राह्मणतन्मूलकब्रह्मगीताभ्यान्तदुपदिशति
न ६६. श्वेताश्वतरोपनिषदापि तदुपदिशति
न ६८. भगवद्गीतयापि तदुपदिशति
न ६९. तद्भगवद्गीतार्थप्रकाशकविद्यारण्याचार्यवचनेनापि तदुपदिशति
न ७५. महावाक्यार्थावगत्यै लक्षणावृत्त्याश्रयणे हेतुमाह

न ७७. तत्र विद्यारण्यसदाशिवब्रह्मणोः सम्मतिं दर्शयति

न ७९॥. तत्र श्रुतिसम्मतिं दर्शयति

न ८१. प्रतिकर्मव्यवस्थावादेन वाच्यैक्यस्य अबाध्यत्वे हेतुन्दर्शयति

न ८७. महावाक्यगततत्त्वंपदयोः पर्यायत्वादिकमाह

न ८८. स्वात्मनि भूतानामेकदा जन्मस्थितिविलयान् सदृष्टान्तन्दर्शयति

न ९३. उभयोरपि प्राज्ञविज्ञानमययोः तत्वंपदवाच्यत्वे उपपत्तिन्दर्शयति

न ९३. आत्मगृहीत्यधिकरणतद्भाष्यादिकं प्रमाणयति

न ९७. वार्त्तिकाचार्यसम्मतिञ्च दर्शयति

न १००. चतुर्थानरूपणातिरिक्तानिरूपणानि प्रमाणयति

न १०२. ब्रह्मणः स्वकार्येऽहमित्यभिमानित्वमेव प्रवेश इति दर्शयति

न १०४. तत्र वार्तिकवचनानि प्रमाणयति

न १११ वाच्ययोर्भेदाभेदवादिनौ वाच्यैक्यं विचारयतः

न ११३. भेदवादिनां वशीकृतत्वं दर्शयति

न ११५॥. शिष्यः स्वस्य वाच्यैक्यानुभव दर्शयति

न ११६. वाच्यैक्यविज्ञानेन लभ्यमानविशेषान्तराण्याह

दशमनिरूपणे प्रथमादिश्लोकादारभ्य तत्रत्यविषयाः सूच्यन्ते

द १. सुप्तं विज्ञानमयं प्रतिचक्रमान्मायाशरीरयोः विशेषणत्वादिकं दर्शयति

द ५. विशेषणस्य लक्षणं दर्शयति

द ६. उदीरितविशेषणलक्षणं स्वाज्ञानशरीरयोर्योजयति

द ७. उपाधेः लक्षणन्दर्शयति

द ८. उपलक्षणस्य लक्षणं दर्शयति

द १०. महावाक्यस्य विशिष्टैक्यात्रियपरत्वं दर्शयति

द ११. मायाद्युपहितस्वात्मनः साक्षित्वादिकं दर्शयति

द १५. मायाद्युपलक्षितस्वात्मनः साक्षित्वादिराहित्यं दर्शयति

द १७. प्रतिकर्मव्यवस्थायां उक्तैक्यत्रयाभावादौदासीन्यमेव कैवल्यमित्याह

एतच्छास्त्रमुपशृण्वताम्मध्ये

द १९॥ माधवतीर्थः स्वानुभवमाचार्यायावेदयति

द २१. सांबयोगी च स्वानुभवमावेदयति

द २३. शिवानन्दोऽपि स्वानुभवं दर्शयति

द २४ चिदानन्दमुनिः स्वानुभवं दर्शयति

द २५॥. श्रीनिवासेन्द्रोऽपि स्वानुभवमावेदयति

द २७. वैद्यनाथयोगीन्द्रः एकसत्तारीत्या मुक्तेरेकत्वं दर्शय

द ३०. दृष्टिसृष्टिरीत्या मुक्तेः पञ्चविधत्वं दर्शयति

द ३६. प्रतिकर्मव्यवस्थारीत्या मुक्तेराप्यत्वमेकत्वञ्चाह

द ४७. द्वैतवादरीत्यामुक्तेराप्यत्वं चातुर्विध्यञ्चाह

द ५० पूर्णानन्दोऽपि स्वानुभवं निवेदयति

द ५१. प्रसन्नस्वाचार्यप्रियचिकीर्षवः प्रार्थयन्ति

द ५३. चन्द्रिकाचार्यः स्वकीयं शास्त्रमनुगृह्णाति

श्रीः

हरिः ॐ

अद्वैतसिद्धान्तगुरुचन्द्रिकाशास्त्रप्रभावः ।

———:०:———

श्रीमन्मदाचार्यप्रदर्शितं मया च विज्ञातमेतच्छास्त्रप्रभावं दर्शयामि कृष्णानन्देन्द्रेत्यादिना ।

मू. कृष्णानन्देन्द्रपाराशरिगुरुचरणानुग्रहावाप्तविद्याः
पूर्वाचार्योक्तिसारग्रथनमयगिरा चन्द्रिकाख्यं प्रबन्धम् ।
कञ्चिन्निर्माय निर्मायितहृदयतया श्रावयन्तो महान्तो
रामब्रह्मेन्द्रसंज्ञा हृदि मम यतिनो हर्षवर्षं ह्यवर्षन् ॥ १ ॥
शृण्वन्तोऽद्वैतसिद्धान्तचन्द्रिकां हर्षदां सताम् ।
राजुशास्त्र्याख्ययज्वानः पत्रमेतद्व्यलीलिखन् ॥ २ ॥
इत्थं चम्पककाननवास्तव्यास्त्यागराजमाखिराजाः ।
रामब्रह्मेन्द्राणां सूक्तिमिमामन्वमोदिषत ॥ ३ ॥

एवं श्रीमदस्मदाचार्यवाक्यम् ।

महाराज्ञ्या साक्षादतुलकुतुकादर्पितमहा-
महोपाध्यायाख्यैर्महितनिलयैश्चम्पकवने ।
महद्भिस्त्यागेशाध्वरिभिरनुशिष्टो गणपति-
स्सयत्नं सव्याख्यां कृतिमनलसोऽशूशुधदिमाम् ॥ ४ ॥
सूर्याभिमुख्यसमये मुतरां प्राकाश्यमाप्नुवत्येषा ।
दोषलवदूरदूरा दोग्धि मुदं काऽपि चन्द्रिका सुदृशां ॥ ५ ॥
प्राचीनैस्सुमनोमुखैर्निजकृतौ कोण क्वचिद्वोपितं
कृच्छ्रेणापि गवेषयन्निखिलमप्यद्वैतसारं स्वयं ।
एकीकृत्य हि चन्द्रिकाभिधकृतिं निर्माय नृणामसौ
कुर्वन्मोक्षमदुर्लभं विजयते श्रीमान्परिव्राड्वरः ॥ ६ ॥
अमृतमयैर्वचनचयैरमृतं जगतामदुर्लभं कलयन् ।
अद्वैतराज्यसंराडाभाति यतिस्स चन्द्रिकाचार्यः ॥ ७ ॥

मू. सरससरसैर्वाचां गुम्भैस्समस्तमयत्नतो
निगममकुटीगूढं तत्वं नृणां करुणावशात्।
करबदरवत्स्पष्टीकुर्वन्भृशं सहि चन्द्रिका-
कृतिवरकृतीरामब्रह्मेन्द्रगीरयमेजते ॥ ८ ॥
आमूलाग्रं व्याख्यया साकमेतां दर्शंदर्शं चन्द्रिकामेष शुद्धाम्।
आनन्दाब्धेरन्तरन्तर्न्यमार्ङ्क्षं शिष्यश्श्रीमत्त्यागराजाध्वरीशाम् ॥
चन्द्रिकाकृतिकर्तृसंयमिशेखरा निजचन्द्रिकां
शृण्वतो मम हर्षवर्षमवर्षिषुर्हृदि निर्भरम्।
त्यागराजमखीश्वरैरिति चन्द्रिका ह्यनुमोदिता
साधु सर्वकलाकलापपयःपयोनिधिकुम्भजैः ॥ १० ॥
साक्षाद्यतिप्रवरवीक्षामवाप्य भुवि मोक्षाभिकाङ्क्षिविबुधैः
ग्राह्या सुधालहरिलेह्या यतीशबहुसाह्यात्कृतिः परमसौ।
त्यागाधिराजगुरुरागादशङ्कमिति वागालयस्स्वहृदयं
जल्पाम्यसाविति विकल्पादिदूरमधुकल्पाऽदसीयवचनैः॥ ११
रामब्रह्माभिधयतिशिष्यैस्साकं तेषां कृतिमतिरम्याम्।
शुद्धां दृष्ट्वा सुविपुलमोदादित्यालेखीद्गणपतिशास्त्री ॥ १२ ॥

अ०। अहमपि यथावद्विदितमेतच्छास्त्रमहिमानं वदामि।
सत्ताद्वित्वादिकं यज्जगति गुरुमतं मन्दमध्योत्तमेभ्यो
व्याकुर्वंश्चन्द्रिकार्याश्श्रुतिगतिसहितैर्युक्तिसङ्घैः क्रमेण।
तद्दृष्ट्वा चन्द्रिकातोमुदमुपगमितो राममुब्वाख्यशास्त्री
चौळे भूमण्डलेऽहं सकलगुणयुते शाहजग्रामवासी ॥ १३ ॥

व्या ॥ जगति नानाचार्यसम्मतं यत् **सत्ताद्वित्वादिकं** द्वयोर्भावः द्वित्वं स्वतो व्यावहारिकसत्तेति प्रातिभासिकसत्तेति च सत्तायाः द्वित्वं सत्ताद्वित्वमादिर्यस्य स्वतो निस्सत्वस्य तत् सत्ताद्वित्वादिकं तत्क्रमेण मन्दाद्यधिकारिभ्यो व्याकुर्वन् व्यवृण्वन्निल्यर्थः किं तत इत्यत आह तद्दृष्ट्वेत्यादिना। एवं प्रागुक्तमहापण्डितावि तदन्योऽपि महाविद्वानद्वैतसिद्धान्तगुरुचन्द्रिकासमवलोकनात्परितुष्ट इति सिद्धम् ॥

अद्वैतसिद्धान्तगुरुचन्द्रिकायां ।

——:o:——

प्रथमं स्वात्मनिजगदध्यासनिरूपणम् ।

अ०. इदानीं श्रीमच्चन्द्रिकाचार्यस्वकीयमद्वैतसिद्धान्तगुरुचन्द्रिकाख्यं शास्त्रं व्याचिख्यासुरादौ अविघ्नेन तत्परिसमाप्तये श्लोकद्वयेन स्वाचार्यद्वयमाहिमानुवर्णनादिपूर्वकं तत्प्रदर्शितं स्वात्मतत्वमनुसन्दधाति ॥ श्रीरामब्रह्मेति.—

मू. श्रीरामब्रह्मसंज्ञादनवरतचिदाकारवृत्तेर्दयाळो-
राद्याच्छ्रीसद्गुरोश्चाखिलविबुधजनैः पूज्यमानाद्विमुक्तात् ।
स्वस्योपादानताद्दक्सकलहितकरं चन्द्रिकाख्यं वितन्वन्
स्वात्मज्ञानां कवीनां सदसि विजयते चन्द्रिकाचार्यभिक्षुः॥ १ ॥
अद्वैतं प्रत्यगेव त्वमिति दृढतरं बोधयन् यः परिव्राड्
द्रागेव ध्वंसयन्सन्हृदयसरसिजे गाढमोहान्धकारम् ।
उद्यत्सूर्यायमाणो विलसति तमिमं कृष्णयोगीन्द्रपादं
वन्दे मच्चन्द्रिकाया अमृतरसझरीनामवृत्तिं प्रकर्तुम् ॥ २ ॥

व्या. प्रथमश्लोकार्थस्तावदतिरोहितार्थः

यथा च सूर्यः स्वाविर्भावमात्रेण नैशं तमो निशातयन्नरविन्दानां विकासको भवति एवमद्वितीयत्वोपदेशेन हार्दं तमो निवर्त्तयन्मम हृदयारविन्दस्य विकासकत्वेन विलसतीति सूर्यस्वाचार्ययोस्साम्यं प्रदर्शयन्ति स्म ॥ २ ॥

अ०. इह खलु परमकारुणिकः परमहंसपरिव्राजको नाम्ना चन्द्रिकाचार्यश्श्रोत्रियः कश्चिद्ब्रह्मनिष्ठो नित्यानित्यवस्तुविवेकादिसाधनचतुष्टयोपेतैश्चिरकालमाचरितब्रह्मचर्यव्रतैर्माधवतीर्थादिभिश्शिष्यैरजस्रमाराधितस्तेषां प्रागुक्ताद्वैतसिद्धान्तचन्द्रिकाख्यशास्त्रे समीरितादात्मानात्मीयाविशेषाद्विशेषान्तरजिज्ञासोत्पादनाय तत्समक्षं सर्वश्रुतिस्मृतिन्यायानुभवोपेतं स्वस्वरूपानुसन्धानपरं प्रागुक्तमेवश्लोकमेकं पुनरपि गायति स्म शिव इति.—

मू. शिवोऽहं वासुदेवश्च स यः प्राज्ञादिमस्य मां ।
प्रकृतिं चागमैस्स्मृत्या मयैक्यं स्वस्य चाब्रवीत् ॥ १ ॥

व्या. यः उपास्यः "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै" इति श्वेताश्वतरोपनिषत्प्रतिपाद्यत्वेन गृहीत आधिदैविकः ॥

श्लो. त्वं शिवोऽसीति वक्तारं गुरुरेवेति निश्चिनु ।

आत्मेति तूपगच्छन्ति ग्राहयन्ति चेत्यादिस्मृतिसूत्रोक्तप्रकारेण **प्राज्ञादिं** प्राज्ञस्सौषुप्त आदिरादावस्थो यस्य विज्ञानमयस्य मम सोऽहं प्राज्ञादिस्तं प्राज्ञादिं (मां) अस्मत्प्रत्ययगोचरं प्राज्ञविज्ञानमयात्मकं (अस्य) वियदादिजगतः (प्रकृतिं) उपादानकारणं चकारेण निमित्तकारणं च (स्वस्य) उपास्यस्य (मया) प्राज्ञविज्ञानमयात्मकेन (ऐक्यञ्च) एकत्वञ्च प्राज्ञादिव्यतिरेकेणाभावञ्च (आगमैः) सुषुप्त्यावस्थावतो जीवाज्जगत्सृष्ट्यादिप्रतिपादकैः "समाननामरूपत्वादावृत्तावप्यविरोधो दर्शनात्स्मृतेश्च" "अन्यार्थन्तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके" इति पञ्चमनिरूपणे त्रिनवतितमश्लोकवृत्तौ वक्ष्यमाणार्थकैतत्सूत्रद्वयभाष्यावसरे 'स्वापप्रबोधयोः प्रळयप्रभवौ हि श्रूयेते' इति च "सुषुप्तिकाले परेण ब्रह्मणा जीव एकतां गच्छति । परस्माच्च ब्रह्मणः प्राणादिकं जगज्जायत इति वेदान्तमर्यादेति च भाष्येभ्यां दृष्टिसृष्टिपक्षं प्रतिज्ञाय तत्र तत्र प्रमाणत्वेनोदाहृतैः "यदा सुप्तस्स्वप्नं न कञ्चन पश्यति अथास्मिन्प्राण एवैकधा भवति तदैनं वाक्सर्वैर्नामभिस्सहाप्येति चक्षुस्सर्वै रूपैस्सहाप्येति श्रोत्रं सर्वैश्शब्दैस्सहाप्येति मनस्सर्वैर्ध्यानैस्सहाप्येति । सयदा प्रतिबुध्यते यथाग्नेर्ज्वलतस्सर्वा दिशो विष्फुलिङ्गा विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनस्सर्वे प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोका" इत्यादिभिः "अयमात्मा ब्रह्म - प्रज्ञानं ब्रह्म - स्वपूर्णात्मातिरेकेण जगज्जीवेश्वरादयः । न सन्ति नास्ति मायां च तेभ्यश्चाहं विलक्षणः" इत्यादिमहावाक्यैश्च **स्मृत्या** श्लो । "यदाध्यासं विहायैष स्वरूपेणावातिष्ठते । अविद्यामात्रसंयुक्तस्साक्ष्यात्मा जायते तदा । द्रष्टाऽन्तःकरणादीनामनुभूतेस्स्मृतेरपि । अतोऽन्तःकरणाध्यस्तानध्यस्तत्वेन चात्मनः । भोक्तृत्वं साक्षिता चेति द्वयं तस्योपपद्यते । आतपश्चापि तच्छायास्वप्रकाशो विराजते । एको भोजयिता तत्र भुङ्क्तेऽन्यः कर्मणः फलं ।" इत्यादिकया स्वगीतया चाब्रवीत्साशिवोऽहमित्युक्त्वा एवमेव य उपास्यः प्रागुक्तकौषीतक्याद्यागमैस्तन्मूलया स्वगीतया श्लो ।"यावत्सञ्जायते किञ्चित्सत्वं स्थावरजङ्गमं । क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ । क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत' इत्यादिकया च **अब्रवी**त्सवासुदेवश्चाह -

मिति गायतिस्म॥ तथाचोक्तं भगवत्पादादिभिः श्लो'नारायणोऽहं नरकान्तकोऽहं पुरान्तकोऽहंपुरुषोऽहमीशः। अखण्डबोधोऽहमशेषसाक्षी निरीश्वरोऽहं निरहं च निर्ममः" "रज्जुसर्पादिवद्विश्वं नाज्ञातं सदिति स्थितं। प्रबुद्धदृष्टिसृष्टत्वात्सुषुप्तौ च लयश्रुतेः" इति च। किञ्च प्रागुक्तशिवस्मृतेस्तन्मूलपुच्छवाक्यऋतपानमन्त्रादीनां चक्रमात्सुप्त परत्वं तु सप्तमनिरूपणे एकोनाशीतितमैकसप्ततितमसप्तविंशश्लोकवृत्तौ दर्शयिष्यामः॥ १॥

अ०. अद्वैतसिद्धान्तचन्द्रिकायां प्रागस्माकमात्मानात्मविशेषजिज्ञासोत्पादकत्वेन संप्रयुक्तस्य शिवोऽहमिति वचनस्यैवाधुनाप्यस्मत्समक्षं पुनरुच्चारणं तद्विशेषान्तरजिज्ञासोत्पादनार्थमेवेति निश्चयवतां माधवतीर्थादीनां शिष्याणां वृत्तानुवादपूर्वकं प्रश्नमनूद्य तदुत्तरमाह शिवोऽहमित्यादिना —

मू. शिवोऽहमित्ययं श्लोको दशाभिप्रायदश्च नः।
भाति ब्रूमस्तथाचेत्तान्निरूपयितुमर्हसि॥
जीवभिन्नेशविभ्रान्त्या जगदारोपितं मयि।
भावाद्भ्रान्तिरभावाद्वा प्राज्ञस्ताभ्यां न वेष्टितः॥
धर्मे प्रकृतिता तत्र नकिञ्चिद्धर्म्यात्मकं जगत्।
जगत्कारणमेकोऽहं पदार्थस्तद्धियैव सा॥
सर्वधीश्च प्रतिज्ञाता वाच्यैक्यमपि सम्मतं।
लक्ष्यैक्यं भाति चैतेषु विशेषाञ्छाधि नो गुरो॥ ५॥
इति पृष्टोऽब्रवीत्स्वामिन्नात्मानात्मविशेषकान्।
तथापि तान्विस्तरेण श्रोतुं कौतूहलं हि नः॥ ६॥
विशेषान्तरतो या स्यात्सिद्धान्तगुरुचन्द्रिका।
ब्रूहि तां चेद्भवद्भक्त्या तोषितः प्रब्रवीमि ताम्॥ ७॥
सावधानेन मनसा धारयेत दृढं हृदि॥ ७॥॥

व्या॥ भो स्वामिन् गुरो भवदुक्तशिवोऽहमित्ययंश्लोकस्तमुपश्रुण्वतामस्माकं च **दशाभिप्रायदो भाति** दशविधाभिप्रायहेतुत्वेन स्फुरति। **तान्** तथाविधान् अस्माभिस्सामान्यत ऊहितान्ब्रूमः। भवच्छिष्या इति शेषः। **तथा चेत्** भवताप्येवमभिप्रेताश्चेत् **तान्निरूपयितुमर्हसि** प्रमाणपूर्वकं प्रतिपादयितुं समर्थो-

सि वक्ष्यमाणप्रकारेण स्वस्मिन्नेव जगदध्यारोपापवादविषयकश्रवणमननर्निदि-ध्यासनपूर्वकं शिवोऽहमिति साक्षात्कारवत्वात् ।

नान्येतथानिरूपयितुमर्हन्ति तेषां तत्तदुपासनावासनावशीकृततया हरिहरादावाधिदैविके जगत्प्रकृतित्ववादित्वादित्युक्त्वा तेषु ।

१. प्रथमाभिप्रायं दर्शयन्ति **जीवभिन्नेशविभ्रान्त्याजगदारोपितम्मयीति** जीवाद्भिन्न ईश इति स्वस्य सजातीयपरिच्छेदविभ्रान्त्या साकमस्मत्पदार्थे मयि जगदारोपितमिति भातीति पूर्वेणवोत्तरेण **वान्वयः**॥ एवं प्रथमाभिप्रायश्शिष्यैर्विज्ञापितः ॥ ननु कथं तदाचार्यावाक्यस्यैतदभिप्रायहेतुत्वमिति चेदुच्यते । यस्मात्तदाचार्येण प्राज्ञादिमित्यादिनाऽस्मत्पदार्थस्यावस्थात्रयवतो जीवस्याविद्यावतो हि प्रागुक्तैः 'यदा सुप्तस्स्वप्नं न कञ्चन पश्यती' त्याद्यागमैर्निवेदितनिखिलजगत्कारणत्वमनुचिन्तितम् अतः प्राग्विद्योदयान्नाहमीश्वर इति जीवेशभेदप्रत्यक्षस्य भ्रमत्वावगतिः। लोके चाज्ञसृष्टरज्जु सर्पादेराध्यासिकत्ववत् अज्ञानवता प्राज्ञेन सृष्टस्यापि जगतआरोपितत्वावगतिश्च भवेत् ॥

२. द्वितीयाभिप्रायं दर्शयन्ति **भावाद्भ्रान्तिरिति** भावरूपादज्ञानाद्द्वैतभ्रमो भवतीति भातीति पूर्वेणान्वयः ॥ कथमयमभिप्रायस्तदाचार्यवाक्यादवगत इति चेत् उच्यते यतः' अयमात्मा ब्रह्म 'त्यादिश्रुत्या मयैक्यं स्वस्य चाब्रवीदित्यवोचत् । शिवोऽहमिति प्राज्ञमहेश्वरयोरभेदश्चानुचिन्तितः ततस्तदनुसन्धानात्पूर्वं प्राज्ञगतं महेश्वरत्वावारकं तद्गतं यदज्ञानं तद्भावरूपमिति गम्यते अन्यथा तस्यावारकत्वानुपपत्तेः ॥

द्वितीयाभिप्राये पक्षान्तरं दर्शयन्ति **अभावाद्वेति** अथवा अभावात्द्वैतभ्रमप्रतिबन्धकभूतमात्मनो यदद्वितीयत्वज्ञानंतदभावरूपादात्मस्वरूपानावारकादज्ञानात् भ्रमसामान्यं प्रतिकारणभूताद्वैतभ्रान्तिर्भवतीति भातीति पूर्वेणान्वयः । एतदभिप्रायजनकत्वमपि कथं तदाचार्यवाक्यस्येति चेदुच्यते प्राज्ञादिमिति तदाचार्योक्तप्राज्ञशब्दार्थस्य सुखमहमस्वाप्समिति निरावृतत्वेनाविचारदशायामपि परामृश्यमानस्यानन्दमयस्यानन्दस्वरूपस्य शिवोऽहमिति वाक्येन ब्रह्मानन्दात्मकत्वस्य दर्शितत्वात् **अस्य मां प्रकृतिमब्रवीदिति** वाक्येन स्वस्य द्वैतभ्रमकारणत्वाङ्गीकाराच्च॥

३. इदानीं द्वितीयाभिप्रायस्य प्रथमपक्षानुसारेणाज्ञानस्यभावरूपत्वमवलंब्य तृतीयाभिप्रायमुपपादयन्ति **प्राज्ञस्ताभ्यां न वेष्टित इति** यत् प्रागुक्तभ्रान्त्युपलक्षितं लिङ्गशरीरादिकं कार्यं यच्च तत्परिणामिकारणमज्ञानं ताभ्यामवस्थात्रयेष्वपि प्राज्ञो न वेष्टितो न वलयित इति भातीति व्यजिज्ञपन् एतदभिप्रायहेतुत्वमपि तदा-

चार्यवाक्ये दृश्यते **प्राज्ञादिमस्य मां प्रकृतिञ्चागमैस्स्मृत्याऽब्रवीदिति** आचार्यवाक्येन प्राज्ञस्यावस्थात्रयेष्वपि प्रकृतित्वावगमात् । यथा हि लोके प्रकृतिभावमापन्नं मृदादिकं वस्तु न स्वविकारपरिवेष्टितत्वेन तदन्तर्गतं भवति किन्तु स्वविकारस्याधारमेव भवति एवं स प्राज्ञोऽपि स्वस्मिन्नद्धचस्ताज्ञानादीनां भवतीत्यवगतं भवेत् ॥

४. चतुर्थाभिप्रायञ्च निवेदयन्ति **धर्मं प्रकृतितेति** धर्मपदमधर्मस्याप्युपलक्षणं तथा च अग्नौ हुतसोमाज्यपयोद्रव्यादि परिणामरूपे द्रव्यरूपेऽपूर्वेद्यमाथिके शरीरादिजगत्प्रकृतित्वं भातीति पूर्ववन्निवेदयन्ति स्म तत्कुत इति चेदुच्यते **आगमैस्स्मृत्याऽब्रवीदिति** तदाचार्यवाक्येनापि श्रुतिस्मृति सामान्यस्य प्रामाण्यादानेन 'ज्योतिष्टोमेन स्वर्गकामो यजेत' 'आचार्यवान्पुरुषो वेद' 'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये' इतीत्यादिश्रुत्या 'शरीरस्थोऽपि कौन्तेयनकरोति नलिप्यते' इत्यादिस्मृत्याच कर्मकार्यशरीरादेर्ब्रह्मज्ञाने नविनाश्यत्वाभावस्याभिप्रेतत्वात्। धर्माधर्मं प्रकृतिकत्वावगतिर्भवितुमर्हति । अन्यथा शरीरादिजगतो गुणापूर्वनिमित्तकत्वे सति मायाप्रकृतिकत्वेऽभ्युपगम्यमाने पूर्वोक्तश्रुतिस्मृत्योरप्रामाण्यप्रसङ्गः । तथाहि ब्रह्मज्ञानेन जगत्प्रकृत्यज्ञाननाशेन तद्विकृतिश्शरीरादिकमवस्थातुं क्षमते यथा चाध्यासिकी देहात्मबुद्धिः यथाच रज्जुसर्पादिः निमित्तजीवनेन नैमित्तिकजीवनं सम्भवत्विति चेन्न । कुलालदण्डादिनाशेऽपि घटादिस्थितिदर्शनात् । अतोऽमायिकं कर्मैव मीमांसकाभिमतं शरीराद्युपादानमिति चाभिप्रायोऽभवत् ॥

५. अथ पञ्चमाभिप्रायमाहुः **तत्र न किञ्चिदिति** तत्र धर्माधर्मादेः किञ्चिदुपादानत्वं निमित्तत्वं वा न सम्भवतीति भातीति पूर्वेणान्वयः॥ कुत इति चेज्जगतश्शरीरादेः कर्मजत्वे तदनुरूपं चिरजीविनः प्रतिदिनं मरणासम्भवेन 'यदा सुप्तस्स्वप्नं न कञ्चन पश्यत्यथास्मिन्प्राणएवैकधा भवति तदैनं वाक्सर्वैर्नामभिस्सहाप्येति' इत्यादि श्रुत्युक्तलयासम्भवादकर्मजत्वाभिप्रायश्चाभवत् ॥

६. इदानीं षष्ठाभिप्रायं च वर्णयन्ति। **ध्यात्मकं जगदिति** वृत्तिज्ञानात्मकं जगदिति भातीति पूर्वेणान्वयः । एतदभिप्रायजनकत्वमपि तदाचार्यवाक्यस्य दृश्यते 'प्राज्ञादिमस्य मां प्रकृतमब्रवीत्' इति तदाचार्यवाक्येन वियदादेरात्मप्रकृतिकत्वावगमेन स्वाप्निकगजादेरिव वृत्त्यात्मकत्वमभिप्रेतम् ॥

७. सप्तमाभिप्रायं च वर्णयन्ति **जगत्कारणमेकोऽहं पदार्थ इति** अवस्थात्रयवानेक एवाहं पदार्थः जगत्कारणमिति भातीति पूर्ववत्सम्बन्धः ॥ अयमप्याभि-

प्रायस्तदाचार्यं परिगृहीतया 'यदासुप्तस्स्वप्नं नकञ्चन पश्यत्यथास्मिन्प्राण एवैकधा भवति' इत्युपक्रम्य 'एतस्मादात्मनस्सर्वे प्राणा यथायतनं विप्रतिष्ठन्ते' इत्येवमादिश्रुत्या 'प्राज्ञादिमस्य मां प्रकृतिमब्रवीदिति' तदाचार्यवाक्यगतेन च कारणात्मपरैकवचनान्तशब्देनावगतः ॥

८. अथाष्टमाभिप्रायं विज्ञापयन्ति **तद्धियैव सा सर्वधीश्च प्रतिज्ञातेति** तस्यावस्थात्रयवतो धीर्ज्ञानं तद्धीः तस्येति कर्मणि षष्ठी, तयैव सा सर्वविकाराविषयिणी प्रतिज्ञातेति भातीति सम्बन्धः ॥ अयमभिप्रायश्च 'प्राज्ञादिमस्य मां प्रकृतिमब्रवीदिति' तदाचार्यवचनतन्मूलश्रुत्यादिभिरहंपदार्थस्य प्रकृतित्वावगमेन मृज्ज्ञानेन घटादिज्ञानवद्भवेत् ॥

९. नवमाभिप्रायं चाहुः **वाच्यैक्यमपि सम्मतमिति** वाच्ययोः तत्त्वंपदार्थयोः तत्तदुपाधिविनिर्मोकमन्तरेणैवैक्यमप्येकव्यक्त्यात्मकत्वमपि सम्मतमिति भातीति संबन्धः ॥ अयमप्यभिप्रायः 'प्राज्ञादिमस्य मां प्रकृतिमब्रवीदिति तदाचार्यवाक्यतन्मूलश्रुत्यादिभिर्भवितुमर्हति । जगत्कारणत्वेन निर्दिष्टस्य प्राज्ञस्यैव तदुपाध्यज्ञानापरित्यागेन विज्ञानमयत्वावगमात्॥

१०. इदानीं दशमाभिप्रायं विवृण्वन्ति **लक्ष्यैक्यं भाति चेति** लक्ष्यस्य तत्त्वंपदलक्ष्यार्थस्यैक्यमेकत्वञ्च भातीति सम्बन्धः॥ अयमभिप्रायश्च 'मयैक्यं स्वस्य चाब्रवीदिति' तदाचार्यवाक्येन तन्मूलभूतेन 'प्रज्ञानं ब्रह्म' 'अयमात्मा ब्रह्म' इत्यादिमहावाक्येन च निष्प्रकारचिन्मात्रावगाहना भवितुमर्हति ।

एवं चन्द्रिकाचार्यस्य स्वानुभवपरश्लोकैकश्रवणमात्रेण तत्प्रसादादिबलेन च स्वस्य चित्ते सामान्यतः परिस्फुरद्दशविधाभिप्रायांस्तस्मै निवेद्य विशेषतस्तदर्थबुभुत्सवो माधवतीर्थप्रभृतयः तं स्वेषामाचार्यत्वेन भावयन्तः प्रार्थयन्ते **एतेषु विशेषाञ्छाधि नो गुरविति** एतेषु दशविधतात्पर्यविषयेषु विशेषान् ज्ञातव्यधर्मविशेषान् हे गुरो भवदन्तेवासिनामस्माकं शाध्युपदिशेत्यर्थः शेषः सुगमः।

अनेनास्य व्याचिख्यासितस्य शास्त्रस्य वक्ष्यमाणविशेषोपेतोदीरितदशविधाभिप्रेतार्थवत्त्वेन विषयसम्बन्धयोस्सिद्धिः ॥ तत्तद्विशेषार्थावरणानिवृत्तिद्वारा नित्यनिरतिशयानन्दरूपेण स्वात्मनोऽवशेषावगतिः फलं माधवतीर्थादीनां तत्सदृशानां च सर्वकर्मसन्न्यासादि तत्त्वजिज्ञासकत्वेनाधिकारित्वं सिद्धम् ॥ ७ ॥

अ०. एवं शिष्यैः प्रार्थितस्सचन्द्रिकाचार्यस्तेभ्यः प्रतिवक्तुकामस्स्वाचार्यचरणरेणुं प्रार्थयते ये रामब्रह्मसंज्ञा इति ॥

मू. ये रामब्रह्मसंज्ञा निरतिशयनिजानन्दभूमैकनिष्ठा
दावाग्नौ भृङ्गवन्मां जननमरणवत्तप्तगर्त्ते पतन्तम् ।
देहादेर्दृष्टितोक्तेस्स्वसुखतमतटं प्रापयामासुरादौ
तेषां पूज्याभिपूज्यं चरणनलिनजं यद्रजो ज्ञापयेत्तान्॥८॥॥

व्या. ये रामब्रह्मसंज्ञा इति पूजायां बहुवचनं तान्विशिनष्टि **निरतिशये-त्यादिना** निरतिशयो मानुषानन्दादेकादशानन्देभ्य उत्कृष्टो यो निजानन्दो नित्यानन्दः तद्रूपो भूमा प्रत्यगात्मा'यो वै भूमा तत्सुखं'इति श्रुतेः तस्मिन् एका मुख्या निष्ठा अनवरतचिन्ता येषां ते निरतिशयनिजानन्दभूमैकनिष्ठा इति स्वाचार्यमहिमानमुक्त्वा दृष्टान्तेन स्वकीयप्रागवस्थां दर्शयति **दावाग्नौ भृङ्गवदित्यादिना** अरण्यामौ महाफलभ्रान्त्या प्रविष्टभ्रमरेण तुल्यं कस्य तद्भ्रमरसाम्यमित्यत आह **मां जननम-रणवत्तप्तगर्त्ते पतन्तमिति** जननमरणवच्च तदाध्यात्मिकादि तापत्रयतप्तं च जननमरणवत्तप्तं शरीरं तदेव गर्तो निर्जलकूपः तस्मिन् पतन्तं प्रविशन्तं **मनुष्योऽहं** शत्रुचोरसर्पजराव्याधीश्वरादिना पीडितोऽस्मीति खिद्यन्तं मामिति **स्वकीयप्राग-वस्थां दर्शयित्वाऽधुना** स्वविषये तदाचार्याणां प्रसादकृत्त्वमाह **देहादेर्दृष्टितोक्ते-स्स्वसुखतमतटं प्रापयामासुरादाविति** स्वाप्निकतप्यतापकशरीरादेस्स्वप्न-प्रत्ययव्यतिरेकेणासत्त्ववदिहापि तप्यतापकरूपदेहादेरहं मनुष्योऽयं शत्रुरयं चोरोऽयं सर्पोऽयं व्याधिरियं जराऽयमीश्वर इति दृष्टिव्यतिरेकेणासत्वे सिद्धे किं वृथा परितप्यस इत्यादेशानन्तरं, श्लो. 'ब्रह्मविज्ञानमानन्दमिति वाजसनेयिन :। पठन्त्यतस्स्व-प्रकाशं सुखं ब्रह्मैव नेतरतः सुप्तौ ब्रह्मैव । नो जीवस्संसारित्वासमीक्षणात्॥'इत्यादिशास्त्रेण च तदनुसारिभ्यां सुखमहमस्वाप्समिति परामर्शतदनुभवाभ्यां च यत्स्वरूपत्वेनावगतं यस्यैव च विभागः'आनन्दस्त्रिविधो ब्रह्मानन्दो विद्यासुखं तथा विषयानन्द इति योगानन्दाख्यशास्त्रे दृश्यते तत्र विषयानन्दाद्विद्यानन्दस्सुखतरः तस्माद्ब्रह्मानन्दस्सुखतमः सएव तटं प्रागुक्तस्य तप्तगर्त्तस्यातिशीतच्छायस्तीरप्रदेशः तदधिगमेऽस्याध्यासिकसर्वसन्तापनिवृत्तिदर्शनात् 'एषाऽस्य परमा गतिरेषास्य परमा सम्पदेषोऽस्य परमो लोक एषोऽस्य परम आनन्द एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति श्रुतेः तत्प्रापयामासुर्मम स्वरूपत्वेन ग्राहयामासुः आदावितिबहूनां स्वाचार्याणां मध्ये प्रकृते स्तूयमानस्याचार्यस्य प्राथम्यं दर्शयित्वाऽधुना तदाचार्यचरणरेणुं विशिनष्टि **पूज्याभिपूज्यमिति** लोकपूज्यैर्ब्रह्मविदादिभिरभिमुख्येन पूजनीयं **चरणनलिनजं यद्रजः** तत् **तान्** दशविधतात्पर्यविषयगताव-

शेषान् **ज्ञापयेत्** तद्विशेषविषयकविज्ञानं जनयत्वित्यर्थः ॥ ८॥ ॥

अ. पुनरपि शिष्यैर्बुभुत्सितार्थान् तत्तदाचार्यप्रसादैकलभ्यं तत्तत्प्रदर्शित जीवेश्वरमायातत्कार्यादिविषयकनानाविधसिद्धान्तपरिज्ञानमन्तरेण वक्तुमशक्यत्वात्तदर्थं पूर्वाचार्यान्नमस्करोति देवानामिति.—

मू. देवानां तृप्तये श्रीविधुदिनकरयोर्योगवद्यत्प्रसादा-
त्सिद्धान्तानां प्रबोधैर्मम हृदि विशदो योग उत्पत्स्यते यः ।
साधूनां तृप्तये तत्प्रकटनकुशलं चन्द्रिकाख्यं चिकीर्षु-
स्तेषां श्रीसद्गुरूणां चरणसरसिजं सर्वभावैर्नमामि ॥ ९॥ ॥

व्या. यथा चन्द्रसूर्ययो रमृताश्रययोस्संयोगोऽमृतोपजीविनां वसुरुद्रादीनां देवानां तृप्तये भवति ॥ तथा हि छान्दोग्ये तृतीयाध्याये 'असौ वा आदित्यो देवमधु' इत्युपक्रम्य प्रथमादिखण्डेषु 'यदेतदादित्यस्य रोहितं रूपं शुक्लं रूपं, कृष्णं रूपं परं कृष्णं रूपं' इत्युक्तानाममृतानां मध्ये 'तद्यत्प्रथममसृतं तद्वसव उपजीवन्ती'त्यादि षष्ठादिखण्डैर्देवभोज्यामृताश्रयत्वमादित्यस्यावगम्यते, चन्द्रस्यामृताश्रयत्वं तु सुप्रसिद्धमेवेति दृष्टान्तमुक्त्वा दार्ष्टान्तिकमाह **यत्प्रसादादित्यादिना** येषां पूर्वाचार्याणां प्रसादाज्जायमानैः **सिद्धान्तानां प्रबोधैः** जीवो नाम क इति प्रश्ने पक्षभेदेन अविद्यावद्ब्रह्मेति च, उपाध्यवच्छिन्नं ब्रह्मेति च ब्रह्मांश इति च ब्रह्मप्रतिबिम्ब इति च, एवमीश्वरादितत्वेष्वपि एकैकस्मिन् तत्वे पक्षभेदेन नानाविधासिद्धान्ताः प्रदर्शिताः तेषां चन्द्रसूर्यवत्प्रमेयार्थप्रकाशकानां ज्ञानैः **विशदः** निर्विचिकित्सः **यो योगः** एकेन सिद्धान्तेनाकांक्षितार्थस्य सिद्धान्तान्तरोक्तार्थेन संबन्ध एकीकरणमस्मिन् चन्द्रिकाख्यशास्त्रे दशसु निरूपणेषु तत्र तत्र वक्ष्यमाणो मम हृदि उत्पत्स्यते भविष्यति, तद्योगस्य प्रकटीकरणचतुरं चन्द्रिकाख्यशास्त्रं शिष्याणां प्रीतये कर्तुमिच्छन् **तेषां** एकैकस्मिन्नपि तत्वे पक्षभेदप्रदर्शकानां **श्रीसद्गुरूणां चरणसरसिजं सर्वभावैः** त्रिविधकरणैर्नमामि, तथा हि श्रूयते "यं यं लोकं मनसा संविभाति विशुद्धसत्वः कामयते यांश्च कामान् । तं तं लोकं जयते तांश्च कामां-स्तस्मादात्मज्ञं ह्यर्चयेद्भूतिकामः" इति ॥ ९ ॥

अ०. अधुना स्वशास्त्रवैयर्थ्यमनूद्य सविनयं परिहरति वेदादाविति.

मू. वेदादौ सति बन्धभञ्जनविधौ मुक्त्वापि तत्के वचो
गृह्णीयुस्तव नूतनं च विरसं यत्नो वृथा स्यात्ततः ।

मू. मैवं जह्नुतनूद्भतां सुरनदीं लोकस्य चोद्धारिकां
स्वीकुर्वन्ति यथा जलं गवि भवं प्राज्ञास्तथा मे वचः॥१०॥

व्या. पूर्वपक्षी तावत् वेदादाविल्यादिना बन्धनिवृत्तिकरत्वेन प्राचीनं शास्त्रं प्रशंसन् चिकीर्षितं शास्त्रं दूषयति **के वचं इत्यादिना** के तव नूतनं विरसं च वचो गृह्णीयुरिति प्रदूष्य तत्फलमाह॥ **यत्नो वृथा स्यात्तत इति** ततः अप्राह्यत्वादित्यर्थः॥ एवं प्राप्ते विरसमपि स्ववाक्यं वेदतद्भाष्यादिवत् मुमुक्ष्वादिभिर्ग्राह्यमेव भवेदिति दृष्टान्तेन समाधत्ते–**मैवमित्यादिना** यथा स्नानपानार्थं सरसां गङ्गां पञ्चगव्यार्थं विरसमपि गव्योदकञ्च स्वीकुर्वन्ति, तथा सरसं वेदादिशास्त्रं विरसमपि चिकीर्षितम् मद्वचनञ्च सम्यग्ज्ञानार्थं स्वीकुर्युरित्यर्थः।

अत्र तावत् यथा च गङ्गा तथा वेदोऽपि परमेश्वरादेव प्रादुरभूत्।

यथा च जह्नुमहर्षिस्तां गङ्गां स्वरूपतो गृह्णन् लोकोपकारार्थं श्रोत्रेन्द्रियद्वारा यथारसं जाह्नवीति नाम्ना सह बहिः प्रचारयामास तद्वत् श्रीमद्भगवत्पादोऽपि तं वेदमर्थतो विशेषेण गृह्णन्नद्वैतभाष्यमिति नाम्ना सह वागिन्द्रियद्वारा मुमुक्षूणां परमोपकारार्थं सर्वत्र प्रकटीचकार।

यथा च महद्भिर्भयभक्तिसदाचारादिसाधनपूर्वकं सेव्यमानामपि गङ्गां तत्साधनविहीना गौः स्वदाहोपशमनार्थं संपिबति तद्वदहमपि तद्ग्राह्यं वैदुष्यादिसाधनोपेतप्राचीनाचार्यवत् तत्साधनविकलस्सन् संसारतापोपशमनार्थमग्रहीषम्।

यथा वा गौः स्वपीतां गङ्गां विरसत्वेन परिणममानामन्तरेवाधार्यत्वादर्वागिन्द्रियेण गव्यमिति नाम्ना सह विमोचयति तद्वत् मद्गृहीतं सरसं वेदतद्भाष्यादिकं शिष्यान्प्रत्युपदेष्टव्यत्वा दल्पवागुत्पन्नत्वाच्च विरसत्वेन जायमानमिदं शास्त्रमद्वैतसिद्धान्तगुरुचन्द्रिकेति नाम्ना सह यथाशक्ति प्रचारयिष्यामि कथं तर्हि विरसं तद्वचोग्राह्यं भवेदिति चेत्

यथा च परिशुद्धयर्थं पञ्चगव्यप्राशनसमये विरसमपि गव्योदकं स्वीकुर्वन्ति तथा मोक्षार्थं स्वस्वरूपविचारसमयेऽल्पवागुत्पन्नत्वेन विरसं मद्वचश्च स्वीकुर्युरिति पञ्चविधधर्मसाम्येन पूर्णोपमा संप्रदर्श्यते॥ १०॥

अ०. ननु भवद्भिश्चिकीर्षितस्य शास्त्रस्य यत्किञ्चित्तत्त्वावभासकत्वेनादेयत्वेपि तद्ज्ञानस्य सर्वार्थप्रकाशकप्राचीनशास्त्रजन्यज्ञानान्तर्गतत्वेन न पृथगारंभणीयमित्याशङ्क्य प्राचीनशास्त्रापेक्षया तस्य अद्वयात्मादिभेदाभिनिवेशिभ्यो भ्रान्तेभ्यः परमोपकारकत्वात्पृथगारभ्यत इत्याह अविदितेति।

मू. अविदितनिजशक्तिस्वात्मरूपेऽवगम्ये
गदसहितदृशो ये तद्धितं चिन्तयद्भिः ।
विबुधपरमहंसैश्चन्द्रिकाचार्यसंज्ञै-
र्गुरुकृतकृतिसौराद्व्यज्यते चन्द्रिकाऽन्या ॥ ११॥ ॥

व्या. **अविदितनिजशक्तिस्वात्मरूपे** अविदिता निजशक्तिः स्वकीय-जगत्सर्जनादिसामर्थ्यं येन सः अविदितनिजशक्तिः सचासौ स्वात्मा चाविदितनिज-शक्तिस्वात्मा तस्य रूपं स्वरूपं तस्मिन् अविदितनिजशक्तिस्वात्मरूपे 'तरति शोक-मात्मवित्' 'आत्मा वा अरे द्रष्टव्य' इत्यादि शास्त्रात् शोकतरणार्थं **अवगम्ये** सति 'आत्मैवेदं सर्वं' 'अहमेवेदं सर्वं' 'मय्येव सकलं जातं मयि सर्वं प्रतिष्ठि-तम् । मयि सर्वं लयं याति तत् ब्रह्माद्वयमस्म्यहं' मित्यादिश्रुत्युक्तप्रकारेण जगदु-पादानत्वेन ज्ञातव्ये सति **गदसहितदृशो ये** श्रोत्रादि तमोन्तमेवाध्यात्मम् ततोऽन्यत् शब्दादिविकारान्तमधिभूतं—ततश्चान्यत् दिगभिमानिदेवतादीश्वरान्त-मधिदैवतमिति भेदाभिनिवेश एव दुःखहेतुत्वात् गदःतत्सहिता दृक् मनोऽस्य दैवं चक्षु' रिति श्रुत्युक्तं मनो येषां ते गदसहितदृशः **तद्धितं** तेषां हितं यत् अध्या-त्मादिभेदाभिनिवेशनिरसनं—तथा चोक्तं वार्तिके ॥ श्लो ॥ 'आधिदैवतमद्वया-त्ममधिभूतमिति त्रिधा । एकं ब्रह्मविभागेन भ्रमाद्भाति न तत्वतः। विश्वं वैराजरू-पेण पश्येद्भेदनिवृत्तये । हिरण्यगर्भरूपेण तैजसं चिन्तयेद्बुधः । जगत्कारणरूपेण प्राज्ञात्मानं विचिन्तयेत् । विश्वादिकत्रयं यस्माद्वैराजादित्रयात्मकम् । एकत्वेनैव संपश्येदन्याभावप्रसिद्धये'। इति यथा हि सर्वात्मकं ब्रह्मेत्यत्र ब्रह्मणः सार्वात्म्यमुक्तं तथास्मिन्वार्त्तिके विश्वादित्रयस्य वैराजाद्यात्मकत्वमुक्तं नान्यथा—तत्तद्धितं तत् **चिन्तयद्भिः विबुधपरमहंसैश्चन्द्रिकाचार्यसंज्ञैर्गुरुकृतकृतिसौरात्** प्रा-चीनाचार्यकृता या कृतिः सैव सौरः प्रचण्डमार्त्तण्डप्रकाशः अध्यात्मादिभेदग्रहे त्वभिनिवेशरहितानां विशेषतः सर्वार्थप्रकाशकत्वात् तस्मात्प्रकृष्टसूर्यप्रकाशादन्या **चन्द्रिका** प्रागुक्तरुग्णचक्षुषां प्रमेयगतविशेषवीक्षणानुकूलशीतप्रकाशात्मकराकाच-न्द्रिकासमाना तु कृती रच्यते—एवमेव 'चन्द्रमा मनो भूत्वा हृदयं प्राविशत्' 'मनोऽध्यात्ममिति प्रोक्तं मन्तव्यं तत्र यद्भवेत् । आधिभूतं तादित्युक्तं चन्द्रस्त-त्राधिदैवतम्' इत्यादिश्रुतिस्मृतिभ्यां चन्द्रिकाया मनोनुग्राहकत्वं दर्शितम्॥११॥ ॥

अ. यत्पुनरुक्तमध्यात्माधिभूताधिदैवानां भेदाभिनिवेशविषये चिकीर्षि-तस्य चन्द्रिकाख्यशास्त्रस्य परमोपकारकत्वं तदुपपादयति आद्यादेरिति ॥

भाष्यादेः परिचिन्तनादपि मुहुर्यस्य त्वहं कारणं
सर्वस्येति दृढा मतश्च न भवेत्सत्तैक्यधीश्चानयोः।
तेनान्येन च चन्द्रिका सकृदियं भक्त्या स्वधीता यदि
स्वस्मिन्कारणतामतिर्दृढतमा सत्तैक्यधीस्स्यादतः॥ १२॥ ॥

व्या ॥ **अनयोरिति** अहङ्कारणं सर्वस्येति वाक्यतात्पर्यभूतयोः स्वात्मजगतोरित्यर्थः **अत इति** सकृदद्वयनत इत्यर्थः। एवं सकृद्गृहीतस्यास्य शास्त्रस्य स्वमात्मानमधिकृत्य वर्त्तत इति सर्वं जगदद्वयात्मभेवेति अद्वयात्मातिरेकेणाधिभूतमाधिदैवमिति तत्वप्रतिषेधकत्वेन कार्यकारणयोरनन्यत्वन्यायेन च स्वात्मनस्तद्विवर्तेन जगताऽद्वितीयत्वबोधकत्वेन च ततस्सजातीयादिपरिच्छेदाभावावगमेन च परमोपकारकत्वं सिद्धमेव एवञ्च सति "मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितं। मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहं" मित्यादिश्रुत्युक्तप्रकारेण स्वात्मतत्वमननशीलानां विज्ञेयपरमिदं सर्वं अद्वयात्मशास्त्रामिति प्रसिद्धिरपि सङ्गच्छत इत्यर्थः ॥

अ. इदानीं चन्द्रिकाचार्यः शिष्यपरिपृष्टान्प्रथमाभिप्रायाविषयगतान्विशेषान् विभज्य तेभ्यो दर्शयति—**अङ्केत्यादिना**—

मू. ॥ अङ्क माधवतीर्थाद्या वादिष्यामि द्वितीयके।
आरोपितविशेषांस्तदधिष्ठानगतान्ब्रुवे ॥ १३॥ ॥
योऽवस्थाभिरनष्टत्वादसङ्गश्च विभुर्भवेत् ॥ १४ ॥
सर्वसाक्षित्वतो नित्यः प्रलयेऽप्यवशेषणात्।
अद्रव्यं निर्गुणत्वेन प्रपञ्चस्तत्र कल्पितः ॥ १५ ॥

व्या. शिष्यान्सम्बोधयति **अङ्केति** द्वितीयके द्वितीयनिरूपण इत्यर्थः **तदधिष्ठानगतान्** तेषामारोपितजगत्तद्विशेषाणामधिष्ठानभूतास्मत्पदार्थगताविशेषान् कर्तृत्वादिविपरीतधर्माध्यासनिवृत्यर्थं व्यवह्रियमाणान्ब्रुवे प्रथमनिरूपण इति शेषः तानेव विशेषान्दर्शयति **य इत्यादिना**। जगदधिष्ठानस्य स्वात्मनोऽसङ्गत्वे हेतुमाह **अवस्थाभिरनष्टत्वादिति**। जाग्रदाद्यवस्थाभिः सह तदवस्थाऽध्यासवतोऽस्मत्पदार्थस्य प्रागस्वाप्सं स्वप्ने गजमहमद्राक्षमिति परामर्शेनावस्थात्रयविनाशेऽप्यनुवर्त्तमानत्वेनावगतस्यात्मनो विनाशाभावात्। परिच्छिन्नत्वभ्रमं व्यावर्त्तयति **विभुरिति**। तत्र हेतुमाह **सर्वसाक्षित्वत इति**। सर्वसाक्षित्वस्य च प्राग्वर्णितदशा-

भिप्रायवद्भिः शिष्यैः सामान्यतोऽवगतत्वाद्धेतुसिद्धिः । नित्यत्वे हेतुमाह **प्रलयेऽप्यवशेषणादिति**। अस्य च 'आकाशवत्सर्वगतश्च नित्य'इति शास्त्रतः सिद्धिः। अद्रव्यत्वे हेतुमाह **निर्गुणत्वेनेति** । साक्षी चेता केवलो निर्गुणश्चेति श्रुतेः । एवं जगदधिष्ठानस्य स्वात्मनोऽवस्थात्रयवत्वासङ्गत्वविभुत्वसर्वसाक्षित्वनित्यत्वजगल्लयाऽधिष्ठानत्वाद्रव्यत्वनिर्गुणत्वादिकमुपदिश्य विवर्तोपादानत्वमाह **प्रपञ्चस्तत्र कल्पित इति** ॥ १५ ॥

अ. इदानीं (श्रु) गगने नीलिमा सत्ये जगत्सत्यं भविष्यतीति श्रूयते अस्या अयमर्थः । यः गगने नीलिमा प्रतिभासते साक्षिणा वा परिदृश्यते तस्मिन्सत्ये सति जगदपि सत्यं भविष्यतीति । अत्रोक्तदृष्टान्तेन दार्ष्टान्तिके निरसनीयं चतुर्थनिरूपणे वक्ष्यमाणप्रकारकं च जगति तत्कारणकर्मकृतपारमार्थिकत्वतात्विकत्वसत्यत्वव्यावहारिकत्वसंज्ञकमज्ञातसत्ताकत्वमपोह्य निरावृते गगने नैल्यभानानुवादेन स्वात्मजगतोरेकसत्ताकत्वस्यान्यया श्रुत्याभिप्रेतत्वेऽपि सोपानक्रमेण तत्र प्रातिभासिकत्वस्वात्मसत्तामात्रकत्वयोः क्रमात् दर्शनीयत्वेन आदौ यत् प्रपञ्चस्य प्रातिभासिकसत्ताकत्वेन स्वात्मन्यद्वयस्तत्वं प्रतिज्ञातं तस्य श्रौतत्वादिकं प्रदर्शयन् तत्प्रतिपक्षभूतानि मतानि निराकरोति **सर्वमिति**—

मू.॥ सर्वं खेऽसितवन्मृषेति निगमात्खे भूगुणस्य भ्रमो
नोर्द्ध्वव्योम्न्यसितेक्षितुर्भुवि दृशोऽपाताच्च बौद्धस्य च ।
नाबाधादसतो दृशाऽननुभवाद्ध्वान्तस्थनैल्यस्य ना-
लोकेनैव विनाशतश्च तमसश्श्रौतं प्रशस्तं ततः॥ १६ ॥

व्या ॥ प्रथमतः सिद्धान्तमाह **सर्वं खेऽसितवन्मृषेति** सर्वं जगन्मृषा स्वात्मन्यद्वयस्तं भवितुमर्हति स्वदृश्यत्वात् नभस्यसितगुणवदित्यनुमानोपमानोपेतात् निगमात् 'गगने नीलिमा सत्ये जगत्सत्यं भविष्यति' यत्र त्वस्य सर्वषामात्मैवाभूत्तत्केन कं पश्येत् ॥ श्रो ॥ एवं सर्वं सदा साक्षिस्वरूपे परमात्मनि । सर्वान्तरतमे प्रोता ओता अद्वयस्तरूपतः। सर्वाधिष्ठानभूतस्तु प्रत्यगात्मा स्वयंप्रभः। इत्याद्यागमप्रमाणात् बाधितत्वेन खे सत्यस्य भूगुणस्य च बौद्धस्यासितगुणस्य च असतोऽसितगुणस्य च ध्वान्तस्थनैल्यगुणस्य च भ्रमो न भवतीत्युक्त्वा आदौ आकाशस्य भूगतासितगुणस्य च विवेकग्रहणाभावात् खमसितमिति भ्रमो भवतीति वैशेषिकमतेऽनुपपत्तिं दर्शयति **ऊर्द्ध्वव्योम्न्यसितेक्षितुर्भुवि दृशोऽपाताच्चेति** खमसितमिति

नक्षत्रमण्डलादप्यूर्द्ध्वदेशगताकाशे नैल्यं पश्यतः तदानीमधोदेशगतभुवि दृष्टिसंयोगाभावात् नान्यथा ख्यातिवादसिद्धिरित्युक्ता

बुद्धिगतासितगुणस्याकाशस्य च विवेकाग्रहणात् खमसितमिति भ्रमो भवतीति विज्ञानवादिमतेऽप्यनुपपत्तिं दर्शयति **अबाधादिति** खमसितमिति प्रथमतः प्रतीयमाने पश्चान्न खमसितं किन्तु आन्तरमेव विज्ञानमसितमिति बाधज्ञानाभावात् नाप्यात्मख्यातिवादसिद्धिरिति निराकृत्य

अधुनाऽसद्रूपासितगुणस्य सद्रूपाकाशस्य च विवेकाभावात् खमासितामिति भ्रमोन भवतीति शून्यवादिमतेऽप्यनुपपत्तिं दर्शयति **दृशाऽननुभवादिति** निष्प्रकारस्यासतः चक्षुषाऽनुभवाभावात् नासत्ख्यातिवादसिद्धिः ।

ननु शून्यस्यापि ससाक्षित्वादिति सिद्धान्तोक्तरीत्या तन्मतेऽपि साक्षिभास्यत्वमसतः किन्न स्यादिति चेत् तैर्द्वैतवादैकदेशिभिरात्मनिदर्शनादिक्रियाकर्तृत्वमात्राङ्गीकारात् तन्मते न साक्षिणा तदनुभवः ।

अधुना तिमिरगुणस्यासितस्य आकाशस्य च विवेकग्रहणाभावात् खमसितमिति भ्रमो भवेदिति यन्मीमांसकमतं तत् ॥ श्लो ॥ अज्ञानवत्तमो वेद्यं छायासिन्नमनीलकम् । पक्षान्यकार्यभिन्नत्वे विषयावारकत्वत इत्यादिना तमःपदार्थस्य नीरूपत्वाद्युपपादनेन निराकरिष्यन्निह तमसो रूपवत्वाङ्गीकारे तदा परोक्ष्यायाऽऽलोकव्याप्तेरावश्यकत्वात् न तन्मतसिद्धिरिति तत्रानुपपत्तिं दर्शयति **आलोकेनैव विनाशतश्च तमस इति** नभसि नैल्यभ्रमात्पूर्वमेव चक्षुषो रूपग्रहणानुग्राहकेणालोकेन नक्षत्रमण्डलादूर्द्ध्वदेशगतस्य नीलद्रव्यस्य तमसो विनाशसंभवे नभसि नैल्यभ्रमासंभवात् नाख्यातिवादसिद्धिः अत्र तावात् वाचस्पत्योक्तप्रकारेण मीमांसकमतमुपन्यस्य अधुना प्रागुक्तसिद्धान्तमुपसंहरति **श्रौतं प्रशस्तं तत इति** ततः प्रागुक्तरीत्या परमतानामनुपपन्नत्वात् गगने नीलिमा सत्ये जगत्सत्यं भविष्यतीत्यादिश्रुत्युक्तं दृष्टान्तदार्ष्टान्तिकयोराद्ध्यासिकत्वमेव प्रेक्षावदुपादेयमित्यर्थः ।

अत्र गगने नीलिमा सत्ये जगत्सत्यं भविष्यति मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यतीत्यादिश्रुत्या गगने यो नीलिमा दृश्यते इह स्वात्मनि पुरुषो नानेव पश्यतीति द्वैतदर्शनानुवादेन नैल्यजगतोः स्वरूपाद्ध्यासानुभवो दर्शितः ॥ १६ ॥

अ. ॥ अधुना वाचस्पत्योक्तं मीमांसकमतमाह **देहात्मनोरिति**—

मू.॥ देहात्मनोर्जपामण्योरनुभूत्यपृथग् ग्रहात् ।
क्वचिद्भजतशुक्त्याद्योस्स्मृतेरनुभवस्य च ॥ १७ ॥

अविवेकाद्भ्रमोऽख्यातिरिति श्रीभामतीरिता ।
सापि नैवोपपन्ना स्यादात्मैवेदमिति श्रुतेः ॥ १८ ॥
पृथक् सत्ताविहीनत्वे भेदाभावादनात्मनः ।

व्या. ॥ अद्वयासकालेऽधिष्ठानारोप्ययोरुभयोस्सन्निधाने तत्तद्विषयकज्ञानयोर्विवेकाभावात् अद्वयासो भवति यत्र त्वधिष्ठानमात्रस्य सन्निधिर्नारोप्यस्य तत्र तद्विषयकानुभवस्मरणयोर्विवेकाभावाद्विशिष्टभ्रमो भवतीति अख्यातिवादिमतं भामत्याख्यवाचस्पत्योक्तमित्यत्रानुपपत्तिमाह **सापीत्यादिना** ॥ १८ ॥

अ.॥ इदानीं यत् पूर्वमीमांसायां षष्ठाद्ध्याये तृतीयपादे 'यदि सोमं न विन्देत्पूतिकानभिषुणुयादि'ति श्रुतिमूलकेन 'वचनाच्च न्याय्यमभावे' इति सूत्रेण 'तदीयाऽनया कर्मचोदनया विहितद्रव्याऽलाभे यत्किञ्चिद्द्रव्यप्राप्तौ युक्तयन्तरेण सदृशस्य वचनेन च पूतीकस्य नियम'इति भाट्टदीपिकया च'सोमेन यजेते'ति शास्त्रेण विहितस्य सोमद्रव्यस्य कतिपयावयवैर्बहुभिः पूतीकावयवैश्च सोमसदृशपूतीकद्रव्यस्यारब्धत्वमङ्गीकृत्य प्रतिनिधिनियमविधिरिति यथा प्रदर्शितं तथैव रजतावयवैरेवापणस्थरजतमारब्धं यत्किञ्चिद्रजतावयवैश्च बहुभिश्शुक्त्यवयवैश्च शुक्तिरारब्धेति मीमांसकमतं तदिदानीं निराकरोति शुक्तेरिति—

मू. ॥ शुक्तेस्तद्गतरौप्यस्याविवेकान्न भ्रमो भवेत् ॥ १९ ॥
शुक्तौ रजतसत्यत्वे न बाद्धयेतेति वाक्यतः ।
रामानन्दैर्दूषितत्वान्मतस्याख्यातिवादिनाम् ॥ २० ॥

व्या. ॥ मीमांसकमते शुक्तौ रजतसत्यत्वानुवादेन वाचस्पत्योक्ताद्वैलक्षण्यं रामानन्दैर्दर्शितमित्यास्थेयम् ॥ २० ॥

अ०. ॥ सदृशयोः समानावयवारब्धत्वे दोषमाह **बिम्बेनेति**—

मू. ॥ बिम्बेन चाद्यचन्द्रेण सादृश्यस्यावलोकनात् ।
प्रतिबिम्बे च नेत्रस्थदोषात्वे दृश्यचन्द्रके ॥ २१ ॥
बिम्बस्य चाद्यचन्द्रस्यावयवारब्धतास्ति चेत् ।
बिम्बस्यापगमे नेत्रदोषाद्येन्द्वोर्निवर्त्तने ॥ २२ ॥

प्रतिबिम्बो द्वितीयेन्दुरपि जीवेच्च पूर्ववत् ।
सोमवल्याश्च रौप्यस्य नाशे पूतीकशुक्तिवत् ॥ २३ ॥
व्योम्ना च पद्मपत्रेण समत्वाद्ब्रह्मणः किल ।
विभुत्वादिष्वन्यजन्यं परं ब्रह्म भवेत्किमु ॥ २४ ॥

व्या. ॥ बिम्बेनेत्यादिना पूर्वपक्षमनूद्य बिम्बस्येत्यादिना प्रदूष्य च तत्र दृष्टान्तमाह **सोमवल्याश्चेति** स्वावयवैरेवारब्धस्य सोमद्रव्यस्य रजतस्य च नाशे सति सोमावयवसजातीयैः स्वावयवैश्चारब्धः पूतीक इव रजतावयवसजातीयैः स्वावयवैश्चारब्धा शुक्तिरिव च प्रतिबिम्बादिकमपि जीवेत् **विभुत्वादिष्विति** विभुत्वादिधर्मविषयेष्विति यावत् । शेषः सुगमः ॥ २४ ॥

अ०. ॥ प्रतिनिधिद्रव्यस्य विहितद्रव्यसादृश्यप्रयुक्ततदवयवसमानजातीयारब्धत्वाङ्गीकारे बाधमाह **हरीति**—

मू॥ हर्यक्ष्यादेश्च पद्मादिवर्णाकारादिसाम्यतः ।
पद्मप्रतिनिधित्वेन पूजायां नयनार्पणात् ।
पद्मावयवजन्यत्वे हरेर्भौतिकता पतेत् ॥ २५॥ ॥

व्या. ॥ **हर्यक्ष्यादेरिति** आदिपदेन मुखपाण्याद्यवयवो गृह्यते द्वितीयेनादिपदेन गात्रोष्ठरदनाद्यवयवसदृशवस्तूनि गृह्यन्ते तृतीयेनादिपदेन सादृश्यप्रयोजकधर्मान्तराणि गृह्यन्ते हरिनेत्रस्य पद्मप्रतिनिधित्वविधायकवाक्याभावेऽपि सर्वविधिश्रुतिकारणभूतेन श्रीहरिणैव शिवपूजायां पद्मप्रतिनिधित्वेनादानात् पद्मावयवजन्यत्वस्य परैरभ्युपगन्तव्यत्वेन भौतिकत्वं बलादापतेत् । तथा चोक्तं शिवपुराणादिषु भगवता व्यासादिना ॥ श्लो ॥ नेत्राम्भोजसमर्चनेन हरये तुष्टो रथाङ्गं ददावार्तत्राणपरायणस्स भगवान् गङ्गाधरो मे गतिरिति ॥ २५॥ ॥

अ० ॥ ननु ' यदि सोमं न विन्देत्पूतीकानाभिषुणुया दिति श्रुतेः का गतिरित्याशङ्क्य यथा 'व्रीहीन वहन्तीति विध्यभावेऽपि पुरोडाशप्रकृतिद्रव्याणां व्रीहीणां तण्डुलनिष्पत्याक्षेपादेवावहननखविदळनाश्मकुट्टनानां मध्येऽन्यतमप्राप्तौ कदाचिदवहननक्रियायाः साधनत्वेनागृहीतांशसंभवे सति तदंशपरिपूरणफलको नियमविधिरिति स्वीक्रियते तथात्रापि स्यादित्याह वैतुष्येति—

वैतुष्यापेक्षितस्याश्मकुट्टनादेर्निवृत्तये ॥ २६ ॥
यथावघाते नियमः पूतीकेऽपि तथा भवेत् ।
तदन्यापोहनार्थं वा पूतीकैर्यागपूर्त्तये ॥ २७ ॥

व्या. ॥ तदन्यापोहनार्थमित्यन्तेनैकं पक्षमुक्त्वा पक्षान्तरमाह वा पूतीकैरिति एतदवतरणोक्तप्रकारेण अवहननस्येव 'यदि सोमं न विन्देत् पूतीकानभिषुणुयादि'ति विध्यभावेऽपि यत्किञ्चिद्वस्तुन इव च पूतीकद्रव्यस्यापि पक्षप्राप्तौ कदाचित्तदप्राप्तांशपरिपूरणफलक इति च नियमविध्यङ्गीकारे सोमसदृशपूतीकस्य सोमसादृश्यप्रयुक्ततदवयवसजातीयारब्धत्वाभावेनेव रजतादिसदृशस्य शुक्त्यादेरपि रजतावयवसजातीयारब्धत्वाभावेन भ्रान्तिकाले शुक्त्यादौ प्रतीयमानस्य रजतादेर्मिथ्यात्वसंभवाद्विहिततत्प्रतिनिधिद्रव्यादीनां निरवयवपरमाणुद्वयसंयोगादिद्वारारब्धत्ववादस्य उभयथाधिकरणे दूषितत्वाच्च वचनाच्चेति सूत्रगतचकारस्याचारपरत्वसंभवाच्च प्रागुदाहृतानां गगने नीलिमा सत्ये जगत्सत्यं भविष्यतीत्यादिश्रुतीनामविरोधेन प्रदर्शितं यदि सोमं न विन्देत् पूतीकानभिषुणुयादिति श्रुत्यर्थवर्णनमेव प्रशस्तमिति भावः ॥ २७ ॥

अ० ॥ परमतनिराकरणफलमाह अत इति—

अतस्स्वरूपतोऽध्यासः प्रतिबिम्बोपचन्द्रयोः ।
एष्टव्यो भवता यद्वत्खनैल्यजगतोस्त्वयि ॥ २८ ॥

व्य. ॥ अतः प्रतिबिम्बादीनां बिम्बादिसादृश्यप्रयुक्ततदवयवसजातीयारब्धत्वाङ्गीकारे ॥ श्लो. ॥ बिम्बस्यापगमे नेत्रदोषाद्येन्द्वोर्निवर्तने । प्रतिबिम्बो द्वितीयेन्दुरपि जीवेच्च पूर्ववदिति द्वाविंशश्लोकोक्तदोषसंभवात् (प्रतिबिम्बोपचन्द्रयोः) प्रतिबिम्बश्च नयनदोषादाकाशे चन्द्रसमीपे परिदृश्यमान उपचन्द्रश्च प्रतिबिम्बोपचन्द्रौ तयोरिव गगने नीलिमा सत्ये जगत्सत्यं भविष्यति य इह नानेव पश्यतीत्यादिश्रुत्या गगने यो नीलिमा दृश्यते इह स्वात्मनि नानेव पश्यतीति च नैल्यजगतोः स्वरूपाध्यासः सिद्धः ॥ २८ ॥

अ०. ॥ इदानीं मीमांसकानां चोद्यमवतार्य तदुक्तं तमःपदार्थं परिशोधयति नन्वित्यादिना—

ननु च्छायाभिधं चक्षुर्मात्रग्राह्यं तमो यतः ।
नास्त्यातिवादी युष्माभिर्जितस्स्यादिति चेद्वद ॥ २९ ॥

दीपे स्थितेऽपवरके कुड्योपान्ताद्बहिः प्रभा ।
निबिडा या ततः कुड्योपान्ते यद्दृश्यते चलम् ॥ ३० ॥
स किं प्रभाया विरळावयवः किं तमो भवेत् ।

व्या. ॥ छायाभिधं तमः यस्मादालोकरहितेन चक्षुषा ग्राह्यं भवति अतो नाख्यातिवादी युष्माभिर्जितः । 'सर्वं खेऽसितवन्मृषेति' श्लोकोक्तप्रकारेणेति शेषः ननु तमसश्छायाभिधत्वं कथमिति चेत् तमोग्रहस्य राहोश्छायाग्रहशब्दवाच्यत्वदर्शनादुपपन्नमेवेत्येवं प्राप्ते । सिद्धान्ती तदुक्तं तमो विकल्पयति (वदेत्यादिना) कुड्ये विनिर्मितापवरकनामकस्थलविशेषे दीपे सति कुड्यसमीपदेशादव्यवहितदेशे या निबिडा प्रभास्ति ततोऽन्यत् यत् कुड्यसमीपदेशे चञ्चलं दृश्यते स किं प्रभाविशेष उत तदतिरिक्तं तम इति प्रश्नार्थः ॥ ३०॥ ॥

अ०. ॥ प्रत्युत्तरमनूद्य निराकरोति तम इति—

तम एवेति चेन्मैवं विषयाणामनावृतेः ॥ ३१ ॥

व्या. ॥ तत्रत्यविषयाणां तदानीमेवानुभूयमानत्वेनावरणाभावान्न तत्तम इत्यर्थः ॥ ३१ ॥

अ०. ॥ तर्हि किं तदित्यत आह सिद्धांती **तत्त्विति**—

तत्तु प्रभाविशेषस्स्यादन्यद्रव्यैस्सह प्रभाम् ।
विना दृशोपलभ्यत्वान्महाकान्तिर्यथा तथा ॥ ३२ ॥

व्या. ॥ यत् दीपधारिणः कुड्यस्य समीपे चञ्चलं दृश्यते तस्य प्रभाविशेषत्वं प्रतिज्ञाय तत्र हेतुमाह । **अन्यद्रव्यैरित्यादिना** ॥ विमतस्य तत्रस्थैस्स्वातिरिक्तरूपिद्रव्यैस्सह स्वातिरिक्तप्रभां विनैव दृशोपलभ्यत्वादिति हेतुमुक्त्वा दृष्टान्तमाह **महाकान्तिर्यथा तथेति** यथा महाप्रकाशः स्वेतररूपिद्रव्यैस्सह स्वेतरप्रकाशं विना चक्षुर्मात्रेण गृह्यमाणत्वात् प्रभाविशेषो भवति एवं छायाभिधमिदं प्रभाविशेषो भवेत् । अन्यथा तेनावृतस्य रूपिद्रव्यस्य तदानीमिदं रक्तमिदं पीतमित्यापरोक्ष्यं नोपपद्येतेत्यर्थः ॥ ३२ ॥

अ०. ॥ इदानीं सिद्धान्ती परदृष्ट्या विषयजातस्याज्ञातसत्ताकत्वमङ्गीकृत्यादित्यादिप्रकाशसामान्यवर्जितदेशगतप्रसिद्धतमसः परोक्षचक्षुर्मात्रग्राह्यत्वादिनिरासाय केवलसाक्षिवेद्यत्वादिकं साधयति **अज्ञानवदिति**—

अज्ञानवत्तमो वेद्यं छायाभिन्नमनीलकम् ।
पक्षान्यकार्यभिन्नत्वे सति चावारकत्वतः ॥ ३३ ॥

व्या. ॥ तमः केवलसाक्षिवेद्यं भवितुमर्हति पक्षान्यकार्यभिन्नत्वे सति विषयावारकत्वादिति हेतुरुक्तः तत्र पक्षान्येति पदं पक्षे हेत्वसिद्धिवारणार्थम् कार्यपदं दृष्टान्ते हेत्वसिद्धिवारणार्थम् । विषयावारकत्वमात्रोक्तौ कुड्यादौ व्यभिचारः तस्य चक्षुर्वेद्यत्वेन केवलसाक्षिवेद्यत्वाभावात् अतः पक्षान्यकार्यभिन्नत्वमुक्तम् तावन्मात्रोक्तावात्मानात्मनोर्भिन्नसत्ताकत्वपक्षे साक्षिणि व्यभिचारः तस्य स्वेन परेण वा साक्षिणा वेद्यत्वाभावात् अतः साधूक्तम् पक्षान्यकार्यभिन्नत्वे विषयावारकत्वत इति । तत्र दृष्टान्तमाह (अज्ञानवदिति) ननु मृदीव दृष्टान्तीकृतपरिणाम्यज्ञाने स्वकार्यकुड्यादेरभिन्नत्वे सिद्धे कथं पक्षान्यकार्यभिन्नत्वघटितहेतुसङ्गतिरिति चेन्न विक्षेपांशाज्ञानस्य स्वविकारकुड्याद्यभिन्नत्वेऽप्यावरणांशाज्ञानस्य कुड्यादि विभिन्नत्वेन विषयावारकत्वात् । तथा केवलसाक्षिभास्यत्वाच्च हेतुसाध्ययोस्संगतिः । पूर्वं पूर्वपक्षिणा तमस्त्वेन निर्दिष्टायाश्छायायाः प्रभाविशेषत्वं साधितम् । अधुना तमस्तद्भिन्नत्वं साधयति (तमश्छायाभिन्नमिति) तिमिरं तावच्छायाशब्दितप्रभाविशेषादन्यद्भवितुमर्हति तत्र हेतुदृष्टान्तौ पूर्वोक्तावेव साध्यान्तरमाह (अनीलकमिति) तमो नीलगुणरहितं च भवितुमर्हति पूर्वोक्तावेव हेतुदृष्टान्तौ ॥ ३३ ॥

अ०. यत्तावदन्धकारे नीलगुणराहित्यं साधितं तत्तानुभवश्च प्रमाणयति **निमीलनादेरिति**—

निमीलनादेर्वेश्मस्थे ध्वान्ते तज्ज्ञानसाम्यतः ।
न नैल्यं किं तु तमसा कृतमावरणं हि यत् ॥ ३४ ॥
नयनागोचरो वेद्यं भ्रमान्नैल्यं जगुः परे ।

व्या ॥ आदिपदेन उन्मीलनं गृह्यते । तथा च ध्वान्ते वेश्मस्थे सति नैमीलनकालिकेन ध्वान्तविज्ञानेन सहोन्मीलनकालिकस्य ध्वान्तविज्ञानस्य समत्वात् चक्षुषस्तत्र करणत्वाभावेन न तद्ग्राह्यं नैल्यमस्ति । तथा चोक्तं वृद्धैः ॥ श्लो० ॥ गाढान्धकारकबळीकृतलोचनानामुन्मीलनेन किमुतापि निमीलनेनेति । एवं प्रमाणाभावेन तिमिरे नैल्यं निराकृत्य तत्र नैल्यव्यवहारस्योपपत्तिमाह **किन्त्वित्यादिना** नयनागोचरः अतएव केवलसाक्षिभास्यं तिमिरकृतं यत् विषयावरणं तदेव भ्रमान्नैल्यमिति मीमांसका जगुरित्यर्थः ॥ ३४॥ ॥

अ० ॥ इदानीं विषयावरणतद्भेदनसाधनविचारेण प्रागुक्तमेव तिमिरस्य केवलसाक्षिभास्यत्वं दृढयति **अन्धकारेति**--

अन्धकारगृहस्थस्य घटस्यावरणं हि यत् ॥ ३५ ॥
तामसं वाऽऽविद्यकं तज्ज्ञायते चक्षुषाऽथवा ।
साक्षिणा वा तामसत्वाच्चक्षुषा ज्ञायते यदि ॥ ३६ ॥
नेत्रे निमीलिते तत्र यद्घटावरणं तु तत् ।
चक्षुषा वा साक्षिणा किं ज्ञायते साक्षिणैव चेत् ॥ ३७ ॥
तद्वेद्यं किं तामसं वाऽऽविद्यकं मायिकं यदि ।
तामसं तु गतं कुत्र तत्रैवास्तीति चेद्वद ॥ ३८ ॥
तदा तज्ज्ञायते नो वा ज्ञायते साक्षिणैव चेत् ।
साक्षिमात्रेण वेद्यत्वाच्चाक्षुषत्वं पलायितम् ॥ ३९ ॥
तर्हि तैमिरिकं तत्स्यादज्ञानेनावृतं यदि ।
ध्वान्तावृत्योरावृतिस्सा केन वा ज्ञायते सुधीः ॥ ४० ॥
साक्षिणैवेति चेद्बाढं तिमिरावरणे तथा ।
साक्षिमात्रेण संभास्ये यथाऽविद्या तदावृती ॥ ४१ ॥
पक्षान्यकार्यभिन्नत्वे सति चावारकत्वतः ।
नो चेदावृत्त्यावृतौ स्यादनवस्था दुरत्यया ॥ ४२ ॥
इत्यावरणकृत्तत्तु ध्वान्तं वेद्यं न चाक्षुषम् ॥ ४३॥ ॥

व्या ॥ इदानीमुदाहृतश्लोकगतानि तामसमिति पदानि तैमिरिकपराणि । तर्हीत्यादिना पूर्वपक्षमनूद्य विषयावारकत्वेन विज्ञाते तिमिरे तत्कार्यभूतस्यावरणस्याज्ञातत्वाभावेऽपि तदुभयावरणवादिनं पृच्छति **ध्वान्तावृत्योरावृतिरिति** प्रत्युत्तरमङ्गीकृत्य तिमिरावरणयोः केवलसाक्षिभास्यत्वं साधयति **तिमिरावरणे इति** साध्यं दर्शयति **साक्षिमात्रेण संभास्ये इति** अविद्यावरणे दृष्टान्तयति **यथेति** तत्र हेतुमाह **पक्षान्येत्यादिना** अस्य हेतोः पदप्रयोजनं प्रागेव दर्शितम् । उक्त-

प्रकारेण तिमिरस्य केवलसाक्षिभास्यत्वेन निरावृतत्वमन्तराऽऽवरणाङ्गीकारे बाधमाह **नो चेदिति**। इदानीं तिमिरस्य केवलसाक्षिभास्यत्वमुपसंहरति **इत्यावरणेति**।

अ० ॥ इदानीं तत्तु प्रभाविशेषस्यादिति प्रागुक्तश्लोकोपजीवितामाशङ्कामनूद्य समाधत्ते **छायेति**—

मू.॥ छायामन्दप्रकाशश्चेत्काष्ण्यं तत्र कथं यदि ॥ ४३ ॥

कृष्णो मन्दप्रकाशस्स्यादग्नेर्यत्कृष्णरूपकम् ।

तदन्नस्येति विस्पष्टश्रुतेरनुभवादपि ॥ ४४ ॥

व्या ॥ मन्दप्रकाशस्तावत्कृष्णगुणक इति प्रतिज्ञाय तत्र 'यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्ये' ति श्रुतिं मन्दप्रकाशोऽयं कृष्णरूप इति लोकानुभवं च प्रमाणयति **अग्नेरिति**॥ ४४ ॥

अ० ॥ मन्दप्रकाशस्य काष्ण्यमङ्गीकृत्य पुनर्महाप्रकाशे तदप्रतीतौ कारणं पृच्छति **बाढमिति**—

मू.॥ बाढं प्रौढप्रकाशेऽस्मिन्कस्मात्काष्ण्यं न दृश्यते ॥ ४४॥ ॥

स्पष्टोऽर्थः ॥ ४४॥ ॥

अ० ॥ दृष्टान्तपूर्वकं समाधत्ते **पञ्चीकृतेति**।

मू॥ पञ्चीकृतवियद्वाय्वोस्स्वांशाधिक्यान्न गृह्यते ॥

यथा रूपरसाद्यंशस्तथा प्रौढप्रकाशके ॥ ४५॥ ॥

व्या ॥ श्लो ॥ 'पृथिव्यादीनि भूतानि प्रत्येकं विभजेद्द्विधा । एकैकं भागमादाय चतुर्धा विभजेत्पुनः ॥ एकैकं भागमेकस्मिन्भूते संयोजयेत् क्रमात् । तत्श्चाकाशभूतस्य भागाः पञ्च भवन्ति हि ॥ वाय्वादिभागाश्चत्वारो वाय्वादिष्वेवमाविशेत् । पञ्चीकरणमेतत्स्यादित्याहुस्तत्ववेदिनः ॥ इति वार्तिकोक्तप्रकारेण पञ्चीकृतयोराकाशवाय्वोर्मध्ये क्रमात् स्वकीयस्य सूक्ष्माकाशांशस्य सूक्ष्मवायुंशस्य चाधिक्याद्यथा तत्रस्थेतरभूतांशीयरूपरसादिर्न गृह्यते । तथा पञ्चीकृतप्रौढप्रकाशेऽपि स्वांशाधिक्यान्न गृह्यते पार्थिवः कृष्णांश इति शेषः ॥ ४५॥ ॥

अ० ॥ दृष्टान्तान्तरेण प्रकाशे काष्ण्यस्य ग्रहणाग्रहणे दर्शयति **यथेति**—

मू॥ यथा क्षीररसो भाति मिते त्वौष्ण्ये न चामिते ॥

प्रकाशमान्द्यामान्द्याभ्यां तत्र काष्ण्यग्रहाग्रहौ ॥ ४६॥ ॥

व्या ॥ भवत इति शेषः ॥ ४६॥ ॥

अ०. ननु वैशेषिकैरिदं रजतमिति भ्रमस्य आपणस्थमेव रजतं विषयो न तदतिरिक्तमित्यङ्गीकृतत्वात्तदभिमतदृष्टान्ताभावे कथं जगतस्त्वाविद्यकत्वं सिध्यतीति प्राप्ते 'तं केचिदन्यत्रान्यधर्माध्यास इति वदन्ति । केचित्तु यत्र यदध्यासस्तद्विवेकाग्रहनिबन्धनो भ्रम'इति अध्यासभाष्ये प्रदर्शितस्य पराभिमतस्याध्यास शब्दशब्दितस्यात्मस्थस्यैव भ्रमस्य ग्राहकेणेदं रजतमिति ज्ञानवानहमित्यनुव्यवसायसंज्ञकेनान्यथाग्रहणेन गृहीतत्वात् इदं मदीयं भ्रमो भवितुमर्हति निष्फलप्रवृत्तिजनकत्वादित्यनुमानादिदं रजतमिति भ्रमज्ञानवानहमिति प्रमाभूतेनानुव्यवसायान्तरेण बाधितत्वाच्चाध्यस्तत्वं मिथ्यात्वं च परमतेऽपि सिध्यतीति तन्निदर्शनेनापि जगतोऽध्यस्तत्वं साधयति । **यच्छुक्ताविति**--

मू॥ यच्छुक्तौ रौप्यविज्ञानं तत्प्रमात्वावगाहिनः ॥ ४७ ॥
भ्रमानुव्यवसायस्य गोचरत्वादथास्य च ।
प्रमानुव्यवसायेन बाधितत्वाद्यथा मृषा ॥ ४८ ॥
आत्मन्येतं जगत्सर्वं मिथ्याभूतं तथा भवेत् ।
यत्र हि द्वैतवद्भाति तदाऽज्ञः पश्यतीतरत् ॥ ४९ ॥
यत्र सर्वमभूत्स्वात्मा कं पश्येदिति च श्रुतेः ।
सति भ्रान्तेर्गोचरत्वे स्वाधारज्ञानबाधनात् ॥ ५० ॥

व्या ॥ इदं रजतमिति भ्रमस्थले यत् शुक्तौ रौप्यविज्ञानं तदध्यस्तं भवितुमर्हति तत्र प्रमात्वावगाहिनः अत एव भ्रमरूपस्यानुव्यवसायसंज्ञकस्याध्यासस्य गोचरत्वादिति हेतुमुक्त्वा हेत्वन्तरमाह **प्रमानुव्यवसायेन बाधितत्वादिति** एवं दृष्टान्तीकृतस्य व्यवसायज्ञानस्याध्यस्तत्वं दर्शयित्वा तज्जगत्यतिदिशति **आत्मनीत्यादिना** अत्रापि हेतुद्वयप्रसिद्धिं श्रुत्यावगमयति **यत्र हीत्यादिना** 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति । यत्र त्वस्य सर्वमात्मैवाभूत्तत् केन कं पश्ये'दिति श्रुतेः ॥ ५० ॥

अ० ॥ इदानीं सर्ववादिसम्मतमध्यासलक्षणमाह **अध्यासेति**--

मू॥ अध्यासलक्षणं किं चेदन्यत्रान्यावभासता ॥ ५१॥ ॥

व्या॥ एवमेव 'सर्वथापि त्वन्यस्यान्यधर्मावभासतां न व्यभिचरती'ति भाष्येण अन्यथाख्यातित्वादिप्रकारविवादेऽप्यध्यासः 'परत्र परावभासत्वलक्षणं न जहाती'ति रामानन्दीयेन चोक्तम् ॥ ५०॥ ॥

अ० ॥ एतावता ग्रन्थसन्दर्भेण गगने नीलिमा सत्ये जगत्सत्यं भविष्यतीति श्रुत्युक्तप्रकारेण दृष्टान्तदार्ष्टान्तिकयोस्स्वरूपाध्यासं च तस्य श्रीमद्भाष्यकारोक्तं सर्ववाद्यभिमतं लक्षणं च निरूप्याधुना 'अन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्ये'ति भाष्योक्तानध्यासविशेषान् प्रश्नपूर्वकं दर्शयति **स्वस्मादिति**—

मू॥ स्वस्मात्तद्विकृतौ पृथग्यदि भवेत्सत्ता तदा सज्जग-
द्भातीत्येव विजानतोऽधिकरणाभेदे जगत्यां परे ।
सत्ताभे न कुतः प्रियं च सदिदं भातीति वाक्यं चित-
स्सत्तामाद्यपदाद्वदेच्च चरमाद्भानं स्वतो नास्य तत् ॥ ९१॥ ॥

व्या॥ स्वस्मात्सद्रूपात्तद्विकृतौ शुक्तिद्रव्यादिव रजते यद्यन्यसत्तो भवेदारोपितस्तस्याधिष्ठानसत्तया सह तादात्म्यात्पूर्वमेव सज्जगद्भातीति सत्ताभाने स्वरूपतोऽध्यस्तस्य जगत एव धर्मौ नान्यदीयाविति विजानतः पश्चाच्छुक्त्या सह रजतस्येव कारणसत्तया सह तादात्म्ये सति कार्यसत्ताभानाभ्यां सहकारणसत्ताभाने सत्सज्जगद्भाति भातीति कुतो न भासेते इति प्राप्ते 'सदेव सोम्येदमग्र आसी'दित्युपक्रम्य 'तदैक्षत बहु स्यां प्रजायेये'ति छान्दोग्येन तथा 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते । आनन्देन जातानि जीवन्ति । आनन्दं प्रयन्त्यभिसंविशन्ती'ति तैत्तिरीयकेण च जगत्प्रकृतित्वेनावेदितसच्चिद्रूपानन्दानुवर्त्तनस्य अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकं । आद्यत्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयमिति श्रुत्या तदन्तर्गतेनाद्येन पदत्रयेण चतुर्थपदनिर्दिष्टे प्रातिभासिकसत्तास्वरूपे जगति प्रदर्शितत्वाज्जगदधिष्ठानभूतस्वात्मसत्तातद्भाने स्वात्मनि तादात्म्यतद्धर्मसंसर्गाद्ध्यासानन्तरमेव हि जगति प्रतीयेतेऽतः ॥ श्लो ॥ आदित्यचन्द्रानलतारकाद्या न भान्ति यस्मिन्ननिशं महान्तं । प्रकाशमानं तमनु प्रभान्ति प्रकाशमस्यैव हि नेतरेषामिति ब्रह्मगीतया तथैव श्लो ॥ नानाच्छिद्रघटोदरस्थितमहादीपप्रभाभास्वरं ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिस्स्पन्दते । जानामीति तमेव भान्तमनुभात्येतत्समस्तं जगदिति भगवत्पादीय वचनेन च स्वस्मिन्नारोपितानां स्वतो भानप्रतिषेधान्न जगति भानद्वयविषयकप्रश्नावकाश इत्याह **प्रियञ्च स दिदं भातीत्यादिना** ॥ ५१.१ ॥

अ० ॥ इदानीं स्वात्मनोऽनात्मद्रव्य तद्धर्मैस्तादात्म्यसंसर्गाध्यासौ दर्शयति **अज्ञानादीति**—

मू ॥ अज्ञानादिजडैश्च तद्गतगुणैस्तादात्म्यसंसर्गिते
प्राज्ञादेर्मम भो वदेर्हि कृपया तत्त्यागकृत्यै गुरो ।
विप्रोऽहं परलोकभागिति जडस्सुप्तोऽस्मि चान्यात्मता
ब्राह्मण्यान्ध्यजडत्वसर्वभवनैस्संसर्गिता ज्ञायते ॥ ९२॥ ॥

व्या ॥ पूर्वार्धमतिरोहितार्थम् । स्थूलसूक्ष्मकारणशरीरेषु आत्मनस्तादात्म्यं दर्शयति । **विप्रोऽहमित्यादिना । विप्रोऽहमिति** स्थूलशरीरेण च परिपूर्णस्य स्वात्मन उपाधिभूते परिच्छिन्ने लिङ्गशरीरे परलोकगामिनि सति परलोकभागस्मीति सूक्ष्मशरीरेण च स्वयंप्रकाशमानोऽपि जडस्सन् सुप्तोऽस्मीति कारणशरीरेण च तादात्म्यं ज्ञायत इत्युत्तरेण संबन्धः । स्थूलादिशरीरधर्मैस्संसर्गाध्यासं दर्शयति **ब्राह्मण्येत्यादिना । सर्वभवनमिति** अज्ञानस्य पारिणामिकं बहुभवनमुक्तम् । तथा च ब्राह्मण्यं चान्ध्यं च जडत्वं च सर्वभवनं च ब्राह्मण्यान्ध्यजडत्वसर्वभवनानि तैः संसर्गाध्यासो ज्ञायत इत्यर्थः । तथा चोक्तं कृत्स्नप्रसक्त्यधिकरणे ॥ श्लो ॥'न युक्तो युज्यते वास्य परिणामो न युज्यते । कात्स्न्यांद्ब्रह्मानित्यतासंरंशात् सावयवं भवेत् ॥ मायाभिर्बहुरूपत्वं न कात्स्न्यान्नापि भागतः । युक्तोऽनवयवस्यापि परिणामोऽत्र मायिकः ॥ इति । अनेनाधिकरणेन 'तदैक्षत बहुस्यां प्रजायेये' त्यादिश्रुत्या सद्रूपानन्दस्य विवर्तोपादानत्वं च मायायां तादात्म्याध्यासपूर्वकतद्धर्मसंसर्गाध्यासवशात् बहुभवनं चाभिप्रेतमित्यात्मानात्मनोर्विषमसत्ताकत्वं दर्शितमित्यवगन्तव्यम् ॥ एवं च पञ्चाध्यासो भवेत् ॥ तथाचोक्तं ब्रह्मनन्दीये प्रथमपरिच्छेदे सत्तादात्म्यविचारप्रस्तावे । 'इदमाद्यवच्छेदेन रजतादिकं' तत्तादात्म्यं रजतत्वादेः संसर्गः रजताद्यवच्छेदेन इदमादेस्तादात्म्यं इदन्त्वादेः संसर्गश्च जायते भ्रमस्थले भ्रान्तिकाले बाध्यस्योत्पत्तिस्वीकारात् । तदुक्तं भाष्ये 'अन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्माश्चाध्यस्ये' ति । तथैव संक्षेपशारीरकेऽपि ॥ श्लो. ॥ इदमर्थवस्त्वपि भवेद्रजते परिकल्पितं रजतवास्त्विदमि । रजतभ्रमेऽस्य च परिस्फुरणान्न यदि स्फुरेन्न हि तु शुक्तिरिवेति ॥ ५२ ॥

अ०॥ इदानीं प्रश्नपूर्वकं जगत्यहमित्यध्यासं दर्शयति **मर्त्योऽस्मीति**—

मू॥ मर्त्योऽस्मीति यथा तथैव सकलश्चास्मीति धीरस्तु चे-
त्कुंभस्सन्निखिलश्च सन्निति हि सा सच्छब्दतो जायते ।
सत्वाच्चेति च सूत्रतश्श्रुतिबलात्सत्तैक्यवादे रता
ये तेषां निखिलेष्वहं मतिरियं चाचार्यशिक्षाबलात् ॥ ९३ ॥

व्या ॥ यथा 'सन् घटस्सन् पट' इति घटपटादिशब्दात्पूर्वं प्रयुज्यमानेन सच्छब्देन घटादेस्सर्वोपादानभूतेन सदात्मना साकं तादात्म्याध्यासावगतिर्जायते तथा कुंभस्सन्निखिलः सन्निति च कुंभादिशब्दोत्तरं प्रयुज्यमानेन सच्छब्देन कुंभादिना साकं सद्रूपस्य प्रत्यगात्मनोऽहमिति तादात्म्याध्यासावगतिश्च जायते । प्रसिद्धं ह्येतत् । 'ब्रह्मैवेदं सर्वम् ।' 'आत्मैवेदं सर्वम्' 'अहमेवेदं सर्वम्' 'स आत्मा' 'तत्त्वमसी' त्यादि श्रुतिभिर्ब्रह्मात्माऽहंसच्छब्दानां पर्यायत्वम्। एवमविवेकिनां तदृच्छा प्रातिभासिकसत्ताके घटादावहमित्यध्यासं दर्शयित्वा इदानीं विदुषस्तदृच्छा स्वात्ममात्रसत्ताके जगत्यहमित्यध्यासं दर्शयति **सत्वाच्चेत्यादिना** 'सत्वाच्चापरस्ये' ति सूत्रात् 'तदैक्षत बहु स्यां प्रजायेये' ति । 'तदात्मानं स्वयमकुरुत ।' 'स य एवं विद्वानेते आत्मानं स्पृणुत' इत्यादि श्रुतिप्रामाण्याच्च गुरूपदेशप्रक्रियाबलाच्च ये स्वात्मजगतोरेकसत्ताकत्ववादपरिशीलिनस्तेषां सर्वत्राहम्मतिः प्रमात्मिका भवतीति भावः । एवमेवैतच्छ्रुत्यर्थः । श्रीब्रह्मणापि स्वगीतायामुच्यते ॥ श्लो० ॥ तप्यतापकरूपेण विभातमखिलं जगत् । प्रत्यगात्मतया भाति ज्ञानाद्वेदान्तवाक्यजात् । कर्ता कारयिता कर्म करणं कार्यमास्तिकाः । सर्वमात्मतया भाति प्रसादात्पारमेश्वरात् । प्रमाता च प्रमेयं च प्रमाणं प्रमितिस्तथा । सर्वमात्मतया भाति प्रसादात्पारमेश्वरात् । नियोज्यश्च नियोगश्च साधनानि नियोजकः । सर्वं...पारमेश्वरात् । ग्राहकं च तथा ग्राह्यं ग्रहणं सर्वतोमुखम् । सर्वं...॥ भोक्ता भोजयिता भोगो भोगोपकरणानि च । सर्वं...॥ अयथाज्ञानमज्ञानं संशयज्ञानमेव च । सर्वं...॥ घटः कुड्यं कुसूलञ्च पटः पात्रं च सर्वशः । सर्वं...॥ पातालाद्याश्च ये लोकास्सत्यलोकादयोऽपि च । सर्वं...॥ ब्रह्माण्डं तत्र कृत्स्नानामण्डानां शतकोटयः । सर्वं...॥ समुद्राश्च तटाकाश्च नद्यस्सर्वनदा अपि । सर्वं...॥ मेरुमन्दरपूर्वाश्च पर्वताश्च महत्तराः । सर्वं...॥ वनानि वनदेवाश्च वन्यानि विविधानि च । सर्वं...॥ वृक्षाश्च विविधाः क्षुद्रास्तृणगुल्मादयोऽपि च । सर्वं...॥ आकाशादीनि भूतानि भौतिकान्यखिलानि च । सर्वं...॥ शब्दस्पर्शादितन्मात्ररूपाणि विविधा-

नि च । सर्वं...॥ कृमिकीटपतङ्गाश्च क्षुद्रा अपि च जन्तवः । सर्वं...॥ पशवश्च मृगाश्चैव पन्नगाः पापयोनयः । सर्वं...॥ मनुष्याश्चैव मातङ्गा अश्वा उष्ट्राः खरा अपि । सर्वं...॥ यक्षराक्षसगन्धर्वप्रमुखास्सिद्धकिन्नराः । सर्वं...॥ कर्मदेवाश्च देवाश्च देवराजो विराट् स्वराट् । सर्वं...॥ अहं च मद्विभूतिश्च मम भक्ताश्च देहिनः । सर्वं...॥ विष्णुर्विष्णुविभूतिश्च विष्णुभक्ताश्च देहिनः । सर्वं...॥ रुद्रो रुद्रविभूतिश्च रुद्रभक्ताश्च देहिनः । सर्वं...॥ ईश्वरस्तद्विभूतिश्च तदीयास्सर्वदेहिनः । सर्वं...॥ सदाशिवसमाख्यस्तु शिवस्तस्य विभूतयः । सर्वं...॥ दिशश्च विदिशश्चैव साभ्रनक्षत्रमण्डलम् । सर्वं...॥ आश्रमाश्च तथा वर्णास्सङ्करा विविधा अपि। सर्वं...॥ निषिद्धं चानिषिद्धं च निषेधा विधयोऽपि च । सर्वं...॥ वासुदेवस्संकर्षणः प्रद्युम्नश्चानिरुद्धकः । सर्वं...॥ मत्स्यः कूर्मो वराहश्च नारसिंहोऽथ वामनः । सर्वं...॥ शरीरमिन्द्रियं प्राणो मनो बुद्धिरहंकृतिः। कामक्रोधादयस्सर्वे तथा शान्त्यादयोऽपि च । जीवात्मा परमात्मा च तयोर्भेदश्च भेदकः । सर्वं...॥ जडशक्तिप्रभेदाश्च चिच्छक्तिस्तद्विदापि च । सर्वं...॥ अस्तिशब्दोदिता अर्था नास्तिशब्दोदिता अपि । सर्वमात्मतया भाति प्रसादात्परमेश्वरात् ॥ इति ॥ ५३ ॥

अ० ॥ चोद्यपूर्वकं क्रमात्प्रत्यग्मात्रसत्ताकतदतिरिक्तसत्ताकेष्वात्मबुद्धिमतां गुणदोषौ दर्शयति **प्राज्ञानामिति**—

मू॥ प्राज्ञानां महिमा न कोऽपि भवति भ्रान्तो यथा विग्रहे-
ऽहंभावं कुरुते तथैव सकलेऽहंभावकारित्वतः ।
मैवं स्वस्य विजानतां प्रकृतितां मुक्त्यै भवेन्मानिता
स्वाभिन्ने जगतीतरस्य तु भवेद्बन्धाय भिन्ने जडे॥९४॥

व्या ॥ पूर्वार्धं सुगमम् । द्वितीयनिरूपणे प्रथमपक्षत्वेन वक्ष्यमाणाज्ञानोपाधिकस्य स्वस्य जगत्प्रकृतित्वं शास्त्राचार्योपदेशमननादिभिर्विशेषेण विजानतां स्वमात्रसत्ताकत्वेन स्वाभिन्ने जगत्यहमभिमानिता सार्वात्म्यरूपमोक्षाय भवतीति विदुषां भ्रान्तजनवैलक्षण्यं मैवमित्यादिनावेद्य भ्रान्तस्याऽपि विद्वद्वैलक्षण्यं दर्शयति **इतरस्येत्यादिना** ॥ चिन्मात्रस्य स्वस्य जगदुपादानतामजानतः स्वात्माभिन्नेऽनात्मनि आविद्यकशरीरादौ आविवेककृताहमभिमानिता बन्धायैव स्यादिति भावः ॥ ५४ ॥

अ०॥ कार्यकारणयोरेकसत्तावादे तादात्म्याध्यासमीक्षिप्य समर्थयते **सत्तै-केति**—

मू॥ सत्तैका जगदात्मनोर्यदि तदा पूर्वं सताऽध्यासतो
निस्सत्वे जगतः प्रतीतिविरहात्तादात्म्यसिद्धिः कथम् ।
तादात्म्याद्धि पुरा मृदा जनिमतोऽसत्वेऽप्यभेदो यथा
भास्यस्याप्यसतस्सता सह तथा तादात्म्यसिद्धिर्भवेत् ॥

व्या॥ सत्तैका जगदात्मनोर्यदीति सिद्धान्तमनूद्याक्षेपं दर्शयति **तदेत्यादिना** तदा तस्मिन्पक्षे **पूर्वं सताऽध्यासतः** कारणभूतेन सद्वस्तुना साकं तादात्म्यात्प्राक् **निस्सत्वे जगतः** शशशृङ्गादेरिव सत्ताराहित्ये सति **प्रतीतिविरहात्** तद्विषयकैन्द्रियवृत्त्यभावात्सद्रूपेण कारणेन साकं तादात्म्यसिद्धिः कथं भवेदिति प्राप्ते ॥ श्लो ॥ 'शून्यख्याऽपि स साक्षित्वादन्यथा नोक्तिरस्य ते' । इति श्रीविद्यारण्याचार्यकृतचित्रदीपोक्तप्रकारेणासतोऽपि केवलसाक्षिवेद्यत्वमेकसत्ताकमृद्घटादिदृष्टान्तं चावलम्ब्य समाधत्ते **तादात्म्याद्धीत्यादिना** यथा च लोके कुलालव्यापारादुत्पन्नस्य घटस्य मृत्सत्तया तादात्म्यात्पूर्वं स्वतस्सत्ताशून्यत्वेनैन्द्रियवृत्त्यगोचरत्वेऽपि केवलसाक्षिभास्यत्वेन तादात्म्याध्यासः—एवं स्वतस्सत्ताराहित्येऽपि जगतः केवलसाक्षिवेद्यत्वेन स्वकारणसद्वस्तुना साकं तादात्म्यसिद्धिर्भवतीत्यर्थः । एतत्तु विस्तरेण द्वितीयनिरूपणे सप्तमप्रदर्शके ॥ श्लो ॥ वन्ध्यापुत्रो गृहे त्वस्मिन् धनदः प्रभुरस्तीत्यादिना वक्ष्यति ॥ ५५ ॥

अ०॥ ननु, 'स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति । महान्तं विभुमात्मानं मत्वा धीरो न शोचति' इत्यादिश्रुत्या स्वात्मनो जगत्कारणत्वानुकूले निरंकुशविभुत्वे सिद्धे तद्विरोधेन ॥ श्लो० ॥ आत्मा देहस्तदन्यो वा चैतन्यं मदशक्तिवत् । भूतमेळनजं देहे नान्यत्वात्मा वपुस्ततः । भूतोपलब्धिर्भूतेभ्यो विभिन्ना विषयित्वतः । सैवात्मा भौतिकाद्देहादन्योऽसौ परलोकभागिति गुणोपसंहारपादे—शरीरेभावाधिकरणे परलोकगामित्वादिना अल्पपरिमाणवत्त्वं किमर्थमुपदिष्टमिति प्राप्ते एकात्मवादी यो वैदिकः तमसङ्ख्यचिद्विभ्वनेकात्मवादिनः सांख्याः तानपि कर्तृविभ्वनेकात्मवादिनस्तार्किकाः तानप्यनेककर्त्रण्वात्मवादिनो मीमांसकाः तानपि देहात्मवादिनो लोकायतिकाश्च क्रमात्प्रद्विषन्ति एतान् सांख्यादीन् कारणभूतैकात्माहमित्यपरोक्षीकरणे उत्तममद्ध्यमाधमाधमाधमाधिकारिणः कारणभूतैकात्मवादे वेशयितुं तैर्बौद्धादिभिः येषु येषु प्रद्वेषः कृतः तत्तन्निरसनमाल मद्ध्यस्थैरस्माभिः कृतञ्चेत् लोकायतिकमीमांसककणादकापिलानां उत्तरोत्तरं स्वस्वप्रतिवादिभिः मत्यं भवेत् तदा सर्वैः कारणभूतैकात्माहमस्मीति अपरोक्षज्ञानात् मोक्षः प्राप्येतेत्यभिप्रेत्य तथोक्तमित्याह **श्रौत इति**—

मू॥ श्रौते सख्यकृता प्रधानमतिना मैत्र्यं परं कांक्षता
काणादेन च कर्मिणाऽपि च तथा बौद्धेन च प्राप्स्यते ।
मोक्षो हीत्यनुचिन्त्य देशिकवरा गन्ता विभुस्साक्ष्यसी-
त्येकोऽसीति च बाधनीयधिषणान्प्रत्येकमेकं जगुः॥ ५६ ॥

व्या॥ **श्रौते** औपनिषदैकात्मविदि **सख्यकृता प्रधानमतिनेति** प्रधाने मतिः कारणत्वबुद्धिर्यस्य सः प्रधानमतिः तेन सांख्येन **मैत्र्यं परं काङ्क्षतेति** वाक्यं काणादादित्रयेणापि संबद्ध्यते **देशिकवराः** सूत्रभाष्याधिकरणरत्नमालाकाराः श्रीव्यासभगवत्पादविद्यारण्याचार्याः गुणोपसंहारपादे त्रिंशाधिकरणगतात् 'व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवदि' त्यादिसूत्रात् तद्भाष्याच्च उत्क्रान्त्यधिकरणीयात् 'नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् तद्गुणसारत्वात्तु तद्व्यपदेशोभाक्तस्तद्भावभावित्वादि'त्यादिसूत्रतद्भाष्याभ्याञ्च तथैव वियत्पादे 'यथा च तक्षोभयथेति सूत्रस्य भाष्याच्च समन्वयाद्वयाये चतुर्थपादे चमसाधिकरणगतस्य 'कल्पनोपदेशाच्च मध्वादिवदविरोध' इति सूत्रस्य भाष्याच्च वक्ष्यमाणवादिनां स्वात्मतत्वे सञ्जातं तत्तद्भ्रमनिवृत्त्यर्थं स्वात्मनः पराभिमतं सविशेषत्वं सिद्धवत्कृत्वा क्रमात् **गन्ता विभुस्साक्ष्यसीत्येकोऽसीति च** अणुत्वपरिमाणवत्वे सति परलोकादिकं प्रति गन्तासीति च दर्शनादिक्रियाश्रयत्वे सति विभुरसीति च विभुत्वे सति साक्ष्यसीति च सर्वदृक्त्वतत्साक्षित्वाभ्यां विनिर्मुक्तत्वे सति एकोऽसीति च वाक्येभ्यः **बाधनीयधिषणान्प्रति** बाधनीया धिषणा स्थूलशरीरभूतात्मनि अणुचेतनात्मनि विभुचेतनात्मनि सर्वसाक्ष्यात्मनि चाहमित्याद्ध्यासिकी बुद्धिर्येषां लोकायतिकमीमांसकवैशेषिकसांख्यानां ते बाधनीयधिषणाः तान्प्रति परमतानां पूर्वोक्तानां मध्ये **एकमेकं जगुः** स्वकीयसिद्धान्तवेदनोपायत्वेनोपदिदिशुः ।

एवमुपदिष्टाश्च ते लोकायतिकादयः स्वस्वप्रतिवादिद्वारा निर्विशेषैकात्मवादिना परमाद्वैतिना सह परममैत्र्यमापन्नास्सन्तः परं श्रेयः प्रापुः ॥ ५६॥ ॥

अ० ॥ नन्वेवं त्वंपदवाच्यः स्वात्मा जगत्प्रकृतिश्चेत् तदा तत्त्वमसीत्यादि महावाक्यस्य वाच्यैक्यपरत्वमापद्येत इष्टापत्तिरितिचेत् तर्हि कथं सूत्रकारैर्जन्माद्यस्य यत इत्यादिसूत्रैः स्वात्मभिन्नस्याधिदैविकस्य परमेश्वरस्य तत्पदवाच्यस्य जगत्प्रकृतित्वमुक्तमित्याक्षिप्य न तैराधिदैविकस्य महावाक्यघटकीभूततत्पदवाच्यत्वं जगत्प्रकृतित्वं वा ऽभिहितामिति समाधत्ते **एवमिति**—

मू. एवं चेत्तत्त्वमस्यादिवाक्याद्ब्राच्यैकता पतेत् ॥ ५७ ॥
इष्टं चेदधिदैवस्य जन्माद्यस्येति सूत्रतः
प्रकृतित्वं कथं व्यासैरुक्तं चेन्न तथोच्यते ॥ ५८ ॥

व्या ॥ स्पष्टोऽर्थः ॥

अ० ॥ तर्हि तदैक्षत बहुस्यामित्युपक्रम्य तत्त्वमसीति छान्दोग्ये 'यतो वा-इमानि भूतानि जायन्त इत्युपक्रम्य 'तद्विजिज्ञासस्व तद्ब्रह्मेति भृगुवल्ल्यादौ च कमुद्दिश्य जगत्प्रकृतित्वं विधीयत इति चेदुच्यते **छान्दोग्य इति**—

मू. छान्दोग्ये त्वारुणिर्यद्वत्कारणब्रह्मरूपताम् ।
श्वेतकेतुं समुद्दिश्य वारुणिं वरुणोऽब्रवीत् ॥ ५९ ॥
शिष्यः प्राक्कालिकं स्वस्मिञ्जानाति प्रकृतत्वतः ।
इति तत्तन्महावाक्यं स्वस्योपादानतां जगौ ॥ ६० ॥
अध्यारोपेऽपवादाच्च स्वस्य ज्ञेयत्वशास्त्रतः
विचारेण विनष्टे स्वाज्ञाने चिन्मात्रता भवेत् ॥ ६१ ॥
एवं सति प्रमाणं स्यादन्यथा बाधितं भवेत् ।
आत्मेति तूपगच्छन्ति ग्राहयन्तीति सूत्रकम् ॥ ६२ ॥

व्या॥ अब्रवीत्तद्ब्रह्मगुवल्ल्यादाविति शेषः। तत्रोपपत्तिमाह शिष्यः प्राक्कालिक-मित्यादिनासत्तद्यदिति सर्वसाधारणपदैरविशदीकृतेऽप्युद्देश्येऽस्मत्प्रत्ययगम्यत्वं स्वा-त्मानन्दत्वादिरूपं विशेष्यत्वं च तदैक्षत बहु स्यामिति प्रागीक्षणकालिकमभिन्ननिमि-त्तोपादानत्वादिधर्मं च यथातत्वं स्वस्मिन् तत्तच्छिष्यः पूर्वप्रकृतत्वाज्जानातीति 'तत्त्वमसि'अहंब्रह्मास्मि'आनन्दो ब्रह्मेति व्यजानादि'त्यादिमहावाक्यं अध्यारोपगम्य-मभिन्ननिमित्तोपादानत्वं स्वात्मनो जगावित्युक्त्वा स्वस्माज्जगदपवादगम्यं निर्धर्म-त्वं स्वस्य दर्शयति अपवादाच्चेत्यादिना स्वपक्षे आत्मेति तूपगच्छन्ति ग्राहयन्ति चेति सूत्रं संवादयति एवमित्यादिना अस्य सूत्रस्यायमर्थः स्वस्मिञ्जगदध्यारोपविषय-कश्रवणमननिदिध्यासनसाक्षात्काररूपसाध्यचतुष्टयसंपन्नाः ब्रह्मविदोऽहमेव जग-दुपादानमित्युपगच्छन्ति स्वात्मजगतोर्नित्यत्वाविवेकादिसाधनचतुष्टयसंपन्ने प्रति त्वमेव जगदुपादानमिति च ग्राहयन्ति इत्युक्तप्रकारेणाध्यारोपापवादाभ्यां स्वस्मिन् विज्ञेयविशेषतदभावपरश्रुतिसूत्रभाष्यादिशास्त्रं तावत् सप्तमनिरूपणे सप्तविंशस्य श्लोकस्य व्याख्यानेऽतिविस्तरेण दर्शयिष्यामः ॥ ६२ ॥

अ०॥ अधुना 'यतो वा इमानि भूतानि जायन्ते' 'जन्माद्यस्य यत' इत्यादिश्रुतिसूत्रैः जगत्कारणत्वेन निर्दिष्टस्त्वाधिदैविको वा आद्ध्यात्मिको वेति संशयनिवर्त्तकात्

'पुरत्रये क्रीडति यस्तु जीवस्ततस्तु जातं सकलं विचित्रम् । मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् । मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहमिति' कैवल्यवाक्यात् ।

सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक्चेतोमुखः प्राज्ञः तृतीयः पादः । एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिस्सर्वस्य प्रभवाप्ययौ हि भूतानामिति माण्डूक्यश्रुतितद्भाष्याभ्यां च ॥ श्लो ॥ सौषुप्तमानन्दमयं प्रकृम्यैवं श्रुतिर्जगौ । एष सर्वेश्वर इति सोऽयं वेदोक्त ईश्वरः । अन्तर्यामी च सर्वज्ञो जगद्योनिस्स एव हि । माण्डूक्यतापनीयादिश्रुतिष्वेतदतिस्फुटमिति विद्यारण्याचार्यकृतत्रिप्रदीपवचनाच्च

'यद्वाचाऽनभ्युदितं येन वागभ्युद्यते । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते' इति सभाष्यात् उद्देश्यभूते स्वात्मनि प्रथमतः जगदुपादानत्वप्रयुक्तत्रिविधपरिच्छेदरहितब्रह्मत्वविधानपूर्वकं उपास्यस्य हरिहरादेर्जगदुपादानत्वप्रयुक्तत्रिविधपरिच्छेदरहितब्रह्मत्वनिषेधककेनवाक्याच्च ।

'सति संपद्य न विदुः सति सम्पत्स्यामहे' इति विज्ञानमयस्य जगदुपादानभूतसद्रूपसौषुप्तप्राज्ञभावापत्तिं अजानतामविद्वत्त्वबोधकछान्दोग्यवाक्याच्च—

श्लो ॥ यथा हिरण्यं निहितं क्षेत्रज्ञानविवर्जिताः । उपर्युपरि गच्छन्त्यो न विन्देयुः प्रजा इमाः । तथा सुषुप्तौ गच्छन्त्यो ब्रह्मलोकं स्वयंप्रभम् । न विन्दन्ति महामोहादहो मोहस्य वैभवमिति छान्दोग्यश्रुत्यर्थनिर्णायकात् सौषुप्तस्य ब्रह्मत्वविधायकात् ब्रह्मगीतायाः षष्ठाद्ध्यायवचनाच्च

तत्र सौषुप्तस्य स्वात्मन एव जगदुपादानत्वरूपब्रह्मत्वमजानतां दूषणोपलम्भाच्च

यथा स्वात्मैव जगदुपादानमित्यवगम्यते तथा किंपुनः तद्वेदान्तवाक्यं जन्माद्यस्य यत इति सूत्रेणेह लिलक्षयिषितम् "भृगुर्वै वारुणिः । वरुणं पितरमुपससाराधीहि भगवो ब्रह्मेत्युपक्रम्याह 'यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व तद्ब्रह्मेति' तस्य च निर्णयवाक्यम् 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते । आनन्देन जातानि जीवन्ति । आनन्दं प्रयन्त्यभिसंविशन्तीति' अन्यान्यप्येवंजातीयकानि वाक्यानि नित्यशुद्धमुक्तसर्वज्ञस्वरूपकारणविषयाण्युदाहर्त्तव्यानीति भाष्येण एतद्भाष्यार्थविवरणपरेणानेन तस्य

लक्षणवाक्यस्य तदर्थस्य च आनन्दाद्ध्येव खल्विमानि भूतानि जायन्त इति वाक्यं तावत् स्वस्य च स्वार्थभूतस्य सुषुप्तौ सुखमहमासमिति स्वयंप्रकाशमानस्यानन्दस्य च क्रमात्पर्यायत्वमैक्यं च निर्णयतीति निर्णयं निर्णायकं वाक्यमिति वाक्येन च लक्षणानन्दवाक्ययोः पर्यायत्वस्य तत्त्वंपदवाच्यैक्यस्य चादिष्टत्वाच्च तदीयात् जन्माद्यस्य यत इति सूत्राच्चोपासकस्यैव कारणत्वमवगम्यते नोपास्यस्येत्याह यः **क्रीडतीत्यादिना**—

मू.॥ यः क्रीडति तनौ जीवस्तस्मात्सर्वं भवेदिति ।
मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् ॥ ६३ ॥

मयि सर्वं लयं याति तद्ब्रह्मास्मीति च श्रुतेः ।
एष सर्वेश्वरस्सुप्त इति माण्डूक्यवाक्यतः ॥ ६४ ॥

वागाद्यगोचरं स्वं त्वं विद्धि ब्रह्मेति नेतरम् ।
उपास्यमिति केनाच्च छान्दोग्याच्च तदीयतः ॥ ६५ ॥

ब्रह्मवाक्याद्यथा स्वस्मिञ्जगत्प्रकृतितैकता ।
तथाऽस्मद्वाष्यकारोक्तरीत्या सा सूत्रतस्स्फुरेत् ॥ ६६ ॥

व्या ॥ सौषुप्तस्वानन्दे जगज्जन्मादिकारणत्वलक्षणयोजनप्रकारस्तु द्वितीयनिरूपणे द्वादशोत्तरशततमादिश्लोकव्याख्यानात् विस्तरेणावगम्यतां । **एकता** वाच्यैक्यामित्यर्थः । शेषः सुगमः ।

अ० ॥ इदानीं श्लोके तथाऽस्मद्वाष्यकारोक्तरीत्या सा सूत्रतस्स्फुरेदिति प्रतिज्ञातमेवार्थमुपपादयति **लक्षणेति**—

मू.॥ लक्षणान्वयतः प्राक्च विधेयज्ञानतः पुरा ।
यथा च गवयस्तद्वद्यस्सुप्तावपरोक्षकः ॥ ६७ ॥

स हि लक्षणवाक्यस्थयच्छब्दाद्गृह्यतामिति ।
जन्मादिसूत्रभाष्ये तन्निर्णायकतयैव हि ॥ ६८ ॥
व्यजानादिति चानन्दो ब्रह्मेत्याचार्यदर्शितम् ॥ ६८॥ ॥

व्या. ॥ एवमेव सर्वत्र लक्ष्ये लक्षणविधेययोः साक्षात्कारक्रमः षट्पञ्चाशादिश्लोकावतरणोक्तभाष्ये भगवत्पादैर्विवक्षित इत्यर्थः ॥ ६८ ॥

अ० ॥ जगत्कारणत्वेन निर्दिष्टो यच्छब्दार्थस्तु सौषुप्तः स्वात्मानन्द एवेति भाष्यकारेणैव भृगुबादरायणाभ्यां च निर्दिष्ट इत्याह **तथेत्यादिना**—

मू ॥ तथाऽऽनन्दाद्धि भूतानि जायन्ते तेन जीवनम् ॥ ६९ ॥

तेषां लयश्च तत्रेति वाक्यैस्तत्प्राक्समीरिते ।
यतस्त्विमानि भूतानीत्यत्रोद्देश्ये प्रगोपिते ॥ ७० ॥

यच्छब्दार्थे हि सौषुप्तानन्दरूपाविशेष्यताम् ।
उद्देश्यताबोधानय हेतुत्वं च विधेयताम् ॥ ७१ ॥

ब्रह्मत्वस्य च विज्ञाय भृगुवद्बादरायणैः ।
श्रुत्यर्थबोधकाच्चैवं जन्माद्यस्येति सूत्रतः ॥ ७२ ॥

स्वस्योपादानतादेशान्नेशे प्रकृतितोच्यते ॥ ७२॥ ॥

व्या. ॥ एवं भृगुबादरायणतात्पर्यनिर्णायकाश्चैते श्लोकाः षट्पञ्चाशादिश्लोकतदवतरणतद्व्याख्यानैः समानार्थकत्वात् न पृथक् व्याख्यायन्ते ।

ननु "यतो वा इमानि भूतानि जायन्त" इत्यारभ्य "तद्विजिज्ञासस्व । तद्ब्रह्मेति" वाक्यं तावत् कथं यच्छब्दार्थस्य स्वात्मनो ब्रह्मत्वविधायकत्वेन च लक्षणपरत्वेन च भवेदिति चेदुच्यते ।

यो गोसदृशस्तं गवय इति विद्धीति वाक्यं यथा गोसदृशस्य गवय इति संज्ञाविधायकत्वेन च तद्विधेयाश्रयव्यक्तिमात्रस्य लक्षणपरत्वेन च भवति तद्वत् सौषुप्तस्वात्मतत्त्वस्य जगज्जन्मादिकारणत्वरूपलक्षणपरत्वेन च ब्रह्मत्वविधायकत्वेन च भवेत् ।

अतो लक्षणान्वयात् विधेयसाक्षात्काराच्च प्रागेव गवयवत् यथा स्वात्माऽपरोक्षो भवति न तथेश्वरो लक्षणविधेयग्रहणात्प्रागेव तद्ग्रहणयोग्यत्वेनापरोक्षो भवेत् नित्यपरोक्षत्वादिति द्रष्टव्यम् ॥ ७२॥ ॥

अ० ॥ आधिदैविकस्य जगत्प्रकृतित्वाभ्युपगमे बाधमाह **नो चेदिति**—

मू॥ नो चेन्नित्यपरोक्षत्वादस्मान्प्रत्याधिदैविके।
लक्षणस्यान्वयाभावे ब्रह्मत्वस्य ग्रहः कथम् ॥ ७३॥ ॥

अ०॥ स्वात्मैव "यतो वा इमानि भूतानि जायन्ते" "सदेव सोम्येदमग्र आसीत्" सेयं देवतैक्षतेति परोक्षनाम्नोक्त इति दर्शयित्वा आध्यात्मिकं प्रति आधिदैविकचैतन्यस्य नित्यपरोक्षं स्वरूपमभ्युपेत्य प्रश्नपूर्वकं तस्य फलदातुरुपादानत्वरूपलक्षणपरशास्त्रस्य तात्पर्यमाह **बाढमिति**—

मू॥ बाढं प्रकृतित्योक्तेः का फलदातुर्गतिर्यदि।
विभुत्वादाश्रयत्वेन गौणी मायादिकं प्रति ॥ ७४॥ ॥

व्या ॥ मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति महत्वमात्रावगमात्॥

अ०॥ परित्राणाय साधूनां विनाशाय च दुष्कृताम्। धर्मसंस्थापनार्थाय संभवामि युगे युगे। ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसश्श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणादिति स्मृतिमवलंब्य दिव्यशरीरादिपरिवेष्टितत्वेन जीवैस्संद्वितीयत्वेन च परिच्छिन्नपरिमाणवत्वाङ्गीकारे त्वौपचारिकमेवोपादानत्वं भवतीत्याह **शरीरेति**—

मू॥ शरीरवेष्टितत्वेन देवेशो मितमानवान्।
इत्यत्रोपादानताऽस्य भवेदौपचारिकी ॥ ७५॥ ॥

व्या ॥ उपासकानां तदुपास्योपरोक्ष्यकाले 'ब्रह्म दाशा ब्रह्म दासा ब्रह्मैमे कितवा उत। त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी त्वं जीर्णो दण्डेन वञ्चसि त्वं जातो भवसि विश्वतोमुख इत्यादिश्रुतिः केवलं स्तुतिरेव तथासति परिच्छिन्न आधिदैविको देशान्तरं लोकान्तरं वा गन्तुमर्हति स्वाप्न जैवमिवैशं चेन्न कुत्रापि गच्छतीत्यर्थः ॥ ७५॥ ॥

अ० ॥ फलदातुराधिदैविकस्य विवर्तोपादानत्वं वारयति **मुख्यमिति**—

मू॥ मुख्यं वैवर्तिकं दातुः प्रकृतित्वं भवेद्यदि।
भोक्तृभोग्यतया भाने न दातृत्वं यथाऽऽत्मनः ॥ ७६ ॥

व्या ॥ पूर्वावस्थामपरित्यज्यावस्थान्तरेण भानं विवर्त्त इति विवर्त्तलक्षणोक्तोपादानत्वे बाधमाह **न दातृत्वमिति** तत्र दृष्टान्तमाह **यथात्मन इति** यथा च स्वप्नावस्थायां भोक्तृभोज्यरूपेण विवर्त्तमानस्य तैजसस्य परेभ्यः स्वविवर्त्तफलदातृत्वं न संभवति तद्वदित्यर्थः ॥ ७६ ॥

अ०.॥ इदानीमाधिदैविकस्य फलदातुरतस्मिन् तद्बुद्धिरद्ध्यास इति अद्ध्यासलक्षणोक्तरीत्या द्रव्यरूपापूर्वे तदुपहितमायायां वा तादात्म्याद्ध्यासासम्भवात् तज्जन्यमप्युपादानत्वं वारयति **बाढमिति**—

मू॥ बाढमाद्ध्यासिकं दातुः प्रकृतित्वं भवेद्यदि।
नाविवेकविहीनत्वाद्द्रव्यापूर्वचयेऽप्यहम् ॥ ७७ ॥
इत्यनद्ध्यासतो नो चेन्नान्यस्मै दातुमर्हति।
फलमाद्ध्यासिकत्वेन स्वस्मान्न विभजेद्यतः ॥ ७८ ॥

व्या॥ फलप्रकृतावपूर्वादौ अद्ध्यासाभावेऽविवेकविहीनत्वादिति हेतुमुक्त्वा तस्यापीश्वरस्याद्ध्यासाभ्युपगमे बाधमाह **नोचेदित्यादिना** ॥ ७८ ॥

अ०॥ फलप्रकृतौ फलदातुः परमेश्वरस्याहमित्यद्ध्यासाभाववादिनं प्रत्याह **ज्ञानादिति** ॥

मू. ज्ञानादद्ध्यासहीनश्चेन्निमित्तं केवलं भवेत्।
भिन्नः फलाच्च प्राणिभ्यः फलं दद्यान्महेश्वरः ॥ ७९ ॥

व्या॥ आधिदैविकस्य जगत्कारणत्वपक्षे केवलनिमित्तकारणत्वमेव भवेदिति पञ्चमनिरूपणे सप्तनवतितमश्लोकतद्व्याख्यानाभ्यां विस्तरेण दर्शयिष्यामः ॥ ७९॥

अ०॥ आधिदैविकस्य पूर्वावस्थां परित्यज्यावस्थान्तरप्राप्तिः परिणाम इति परिणामलक्षणोक्तमुपादानत्वं च वारयति **पारिणामिकमिति**—

मू॥ पारिणामिकमीशस्य प्रकृतित्वं भवेद्यदि।
निष्कलत्वश्रुतेर्भङ्गोऽप्यनित्यत्वमदातृता ॥ ८० ॥

व्या॥ यथा क्षीरात् तत्परिणामभूतदधिनवनीतादेरभिन्नत्वात् तदानीं क्षीरत्ववैशिष्ट्येन स्वरूपाभावाच्च न तस्य दातृत्वं संभवति तद्वदित्यर्थः ॥ ८० ॥

अ०॥ आद्यमुपादानद्वयमैश्वरमिति चतुस्सप्ततितमादिश्लोकद्वयेनोक्त्वा तृतीयं चतुर्थं च जैवमित्याह **जीवइति**—

मू॥ जीवे जगद्विवर्तं वाऽद्ध्यस्तं वा तददेयता।
स्वान्यभोक्तुरभावाच्च भ्रान्तिमात्रत्वतः फले ॥ ८१ ॥
अतस्त्यादद्वितीयत्वं स्वात्मनो नेश्वरे भवेत् ॥ ८१॥ ॥

व्या॥ पंचमन्त्वीश्वरस्येव जीवस्यापि दोषावहमिति भावः ॥ ८१॥ ॥

अ० ॥ आत्मनस्तु कामाय सर्वं प्रियं भवति। आत्मा वा अरे द्रष्टव्यश्श्रोतव्यो मन्तव्यो निदिद्ध्यासितव्यो मैत्रेयि आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितं भवतीति बृहदारण्यश्रुतिं तत्समानप्रमेयां 'यतो वा इमानि भूतानि जायन्त इत्यादितैत्तिरीयकश्रुतिं च तदर्थनिर्द्धारणपरामधिकरणरत्नमालां च तस्याः मूलभूतानि 'वाक्यान्वयात् ।अथातो ब्रह्मजिज्ञासा। जन्माद्यस्ययत इत्यादिसूत्राणि च स्वात्मन्येव जगत आद्ध्यासिकत्वप्रदर्शनायोदाहरति **आत्मेति**—

मू॥ आत्मा द्रष्टव्य इत्युक्तस्संसारी वा परेश्वरः।
संसारी पतिजायादिभोगप्रीत्याऽस्य सूचनात् ॥ ८२ ॥
अमृतत्वमुपक्रम्य तदन्तेऽप्युपसंहृतम्।
संसारिणमनूद्याथ परेशत्वं विधीयते ॥ ८३ ॥
इत्यत्रोद्देश्यभूतोऽस्मि मज्ज्ञानात्सर्वधीश्श्रुता।
यद्यस्म्यहमुपादानं प्रतिज्ञा सा भवेदिति ॥ ८४ ॥
जायते ब्रह्मजिज्ञासाऽद्वितीयत्वावगाहिनी।
स्वात्मन्येव यदा तस्य जिज्ञासोस्तन्निवर्तकात्॥ ९५ ॥
जन्मादिसूत्रतस्सर्वं सौत्रात्त्वत्तो यदर्थकात्।
भवत्यतोऽसि ब्रह्मेति विधानात्प्रकृतिस्स्वयम् ॥ ८६ ॥
अतोऽपि सूत्रकाराद्यैर्नेशे प्रकृतितोच्यते ॥ ८६॥ ॥

व्या ॥ आत्मा द्रष्टव्य इत्याधिकरणरत्नमालाश्लोकद्वयार्थस्तु तद्विषयश्रुत्यैवावगम्यते आत्मा वारे द्रष्टव्यश्श्रोतव्य इति श्रुतिमूलकस्यास्य 'अथातो ब्रह्मजिज्ञासेति सूत्रस्यायमर्थः स्वात्मजगतोर्नित्यानित्यत्वविवेकानन्तरं उद्देश्यभूते स्वात्मनि प्रतिज्ञाश्रुत्याभिप्रेतजगदुपादानत्वसर्वज्ञत्वादेः ज्ञानाभावात्आवृतत्वाद्वा कुतो ब्रह्मभवामीति जिज्ञासा भवतीति शेषः ॥

एवमेव वाचस्पतेरप्यभिमतम् तज्जिज्ञासानिवर्त्तकं तु 'जन्माद्यस्य यत" इति सत्रं तत्सूत्रद्वयार्थं दर्शयति इत्यत्रेत्यादिना। त्वत्तः सर्वजगज्जन्मादिकम् भवतीत्यन्वयः। फलितमाह प्रकृतिस्स्वयमिति जिज्ञासोश्श्रद्धातिशयपरीक्षार्थं श्रुतिसूत्रयोः स्वात्मनः सामान्यतो यच्छब्देन निर्देश इति भृगुकर्तृकात् श्रद्धातिशयकृतविचारादवगम्यते तथा हि ॥

अस्मत्पिता वरुणस्तावत् 'यतो वा इमानि भूतानि जायन्त इत्यादिश्रुतिगत-यच्छब्देन जगज्जन्मादिकारणभूतं पदार्थमुद्दिश्य तस्य 'तद्विजिज्ञासस्व तद्ब्रह्मे'ति वाक्येन ब्रह्मत्वमादिदेश तदन्यो ब्रह्मज्ञस्तु 'मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम्। मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहं'मित्यादिवाक्यैः जगज्जन्मादिकारणभूतं अहंपदार्थमुद्दिश्य तत्र ब्रह्मत्वमवगच्छति अतो मम पितृवाक्यगत यच्छब्दस्य अस्मत्पदगम्येऽहंपदार्थे शक्तिग्रह इति निश्चित्य भृगुरहमिति प्रतीयमानेऽन्नमयादिकोशचतुष्टये क्रमात्साकल्येन ब्रह्मलक्षणानवगमे सति सौषुप्ते स्वात्मनि जगज्जन्मादिकारणत्वं निर्धारितवान् ॥ ८६॥ ॥

अ०. ॥ इदानीं सता सोम्य तदा संपन्नो भवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतो भवतीत्युपक्रम्य ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसीति छान्दोग्यश्रुतिञ्च तदर्थनिर्णायकम् 'स्वाप्ययादिति, सूत्रं च तदर्थोपपत्तिपरां स्वाप्नसौषुप्ततत्त्वबोधिनीम्' यथा गार्ग्य मरीचयोऽर्कस्यास्तङ्गच्छतस्सर्वा एतस्मिन् तेजोमण्डल एकीभवन्ति ताः पुनः पुनरुदयतः प्रचरन्ति एवं ह वा एतत्सर्वं परे देवे मनस्येकीभवतीत्युपक्रम्य यथा सोम्य वयांसि वासो वृक्षं संप्रतिष्ठन्ते एवं ह वा एतत्सर्वं पर आत्मनि संप्रतिष्ठते पृथिवी च पृथिवीमात्रा चेत्यादिप्रश्नोपनिषदञ्चार्थतः सङ्गृह्य प्रतिज्ञातार्थं प्रमाणयति **सतेति**—

मू॥ सता सोम्येत्यादिवाक्यात्स्वाप्ययादिति सूत्रतः ॥ ८७ ॥
परे देवे मनस्येकीभवत्येतदिति तेः।
स्वप्ने जाग्रत्कालिकानां लयाधिकरणस्य हि ॥ ८८ ॥
समनस्कस्य विज्ञानमयस्यापि चिदात्मनः।
जगत्प्रकृतिभूतस्य मनसश्च लयो यतः ॥ ८९ ॥
सुप्तौ स्वसिञ्ज्ञायतेऽतो नेशे प्रकृतितोच्यते ॥ ८९॥ ॥

व्या॥ सतेति श्रुतिगतस्य कारणवाचिनः चेतनाचेतनोभयसाधारणस्य सच्छब्दस्याचेतनप्रधानादिपरत्वव्यावृत्तये 'स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतो भवति स आत्मा तत्त्वमसीति' वाक्यानामभ्यासेन सुषुप्त्याद्यवस्थासु अनुस्यूतस्य जगदुपादानमनोऽज्ञानतादात्म्यापन्नस्य स्वात्मन एव ग्रहणात् नाधिदैविकस्योपास्यस्य प्रकृतित्वं सिद्ध्यतीति भावः। अवतरणोक्तप्रश्नोपनिषदर्थस्तावत् पञ्चमनिरूपणे षोडशश्लोकावतरणात् विस्पष्टमवगम्यताम्॥

अत्रोदाहृतछान्दोग्यवाक्यार्थस्तु नवमनिरूपणेऽष्टाशीतितमादिश्लोकतद्व्याख्यानैर्विशेषतोऽवधार्यताम् ॥ ८९॥ ॥

अ० ॥ इदानीं तत्समनन्तरसूत्रमूलभूतां पूर्वसूत्रानुसारिणीं त्वंपदवाच्ये स्वात्मनि जगदप्ययोत्पत्तिविधायकत्वेन नवमनिरूपणे द्व्यशीतितमादिश्लोकैर्वक्ष्यमाणप्रकारेण च तत्त्वंपदवाच्यैक्यपरां प्रथमश्लोकव्याख्याने व्याख्यातां 'यदा सुप्तस्स्वप्नं न कञ्चन पश्यतीत्यादि' कौषीतकीश्रुतिं 'आत्मन आकाशस्संभूत' इति तैत्तिरीयकादिश्रुतीश्च तन्मूलकं गतिसामान्यादिति सूत्रं चार्थतस्सङ्गृह्य प्रतिज्ञातार्थं प्रमाणयति **यदेति**—

मू॥ यदा सुप्तस्तदैनं हि वागप्येति च नामभिः ॥ ९० ॥
चक्षुश्च सर्वरूपैश्चेत्येवं कौषीतकीश्रुतेः ।
स्वस्माद्वचोमादिकं जातमिति श्रुत्यन्तरादपि ॥ ९१ ॥
अन्यासां गतिसामान्यादिति सूत्रान्तरादपि ।
स्वस्योपादानतादेशाद्वाच्यैक्यं सर्वसम्मतम् ॥ ९२ ॥

व्या ॥ गतिसामान्यादिति सूत्रमर्थतस्सङ्गृह्नाति **अन्यासां गतिसामान्यादिति** पूर्वसूत्रेणोदाहृतानां श्रुतीनां तात्पर्येण सह श्रुत्यन्तराणां गतेरपि समानत्वादित्यर्थः। शेषस्सुगमः ॥ ९२ ॥

अ०. ॥ यत् द्वैतं न पश्यति पश्यन्वै तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात् न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येदिति बृहदारण्यश्रुतिं तन्मूलकं 'ज्ञोऽत एवेति' सूत्रं च 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदिति श्रुतिं च सुषुप्तिकाले स्वात्मनि विलीनत्वात् जगतो न दर्शनमस्ति मुक्तिदशायां मूलाज्ञानेन सहोच्छिन्नत्वाज्जगतो न दर्शनमस्तीति क्रमात् निर्णायकम् 'स्वाप्ययसंपत्योरन्यतरापेक्षमाविष्कृतं हीति' सूत्रं चार्थतस्सङ्गृह्य प्रतिज्ञातार्थे संवादयति **ब्रह्मत्वादिति**—

मू॥ ब्रह्मत्वादेव चिद्रूपश्चित्सुषुप्तौ न लुप्यते ।
द्वैतादृष्टिर्द्वैतलोपान्नहि द्रष्टुरिति श्रुतेः ॥ ९३ ॥
सुषुप्तौ च विमोक्षे च द्वैतादर्शनबोधकात् ।

शास्त्रात्स्वाप्ययसंपत्त्योरिति सूत्रान्तरादपि ।
स्वस्योपादानतादेशान्नेशे प्रकृतितोच्यते ॥ ९४॥ ॥

व्या॰ ॥ ब्रह्मत्वादेव जीवस्येति शेषः। सुषुप्तौ द्वैतदर्शनाभावे हेतुमाह द्वैतलोपादिति तत्र चिदस्तीत्याह 'नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वादिति श्रुतेः स्पष्टमन्यत् ॥ ९४॥ ॥

अ० ॥ एवमेव जगत्सृष्टिपराणां सर्वश्रुतीनां स्वात्मन्येव गतिनिर्णायकम् 'कारणत्वेन चाकाशादिषु यथा व्यपदिष्टोक्तेरिति' सूत्रं चार्थतः संगृह्य प्रतिज्ञातार्थं प्रमाणयति **कारणत्वेनेति—**

मू॥ कारणत्वेन शास्त्रेषु स्वात्मोक्तेरिति सूत्रतः ।
स्वस्योपादानतादेशान्नेशे प्रकृतितोच्यते ॥ ९५॥ ॥

स्पष्टोऽर्थः ॥

अ०॥ 'अहं ब्रह्मास्मि' 'अहमेवेदं सर्वम्' 'त्वं ब्रह्मासि' 'तत्त्वमसी'त्यादिश्रुतिश्च तन्मूलकम् 'आत्मेति तूपगच्छन्ति ग्राहयन्ति चेति' सूत्रं चार्थतः संगृह्य वाच्यैक्यापत्तिरस्माकमिष्टैवेत्यत्र प्रमाणयति **पश्यन्तीति—**

मू॥ पश्यन्ति कारणत्वेन स्वात्मानं ज्ञानिनस्तथा ॥ ९६ ॥
ग्राहयन्ति च शिष्य त्वं कारणं हि भवेरिति ।
सूत्रात्सोपाधिके जीवे प्रकृतित्वविधानतः ॥ ९७ ॥
साक्षाल्लक्ष्यैक्यवत्स्वस्मिन्वाच्यैक्यमपि सिद्ध्यति ।
श्रुतीनामन्वयस्त्वस्मिन्सप्तमे तु निरूपणे ॥ ९८ ॥
श्लोकस्य सप्तविंशस्य व्याख्यानादवगम्यताम् ॥ ९८॥ ॥

स्पष्टोऽर्थः ॥

अ०. ॥ यस्मिन्द्यौः पृथिवी चान्तरिक्षमोतं मनस्सह प्राणैश्च सर्वैः । तमेवैकं जानथात्मानमन्या वाचो विमुञ्चथामृतस्यैष सेतुरिति मुण्डकश्रुत्या द्युभ्वाद्यायतनस्य स्वात्मन एषोऽद्वितीयत्वप्रत्यय एव मोक्षप्रापक इत्युक्तम्। तामिमां श्रुतिं च

तदन्तर्गतयच्छब्दार्थपरस्यात्मशब्दस्य सर्वगतस्वात्मबोधकत्वनिर्णायकम् 'द्युभ्वाद्यायतनं स्वशब्दादिति'सूत्रं चार्थतः सङ्गृह्य प्रतिज्ञातार्थं प्रमाणयति **द्युभ्वादेरिति**—

मू॥ द्युभ्वादेरप्यायतनं स्वशब्दादिति सूत्रतः ।
स्वस्योपादानतादेशान्नेशे प्रकृतितोच्यते ॥ ९९॥ ॥

स्पष्टोऽर्थः ॥

अ० ॥ ननु पूर्वश्लोकेनोदाहृतश्रुतौ अन्या वाचो विमुञ्चथेति श्रूयते ताः कस्य वाचः तासां स्वार्थे प्रामाण्यस्वीकारे को बाध इति प्राप्ते ताः तत्तदुपासकानां वाचः तासां तत्तदुपास्येषु फलदातृत्वोपादानत्वांशे प्रामाण्यस्वीकारे षट्सप्ततितमादिश्लोकोक्तप्रकारेण उपासकान् प्रति उपास्यानां स्वप्रकृतिकफलदातृत्वाद्यभावापत्तेः न प्रामाण्यं भवतीति परित्यजतेत्यत्र च नेशे प्रकृतितोच्यत इति स्वेन व्यवस्थापितांशे च ।

पूर्वोक्ततत्तच्छ्रुतिभाष्यादेः गुणोपसंहारपादेऽष्टमाधिकरणीयस्यास्य आत्मगृहीतिरितरवदुत्तरादिति सूत्रस्य च तन्मूलभूतस्य 'आत्मन आकाशस्संभूत' इति तैत्तिरीयकस्येव लौकिकात्मशब्दस्येव च आत्मा वा इदमेक एवाग्र आसीदित्युपक्रम्य प्रज्ञानं ब्रह्मेत्यैतरेयस्य च ।

तथैव कतम आत्मा योऽयं विज्ञानमय इत्युपक्रम्य स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्मेति वाजसनेयकवाक्यस्येव सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यन्तरेणैवात्मशब्दमुपक्रम्य उदर्के स आत्मा तत्त्वमसीति छान्दोग्यस्य च तदधिकरणभाष्यस्य च तदधिकरणार्थनिर्णायकाणां श्लो ॥ आत्मा वा इदमित्यत्र विराट् स्यादथवेश्वरः । लोकसृष्टेर्नेश्वरस्स्याद्वावाद्यानयनाद्विराट् । भूतोपसंहृतेरीशस्स्यादद्वैतावधारणात् । अर्थवादो गवाद्युक्तिर्ब्रह्मत्वं हि विवक्षितम् । द्वयोर्वस्त्वन्यदेकं वा काण्वछान्दोग्यषष्ठयोः। उभयत्र पृथग्वस्तु सदात्मभ्यामुपक्रमात् । साधारणोऽयं सच्छब्दस्स आत्मा तत्वमित्यतः। वाक्यशेषादात्मवाची तस्माद्वस्त्वेकमेतयोरिति वर्णकद्वयात्मकाधिकरणरत्नमालावचनानां चानुग्राहकाणि स्वात्मनः जगत्प्रकृतित्वविधानपूर्वकमाधिदैविकानां तदभावपराणि ब्रह्मगीतायां द्वितीयाद्धयायवचनानि प्रमाणयति **तं हरमित्यादिना**—

म ॥ तं हरं केचिदिच्छन्ति केचिद्विष्णुं सुरोत्तमाः ॥ १०० ॥
केचिन्मामेव चेच्छन्ति केचिदिन्द्रादिदेवताः ।

केचित्प्रधानं त्रिगुणं तदन्यान्यपि केचन ॥ १०१ ॥

सर्वे वादाश्श्रुतिस्मृत्योर्विरुद्धा इति मे मतिः ।

इति श्रीपद्मजोऽस्वप्नस्स्वानुभूत्यनुसारतः ॥ १०२ ॥

अस्वप्नस्यापि रुद्रादेरिवेशस्यापि मायिनः ।

व्यामोहाभावतोऽज्ञाने तादात्म्याभावतोऽपि च ॥ १०३ ॥

फलप्रकृतिता भोग्यदातृत्वं च विरुद्ध्यते ।

इति ज्ञात्वा तदुभयमुपास्ये वदतां यतः ॥ १०४ ॥

शैवानां वैष्णवादीनां पूर्वपक्षित्वमब्रवीत् ।

अतस्स्यात्प्रकृतित्वं तु शिवादिष्वौपचारिकम् ॥ १०५ ॥

व्या ॥ तमिति प्रज्ञानं ब्रह्मेत्यैतरेयोपनिषद्गतमहावाक्ये त्वादेन पदेन 'आत्मा वा इदमेक एवाग्र आसीत् नान्यत्किञ्चन मिषत् स ईक्षत लोकान्नु सृजा' इत्युपक्रमवाक्ये यो विवक्षितः सृष्टेः प्राक्कालिको निष्प्रपञ्चः यमुद्दिश्य द्वितीयेन ब्रह्मपदेन ब्रह्मत्वं विवक्षितं तं स्वात्मानं यः क्रीडति तनौ जीव इत्यादिभिः प्रागुक्तश्लोकैरुदाहृतश्रुतिसूत्राद्युक्तप्रकारेणाहमेव निखिलजगदुपादानकारणमित्यजानन्तः केचिदुपासकाश्शिवादिकमेव जगदुपादानत्वेन वक्तुमिच्छन्तीति लटः प्रयोगेण नाद्यापि तेषामभीष्टसिद्धिरिति ब्रह्मणोऽभिप्रायः तत्रोपपत्तिं दर्शयति कविः इति श्रीपद्मजोऽस्वप्न इत्यादिना । श्लो । अन्यथा गृहतस्स्वप्नो निद्रा तत्त्वमजानत इति श्रीगौडपादकारिकयाऽन्यथागृहतः पुरुषस्य यो धर्मः स स्वप्न इति च स्वात्मतत्वमजानतः यो धर्मः सा निद्रेति चोक्तम् ।

तथा च सति ब्रह्मविष्णुरुद्रमहेश्वराणां मद्ध्ये एकैकस्यापि स्वस्वरूपे स्वप्राप्त्यान्यथाग्रहणरूपैद्वैताद्ध्यासाभावप्रदर्शनार्थं योगरूढिसिद्धोऽस्वप्न इति विशेषणम् तद्विशेषणसिद्धये व्यामोहाभावादिहेतुद्वयमुक्त्वा परमते फलितमाह अतस्स्यादिति ॥ १०५ ॥

अ० ॥ किञ्च प्रतिज्ञातार्थे भगवत्पादकृतमहावाक्यदर्पणवचनमपि प्रमाणयति **न ब्रह्मणेति**--

मू ॥ न ब्रह्मणा नापि शिवेन विष्णुना
स्वप्नप्रपञ्चो न कदापि सृष्टः ।
स्वयं धिया कल्पित एव भाति
तथैव जाग्रत्यपि बुद्धिकल्पितः ॥ १०६ ॥

व्या ॥ ब्रह्मादीनामुपास्यमानत्वेऽप्यनुपास्यमानत्वे वा कदाचिदपि न तैः स्वप्नादिप्रपञ्चस्सृज्यत इत्येतत् पञ्चमनिरूपणे पञ्चाशीतितमश्लोकेन तत्पूर्वापरैश्शिवगीतागत-श्रीरामवाक्यैश्च विस्तरेणावगम्यताम् ॥ १०६ ॥

अ० ॥ एवं जगतो व्यावहारिकसत्तावादबाधपूर्वकं प्रातिभासिकसत्तावादप्रवचनप्रसङ्गादुपस्थिते प्रागुक्तेन सार्धेन पञ्चपञ्चाशेन श्लोकेन प्रदर्शिते स्वात्मसत्तां विना निस्सत्तावादे जिज्ञास्यविशेषं प्रश्नपूर्वकं दृष्टान्तादिभिः संप्रत्याययति **स्वात्मेति**--

मू ॥ स्वात्मसत्तां विना सत्ता जगतोऽस्य स्वतो न चेत् ।
जानामि तन्न जानामीत्याद्युक्तेः का गतिर्यदि ॥ १०७ ॥
सर्वं ब्रह्मेत्यादिवाक्यं श्रुतिर्वक्तीति वाक्यतः ।
श्रुतिर्विधिञ्च वक्तीति वाक्यादस्मात्सकर्मकात् ॥ १०८ ॥
श्रुतेरकर्म विध्यादि वाक्यं यत्कर्मवद्यथा ।
भातीत्यत्र गतिस्स्यान्नश्श्रुतित्वाद्विधिवाक्ययोः ॥ १०९ ॥
तथाऽऽद्यादृतवद्भामीत्यन्यवाक्याद्गतिं ब्रुवे ।
स्वप्ने दृष्टाद्गजादीनां पार्श्वात्पार्श्वान्तरे सदा ॥ ११० ॥
दृष्टाच्चित्रगजादीनां पार्श्वात्पार्श्वान्तरेऽत्र च ।
त्रिविधास्वपि सत्तासु ह्येकस्या अप्यसंभवात् ॥ १११ ॥
पार्श्वान्तरात्मना नैव भामि तद्वज्जडात्मना ।
इति जाने न जाने चेत्यादिवाक्याद्गतिर्भवेत् ॥ ११२ ॥

व्या ॥ स्वात्मजगतोरेकसत्तावादे जानामीत्यादिवाक्यार्थावगतौ श्लो ॥ सर्वं ब्रह्मेति कल्याणी श्रुतिर्वदति सादरमिति ब्रह्मगीतादिवचनमर्थतस्संगृह्योदाहरति सर्वमित्यादिना

नन्विदं ब्रह्मवाक्यं तावत् सर्वं जगत् ब्रह्माभिन्नमित्यमुमर्थं श्रुतिर्वदतीति बोधयति वा किं वा सर्वं ब्रह्मेत्येवंरूपेयं श्रुतिः स्वार्थं वदतीति बोधयति उत जगतः ब्रह्माभेदपरं सर्वं ब्रह्मेति वाक्यं तद्वाक्यरूपा श्रुतिर्वदतीति बोधयतीत्यनिर्धारिते कथं तद्वाक्यं स्वपक्षसाधकत्वेन परिगृह्यत इति चेत् भवांस्तावत् पृष्टव्यः आद्ये सा श्रुतिः ब्रह्माभेदपरवाक्यातिरिक्ता वा तद्वाक्यरूपा वा नाद्यः तद्वाक्यातिरिक्तायाः तद्वाक्यार्थबोधकत्वायोगात् नान्त्यः तत्र स्वपक्षहानिः परपक्षसिद्धिश्च द्वितीये तु भवतैव तच्छ्रुतेर्वचनकर्तृत्वाङ्गीकारात् किं सा श्रुतिरर्थाभिलाषकाद्वचनाद्भिन्नाऽभिन्ना वा उभयथापि प्रथमपक्षोक्तदोषद्वयापत्तिः ।

ततस्तृतीयपक्षपरिग्रहे तु न कश्चिद्दोषः ।

एवं स्वात्मजगतोरेकसत्तावादिनामस्माकं जानामीत्यादिसकर्मकवाक्यार्थावगतिं दर्शयित्वा न जानामीति वाक्यार्थावगतिं च सदृष्टान्तमाह स्वप्ने दृष्टादित्यादिना **अत्र च** जगत्यपीत्यर्थः ॥ ११२ ॥

अ० ॥ एवं स्वात्मजगतोरेकसत्तानुसारेण प्रदर्शितः सकर्मकवाक्यार्थो बहुश्रुत्यारूढ इति प्रतिजानाति **भेदेति**—

मू ॥ भेददृष्ट्यनुसारेण प्रवृत्तं कर्तृकर्मणोः ।
सकर्मकं यद्वाक्यं तदकर्मकतया श्रुतौ ॥ ११३ ॥
अभेदस्यानुरूपेण भासते कर्तृकर्मणोः ॥ ११३॥ ॥

स्पष्टोऽर्थः ॥

अ० ॥ तत्र 'ब्रह्मैव सन् ब्रह्माप्येती'ति श्रुतिं प्रमाणयति **ब्रह्मैवेति**—

मू ॥ ब्रह्मैव संस्तदप्येतीत्यात्मनि ब्रह्मता भवेत् ॥ ११४ ॥

स्पष्टोऽर्थः ॥

अ०॥तत्रोपपत्तिपरां 'ब्रह्मविद्ब्रह्मैव भवती'ति, श्रुतिं संवादयति **ब्रह्मविदिति**—

मू ॥ ब्रह्मविद्ब्रह्म भवति नेतरश्चेति विश्रुतेः ॥ ११५ ॥

स्पष्टोऽर्थः ॥

अ० ॥ ब्रह्मविदिति सकर्मकवाक्यस्य तदुत्तरवाक्यानुसारेण तात्पर्यमाह **अहं ब्रह्मेति**—

मू॥ अहं ब्रह्मेति यो भाति ब्रह्मैव भवति स्वयम् ॥ ११५॥ ॥

अ० ॥ उक्तार्थे श्रुत्यन्तरं प्रमाणयति **यस्येति**—

मू॥ यस्यामतं तस्य मतं मतं यस्य न वेद सः ।
इति व्यावर्त्यते स्पष्टं कर्मत्वं स्वात्मनः किल ॥ ११६॥ ॥

स्पष्टोऽर्थः ॥

अ० ॥ एवं जीवब्रह्मणोरभेदपरवाक्यानुसारेण तद्भेदपरसकर्मकवाक्यस्य नखार्थे तात्पर्यमिति दर्शयित्वा इदं सर्वमसृजतेति सृष्टृजगतोः भेदपरसकर्मकश्रुतेरपि 'सत्यं चानृतं च सत्यमभवदिति' तदभेदपरश्रुत्यनुसारेण न खार्थे तात्पर्यमित्याह **तथेति**—

मू॥ तथात्माऽसृजताशेषमिति कर्मनिषिद्धये ॥ ११७ ॥
अभवच्चेतनं सत्यमनृतं चेत्यकर्मकम् ।
वाक्यं स्वात्मातिरिक्तस्य निस्सत्वायापि संभवेत् ॥ ११८ ॥
कर्मजत्वेन सत्यत्वे युज्यतेऽसृजतेति हि ।
प्रातिभासिकसत्वेऽस्यासृजतेति न युज्यते ॥ ११९ ॥
वस्तुतन्त्रत्वतो यद्वत्सर्पभ्रान्तिर्न सृज्यते ॥ ११९॥ ॥

स्पष्टोऽर्थः ॥

अ० ॥ पुनश्च प्रतिज्ञातार्थे श्रुत्यादिरस्तीत्याह **अहमिति**—

मू॥ अहमन्यवदाभामि ह्यहमेव शरीरवत् ॥ १२० ॥
अहं शिष्यवदाभामीत्येतदागमतोऽपि च ।
ब्रह्मरूपतया ब्रह्म केवलं प्रतिभासते ॥ १२१ ॥
जगद्रूपतयाप्येतद्ब्रह्मैव प्रतिभासते ।
विद्याविद्यादिरूपेण भावाभावादिभेदतः ॥ १२२ ॥
गुरुशिष्यादिभेदेन ब्रह्मैव प्रतिभासते ।

ब्रह्म सर्वमिदं ज्ञानं ब्रह्मप्राप्तेस्तु साधनम् ॥ १२३ ॥
इति श्रीब्रह्मगीतायां द्वादशाद्ध्यायतोऽपि च ।
त्रिपञ्चाशस्य पद्यस्य व्याख्याने प्राक्समीरिते ॥ १२४ ॥
उक्तेभ्यो ब्रह्मवाक्येभ्यः कर्मत्वं जगतो न हि ॥ १२४॥॥

स्पष्टोऽर्थः ॥

अ० ॥ निरुपाधिकत्वेनाद्वितीयस्य तत्त्वंपदलक्ष्यार्थभूतस्य प्रत्यगात्मनः सजातीयपरिच्छेदाभावात् तस्यैव भवद्भिरुदाहृतश्रुतिसूत्रभाष्यस्मृत्यादिभिः जगत्प्रकृतित्वमभिहितम् न तु सोपाधिकस्य स्वात्मन इत्याशंकामनूद्य निराकरोति **नन्विति**-

मू॥ ननु भावाभावरूपाज्ञानासम्बन्धिनी तु या ॥ १२५ ॥
चित् तस्याः कारणत्वं हि श्रुतिसूत्रमतं यदि ।
तदा स्वाप्ययसंपत्त्योरपेक्ष्यान्यतरां हि यत् ॥ १२६ ॥
द्वैतस्यादर्शनं प्रोक्तमिति सूत्रं कथं वदेत् ।
शुद्धे कारणतां तत्र तदभावं वदत्यतः ॥ १२७ ॥
विशिष्टे कारणत्वं स्यान्निरुपाधौ विमुक्तता ।
स्वामिन्नेवं विजानीमः कुतर्का हृदयाद्गताः ॥ १२८ ॥
कृतार्थाः स्मो भगवतां कृपया छिन्नसंशयाः॥ १२८॥ ॥

व्या ॥ स्वाप्ययसंपत्त्योरन्यतरोपक्षमाविष्कृतं हीति सूत्रमर्थतः सङ्गृह्णाति **स्वाप्ययेत्यादिना** तत्सूत्रार्थस्तु प्राक्तिनवतितमश्लोकतदवतरणाभ्यामवगन्तव्यः कथं तर्हि श्रुतिसूत्रार्थ इत्यत आहात इति **विशिष्टेन** जानामीति मूलाविद्यावत्तीत्यर्थः शिष्याः विनीतास्सन्तःस्वकृतार्थतामावेदयन्ति **स्वामिन्नित्यादिना**--

अ० ॥ इदानीं प्रश्नपूर्वकमध्यासनिरूपणाख्यैतच्छास्त्रश्रवणजन्यं शिष्याणामात्मानात्मीयविशेषविज्ञानं दर्शयति **चिन्मात्रात्मनीति**--

मू॥ चिन्मात्रात्मनि कल्पनात्त्रिजगतः किं स्याद्वयं कारणं ।
तादात्म्यात्स्वसदात्मनास्य सह किं तद्भानसंगाच्च किम् ॥

सत्त्वं स्फूर्तिरवेक्ष्यते सदभिदाभावे तु शून्यं भवेद्
देहैस्तद्गुणकैरभेदकरणात्किं शून्यता नान्यथा ॥
अतोऽस्य सत्ताशून्यत्वादद्वितीया वयं सदा ॥ १३० ॥
प्रातिभासिकतापक्षे देहैस्तादात्म्यविभ्रमात् ।
बद्धा अभूम मुक्ताश्च भवामस्तं विना गुरो ॥ १३१ ॥

व्या॥ इदानीमाचार्यः प्रत्यगात्मनि जगत्त्रयाध्यासवेदनफलं पृच्छति **चिन्मात्रेत्यादिना** शिष्या उत्तरं ददति **वयं कारणमिति** अवस्थात्रयसाक्षित्वेन प्रत्यग्भूताः वयमेव जगत्कारणमित्यर्थः ॥ पुनश्चाचार्यस्सच्चैतन्याभ्यां जगदध्यासे फलं पृच्छति **तादात्म्यादित्यादिना** शिष्यास्तदुत्तरं ब्रुवन्ति **सत्वमित्यादिना** पुनश्चाचार्यः प्रत्यगात्मनोऽनात्मतद्धर्मैस्साकमाध्यासिकसंबन्धज्ञान् परिशोधयति **देहैस्तद्गुणकैरभेदकरणात्किमिति** पुनश्शिष्या विशिष्य तदुत्तरं कार्यकारणयोरेकसत्तावादानुसारेण वदन्ति **शून्यतेत्यादिना** । स्वतस्सत्ताशून्येन जगता आत्मनस्तादात्म्याध्यासेन शून्यतैव भवति 'असन्नेव स भवति । असद्ब्रह्मेति वेद चे'दिति श्रुतेः असता सह तादात्म्याकरणे तु न शून्यात्मता भवतीत्याह **नान्यथेति** । अज्ञानादेः प्रातिभासिकसत्तामादाय चोत्तरं वदन्ति **प्रातिभासिकतेत्यादिना**। शेषस्सुगमः ॥ १३१ ॥

अ०. ॥ इदानीमेतदध्यासनिरूपणस्य श्रवणफलमाह **आद्य इति**—

मू॥ आद्ये निरूपणे सम्यज्ज्ञाते मुक्तिरभूद्यतः ।
अतो वः किमु वक्तव्यं ज्ञाते दर्शनिरूपणे ॥ १३२ ॥

व्या॥ दर्शनिरूपणे एतच्छास्त्रगम्ये दशविषय इति यावत् ।

अ०॥ आद्यनिरूपणसमाप्तिं दर्शयति **एवमिति**—

मू॥ एवमद्वैतसिद्धान्तचन्द्रिकायां यथामति ।
अध्यारोपापवादाभ्यां ज्ञातव्यमिति शासनात् ॥ १३३ ॥
स्वरूपवेदनायात्र पञ्चाध्यासा निरूपिताः ।
चन्द्रिकाचार्यसंज्ञेन पूर्वाचार्यप्रसादतः ॥ १३४ ॥

व्या ॥ यथा मति पञ्चाध्यासा निरूपिता इति संबन्धः ॥

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीरामब्रह्मकृष्णानन्देन्द्रभगवत्पादशिष्यश्रीचन्द्रिकाचार्याख्ययतीश्वरविरचितायाममृतरसझरीनामकव्याख्यानोपेतायामद्वैतसिद्धान्तगुरुचन्द्रिकायां प्रथमं स्वात्मनि जगदध्यासनिरूपणं संपूर्णम् ॥

हरिः ओं तत्सत् ॥

——:o:——

हरिः ओं ।

अद्वैतसिद्धान्तगुरुचन्द्रिकायां ।

द्वितीयं स्वात्मजगतोरेकसत्तावादादिनिरूपणम् ॥

——:o:——

अ० ॥ भावाद्भ्रान्तिरभावाद्वेति भ्रमकारणस्याज्ञानस्य यत् स्वरूपं प्रथमनिरूपणारंभे शिष्यैर्वर्णितं तद्विशेषेण प्रतिपिपादयिषुः प्रारिप्सितशास्त्राभिप्रायाभिव्यञ्जकमर्धनारीश्वरमनुसन्दधाति **कार्येति**——

मू ॥ कार्यकारणयोरेकां व्यक्तिमादेष्टुमुद्यता ।
अर्द्धेनारीतया स्वार्द्धं सृष्टं येन शिवोऽस्म्यहम् ॥

व्या ॥मयि कल्पितस्याम्बिकार्धस्येव सर्वोपादाने प्रत्यगात्मनि त्वयि कल्पितस्य जगतो न प्रत्यगतिरिक्तव्यक्तिरस्तीति स्वनिदर्शनेन प्रत्याययन्तमर्द्धनारीश्वरमभेदेन अनुसन्दधामीत्यर्थः ॥ १ ॥

अ० ॥ कार्यकारणयोरेकसत्तादिप्रयोजकं प्रश्नपूर्वकमाह **स्वात्मेति**——

स्वात्मन्यध्यस्तकार्ये किमेकं सत्ताभिदाप्रदम् ।
नानावाऽऽत्मतमःकर्म सत्ता स्यात्तत्तदीयके ॥ २ ॥

व्या ॥ अत्र पक्षभेदेन जगत्प्रकृतेः स्वात्मनः तमोरूपाज्ञानस्य च द्रव्यरूपापूर्वाख्यकर्मणश्च या पृथक्पृथक्सत्ता तस्याः क्रमाज्जगति चित्सत्तामात्रहेतुत्व

तदतिरिक्तप्रातिभासिकसत्ताजनकत्वं च तदतिरिक्तव्यावहारिकसत्ताप्रदत्वं चावगम्यतां तथाहि श्लो। ब्रह्मरूपतया ब्रह्म केवलं प्रतिभासते। जगद्रूपतयाऽप्येतत् ब्रह्मैव प्रतिभासते॥ विद्याविद्यादिरूपेण भावाभावादिभेदतः। गुरुशिष्यादिभेदेन ब्रह्मैव प्रतिभासते॥ ब्रह्म सर्वमिदं ज्ञानं ब्रह्मप्राप्तेस्तु साधनमिति सर्वशास्त्रार्थसंग्राहकेण ब्रह्मगीताया द्वादशाद्ध्यायवचनजातेनोत्तममधिकारिणं प्रति स्वात्मजगतोरेकसत्तावादं निरूप्य अनन्तरम्। श्लो॥ जगन्मायेति विज्ञानमज्ञानं फलतो भवेत्। तथापि परमाद्वैतज्ञानस्येदन्तु वेदनं॥ उपकारकमत्यन्तं तद्दृष्ट्वा वक्ति तच्छ्रुतिरिति वाक्येन जगति प्रातिभासिकत्वज्ञानस्यान्यथाग्रहणत्वेऽपि तस्य स्वात्मनि निरंकुशाद्वितीयत्वग्रहणे महाप्रतिबन्धकभूतं यत् जघन्येनाधिकारिणा कर्मिणा गृहीतं व्यावहारिकसत्यत्वं तद्व्यावर्त्तकत्वात्परमोपकारकत्वेन स्वात्माभिन्नस्य प्रातिभासिकत्वं चोपन्यस्य चतुर्थनिरूपणे सार्धत्रिंशादिश्लोकत्वेन च पञ्चमनिरूपणेऽष्टषष्टितमादिश्लोकत्वेन चोदाहृत्य व्याख्यातेन॥ श्लो। यथा भातस्वरूपेणेत्यादिना जगत्सत्यत्वमनूद्य। श्लो॥ अतीव पक्वचित्तस्य चित्तपाकमवेक्ष्य सा। सर्वं ब्रह्मेति कल्याणी श्रुतिर्वदति सादरमिति तदानन्तरादस्माच्छ्लोकात् तत्प्राक्तनेभ्यो ब्रह्मवाक्येभ्यश्च उत्तमादीनामधिकारिणां बुद्ध्यनुसारेण जगति स्वात्मसत्तादित्रयमुपन्यस्तं ततः स्वात्मतमः कर्मसत्तायाःजगत्सत्तात्रयहेतुत्वं भवेत् किञ्चास्मिन्द्वितीयनिरूपणे तृतीयप्रदर्शकावसाने च चतुर्थप्रदर्शकारम्भे च तत्तदधिकारिबुद्ध्यनुसारेण त्रिविधसत्तासु अन्यतमाया उपदेष्टव्यत्वे प्रमाणानि च दर्शयिष्यन्ति॥ २॥

अ०॥ इदानीमस्मिन् द्वितीयनिरूपणे प्रतिपादनीयविषयान् दर्शयति **पक्षभेदेनेति**--

मू॥ पक्षभेदेन मायाया रूपभेदप्रदर्शकम्।
मायास्वरूपभेदेषु प्रमाणकथनं ततः॥ ३॥
भिन्नमायास्वरूपाणां पृथग्लक्षप्रदर्शकम्।
सिद्धिकारस्य तात्पर्यं तुरीयत्वेन कीर्त्यते॥ ४॥
भिन्नमायास्वरूपेषु हेतुत्वोक्तिस्ततः परम्।
विघ्नात्यन्ताभाव एव हेतुस्स्यादिति ये जगुः॥ ५॥
तन्निरासाय हेतुत्वं ध्वंसादेरुच्यते ततः।
सप्तमे कार्यकथनम्मायारूपानुगुण्यतः॥ ६॥

ततो लयभिदोक्तिस्स्यात् कार्याणां लक्षणं ततः ।
इत्येवं नवधा प्रोक्तं विज्ञेयानां प्रदर्शकम् ॥ ७ ॥

व्या ॥ प्रदर्शकमिति प्रमाणमित्यर्थः ॥ ७ ॥

अ० ॥ अधुना नवभिः प्रदर्शकैः प्रतिपादनीयविषये वक्तव्यपक्षे भेदान् प्रतिजानीते ॥ **नवभिरिति**—

नवभिस्तैः प्रमेये तु यत्तत्पक्षत्रयं ब्रुवे । ७॥ ॥

व्या ॥ स्पष्टोऽर्थः ॥ ७॥ ॥

॥ द्वितीयनिरूपणे प्रथमप्रदर्शकारंभः ॥

अ० ॥ इदानीं वक्ष्यमाणेषु प्रदर्शकेषु निरूपणीयानां पक्षत्रयाणां मध्ये द्वितीयतृतीयपक्षयोः स्वात्मनस्तमसा आवृतत्वं वृत्तिविषयत्वञ्च **कार्यस्य स्वात्मसत्तातिरिक्तसत्तारूपव्यक्तित्वञ्च** निरूपयिष्यन्नपि । 'यद्वैतन्न पश्यति पश्यन् वै तन्न पश्यति नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते अविनाशित्वात् न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत् पश्ये' दिति बृहदारण्ये षष्ठाध्यायगतश्रुत्या ।

अधिकरणरत्नमालाव्याख्यातृभिरेवं तत्र 'सुप्तौ जीवः कमपि न पश्यतीति, यत् लौकिकैरुच्यते 'तदसत् पश्यन्नेव **स्वयंप्रकाशमान एव** जीवस्तदा न पश्यती'ति भ्रान्त्या केवलं व्यपदिश्यते । कथं दर्शनमित्यत्र हेतुरुच्यते तत्र द्रष्टुरात्मनः स्वरूपभूतायाः दृष्टेर्विपरिलोपो न हि विद्यते विनाशराहित्यस्वभावत्वात् अन्यथा आत्मनि मनस्संयोगजन्यस्य गुणात्मकवृत्तिज्ञानस्य लोपवादिनोऽपि निस्साक्षिकस्य लोपस्य वक्तुमशक्यत्वात् कथं तर्हि लौकिकानां 'न पश्यती'ति भ्रम इत्यत्र हेतुमाह ब्रह्म चैतन्यादन्यत् क्रियाकारकफलरूपेण विभक्तं यत्पश्येत्–टि–**स्वरूपप्रकाशेन प्रकाशयेत्** तन्नास्तितस्य स्वाकारेण विनाशात् अतो जागरण इव द्रष्टृदृश्यव्यवहाराणामभावात् न पश्यतीति लौकिकानां भ्रम इति । तस्मात् चिद्रूपो जीवः न मनस्संयोगजज्ञानगुणक इति व्याख्यातया ।

तन्मूलकेन 'ज्ञोऽत एवेति, सूत्रेण च तदर्थविवरणपरया ॥ श्री ॥

'अचिद्रूपोऽथ चिद्रूपो जीवोऽचिद्रूप इष्यते । चिदभावात्सुषुप्त्यादौ जाग्रच्चिन्मनसा कृता ॥ ब्रह्मत्वादेव चिद्रूपश्चित्सुषुप्तौ न लुप्यते । द्वैताद्दृष्टिर्द्वैतलोपान्न हि द्रष्टुरिति श्रुतेः ।' इत्यधिकरणरत्नमालया च ॥ श्लो ॥ 'चित्तव्यापारनाशे तु तद्भावं सुरर्षभाः । स्वप्रकाशेन जानाति सुषुप्तौ वेद तामपि ॥' इति ब्रह्मगीतायां दशमाध्यायवचनेन च पश्यति पश्यन् दृष्टेः जानाति वेदेत्यादिपदानां स्वतः प्रकाशमानस्वरूपचैतन्यपरत्वावगमात् दृष्टेः जानाति वेदेत्यादिपदानां स्वतःप्रकाशमानस्वरूपचैतन्यपरत्वावगमात् तेषां पदानां ॥ श्लो ॥ 'यथा ऽयः पावकेनेद्धं भाति वै दहतीव च । तथा वेदोऽपि देवेद्धस्सर्वं वक्तीव भासते' ॥ इत्यात्मनः स्वतस्सिद्धस्वरूपप्रकाशातिरेकेणागमादिप्रमाणानां विषयग्राहकत्वनिरासकस्य यज्ञवैभवखण्डवचनस्य च ॥ श्लो ॥ ब्रह्मरूपतया ब्रह्म केवलं प्रतिभासते । जगद्रूपतयाऽप्येतद्ब्रह्मैव प्रतिभासते । विद्याविद्यादिभेदेन भावाभावादिभेदतः । गुरुशिष्यादिभेदेन ब्रह्मैव प्रतिभासत' इति ब्रह्मगीतायाः द्वादशाध्यायवचनगतस्य जाग्रत्कालिकविद्यादिपदस्य च 'अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् । आद्यत्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् ॥ न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भांति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' ॥ श्लो ॥ 'आदित्यचन्द्रानलतारकाद्या न भान्ति यस्मिन्ननिशं महान्तम् । प्रकाशमानं तमनु प्रभान्ति प्रकाशमस्यैव हि नेतरेषाम् ॥ आद्यो विकार आकाशस्सोऽस्ति भात्यपि च प्रियः । अवकाशस्तस्य रूपं तन्मिथ्या न तु तत्त्रयमि'ति श्रुत्यादिभिः प्रदर्शितेन भातीतिपदेनान्तःकरणपरिणामात्मकमिथ्याभूतवृत्तिज्ञानातिरिक्तब्रह्मचैतन्यपरेण समानार्थकत्वात् ॥

एतदुक्तं भवति सर्वस्य कार्यस्य ब्रह्ममात्रप्रकृतिकत्वेन तत्सत्तास्फुरणातिरेकेण तन्न्यूनसत्तास्फुरणाभावेन 'नेह नानास्ति किञ्चनेत्या'दि शास्त्रविचारभावमापन्नं सत् यथावत्स्वयं प्रकाशिष्यमाणात्मचैतन्यात्मकविद्यारूपेण तत्प्रागभावसहायात् अन्यथा भासमानात्मचैतन्यरूपविद्यारूपेण च जीवेशगुरुशास्त्रतद्विचारादिभेदेन च ब्रह्मैव प्रतिभासते ततो ब्रह्मविषयकं ज्ञानमज्ञानं वा ब्रह्मातिरिक्तं यत्किञ्चित्प्रातिभासिकसत्ताकं भ्रमादिकं वा नास्तीति ।

ननु यतः स्वात्मैव विद्यादिरूपेण प्रतिभासते ततस्तस्य प्रमाभ्रमविषयत्वं नास्तीत्युक्तं तन्न यथा घटः प्रकाशत इत्यत्र घटस्य प्रकाशाश्रयत्वं तत्प्रकाशविषयत्वं च भवति तद्वत्स्वात्मनोऽपि किं न स्यादिति चेत् विषमोऽयं दृष्टान्तः घटस्तावत्स्वतः प्रकाशरहितत्वात्परप्रकाश्यः परप्रकाश्यत्वन्तु घटालोकयोर्भिन्नस्वरूपत्वात् ततो घटं तन्निष्ठः प्रकाशः प्रकाशयतु नाम तथापि स्वात्मजगतोरेकसत्तापक्षे स्वात्मातिरिक्तस्य

पृथग्व्यक्त्यभावेन नित्यभानस्वरूपः स्वात्मा विद्याविद्यादिरूपेण भासत इत्यत्र न तस्य प्रततौष्ण्यप्रकाशात्मकसवितुरिव भानकर्तृत्वं भानविषयत्वं च संभवेत् भानस्य स्वात्मस्वरूपत्वं तु 'अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम्। आद्यत्रयं ब्रह्मरूपमिति श्रुत्या भानं ब्रह्मैव केवलमिति स्मृत्या च सिद्धमेवेति न भवदाशङ्कावकाशः ततो यत् प्रागुदाहृत्य व्याख्यातं तदेतत् वचनमवलंब्य प्रथमादिप्रदर्शकेष्वाद्यपक्षमुपपादयति **प्रतिबन्धकेति**—

प्रतिबन्धकरूपं यद्द्वैतविभ्रमजन्मनि ॥
ज्ञानं तत्प्रागभावस्स्यादज्ञानं भ्रमकारणम् । ८॥ ॥

व्या ॥ द्वैतविभ्रमजन्मनि द्वैतभ्रमस्य भोक्तृभोग्याद्यात्मना अन्यथा स्वतो भासमानस्य स्वरूपचैतन्यस्य जन्मनि **प्रतिबन्धकरूपं** 'नेह नानास्ति किञ्चन । आत्मैवेदं सर्वं । नान्योऽतोऽस्ति द्रष्टा । तत्त्वमसी' त्यादिश्रुत्या द्वैतासत्वे निवेदिते सति **यद् ज्ञानं** यथावत् स्वयंप्रकाशिष्यमाणं स्वरूपचैतन्यं **तत्प्रागभावः** तस्य यथावत् प्रकाशिष्यमाणात्मचैतन्यस्य प्रागभावसंज्ञः भोक्तृभोग्यादिरूपेणाऽन्यथा स्वयंप्रकाशमानात्मचैतन्यगतः सान्तो ह्यभावो **भ्रमकारणम्** भ्रमस्य भोक्तृभोग्यादिरूपेणान्यथाभासमानस्यात्मचैतन्यस्य सहकारिसाधनं **अज्ञानं** अज्ञानशब्दशब्दितं स्यात् न तस्य प्राक्कालिकत्वं विवक्षितं अन्यथा भावत्वमापद्येतेत्यर्थः ॥ ८॥ ॥

अ० ॥ इदानीं द्वितीयादिपक्षमाह **द्वितीयेति**—

द्वितीया ऽऽवारिका शक्तिस्तमो द्रव्यं तृतीयकम् ॥ ९ ॥

व्या ॥ आवारिकेति जीवे ब्रह्मत्वनिरतिशयानन्दत्वाद्याच्छादिनी **शक्तिः** द्रव्येतरा **द्वितीया** द्वितीयपक्षाभिमता मायेत्युक्ता तृतीयपक्षाभिमतां मायां विशिनष्टि **तमो द्रव्यं तृतीयकमिति** जीवे ब्रह्मत्वाद्यावारकं शक्तिमद्द्रव्यमित्यर्थः ॥

अ० ॥ प्रथमपक्षे उपपत्तिं दर्शयति **मायेति**—

मायाशक्त्योरसत्वं तु यस्माच्छ्रुत्या विधीयते ।
तस्माज्ज्ञानप्रागभावो भ्रमकारणमिष्यते ॥ १० ॥

व्या ॥ यस्मात् श्रुत्या 'तुच्छमिदं रूपमस्येति' श्रुत्या **मायाशक्त्योः** माया च शक्तिश्च मायाशक्ती प्राक् स्वरूपारकत्वेन निर्दिष्टे तयोः काल-

त्रये ऽप्यसत्वं विधीयते तस्मात् **ज्ञानप्रागभावः** ज्ञानस्य 'नेह नानास्ति किञ्चने' त्यादिशास्त्रार्थविचारभावमापद्य यथावत् स्वयं प्रकाशिष्यमाणस्य द्वैतासत्वगोचरस्य स्वरूपचैतन्यस्य प्रमातृप्रमाणादिरूपेणान्यथा स्वयं प्रकाशमानत्वप्रतिबन्धकत्वात् तस्य प्रागभावोऽन्यथा स्वयं प्रकाशमानात्मचैतन्यगताभावः **भ्रमकारणमिष्यते** भ्रमस्य प्रमातृप्रमाणाद्यात्मना अन्यथा प्रकाशमानात्मचैतन्यस्य कारणमित्येष्टव्यमित्यर्थः ॥ १० ॥

अ० ॥ 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवती'ति मुण्डकोपनिषन्मन्त्रेण प्रदर्शितस्य प्रश्नस्य प्रत्युत्तरत्वेन स यो ह वै तदच्छायमशरीरमलोहितं शुभ्रमक्षरं वेदयते' 'यस्तु सोम्य स सर्वज्ञस्सर्वीभवती' तीमां वक्ष्यमाणार्थपराम् यस्सर्वत्यागी यश्च सर्वैषणाविनिर्मुक्त एतदक्षरं जगदुपादानभूतं स्वात्मानं वेदितुरेवानया श्रुत्या सर्वज्ञत्वसर्वात्मकत्वयोरुपदेशात् वेदयते अहमस्मीति जानाति स सर्वज्ञस्सर्वात्मकश्च भवति ननु जगदुपादानभूतस्याक्षरस्य तदावारकेणाज्ञानेन सद्वितीयत्वे सति कथं पुनरेकविज्ञानेन सर्वविज्ञानासिद्धिरित्यत आह **अच्छायमिति** तमोरूपाज्ञानवर्जितमित्यर्थः । तथाऽपि लूताकीटस्येव सशरीरस्यैव उपादानत्वं स्यादित्यत आह । **अशरीरमिति** तथापि नैल्याध्यासाधिकरणस्य व्योम्न इव गुणित्वं स्यादत आह **अलोहितमिति** अलोहितपदं गुणान्तराभावानामप्युपलक्षणं यत एवं छायादिवर्जितमतः **शुभ्रमिति** । एवं तमोरूपाज्ञानादिभावपदार्थोपाधिकत्वस्य निषेधादक्षराख्यस्य प्रत्यगात्मनः द्वैतभ्रमसाधनभूतः पूर्वोक्तज्ञानप्रागभाव एवाज्ञानत्वेनाध्यवसीयते अन्यथा भ्रमानुपपत्तेरिति श्रुतिं प्रथमपक्षसिद्ध्यर्थमुपपत्त्यन्तरपरत्वेन संगृह्णाति **कस्मिन्निति**—

कस्मिन्नु विदिते सर्वं ज्ञातं स्यादिति पृच्छते ।
'स यो वेत्ति तदच्छायमशरीरमलोहितम् ॥ ११ ॥
शुभ्राक्षरमुपादानं सर्वीभवति सर्ववित् ।'
इति प्रत्युत्तरश्रुत्या निरस्तं च तमो यतः ॥ १२ ॥
तस्माज्ज्ञानप्रागभावो भ्रमकारणमिष्यते ॥ १२॥ ॥

व्या ॥ अत्रापि 'ज्ञानभ्रमशब्दार्थौ तावत् पूर्ववदेवावगन्तव्यौ ॥ १२॥ ॥

अ० ॥ 'परास्य शक्तिर्विविधैव श्रूयत' इति श्वेताश्वतरश्रुतिं तस्या ईक्षते-

नाशब्दमिति सूत्रभाष्यव्याख्यानावसरे समीरितं ऐतिह्यमात्रसिद्धा न तु प्रमाणसिद्धेत्याह श्रूयत इतीति रामानन्दीयञ्च व्याख्यानमुपपादितार्थसिद्धये संगृह्णाति **परेति**--

परा शक्तिश्श्रुतैवेति श्रुत्या यस्मात्प्रदर्शितम् ।
तस्माज्ज्ञानप्रागभावो भ्रमकारणमिष्यताम् ॥ १३॥ ॥

व्या ॥ अत्रापि ज्ञानभ्रमशब्दार्थौ पूर्ववदेव ग्रहीतव्यौ ॥ १३ ॥

द्वितीयप्रदर्शकारंभः ।

——:o:——

अ० ॥ एवं प्रथमप्रदर्शकमुपपाद्य द्वितीयप्रदर्शकारंभं प्रतिजानीते **पक्षभेदेनेति**—

पक्षभेदेन रूपेषु मायाया मानमुच्यते ॥ १४ ॥

व्या ॥ प्राक् प्रथमप्रदर्शके पक्षभेदेन निर्दिष्टेषु मायास्वरूपेषु प्रमाणमुच्यत इत्यर्थः ॥ १४ ॥

अ० ॥ पक्षभेदेनाज्ञानस्य स्वरूपभेदात् तत्तत्प्रमाणमपि पार्थक्येन दर्शयति **ज्ञानस्येति**--

ज्ञानस्य प्रागभावो यस्तस्य ज्ञानं प्रमाणकम् ।
आद्ये पक्षे द्वितीयादावनुमानानुवादकम् ॥ १५ ॥

व्या ॥ **ज्ञानस्य** । 'नेह नानास्ती'त्यादि शास्त्रार्थविचारात् यथावत्स्वयं प्रकाशिष्यमाणात्मचैतन्यस्य द्वैतासत्वगोचरस्य **प्रागभावो यस्तस्य** अज्ञानस्याधिकरणभूतत्वेन तद्ग्राहकं **ज्ञानं** सम्यग्ज्ञानस्य प्रागवस्थोपेतं पूर्वावस्थामपरित्यज्यावस्थान्तरेण भानं विवर्त इति विवर्तलक्षणोक्तप्रकारेण निष्प्रकारसच्चिदानन्दरूपतामपरित्यज्य प्रमातृप्रमाणादिरूपावस्थान्तरेणान्यथा स्वयं प्रकाशमाननि-

त्यापरोक्षात्मचैतन्यम् **आद्ये पक्षे** ज्ञानप्रागभावरूपा ज्ञानसद्भावपक्षे **प्रमाणं** अनुभवकारणमित्युक्त्वा द्वितीयतृतीयपक्षयोरपि प्रमाणमाह **द्वितीयादाविति** द्वितीयतृतीयपक्षत्वेन निर्दिष्टशक्तिमायास्वरूपविषये प्रवृत्तानां तत्तदनुमानानामनुवादकं तत्तच्छास्त्रं प्रमाणमित्यर्थः ॥ १५ ॥

अ० ॥ ननु पक्षभेदेन मायास्वरूपाणि तत्तत्प्रमाणानि च परस्परं भिद्यन्त इत्युक्तं तथापि क्रियायामिव वस्तुनि विकल्पासंभवात् तत्प्रमाणानां मध्ये किमबाधितं प्रमाणमित्यत आह **तन्मानानीति**—

तन्मानानि क्रमाद्वक्ष्ये तत्प्राबल्यं विमृश्यताम् ॥ १९॥ ॥

अ० ॥ अज्ञानं नाम ज्ञानप्रागभाव इत्यत्र ब्रह्मादिसम्मतिं प्रतिजानीते **शक्तिरिति**—

शक्तिः प्रकृतिरव्यक्तमाकाशोऽव्याकृतं तमः ॥ १६ ॥

एवमादीनि नामानि ज्ञानाभावस्य मेनिरे ।

ब्रह्मादयस्सुराश्चैव परमाद्वैतवादिनः ॥ १७ ॥

व्या ॥ ज्ञानाभावस्य शक्त्यादिशब्दवाच्यत्वं तावदस्य द्वितीयप्रदर्शकस्यावसाने अस्मिञ्ज्ञानप्रागभाव इत्यारभ्य प्रतीत्या केवलं शक्तिरित्यादिश्लोकेन दर्शयिष्यति ॥

अ० ॥ यत्तावत् प्राक् ॥ श्लो ॥ ज्ञानस्य प्रागभावो यस्तस्य ज्ञानं प्रमाणकम् । आद्ये पक्ष इति ज्ञानप्रागभावसद्भावे प्रमाणं प्रतिज्ञातं तदुपपादयति **द्वैतोपमर्दकमिति**—

द्वैतोपमर्दकं ज्ञानं श्रवणान्मद्भविष्यति ।

इत्युक्त्या तत्प्रागभावज्ञानमाद्ये प्रमाणकम् ॥ १८ ॥

व्या ॥ 'नेह नानास्ति किञ्चन' 'नान्योऽतोऽस्ति द्रष्टा' 'न तु तद्द्वितीयमस्ति' । 'तत्त्वमसि' 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्ये'दित्यादिश्रुत्या प्रत्यगतिरिक्तद्रष्टृदर्शनदृश्यानामसत्त्वोपदेशादापाततः प्रतीयमानं **द्वैतोपमर्दकं ज्ञानं** द्वैतभ्रमोपमर्दकं यथावत् स्वयंप्रकाशिष्यमाणात्मचैतन्यमुद्दिश्य श्रोतव्य इति विधिच्छायापन्नवाक्यार्थात् **श्रवणात्** विचारभावमापन्नात् **मत्** मत्तः **भवि-**

ष्यतीत्युक्त्या भविष्यतीति व्यवहारेणावभासमानं यत् तत्प्रागभावज्ञानं तस्य यथावत् स्वयंप्रकाशिष्यमाणात्मचैतन्यस्य यः प्रागभावसंज्ञकः अनित्यो ह्यभावः तस्याधिकरणत्वेन तद्विषयकं विचारप्राक्कालिकम् प्रमाणादिरूपेण स्वयंप्रकाशमानात्मचैतन्यं **आद्ये प्रमाणकं** ज्ञानस्य प्राक्कालिकस्य अभावरूपाज्ञानसद्भावपक्षे अनुभवकारणम् । तथा चोक्तम् पञ्चदशप्रकरणे 'द्वैतस्य प्रागभावस्तु चैतन्येनानुभूयत इति ।

अ० ॥ इदानीं ज्ञानप्रागभावशब्दस्य समासं तदर्थस्य लक्षणञ्च दर्शयति **प्राक्कालिकस्येत्यादिना**—

मू ॥ प्राक्कालिकस्य ज्ञानस्य योऽभावस्स तथेर्यते ।
नर्धाप्राक्कालिकोऽभावस्स्वाश्रयस्थान्तलक्षणः ॥ १९ ॥

व्या ॥ प्राक्कालिकस्येत्यादिना प्रागभावस्य आचार्याणामभिमतमनभिमतञ्च विशेषणं दर्शयित्वा तल्लक्षणमाह **स्वाश्रयस्थान्त लक्षण इति** स्वस्य स्वज्ञानप्रागभावस्य आश्रयः प्रत्यगात्मा तत्रस्थः स्वप्रतियोग्याविर्भावदशायां विद्यमानः अन्तः विनाशस्स्यादर्शनमित्यमरकोशोक्तं अदर्शनं आत्मनः औदासीन्यरूपं लक्षणं यस्य सः स्वाश्रयस्थान्तलक्षण इति तदुक्तं ब्रह्मगीतायां—श्लो. ॥ असतः प्राक्तूपूर्वाणां विशेषाणामभावत इति किञ्च न प्रतियोगिना च विशेषणेन अभावस्य प्रकृतस्य सहभावित्वमस्ति अतोऽप्यत्र न भावत्वाशङ्कावकाशः । एवमेव सदेव सोम्येदमग्र आसीत् श्लो ॥ इदं सर्वं पुरा सृष्टेरेकमेवाद्वितीयकम् । सदेवासीन्नामरूपे नास्तामित्यारुणेर्वचः इति श्रुतिगतैवकारेण तदर्थकेन नच्या च ज्ञानज्ञेयात्मकस्य जगतः प्राक्कालेन संबन्धनिषेधात् तदभावो हि तत्प्रतियोगिकत्वात् प्रागभावसंज्ञकः तद्विषये प्राक्कालिकसाक्षिचैतन्यमेव तदनुभवकारणं श्लो. ॥ प्रागभावयुतं द्वैतं रच्यते हि घटादिवदिति स्मर्यते ॥

१. ननु भ्रमप्रतिबन्धकभूतज्ञानात्यन्ताभावस्यैव द्वैतभ्रमं प्रति कारणत्वमङ्गीकार्यमिति चेन्न स्वकीयज्ञानात्यन्ताभावस्य यत् प्रतियोगि तत् स्वकीयमेवज्ञानं न परकीयम् तथा सति तस्य स्वात्मन्येव विद्यमानत्वदशायां तदीयात्यन्ताभावस्य प्रतिबन्धकात्यन्तभावरूपत्वात् स्वाश्रये प्रत्यगात्मनि स्वकार्यद्वैतभ्रमारम्भकत्वासंभवात् स्वप्रतियोगिभूतज्ञानस्य देशान्तरे गमने सति कार्यारम्भकत्वं भवेत् यथा प्रतिबन्धमाचरतो मणेः देशान्तरे अपसरणे सति मण्यत्यन्ताभावस्य कार्यारम्भकत्वं

दृष्टम् एवं प्रतिबन्धकज्ञानात्यन्ताभावस्य कारणत्वे वक्तव्ये सति प्रतिबन्धकस्य प्रत्यक्षात्रप्रकृतित्वेन स्वात्माश्रितस्य ज्ञानस्य आत्मान्तरे गमनासंभवात् द्वैतभ्रमकारणत्वेन भवदभिमतस्यात्यन्ताभावस्य कार्यानुमेयस्य कार्याभावे स्वात्मनि स्वरूपासंभवात् ।

२. न च नात्यन्ताभावेन स्वप्रतियोगिज्ञानस्य देशान्तरे गमनं कार्यारम्भणायापेक्षितं किन्तु तन्नाश एवेति वाच्यम् विनष्टप्रतियोगिकस्यैव विघ्नात्यन्ताभावस्य कारणत्वं न विद्यमानप्रतियोगिकस्येति नियमस्य देशान्तरे अपसारितमण्यत्यन्ताभावेन संजातकार्येकेण बाधदर्शनात् 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्' इति श्रुत्या कतकरजोन्यायेनाद्वितीयस्वात्मज्ञानस्यापि विनाशे सति पश्चात्तद्भूतज्ञानप्रतियोगिकस्यात्यन्ताभावस्य भ्रमारंभकत्वाभावदर्शनाच्च उभयनियमव्यभिचारः ।

३. न च भूतज्ञानप्रतियोगिकस्यात्यन्ताभावस्य कारणान्तरसहायाभावात् चरमसाक्षात्कारध्वंसानन्तरं न कारणत्वमिति वाच्यम् कार्यकारणयोरेकसत्तावादे प्रतिबन्धकभूतज्ञानात्यन्ताभावेन आत्मनः पूर्वावस्थापरित्यागमन्तरेणैवावस्थान्तररूपेण स्वयं प्रकाशमानत्वे आकाशेनेव कर्मावरणयोरनपेक्षितत्वात् किञ्च प्रतिबन्धकभूतज्ञानप्रागभावरूपस्याज्ञानस्य प्रमातृप्रमाणादिरूपेण आत्मनस्स्वयमन्यथा भासमानत्वे निमित्तकारणत्ववादिभिरुक्तज्ञानप्रागभावातिरिक्तभावरूपकारणान्तरास्वीकाराच्च यथा नीलं नभ इत्यत्र निरंशस्य नभसो नीरूपत्वज्ञानप्रागभावातिरेकेणावरणं कर्म वा न स्वीक्रियते सर्वैः तथाचोक्तं विद्यारण्याचार्यैः । श्लो ॥ 'निरंशेऽप्यस्त्यसौ व्योम्नि तलमालिन्यकल्पनात् । तथा निरंश आनन्दे विवर्तो जगदिष्यतामिति ।

४. न च न प्रतिबन्धकज्ञानात्यन्ताभावस्य कारणत्वाभावे नियामक इति वाच्यम् नष्टज्ञानप्रतियोगिकस्यात्यन्ताभावस्य भ्रमकारणत्वाभावबोधिन्याः 'यत्रत्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्' इत्यादिश्रुतेः—ज्ञानस्य स्वाश्रयं विहायान्यत्र गमनासंभवस्य च नियामकत्वात् ।

५. ननु द्वैतभ्रमप्रतिबन्धकभूतज्ञानात्यन्ताभावस्य विनष्टापसारितज्ञानप्रतियोगिकस्य कारणत्वे तस्य भवत्प्रदर्शितश्रुत्यपसरणाभावाभ्यां बाधदर्शनादेवं ब्रूमः—प्रकृतज्ञानात्यन्ताभावस्य न किञ्चित्कालावच्छिन्नं ज्ञानं प्रतियोगि—किन्तु कालकृतविशेषणविनिर्मुक्तमेवेति चेत् न चरमसाक्षात्कारानन्तरमवशिष्यमाणस्य नित्यस्य

अविवक्षितकालकृतविशेषणकज्ञानप्रतियोगिकस्यात्यन्ताभावस्यापि 'यत्र त्वस्य' त्यादिपूर्वोक्तश्रुत्यैव कारणत्वाभावावगमात् ।

६. किञ्च किं तव न्यायमतानुसारिणः प्रतिकर्मव्यवस्थावादिनः सर्वभ्रमप्रतिबन्धकज्ञानात्यन्ताभावसत्वे प्रमाणं नेह नानास्ति किञ्चन' 'न तु तद्द्वितीयमस्ती'त्यादि श्रुतिरेवेति चेत् किमियमपवादश्रुतिः प्रत्यगात्मनो भिन्नत्वेन विद्यमानानां भावाभावपदार्थानां ये अत्यन्ताभावाः तेषां प्रतीचिभिन्नत्वेन सत्वं उत सर्वेषामसत्वं बोधयति नाद्यः श्लो ॥ न व्यापित्वाद्देशतोऽन्तो नित्यत्वान्नापि कालतः । न वस्तुतोऽपि सार्वात्म्यादानन्त्यं ब्रह्मणि त्रिधे' ति कालत्रयेऽपि त्रिविधवस्तुकृतपरिच्छेदशून्यस्यात्मनः त्रिविधवस्तुप्रतियोगिकत्रैकालिकात्यन्ताभावैः परिच्छेदापत्तेर्नाद्वैतसिद्धिः ।

७. ननु 'नेह नानास्ति किञ्चने' त्यादि श्रुतेरात्मातिरिक्तात्यन्ताभावादि निखिलनिषेधपरत्वादद्वैतसिद्धिरिति चेत् नेयं श्रुतिस्तवात्यन्ताभावसत्वे प्रमाणं भवेत् ।

८. ननु ज्ञानप्रागभावेनापि द्वैतापत्तिस्स्यादिति चेत् न तस्यापि स्वात्मसत्तातिरिक्तसत्ताभावेन 'नेह नानास्ति किञ्चन । न तु तद्द्वितीयमस्ती' त्याद्यपवादश्रुत्या प्रागभावादिभावाभावपदार्थानां स्वतः सत्तानिषेधात् अद्वैतसिद्धिः ।

९. तर्हि तथैवात्यन्ताभाववादिनां किन्न स्यादिति चेत् न तैस्तस्य नित्यत्वाभ्युपगमात् न ज्ञाननाश्यत्वसिद्धिः नित्यत्वरूपभावधर्माश्रयत्वात् ततो नाद्वैतत्वसिद्धिरात्मनः तस्याः अपवादश्रुतेः द्वैतभ्रमसाधनभूतप्रतिबन्धकज्ञानात्यन्ताभावपरत्वे अध्यारोपपरत्वापत्तिश्च स्यादतः प्रागभावध्वंसयोरधिकरणे नात्यन्ताभाव इति प्राचीनानां मतानुसारेण प्रकृतसर्वभ्रमप्रतिबन्धकज्ञानस्य नात्यन्ताभावसिद्धिरात्मनि । अन्यथाऽत्यन्ताभावसिद्ध्यर्थं ज्ञानस्य त्रैकालिकनिषेधप्रतियोगित्वे तमेवं विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति श्रुतेरप्रामाण्यं प्रसज्येत ।

१०. नन्वनया श्रुत्या मुखतः अत्यन्ताभावातिरिक्तभावाभावदृश्यनिषेधेनात्यन्ताभाव एक एवावशिष्यते तथापि न तेनात्मनो द्वैतापत्तिः तदत्यन्ताभावस्याधिकरणात्मकत्वादिति चेन्न किं तदत्यन्ताभावप्रतियोगिभिरपराद्धं सर्वेषामधिकरणात्मकत्वं 'आत्मैवेदं सर्वं अहमेवेदं सर्वं'मित्यादि श्रुतिभिः 'तदनन्यत्वमारंभणशब्दादिभ्यः' 'सत्वाच्चापरस्ये'त्यादिसूत्रैश्च मृद्घटादिदृष्टान्तैश्च सिद्धमेव ।

११. किं चात्यन्ताभावस्य तदधिकरणात्मकत्वं नाम तदधिकरणादनन्यत्वं चेत्स्वपक्षहानिः परपक्षसिद्धिश्च ततः कार्यकारणयोरभेदवादे अन्योन्याभावाख्यभेदस्येव कारणे कार्यात्यन्ताभावस्यापि न स्वरूपासिद्धिः तथोपादाने तदाश्रितत्वेन न

कार्यप्रध्वंसाभावस्यापि स्वरूपसिद्धिः श्लो॥ अधिष्ठानावशेषो हि नाशः कल्पितवस्तुनः। विकाराणां प्रकृतिभावापत्तिर्लय इत्यादिस्मृतेः तथाऽपि यावद्विचारं प्राक्कालिकज्ञानस्वाभाव एव प्रागभावसंज्ञः प्राक्कालिकस्य स्वात्मविवर्त्तस्याभाववदवस्थितः।

१२. अन्यथा—प्रध्वंसाभाववत् नित्योऽपि मोक्ष आरभ्यत एवेति चेन्न मोक्षस्य भावरूपत्वात् प्रध्वंसाभावोऽप्यारभ्यत इति न अभावस्य विशेषाभावाद्विकल्पमात्रमेतत् भावप्रतियोगी ह्यभावः।

यथाह्यभिन्नोऽपि भावो घटपटादिभिर्विशेष्यते भिन्न इव घटभावः पटभाव इति एवं निर्विशेषोऽप्यभावः क्रियागुणयोगात्–टि–**क्रियासंख्याध्यासात्** द्रव्यादिवद्विकल्प्यते।

नह्यभाव उत्पलादिवद्विशेषणसहभावी विशेषणवत्वे भाव एव स्यात् इति शीक्षावल्ल्यवतरणभाष्यं च तदीयं ननु अभावश्चतुर्विधः तत्रानित्यः प्रागभावः प्रध्वंसादयस्तु नित्याः ततः कथं निर्विशेषत्वमित्याशङ्क्याह यथा हीति भावप्रत्ययस्यैकाकारत्वात् एक एव भावः अवच्छेदकभेदात् भिन्न इव प्रकाशते तथा निषेधप्रत्ययस्यैकाकारत्वादेक एवाभावः अवच्छेदकभेदाद्भिन्न इव प्रकाशते जायते नश्यति चेति क्रियायोगात् संख्यादिगुणयोगात् द्रव्यवदभावो विकल्प्यते न तु तत्वतः स विशेष इत्यर्थः।

इतश्च न तत्वंतस्साविशेष इत्याह न हीति विशेषणं हि विशेष्यान्वयि प्रसिद्धं प्रतियोगिना च विशेषणेन नाभावस्य सहभावोऽस्ति। घटप्रध्वंसस्य नित्यत्वे घटस्यापि नित्यत्वप्रसङ्गात् घटसहभावित्वे च तदभावत्वव्याघातात् भावाभावयोस्सहानवस्थानरूपविरोधाभ्युपगमात्।

ततः प्रतियोगिविशेषादभावस्साविशेषः कार्यत्वादिधर्मवानिति भ्रममात्रमित्यर्थ इत्यानन्दगिरीयं न असतः प्राक्त्वपूर्वाणां विशेषाणामभावत इति ब्रह्मगीतायाः तृतीयाध्यायवचनं चोपरुध्येत।

किञ्च द्वैतिनामद्वैतिनां च ज्ञानप्रागभावरूपं भावरूपं वाऽज्ञानं न श्यतीत्यत्र नतत्तत् तत्तद्ध्वंसक्रियाश्रयं किन्तु तदधिष्ठानं स्वात्मचैतन्यमेवेति चेत् बाढमेतदेवं स्यात्।

१३. ननु नेह नानास्तीति श्रुतेः पराभिमतं द्वैताद्यन्ताभावपरत्वं नास्ति यदि कोऽभिप्राय इति चेत् सद्रूपात्मसन्निधौ सदिति प्रतीत्यर्हत्वेन विवर्त्तमानं जगन्मद्व्यतिरेकेण शशविषाणवन्निषेधार्हमित्यभिप्रायः अयमेव यद्यपि त्रैकालिकनिषेधप्रतियोगित्वं तुच्छानिर्वाच्ययोस्साधारणमित्यादिसिद्धिवाक्येनापि दर्शितः बाढमेवं किं तुच्छस्य त्रैकालिकनिषेध्यत्वं उत्पत्तिविनाशराहित्यं तर्ह्यसदात्मनोः को भेदः सद्रूपेणोत्पत्तिविनाशराहित्यं आत्मनःसत्वं नीरूपेणोत्पत्तिविनाशराहित्यं शशशृङ्गादे-

रसत्वमिति विभागः बाढं तुच्छानिर्वाच्ययोरसत्वे तु समाने कथं भेद इति चेदसत्वेन लौकिकैः ज्ञातत्वाज्ञातत्वाभ्यां विवेकः ।

ननु त्रैकालिकाभाव इत्यत्र कथं समासार्थाविति चेत् त्रैकालिकानां आसीदस्ति भविष्यतीति तात्तत्कालिकानां अभावः असत्वं निषेधः समासार्थौ भवतः

तथाचोक्तं 'प्रकृतैतावत्वं हि प्रतिषेधति ततो ब्रवीति च भूय' इति सूत्रस्थानेन भाष्येण 'अथात आदेशो नेति नेति नह्येतस्मा' दिति श्रुत्या ब्रह्मैव रूपवत् प्रतिषिध्यते तद्धि वाङ्मनसातीतत्वादसंभाव्यमानसद्भावं प्रतिषेधार्हम् न तु रूपप्रपञ्चः प्रत्यक्षादिगोचरत्वात् प्रतिषेधार्ह इति पूर्वपक्षे प्राप्ते न ब्रह्म प्रतिषेध उपपद्यते 'ब्रह्म ते प्रब्रवाणी' त्युपक्रमविरोधात् ' असन्नेव स भवति असद्ब्रह्मेति वेद चे' दित्यादिनिन्दाविरोधादित्युपक्रम्य युक्तं च कार्यस्य वाचारम्भणश्रुत्यादिभ्योऽसत्वमुक्तमिति नेति नेतीति प्रतिषेधनम् न तु ब्रह्मणः सर्वकल्पनामूलत्वादिति । अत एवारम्भणसूत्रभाष्ये सूत्रगतादि शब्देन 'नेह नानास्ति किञ्चने'त्यादिश्रुतिमादाय तस्याः पूर्वोक्तारंभणश्रुत्या समानार्थकत्वं नास्तीति वाक्यस्यासदिति पदादविशेषताश्रौतीत्यभिप्रेत्यैवोक्तम् अतः कारणव्यतिरेकेण कार्यस्याभाव आरंभणश्रुत्यभिप्रेत इति भाष्यगतेनाप्यभावशब्देन कारणात् भेदेन कार्यस्य भूधात्वर्थसत्तैव निषिध्यते यथा न सुरां पिबेदिति तत्पानप्रवृत्तिर्निरुध्यते एवमेव नञश्चैष स्वभावः यत्स्वसम्बन्धिनोऽभावं बोधयतीत्यत्रापि स्वसम्बन्ध्येव निषिध्यते ।

एवमेव निषेधवाक्यार्थः गृहीतव्य इत्यत्र पञ्चमनिरूपणे एकनवतितमश्लोकवृत्तौ बहूनामाचार्याणां सम्मतिं दर्शयिष्यामः ।

किञ्च यत् कार्यस्य कारणादनन्यत्वपरमारम्भणसूत्रं यत्तद्गतादिशब्देन ग्रहीतं नेह नानास्तीति कठवल्लीवाक्यं यच्च नेह नानेति चाम्नायादिति गौडपादीयाद्वैतप्रकरणवाक्यं यच्च न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येदिति बृहदारण्यवाक्यं सुषुप्तिपरं यच्च प्रागुक्तकठवल्लीवाक्यवत् यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदिति जीवन्मुक्त्यादिपरं बृहदारण्यवाक्यं यदेतच्छ्रुतिमूलकं खाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हीति सूत्रं च यान्यारम्भणाधिकरणीयानि गुणसूत्राणि च यानि च तत्तद्भाष्याणि तेषां कार्यकारणयोरन्योन्याभावरूपभेदानभ्युपगमादेवाद्वितीयत्वसाधकानां समानतात्पर्यकत्वात् विभिन्नं त्रैकालिकनिषेधप्रतियोगीति सिद्धिवाक्यस्य चिद्भिन्ने चिदभेदसाधकत्वाच्च असंभाव्यमानसद्भावं प्रतिषेधार्हमिति प्रागुदाहृतभाष्योक्तप्रकारेण जगति नासीन्नास्ति न भविष्यतीति क्रमात् तात्तत्कालिकसत्ताप्रतिषेधार्हत्वबोधकेन न स्वात्मनि तस्माद्भेदेन पराभिमतः कालान्तरेऽधुना वा उपा-

दानान्तरे वा तेन साकमन्यत्र वा विद्यमानपदार्थप्रतियोगिकात्यन्ताभावोऽङ्गीकृत इति ध्येयम्। उत्पत्तिलयपरेण एवमेवामुत्र पुण्याचितो लोकः क्षीयत इत्यादिना चाकाशादीनां कर्मफलस्य च क्रमात् नित्यत्वमक्षय्यत्वं च प्रतिषिद्धम्।

१४. ननु स्वात्मनो यथावत्स्वतः प्रकाशिष्यमाणभानस्य प्राक्कालिकत्वाभावसहायबलेन बहु स्यामिति श्रुत्यनुसारेण प्रमातृप्रमाणप्रमेयादिरूपेणाऽन्यथा स्वयं प्रकाशमानस्वात्मरूपातिरेकेणाऽनात्मद्रव्यादीनां तदत्यन्ताभावानां चासत्वं नेह नानास्ति किं चनेत्यादि श्रुत्यभिप्रेतं यदि।

१५. अस्मिन्ननात्मनि कपाले तदीयघटो नास्तीत्यत्र तदत्यन्ताभावप्रतीतेः का गतिरिति चेत्।

१६. अत्रापि अयमात्मा ब्रह्मेति यो नित्यापरोक्षस्तस्मिन् स्वात्मनि कपालादिजगद्रूपे णान्यथा स्वतोभासमाने सति स्वात्मजगतोरेकसत्तापरश्रुतितात्पर्यतदनुभवादिरहितैः स्वात्मसत्तातिरिक्तसत्ताकत्वेनात्मभिन्नत्वेन चान्यथागृहीतेऽनात्मनि कपाले तद्भेदेन घटतदत्यन्ताभावादीनामन्यथा गृहीतत्वात् न तेषां स्वरूपसिद्धिः।

१७. अन्यथा तदभावस्य नासीन्नास्ति न भविष्यतीति व्यवहारात् यदि त्रैकालिकत्वं तदा घटः कालत्रयेऽपि तदीयकपाले नास्तीत्युक्तं स्यात् न तत्र तदसत्वं सम्भवति तत्पक्षे तत्र जायमानघटप्रतीत्या बाधितत्वात् तथाच सति न तदभावस्य त्रैकालिकत्वेन स्वरूपसिद्धिरिति प्रथमो दोषः।

१८. तथैव यदि कपाले तदीयघटाभावस्य त्रैकालिकत्वेन नित्यत्वमिष्यते तदा कपाले घटस्यानाविर्भावापत्तिरिति द्वितीयो दोषः।

१९. तथैव कपाले तदीयघटाभावस्य नित्यत्वेऽपि तत्र घटाविर्भावदशायां तदभावप्रतीत्यभावे स्वरूपसम्बन्धाभावः कारणं तत्र घटानाविर्भावदशायां तदभावप्रतीतौ स्वरूपसम्बन्धः कारणमिति कल्पनाप्यसदर्थप्रलापिनीति तृतीयो दोषश्चापद्येत।

२०. तथाहि कपालेन सह तदीयघटात्यन्ताभावस्य स्वरूपसम्बन्धो नाम यदि कपालस्वरूपं तस्य घटवत्वदशायां प्रत्यक्षसिद्धत्वे कदाचित्तन्नास्तीति कथमुच्येत।

२१. तदानीं कपालस्वरूपसिद्धावपि तत्र घटाभाववत्तावगाहिबुद्धि कालिककपाल स्वरूपाभावात् तत्सम्बन्धात्मकं कपालस्वरूपं नास्तीति चेत्

२२. न एकस्यैव कालभेदेन भेदवादस्य नहि गौस्तिष्ठन्गच्छन् गौर्भवति शयानोऽश्वादिजात्यन्तरं भवेदिति बृहदारण्यभाष्येण च सोयं गौरित्यभेदप्रत्यक्षेण च तदिदं कापालस्वरूपमित्यभेदप्रत्यक्षेण च बाधितत्वात्।

२३. किं च यदा पुनः कपालतदीयघटात्यन्ताभावयोस्सम्बन्धो नास्तीत्युच्यते तदा तदभावः किमस्ति विनष्टो वा आद्ये कुत्रास्ति तत्कपाल एवेति चेत् केन सम्बन्धेनास्ति स्वरूपसम्बन्धेनैवेति चेत् तत्काले स सम्बन्धः तत्रास्ति नास्तीति च वाक्यस्य 'नैकस्मिन्नसम्भवादिति' सूत्रेण दर्शितस्य स्यादस्ति स्यान्नास्तीति दिगम्बरवादस्येव परस्परव्याहतत्वापत्तिरूपः चतुर्थो दोषः प्रसज्येत ।

२४. यदि तत्परिहारायान्यत्र गमनमिष्येत तदा तस्याभावस्य मूर्त्तत्वापत्तिरूपः पञ्चमो दोषः प्रसज्येत

२५. यदि तत्परिहाराय द्वितीयो विकल्पोऽभ्युपगम्येत तदा तस्य किमनादित्वेन विनाशोऽङ्गीक्रियते किमादिमत्वेन आद्ये तस्याभावस्य वक्ष्यमाणप्रकारेणास्मदीयभाष्यकारविद्यारण्याचार्याणां प्राचीनानां न्यायविदां चाभिमतप्रागभावत्वसिद्धिरूपः परानभिमतः षष्ठो दोष आपद्येत ।

२६. द्वितीये तु तस्य सामयिकाभावत्वरूपः सप्तमो दोषः प्रसज्येत ।

२७. न च तस्य सामयिकाभावत्वं वैशेषिकाणामिष्टं तैस्तस्य समवायिकारणेतरभूतलादावेव घटगमनागमनाभ्यामुत्पत्तिविनाशस्वीकारात्

२८. अतः कपाले घटस्य प्रागभावं विना प्रध्वंसाभावोऽत्यन्ताभावः सामयिकाभाव इव च सर्वोपादाने स्वात्मनि विवर्त्तमानस्यास्य जगतः प्रागभावं विना न प्रध्वंसाभावोऽत्यन्ताभावस्सामयिकाभावश्च प्रसिध्यति ।

२९. किं च द्वैतिनामिष्टेनात्यन्ताभावेन सह प्रागत्रोदाहृतेन 'प्रकृतैतावत्वं हि प्रतिषेधति ततो ब्रवीति च भूय इति, सूत्रस्य भाष्येण च एतेन शिष्टापरिग्रहा अपि व्याख्याता इति' सूत्रतदीयभाष्याभ्यां च तदधिकरणार्थनिर्णायकेनानेन

श्लो ॥ बाधोऽस्ति परमाण्वादिमतैर्नो वा यतः पटः ।
न्यूनतन्तुभिरारब्धो दृष्टोऽतो बाध्यते मतैः ।
शिष्टैष्टापि परित्यक्ता शिष्टत्यक्तमतं किमु ।

नातो बाधो विवर्त्ते तु न्यूनत्वनियमो न हीति ।

अधिकरणरत्नमालावचनेन च शिष्टैर्मन्वादिभिरुपादानांशे परिगृहीतायाः साङ्ख्याभिमतमूलप्रकृतेरिव परमाणुकारणवादस्यापि सूत्रकारादिभिः परित्यक्तत्वे सति तदेकदेशो घटस्य समवायिकारणेतरभूतलादावभिमतस्सामयिकाभावोऽपि न्यायकुशलैर्नवीनैः गौरवापादकत्वेन परित्यक्तत्वात् श्रुत्यनारूढत्वाच्च ।

अस्मिन्द्वितीय निरूपणे चतुःपञ्चाशदुत्तरद्विशततमादिभिस्सप्ताभिश्लोकैरुदाहरिष्यमाणगौडपादीयकारिकोक्तप्रकारेणात्मोपादानकस्य कार्यस्य द्रव्यत्वाभावेनान्यत्र गमनासम्भवाच्च गन्तव्यप्रदेशान्तराभावाच्च नास्माभिरद्वैतिभिरुपादेयः ।

३०. ननु सामयिकाभावाभ्युपगमे किं गौरवमिति चेत् भूतले कपाले च घटो नास्तीति वाक्यप्रयोगस्यैकत्वे सति एकत्र सामयिकाभावबोधकत्वं अन्यत्र तदनवबोधकत्वमित्यनियतत्वकल्पनं पदार्थान्तरकल्पनं च गौरवमित्यवगन्तव्यं ।

३१. ननु प्रतियोगिज्ञानमन्तरा तदभावज्ञानस्यासिद्धत्वात्कथं प्रागभावसिद्धिरिति चेत् सदेवसोम्येदमग्र आसीदिति श्रुत्याऽस्य प्रत्यक्षस्ववार्त्तमानिकस्य जगतः प्राक्कालिकत्वाभावस्य दर्शितत्वात् तत्सिद्धिः ।

३२. अन्यथा पुरा इमे नामरूपे नास्तामिति परामर्शासंभवापत्तेः ।

३३. किञ्च न प्राक् सुषुप्ताविदानीन्तनमिदं जगदभवत्स्वात्मनि इदानीमेव जायमानत्वादित्यत्र नित्येन साक्षिणानुभूयमानो जगत्प्रागभावो जगदुत्पत्या नश्यतीति 'गतिसामान्यादिति' सूत्रभाष्ये भाष्यकारैरुदाहृतैः 'समानैव हि सर्वेषु वेदान्तेषु चेतनकारणावगतिः स यदा प्रतिबुद्ध्यते यथाग्नेर्ज्वलतः सर्वा दिशो विष्फुलिङ्गा विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनः सर्वे प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोकाः ॥ तस्माद्वा एतस्मादात्मन आकाशस्संभूतः ॥ आत्मन एवेदं सर्वं ॥ आत्मन एष प्राणो जायते ॥ इति कौषीतकीतैत्तिरीयकछान्दोग्यप्रश्नाख्यैः सर्ववेदान्तैः अवस्थात्रयवतो जगदुत्पत्तिपरैः विदुषां जगत्तत्प्रागभावानुभवौ च दर्शितौ ।

३४. किञ्चास्मिन् तण्डुले मृदादौ च एतत्सदृशमोदनं गणेशादिकं च करिष्यामइति वदतां सर्वेषामस्माकं चिकीर्षितस्य भविष्यदोदनादेः तत्पाकाकारविशेषस्य च तत्प्रकृतिनिष्ठाभावे ओदनादिप्रागभावत्वस्य च तत्प्रागभावतद्ध्वंसयोश्चानुभवः साक्ष्यायत्तः सिद्धः ।

३५. अन्यथाऽस्मच्चिकीर्षानुगुण्येन नैवौदनादिस्वरूपनिष्पत्तिः स्यात् ।

किं चास्मिंस्तण्डुले तदीय ओदनो नास्तीत्यत्र प्रतीयमानोऽभावस्तावत् नात्यन्ताभावः तस्य त्रैकालिकत्वेन सहात्र सप्तदशखण्डादारभ्य सप्तविंशखण्डावसानकग्रन्थसन्दर्भैर्निराकृतत्वात्

३६. नापि प्रध्वंसः तस्मिन् तण्डुले त्वविक्रियमाणे सति तद्विकृत्योदनध्वंसस्यावकाशाभावात्

३७. अतः पारिशेष्यात्तस्य प्रागभावत्वं तदनुभवश्च सिद्धः

३८. एवमेव ममासन्तुष्टिर्नष्टेत्यत्र साक्षिणा सन्तुष्टितत्प्रागभावतद्विनाशाना-मनुभवः पण्डितैरपि दुरपन्हवत्वात्सिद्धः ॥ १९ ॥

अ० ॥ इदानीं द्वितीयपक्षत्वेन प्रतिज्ञाते मायाया आत्मशक्त्यात्मकत्वे प्रमाणादिकं दर्शयति **अथेति**--

मू ॥ अथ वक्ष्याम्यात्मशक्तेः प्रमाणमभिधामपि ।
मायाप्रकृतिरव्यक्तमाकाशोऽज्ञानमेव च ॥ २० ॥
अविद्या तम इत्यादि शक्तेर्नामेति वादिनः ।
संक्षेपगुरवश्शक्तेरनादित्वादिकेऽपि च ॥ २१ ॥
श्रौतानि नानावाक्यानि प्रमाणमिति मेनिरे ॥ २१॥ ॥

अ० ॥ कानि तानि वाक्यानीत्यत आह **अनादीति**--

मू ॥ अनादिमायया सुप्तो यदा जीवः प्रबुध्यते ॥ २२ ॥

व्या ॥ **अनादिमाययेति** अनादिभूतया मायया आत्मशक्त्येत्यर्थः॥२२

अ० ॥ नन्वनया श्रुत्या मायाया अनादित्वावगमेऽपि न शक्त्यात्मकत्व-मवगम्यत इति प्राप्ते । तस्यास्तथात्वपरां श्वेताश्वतरश्रुतिं प्रमाणयति **त इति**--

मू ॥ ते ध्यानयोगानुगता अपश्य-
न्देवात्मशक्तिं स्वगुणैर्निगूढाम् ॥ २२॥ ॥

व्या ॥ **त इति** जगत्कारणतत्वजिज्ञासवो मुनयः **ध्यानयोगानुगताः** विचारयोगमाश्रितास्सन्तः **निगूढां** स्वतो ज्ञातुमशक्यां **देवात्मशक्तिं** देवस्य स्वयं प्रकाशमानस्यात्मनो जगदद्ध्यासाद्यनुकूलां शक्तिं **स्वगुणैः** स्वकीयैश्शक्त्या-रब्धैर्गुणैर्गुणरूपलिङ्गैः **अपश्यन्** अविदुरित्यर्थः ॥ २२ ॥

अ० ॥ एवमात्मशक्तेरनादित्वं मायाशब्दवाच्यत्वञ्च दर्शयित्वा अधुना जगत आध्यासिकत्वप्रदर्शनार्थं तत्कल्पकस्यात्मनः स्वशक्तिमोहितत्वे कैवल्यश्रुति-मुदाहरति **स एवेति**--

मू ॥ स एव मायापरिमोहितात्मा
शरीरमास्थाय करोति सर्वम् ॥ २३ ॥

स्पष्टोऽर्थः ॥

अ० ॥ इदानीं शक्तेरात्मव्यामोहकत्वसिद्ध्यर्थं तापनीयश्रुतिमुदाहरति **मायेति**—

मू ॥ माया चेयं तमोरूपेत्येवमादीनि तद्बलात् ।
द्रव्यादन्यां तमोरूपां स्वात्मन्यपि च कल्पिताम् ॥ २४ ॥
ज्ञाननाश्यत्वसिद्ध्यर्थमनिर्वाच्यां समीर्य च ।
तत्रैतान्यनुमानानि प्रमाणत्वेन मेनिरे ॥ २५ ॥

व्या ॥ एवमात्मशक्तेर्व्यामोहकत्वप्रयोजकं तमोरूपत्वमित्यत्र श्रुतिं दर्शयित्वा अनुमानान्यपि मेनिर इत्याह **तद्बलादित्यादिना** ॥ २५ ॥

अ० ॥ कानि तान्यनुमानानीति प्राप्ते तदवतरणाय किञ्चिदनुमानान्तरमाह **व्योमादीति**—

मू ॥ व्योमादिकर्तृजं भोक्तृशेषत्वादन्नवत् सतु ॥ २६ ॥ ॥

व्या ॥ व्योमादीत्यादिपदेन कालदिङ्मनश्शब्दादिविषयाणां संग्रहः । तेषां कथं भोक्तृशेषत्वमिति चेत् व्योम्नो भोग्यवीणादिशब्दाधिकरणत्वात् कालस्य सर्वं प्रति निमित्तकारणत्वात् दिशां प्राच्याद्याधिपत्यं प्रति निमित्तत्वात् मन आदीनां भोगोपकरणत्वाच्च भोक्तृशेषत्वमवगन्तव्यम् । तत्र दृष्टान्तमाह **अन्नवदिति** । ननु सिषाधयिषिताया आत्मशक्तेः अनादेरीश्वरस्य च भोक्तृशेषत्वात् कर्तृजन्यत्वं चापद्येतेति चेत् बाढमेवं स्यात् जीवेशयोर्भेदवादिनाम् । 'पुरत्रये क्रीडति यस्तु जीवस्ततस्तु जातं सकलं विचित्र ' मित्यादिश्रुतिमवलम्ब्य एकजीववादं ब्रुवताम-भेदवादिनां न कश्चित् दोषः साधनीयशक्तिकस्य सौषुप्तस्य प्राज्ञस्यैव जगत्स्रष्टुः कार्यानुप्रवेशेन भोक्तृत्वदशायां तदतिरेकेण शक्तीश्वरयोरभावात् । अतश्च न भवदाशङ्कावकाशः ॥ २६ ॥ ॥

अ० ॥ व्योमादिकर्तुर्विचित्रशक्तिकत्वं साधयति **विचित्रेति**—

मू ॥ विचित्रशक्तिकश्चित्रकर्तृत्वाच्चित्रकर्तृवत् ॥ २६ ॥

व्या ॥ स त्विति पूर्वश्लोकादनुवर्तते । स तु जगत्कार्ता विचित्रशक्तिकः भवितुमर्हतीति साध्यं प्रतिज्ञाय हेतुमाह **चित्रकर्तृत्वादिति** चित्रस्य विचित्रस्य कार्यस्य कर्तृत्वादिति हेतुमुक्त्वा दृष्टान्तमाह **चित्रकर्तृवदिति** चित्रस्य नानावसरोपेतरामलक्ष्मणाद्यालेख्यस्य कर्तृवत् चित्रकार इवेत्यर्थः ॥ २६ ॥

अ० ॥ अधुनात्मशक्तेस्सदृष्टान्तमनिर्वचनीयत्वं साधयति **अग्नीति**—

मू ॥ अग्निशक्तिर्न तद्भिन्ना तन्नाशेऽस्या अदर्शनात् ।

यद्यभिन्ना प्रदृश्येत प्रतिबन्धे यथाऽनलः ॥ २७ ॥

नोभयत्वं विरुद्धत्वादनिर्वाच्या ततस्तथा ।

आत्मशक्तिरनिर्वाच्या शक्तित्वादग्निशक्तिवत् ॥ २८ ॥

व्या ॥ **तन्नाशे** अग्निनाश इत्यर्थः **प्रतिबन्ध इति** आत्माग्निशक्तिकार्यावियादि प्रतिबन्धकपापादौ सतीत्यर्थः **यथानल इति** अनलाभिन्नोऽनलवत् अनलाभिन्ना चेत् शक्तिरित्यर्थः शेषस्सुगमः ॥ २८ ॥

अ० ॥ आत्मशक्तेरनादित्वं साधयति **चिदिति**—

मू ॥ चिच्छक्तित्वादनादिस्वशक्तिरीशस्य शक्तिवत् ॥ २८॥ ॥

अ० ॥ इदानीं मीमांसकं प्रति प्रश्नपूर्वकं शक्तेरात्मावारकत्वं साधयति **चक्षुरिति**—

मू ॥ चक्षुर्ग्राह्यातिरिक्तस्य ध्वान्तं नावारकं यतः ।

स्वस्य किं जगदध्यासहेतुरावारकं यदि ॥

काचित्स्वस्यावारिका तद्विशेषत्वात्स्वशक्तिषु ।

आत्मवद्व्यतिरेकेण ततोऽन्यदनुमीयते ॥ २९॥ ॥

व्या ॥ आत्मनो नानाविधशक्तीनाम्मध्ये **स्वस्य** जगत्कारणत्वसमर्पिका काचिच्छक्तिरिति पक्षनिर्देशः । शेषस्सुगमः ॥ २९॥ ॥

अ० ॥ शक्तौ तमस्त्वं साधयति **आवारिकेति**—

मू ॥ आवारिका तु सा शक्तिस्तमो भवितुमर्हति ।
धीनाश्यभ्रमहेतुत्वादन्धकारो यथा तथा ॥ ३०॥ ॥

व्या ॥ यथा ऽन्धकारस्य इयं रज्जुरिति ज्ञाननाश्यसर्पभ्रमहेतुत्वात्तमस्त्वं तद्वदात्मशक्तेरपि देहव्यतिरिक्तोऽहमिति ज्ञाननाश्यो यो जातोऽहं मृतोऽहमित्यादि भ्रमः तं प्रति हेतुत्वात्तमस्त्वं न च भ्रमहेतुभूतैन्द्रजालिकमण्यादौ व्यभिचारः तद्वियोगस्यैव तद्भ्रमनाशकत्वेन ज्ञाननाश्यविभ्रमहेतुत्वाभावात् तन्मिथ्यत्वंतु असत्वं जपावियोगात् मणिलौहित्यवत् मण्यादि वियोगादवगम्यताम् ॥ ३०॥ ॥

अ० ॥ नन्वेतेषां शक्तितद्धर्मविशेषसद्भावपराणामनुमानानां 'ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढा' मित्यादिश्रुत्यनन्तरभावित्वे सति कथम् ॥ श्लो ॥ 'ज्ञानस्य प्रागभावो यस्तस्य ज्ञानं प्रमाणकम् । आद्ये पक्षे द्वितीयादावनुमानानुवादक' मिति प्रागुदाहृतश्लोकेन श्रुतीनामनुवादकत्वमुक्तामिति प्राप्ते श्रुतिमनपेक्ष्यानुमानानां प्रदर्शितत्वाच्च ।

'न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र ही'त्यादि ब्रह्मसूत्रैरात्मनस्सर्वनियन्तृत्वसर्वशक्तिमत्वादिसद्भावे श्रुतीनामनुवादकत्वस्य व्यवस्थापितत्वाच्चेत्याह **एतेषामिति**—

मू ॥ एतेषामनुमानानामनुवादाः पुरेरिताः ।
वेदा उभयलिङ्गाधिकरणोक्तप्रकारतः ॥ ३१॥ ॥

स्पष्टोऽर्थः ॥

अ० ॥ तदुभयलिङ्गाधिकरणार्थसंग्राहकमधिकरणरत्नमालावाक्यमुदाहरति **ब्रह्मेति**—

मू ॥ ब्रह्म किं रूपि वाऽरूपि भवेन्नीरूपमेव वा ॥ ३२ ॥
द्विविधश्रुतिसद्भावाद्ब्रह्म स्यादुभयात्मकम् ।
नीरूपमेव वेदान्तैः प्रतिपाद्यमपूर्वतः ॥ ३३ ॥
रूपि त्वनूद्यते भ्रान्तमुभयत्वं विरुद्ध्यते ॥ ३३॥ ॥

व्या ॥ 'तदेतच्चतुष्पाद्ब्रह्मे'त्यादिश्रुतयः रूपवद्ब्रह्म प्रतिपादयन्ति । 'अस्थूलमनण्वि'त्यादि श्रुतयो नीरूपम् तस्मात् वस्तुत उभयात्मकं ब्रह्मेति प्राप्ते

ब्रूमः नीरूपमेव शास्त्रप्रतिपाद्यं मानान्तरासिद्धत्वात । जगत्कर्तृत्वादिरूपयुक्तन्तु ब्रह्म क्षित्यादिकं सकर्तृकं कार्यत्वादित्याद्यनुमानेनावगम्यते अत उपासनायामनुवते न तु तात्पर्येण प्रतिपाद्यते न च शास्त्रानुमानसिद्धयोरुभयोर्वास्तवत्वम् एकस्मिन्वस्तुनि सरूपत्वनीरूपत्वयोर्विरोधात् तस्मादतात्पर्यविषयस्य शक्तिमत्वादि रूपस्य नीरूपपरागमबाधिताभासानुमितिगोचरस्यानुवादकत्वं वेदानां सिद्धमित्यर्थः ॥

अ० ॥ यथा चोभयलिङ्गाधिकरणेन आत्मनश्शक्तिमत्वादिपरशास्त्रस्यानुवादकत्वमुक्तं तथैव 'ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम् परास्य शक्तिर्विविधैव श्रूयत' इति श्वेताश्वतरमन्त्रोऽपि स्वस्यात्मशक्त्यादिसद्भावे अनुवादकत्वमेव दर्शयतीत्याह **देवेति**—

मू ॥ देवात्मशक्तिं स्वगुणैर्निगूढां मुनयोऽविदुः ॥ ३४ ॥
परास्य शक्तिर्विविधेत्येव संश्रूयते मया ।
इति वेदवचो युग्मं क्रियावाचिपदेन हि ॥ ३५ ॥
विस्पष्टं स्वयमेवाह शक्तौ स्वस्यानुवादताम् ॥ ३६ ॥ ॥

व्या ॥ अविदुरिति पदेन श्रुत्युक्तमपश्यन्निति पदं संगृहीतं । स्पष्टमन्यत् ॥

अ० ॥ अधुनात्मशक्तेरद्रव्यत्वानुमानगम्यत्वमायासंशकत्वेषु श्रीविद्यारण्याचार्यसम्मतिं दर्शयति **निस्तत्वेति**—

मू ॥ निस्तत्वाकार्यगम्याऽस्य शक्तिर्मायाऽग्निशक्तिवत् ।
इति भूतविवेके च शक्तिर्मायेति कीर्तिता ॥ ३६ ॥ ॥

व्या ॥ **अस्येति** आत्मन इत्यर्थः ॥ ३६ ॥ ॥

अ० ॥ अधुना प्रतिज्ञातार्थे श्रीमद्वसिष्ठसम्मतिं प्रतिजानीते **अतएवेति**—

मू ॥ अतएव च वासिष्ठैर्मन्दमत्यनुसारिता ।
शक्तिसद्भावशास्त्रस्य दर्शिता तानि संशृणु ॥ ३७ ॥ ॥

व्या ॥ यतश्च प्रागुदाहृतश्वेताश्वतरमन्त्रेण स्वस्यात्मशक्तिसद्भावे अनुवादकत्वमुपदिष्टं **अत एव** आत्मनि जगत्सर्जनानुकूलशक्तिकत्वे श्रुतेः प्रामाण्याभावादित्यर्थः । शेषस्सुगमः ॥ ३७ ॥ ॥

अ० ॥ इदानीमात्मनि शक्तिसद्भावपरशास्त्रस्य मन्दमत्यनुसारित्वप्रदर्शनाय शक्तिकल्पकानि वासिष्ठवाक्यान्याह **सर्वशक्तीति**—

मू ॥ सर्वशक्तिपरं ब्रह्म नित्यमापूर्णमद्वयम् ॥ ३८ ॥
ययोल्लसति शक्त्यासौ प्रकाशमधिगच्छति ॥
चिच्छक्तिर्ब्रह्मणो राम शरीरेषूपलभ्यते ॥ ३९ ॥
स्पन्दशक्तिश्च वातेषु दार्ढ्यशक्तिस्तथोपले ॥
द्रवशक्तिस्तथाम्भस्सु दाहशक्तिस्तथाऽनले ॥ ४० ॥
शून्यशक्तिस्तथाकाशे नाशशक्तिर्विनाशिनि ॥
यथाण्डेऽन्तर्महासर्पो जगदस्ति तथात्मनि ॥ ४१ ॥
फलपत्रलतापुष्पशाखाविटपमूलवान् ॥
वृक्षबीजे यथा वृक्षस्तथेदं ब्रह्मणि स्थितम् ॥ ४२ ॥
क्वचित्काश्चित्कदाचिच्च तस्मादुद्यन्ति शक्तयः ।
देशकालविचित्रत्वात् क्ष्मातलादिव शालयः ॥ ४३ ॥
स आत्मा सर्वगो राम नित्योदितमहावपुः ।
यन्मनाङ्मननीं शक्तिं धत्ते तन्मन उच्यते ॥ ४४ ॥
आदौ मनस्तदनुबन्धविमोक्षदृष्टी
पश्चात्प्रपञ्चरचना भुवनाभिधाना ।
इत्यादिका स्थितिरियं हि गता प्रतिष्ठा-
माख्यायिका सुभगबालजनोदितेव ॥ ४५ ॥

व्या ॥ अतिरोहितार्थः ॥

अ० ॥ अधुना शक्तिकल्पनापरस्य शास्त्रस्य मन्दमत्यनुसारित्वपराणि वासिष्ठवचनानि दर्शयति **बालस्येति**—

मू ॥ बालस्य हि विनोदाय धात्री वक्ति शुभां कथाम् ।
क्वचित्सन्ति महाबाहो राजपुत्रास्त्रयः शुभाः ॥ ४६ ॥

द्वौ न जातौ तथैकस्तु गर्भ एव हि संस्थितः ।
वसन्ति धर्मयुक्तास्ते ह्यत्यन्तासति पत्तने ॥ ४७ ॥
स्वकीयशून्यनगरान्निर्गत्य विमलाशयाः ।
गच्छन्तो गगने वृक्षान् ददृशुः फलशालिनः ॥ ४८ ॥
भविष्यन्नगरे तत्र राजपुत्रास्त्रयोऽपि ते ।
सुखमद्य स्थिताः पुत्रा मृगयाव्यवहारिणः ॥ ४९ ॥
धाऱ्येति कथिता राम बालकाख्यायिका शुभा ।
निश्चयं स ययौ बालो निर्विचारणया धिया ॥ ५० ॥
इयं संसाररचना विचारोज्झितचेतसाम् ।
बालकाख्यायिकेवेत्थमवस्थितिमुपागता ॥ ५१ ॥
इत्यादिभिरुपाख्यानैरात्मशक्तेस्तु कल्पना ।
नोपपन्नेति चादेशादनुमानानुवादिनी ॥ ५२ ॥

व्या ॥ यथातिमूढो राजपुत्र इयं तावदाख्यायिका संभाविताभिधेयवत्येवेति निश्चिनोति तथेयं संसाररचनोक्तिश्च भवेदिति पौर्वापर्यपर्यालोचनाहीना अनुमातारः केचित् 'वाचारम्भणं विकारो नामधेय' मिति श्रुतिविरोधेन मेनिरे इत्युक्ता प्राग्यत् द्वितीयादावनुमानानुवादकमिति प्रतिज्ञातम् तदुपसंहरति **इत्यादिभिरिति** ननु कथं ब्रह्मणि शक्तिसद्भावग्राहिणां विचारोज्झितचेतस्त्वमिति चेत् द्विसप्ततितमश्लोकवृत्तौ तद्दर्शयिष्यामः ॥

अ० ॥ इदानीं तृतीयपक्षत्वेन प्रतिज्ञाताया मायाया जगत्प्रकृतित्वे प्रमाणादिकं दर्शयति **वक्ष्य इति**--

मू ॥ वक्ष्ये तृतीयपक्षेऽथ प्रमाणञ्च द्वितीयके ।
शक्तिर्मायेति चाव्यक्तमाकाशोऽज्ञानमित्यपि ॥ ५३ ॥
जगत्प्रकृतिभूताया नामानीति च वादिनः ।
तत्वनिर्णयकाराद्या अनादित्वादिकेऽपि च ॥ ५४ ॥

श्रौतानि नानावाक्यानि प्रमाणमिति मेनिरे ॥ ९४॥ ॥

व्या ॥ द्वितीयक इति द्वितीयप्रदर्शक इत्यर्थः । तत्वनिर्णयकारः आद्यो येषाम् सिद्धान्तमुक्तावळीकारादीनां ते तत्वनिर्णयकाराद्याः शेषस्सुगमः ॥

अ० ॥ कानि तानि वाक्यानीत्यत आह **मायां त्विति**--

मू ॥ मायान्तु प्रकृतिं विद्यात् सुप्तश्चानादिमायया ॥ ९५ ॥
सुषुप्तिकाले सकले विलीने तमसा वृतः ।
एवमादीनि वाक्यानि तत्प्रामाण्यबलेन च ॥ ९६ ॥
द्रव्यात्मिकां तमोरूपां स्वात्मन्यारोपितामपि ।
ज्ञाननाश्यत्वसिद्धयर्थमनिर्वाच्यां समीर्य च ॥ ९७ ॥
तत्रैतान्यनुमानानि प्रमाणत्वेन मेनिरे ॥ ९७॥ ॥

व्या ॥ एवमादीनीति श्वेताश्वतरादीनि वाक्यानीत्यर्थः । शेषः पूर्ववत् ॥

अ० ॥ कानि तान्यनुमानानीत्यत आह **विकृत्येति**--

मू ॥ विकृत्या प्रकृतेस्साकं सालक्षण्यस्य दर्शनात् ॥ ९८ ॥
जडप्रकृतिकं खादि जडत्वात् कुंभवद्भवेत् ॥ ९८॥ ॥

व्या ॥ पूर्वार्द्धेन व्योमादीनां जडप्रकृतिकत्वानुमानप्रवृत्तिबीजमुक्त्वा उत्तरार्द्धेन तदेवानुमानमुपन्यस्तम् ॥ ५८॥ ॥

अ० ॥ इदानीं जगत्प्रकृतेरनादित्वं साधयति **सर्वेषामिति**—

मू ॥ सर्वेषां प्रकृतित्वात्स्यात्साऽनादिः कापिलं यथा ॥ ९९ ॥

व्या ॥ कापिलमिति कपिलशास्त्रोक्तं । प्रधानमित्यर्थः ॥ ५९ ॥

अ० ॥ इदानीं कार्यस्य कर्तृजन्यत्वं तत्कर्तुरुपादानत्वञ्च क्रमात् साधयति **इदमिति**--

मू ॥ इदं सर्वं कर्तृजन्यं कार्यत्वात् घटवज्जगत् ।
ईशप्रकृतिकञ्चेशानुवृत्ते र्मृदुतो यथा ॥ ६० ॥

व्या ॥ ईश्वरस्य सर्वगतत्वेन तदनुस्यूतत्वात् जगतः तत्प्रकृतिकत्वं यत् यदनुस्यूतं तत् तत्प्रकृतिकमिति सामान्यमुखव्याप्तेः तत्र दृष्टान्तमाह मृदुतो यथेति यथा मृदनुस्यूतः घटः मृत्प्रकृतिकः तथेत्यर्थः ननु घटादेः आकाशानुस्यूतत्वे-

न तत्प्रकृतिकत्वापत्तिरिति चेत् कपालिकादेरिव आकाशादेरपि अवान्तरप्रकृतिकत्वं इष्टमेव ननु कपालिकादेरिव आकाशादेरपि जनिमत्वे हि अवान्तरप्रकृतित्वं भवेत् तत् कुतश्चेत् विभक्तत्वादिति ब्रूमः तर्हि विभक्तयोः जीवेश्वरयोरपि जनिमत्वापत्तिः न तयोः भेदस्य नवमनिरूपणे निराकरिष्यमाणत्वात् जगतः गौणं ईश्वरप्रकृतिकत्वं सिद्धम् ॥ ६० ॥

अ० ॥ तदर्थं ईश्वरस्य प्रकृतिसाहित्यं प्रकृतेः ईश्वरपारतन्त्र्यञ्च साधयति **ईश इति**--

मू ॥ ईशः प्रकृतिमान्कार्यकर्तृत्वात्स्यात् कुलालवत् ।
ईशतन्त्रा भवेत्सा तु जडत्वान्मृत्तिका यथा ॥ ६१ ॥

व्या ॥ ईश्वरो जगत्परिणामिकारणवानित्यर्थः ॥ ६१ ॥

अ० ॥ प्रकृतेः तमोंशविशिष्टत्वं साधयति **सतमा इति**--

मू ॥ सतमाः प्रकृतिर्मोहहेतुत्वात्स्यात्प्रधानवत् ॥ ६१॥ ॥

व्या ॥ प्रधानवदिति साङ्ख्यशास्त्रोक्तमूलप्रकृतिवदित्यर्थः ॥ ६१॥ ॥

अ० ॥ अधुना 'मायान्तु प्रकृतिं विद्यादि' त्यादि शास्त्रस्योक्तानुमानानुवादकत्वमाक्षिप्य परिहरति **एतानीति**--

मू ॥ एतान्यप्यनुमानानि स्युश्शास्त्रैर्विदिते ततः ॥ ६२ ॥
इति चेदनुमानानामनुवादाः पुरेरिताः ।
वेदा उभयलिङ्गाधिकरणोक्तप्रकारतः ॥ ६३ ॥

व्या ॥ 'मायान्तु प्रकृतिं विद्या' दित्यादिशास्त्रैरज्ञाने जगदुपादानत्वेन विज्ञाते सति पश्चात् एतान्यनुमानानि भवेयुरिति चोद्यमनूद्य समाधत्ते **इति चेदित्यादिना** उभयलिङ्गाधिकरणं तावत् प्राक् द्वात्रिंशादिश्लोकाभ्यामुदाहृत्य व्याख्यातम् ॥ ६३ ॥

अ० ॥ ननु यत् 'तत्वनिर्णयकारादिभिर्मायान्तु प्रकृतिं विद्या दिति' लिङ्गो मायायाः प्रकृतित्वविधायकत्वमङ्गीकृतम् तस्य का गतिरिति प्राप्ते ॥ श्लो ॥ विचारयन्नामरणं नैवात्मानं लभेत चेत् । जन्मान्तरे लभेतैव प्रतिबन्धक्षये सती' त्यत्र यथा 'लभेते' ति लिङः अर्हार्थता भवति तद्वत् विद्यादिति लिङः अनुमानेन मायां प्रकृतित्वेन विज्ञातुमर्हतीत्यर्हार्थतासंभवात् तच्छ्रुतेरनुवादकत्वे न कश्चिद्दोष इत्याह **प्रकृतित्वेनेति**--

मू ॥ प्रकृतित्वेन विज्ञातुं मायाख्यामर्हतीति च ।
मायान्तु प्रकृतिं विद्यादिति वेदोऽनुभाषते ॥ ६४ ॥

व्या ॥ स्पष्टोऽर्थः ॥

अ० ॥ ननु जगत्प्रकृतित्वेनानुमितस्य द्रव्यस्य कथं श्रुतिमन्तरेणैव मायेति संज्ञा विज्ञातुं शक्यत इत्यत आह **प्रधानमिति**—

मू ॥ प्रधानमिति संज्ञेव माया संज्ञापि लौकिकी ॥ ६५॥ ॥

व्या ॥ यथा साङ्ख्याभिमतायाः प्रकृतेः प्रधानमिति संज्ञा लौकिकी तद्वदित्यर्थः ॥ ६४॥ ॥

☞ अथ षट्चत्वारिंशोत्तरशततमश्लोकपर्यन्तम् शक्तिमायानुमान बाधकप्रमाणोपन्यासः क्रियते ☜

अ० ॥ एवं पक्षभेदेन मायायास्स्वरूपत्रये प्रमाणान्युपन्यस्य तेषां प्रश्नपूर्वकं प्राबल्यदौर्बल्ये दर्शयति **एतेष्विति**—

मू ॥ एतेषु कस्य दौर्बल्यं कस्य प्रबलतेति चेत् ॥ ६६ ॥
श्रुत्या युक्त्यानुभूत्या च शक्तिमायानुमानयोः ।
बाधितत्वाद्भवेदाद्यं प्रमाणं प्रबलं किल ॥ ६६ ॥

व्या ॥ **एतेष्विति** ॥ मतभेदेन मायास्वरूपत्रयसद्भावे प्रदर्शितेषु प्रमाणेषु कस्य प्रमाणस्य प्राबल्यं कस्य प्रमाणस्य दौर्बल्यमिति प्राप्ते वक्ष्यमाणैश्श्रुत्यादिप्रमाणैः प्रागुपन्यस्तयोः शक्तिस्वरूपमायास्वरूपविषयकानुमानयोः बाधितत्वात् आद्यं ज्ञानप्रागभावरूपाज्ञानविषयकं ज्ञानमेव केनाप्यबाधितत्वात् प्रमाणं भवेदित्यर्थः ॥

☞ शक्तिमायानुमानबाधकप्रमाणानि ☜

अ० ॥ इदानीं शक्तिमायास्वरूपविषयकानुमानबाधकं तु 'स यो ह वै तदच्छाय' मित्यादि शास्त्रमेवेति दर्शयति **स यो वेत्तीति**—

मू ॥ स यो वेत्ति तदच्छायमशरीर मलोहितम् ।
शुभ्राक्षरमुपादानमिति प्रश्नाख्यवेदतः ॥ ६७ ॥
अस्य रूपमिदं तुच्छमिति श्रुत्या तमो मयी ।
निराकृता तत स्तस्या अनुमानञ्च बाधितम् ॥ ६८ ॥

व्या ॥ उदाहृतश्रुतिद्वयं तावत् मायाशक्त्योरसत्वं तु यस्माच्छ्रुत्या विधीयत इति प्रागुक्तदशमादिश्लोकैरुदाहृत्य व्याख्यातम् । तच्छ्रुतिद्वयेन तस्यास्स्वरूपावारिकाया आवरणशक्तेर्मायायाश्च बाधितत्वात् तत्तद्विषयकमनुमानमपि बाधितार्थविषयकत्वादप्रमाणं अवेदित्यर्थः ॥ ६८ ॥

अ० ॥ पूर्वोक्तानां शक्तिमायाविषयकानुमानानां अप्रामाण्यवेदनाय तद्बाधकत्वेन प्रागुदाहृतश्रुत्यनुसारीणि देवाशङ्कानिरासकानि ब्रह्मगीतावचनान्युदाहरति **ब्रह्मणीति**—

मू ॥ ब्रह्मण्यद्धचस्तमायायाः निवृत्तिं कुरुते तु सा ।
विद्या यदि न मायायाः प्रत्यगात्मन्यसंभवात् ॥ ६९ ॥

व्या ॥ **प्रत्यगात्मनीति** प्रत्यगात्मनि तत्स्वरूपावारकत्वेन मायायाः स्वरूपाद्ध्यासासंभवात् तदावरणनिवृत्त्यर्थं ब्रह्मणो वृत्तिविषयत्वं न संभवतीत्यर्थः ॥

अ० ॥ इहाले तत्काष्ण्यविरुद्धस्याध्यासिकरजतस्येव प्रत्यगात्मनि तज्ज्योतिषा विरुद्धस्य तत्स्वरूपावारकत्वेनाद्ध्यासिकमायास्वरूपस्यासंभवे प्रत्यगात्मा नाध्यासिकतमोधिकरणम् भवितुमर्हति तमोविरोधिज्योतिस्स्वरूपत्वात् आदित्यप्रभावदित्यनुमानं श्रुतिं सार्वजनीनानुभवञ्च दर्शयति ब्रह्मा **प्रत्यगिति**—

मू ॥ प्रत्यगात्मा परंज्योतिर्माया सा तु महत्तमः ।
तथा सति कथं मायासंभवः प्रत्यगात्मनि ॥ ७० ॥

तस्मात्तर्कप्रमाणाभ्यां स्वानुभूत्या च चिद्घने ।
स्वप्रकाशैकसंसिद्धे नास्ति मायात्मनीति हि ॥ ७१ ॥

निरस्तं ब्रह्मगीतास्थतुरीयाध्यायगैस्तमः ।
अतश्शक्तेश्च मायाया अनुमानन्तु दुर्बलम् ॥ ७२ ॥

व्या ॥ प्रत्यगात्मेत्यादिकन्तु ब्रह्मवाक्यम् । इति हि निरस्तमित्यादिकं कविवाक्यम् । एतेनोदाहृतब्रह्मगीतावाक्येनैव शक्तिमायानुमानयोः श्रुतियुक्त्यनुभवैर्बाधदर्शनात् भवेदाद्यं प्रमाणं प्रबलं किलेति प्राक् षट्षष्टितमश्लोकेन प्रतिज्ञातार्थसिद्धिः तत्षट्षष्टितमश्लोके स्वप्रतिज्ञातानुमानं त्वत्र ब्रह्मणा मुखत एव दर्शितम् स यो वेत्ति तदच्छायमित्यादि श्लोकेनोदाहृतश्रुतिसद्भावश्च ब्रह्मोक्तप्रमाणेति पदेना-

भ्यनुज्ञातः। ब्रह्मणा स्वेन च तत्त्वज्ञानात्पूर्वमपि तमोरूपं स्वरूपावरणं नास्तीति प्रतिज्ञाते ह्यनुभूतिं तु सप्तसप्ततितमादिभिः नन्वेकत्वं स्वतो भायादिल्यादिश्लोकैरुत्तरत्र दर्शयिष्यति च। अतो ज्योतिस्स्वरूपे प्रतीचि नाध्यासिकं तमः सिध्यतीत्यास्थेयम् स्वात्मजगतोरेकसत्ताजिज्ञासुभिरित्यर्थः।

१. शङ्का ॥ ननु ब्रह्मोक्तानुमानादिना दर्शितः स्वात्मज्योतिषि आध्यासिकतमसो ह्यभावस्तु पेचकस्य सूर्यप्रकाशे तदारोपिततमः प्रत्यक्षेण बाधित इति चेत् न।

समाधानम्—कदाचिदस्मदृष्टेरिव पेचकदृष्टेरपि सूर्यतिग्मप्रकाशप्रतिहतशक्तिकत्वप्रयुक्तविषयग्रहणाभावातिरेकेण तिमिरस्य अस्माकमिव पेचकस्यापि प्रकाशसाहित्यदशायां चक्षुषा साक्षिणा वा तदाऽनुपलब्धेः ॥ १ ॥

स० ॥ चक्षुषो महाप्रकाशसाहित्यदशायां आध्यासिकं तमश्चक्षुषाऽनुभूयत इति विप्रतिषिद्धत्वाच्च ॥ २ ॥

स० ॥ अन्यथा सूर्यप्रकाशवच्चन्द्रप्रकाशेऽप्यस्माकं पेचकस्य च शुक्तिसदृशरज्ञे रजतकल्पकत्ववत् तमःकल्पकत्वापत्तेश्च ॥ ३ ॥

स० ॥ श्लो० ॥ जीवन्नाखुर्न मार्जालं हन्ति हन्यात् कथं मृत इति मार्जालं मृतमूषिक इव यस्य पेचकस्य रात्रौ विषयं वास्तवं तमो नावृणोति तस्य पेचकस्य स्वारोपितमत एव वास्तवत्वविहीनं तमो दिवि विषयं कथमावृणुयादिति बाधज्ञानाच्च ॥ ४ ॥

स० ॥ अस्मदृष्टेः सूर्यतिग्मप्रकाशेन प्रतिहतशक्तिकत्वेन विषयग्रहणाभावसमये तिमिराभावानुभवाच्च ॥ ५ ॥

स० ॥ इङ्गालादौ रजताध्यासासंभवनिदर्शनाच्च ॥ ६ ॥

स० ॥ एतन्निरूपणोक्तसप्तषष्टितमादिश्लोकेनोदाहृतागमेभ्यश्च पेचकेत्वाहततमः प्रत्यक्षस्य बाधितत्वाच्च ॥ ७ ॥

२. शङ्का ॥ ननूक्तप्रमाणैः स्वयंज्योतिस्स्वरूपचैतन्ये तमोरूपाज्ञानाध्यासस्य सति किमर्थं श्रीरामानन्दविवरणाचार्यादिभिः स्वात्मनि अनुमितं तम इति चेत्

स० ॥ चतुर्थप्रदर्शके वक्ष्यमाणानां त्रयाणां सोपानानां मध्ये द्वितीयतस्सोपानमतो वा यथाकथञ्चित् मन्दमतीनां बुद्धेः स्वस्वरूपविचारे प्रवेशसिध्यर्थमम् तथाहि प्रचण्डमार्तण्डमण्डले पेचकानुभवसिद्धान्धकारवत् अहमज्ञानेद्धं भावरूपमज्ञानं दुरपह्नवं कल्पितस्याधिष्ठानास्पर्शित्वात् नित्यस्वरूप-

ज्ञानस्याज्ञानाविरोधित्वाच्चेति च विवादपदं प्रमाणज्ञानं स्वप्रागभावातिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकं अप्रकाशितार्थप्रकाशकत्वात् अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावदिति च एवं जातीयकानुमानोपन्यासः स्वात्मजगतोरेकसत्तावादश्रवणानधिकारिणां पूर्वोत्तरविरोधतत्परिहारविमर्शरहितानां मन्दमतीनां प्रातिभासिकसत्ताप्रक्रियया व्यावहारिकसत्ताप्रक्रियया वा यथा कथञ्चित् स्वरूपविचारे प्रवेशसिध्यर्थमिति विज्ञापयितुम् ॥

स्वयमेव रामानन्दस्वामिनोऽनेन--कारणवत् कार्यस्यापि सत्वात् सत्वभेदे मानाभावात् कार्यस्य कारणादभिन्नसत्ताकत्वमिति सूत्रस्यार्थान्तरमाह--यथा कारणं ब्रह्म त्रिष्वपि कालेषु सत्वं न व्यभिचरति एवं कार्यमपि जगत् त्रिष्वपि कालेषु सत्वं न व्यभिचरति एकं च पुनस्सत्वमतोऽप्यनन्यत्वं कारणात् कार्यस्येत्यारम्भणाधिकरणीयैः सत्वाच्चापरस्येति,' सूत्रतद्भाष्यतदवतरणैः केनापि वादिना जगति ब्राह्मसत्तासमानपारमार्थिकसत्तानभ्युपगमात् तद्व्यावृत्तिपरतया नेतुमशक्यैः तुच्छमिदं रूपमस्य--तदेतदच्छायमशरीरमित्यादि श्रुत्यनुसारिभिः तथैव ईक्षतेर्नाशब्दमिति सूत्रस्य भाष्ये उदाहृतायाः 'तद्व्यानयोगानुगता अपश्यन्देवात्मशक्तिं स्वगुणैर्निरूढां। परास्य शक्तिर्विविधैव श्रूयत' इति श्रुतेरनेन स्वात्मनः शक्तिरूपमायास्वकार्यापेक्षया परा विचित्रकार्यकारित्वाद्विविधेति तमोरूपमायाया जगत्कारणत्वमनूद्य सा त्वैतिह्यमात्रसिद्धा न प्रमाणसिद्धेति श्रुतिरेवाह श्रूयत एवेति तमसः प्रमाणासिद्धत्वेनासत्वविधायकश्रुतिव्याख्यानेन च आध्यात्मिके प्राज्ञे ॥

एतेनेश्वरस्यापि नित्यनिवृत्ताविद्यस्योत्थानं प्रत्युक्तमिति स एव तु कर्मानुस्मृतिशब्दविधिभ्य इति सूत्रभाष्यतद्व्याख्यानाभ्यां चाधिदैविकपरमेश्वरे च ॥

तमोरूपाज्ञानसाधकस्य स्वकीयस्य परकीयस्यानुमानस्य च प्रत्यक्षादेश्च प्रागुक्तब्राह्मानुमानप्रश्नोपनिषच्छ्वेताश्वतर--सूत्र--तद्भाष्य--तद्व्याख्यानैर्बाधितत्वात् प्रामाण्याभावं विस्पष्टं प्रदर्शयन्ति स्म ॥ १ ॥

स० ॥ किंच तदेतदच्छायमशरीरं--तुच्छमिदं रूपमस्येति श्रुतिश्च ॥

तन्मूलकमिदानीं व्याख्यायमानं प्रत्यागात्मनि आध्यासिकतमोनिरसनपरं ब्राह्ममनुमानवाक्यं च ॥

तदुपपादनपरत्वेन वक्ष्यमाणं तमोरूपाज्ञाननिरसनपरं । ब्राह्मं वाक्यं च ॥

श्लो० ॥ विद्याद्दृष्ट्या श्रुतं तुच्छं तस्य नित्यनिवर्त्तनादिति श्रीविद्यारण्याचार्य वचनञ्च ॥

श्लो० ॥ प्रतीत्या केवलं शक्तिरचिद्रूपेति ज्ञानप्रागभावपरत्वेन वक्ष्यमाण ब्रह्मवाक्यं च ॥

प्राग्रामानन्दैर्व्याख्यातश्रुतिसूत्रतद्भाष्याणि च ॥

एतत् सर्वप्रमाणानुसारीदं स्वात्मजगतोरेकसत्ताकत्वे तयोस्सदसतो रावार्यावयवगुणधर्मराहित्येन द्वैतभ्रमप्रतिबन्धकज्ञानप्रागभावस्य प्रतिबन्धकाभावविधयैव तन्निमित्तकारणत्वं न भिन्नसत्तावादे अधिष्ठानावारकतमस इवावरणविधयेति बोधकं शास्त्रं च ॥

न मनागपि बाधितं भवति विभिन्नविषयत्वात् !

तथाहि अद्वैतसिद्धौ प्रागुक्तं विवरणानुमानन्तु प्रतिकर्मव्यवस्थामभ्युपगम्य चेदमनुमानमुक्तमित्यत्रत्यचकारेण नेह नानास्तीति श्रुतिर्निषिद्धामपीति दर्शयित्वा न तु दृष्टिसृष्टिवादोनुमित इति ध्येयमिति दृष्टिसृष्टिवादश्रवणाधिकारिणोऽप्यधमाधिकारिणं प्रति प्रवृत्तमिति चादिश्य ज्ञानप्रागभावस्यापि विषयावारकत्ववादिनां तदनावारकत्ववादिनां च मतानुसारेण ज्ञानप्रागभाव एवानेनानुमानेन विवक्षित इति भ्रमनिरासाय स्वप्रागभावातिरिक्तस्वविषयावरणेतिविशेषितं तमः न ज्ञानप्रागभावनिरासायेति विवरणाचार्यानुमानगतदृष्टान्तावष्टंभन प्रवर्त्तमानात् सिद्धिकारवचनात्—तदर्थनिर्णायकात्—श्लो० ॥ व्यावहारिकसत्वेऽस्याऽऽवृतिः कारणकार्ययोः। अपूर्वं कारणं कार्यं तद्विकारस्तयोर्भवेत् । प्रातिभासिकसत्वेऽस्याधिष्ठानात्मन एव सा। कार्यं निस्सत्वकञ्चेन्नावृतिस्त्वानन्दकार्ययोः। अतोऽनावारकाज्ज्ञानप्रागभावाद्भ्रमोऽन्यमे इति वचनाच्च प्रागुक्तशास्त्राणां विवरणानुमानस्य च भिन्नविषयत्वं सिद्धम् ॥ २ ॥

३. शङ्का ॥ ननु श्रीरामनन्दविवरणाचार्यानुमानोपन्यासः स्वात्मजगतोरेकसत्ताश्रवणानधिकारिणां पूर्वोत्तरविरोधतत्परिहारपरामर्शरहितानां यथाकथं चित्स्वरूपविचारे प्रवेशसिद्ध्यर्थमित्युक्तं के त इति चेत् ।

स० ॥ दृष्टिसृष्टिवादिनः प्रतिकर्मव्यवस्थानिष्ठाश्च द्वैतिनश्चेति ब्रूमः ॥

तथा हि अपौरुषेयो वेदो ह्येकत्र तुच्छमिदं रूपमस्य तदेतदच्छायमित्यादिवाक्येन तमोरूपाज्ञानवर्जितं स्वात्मतत्वं जगद्विवर्त्तोपादानमित्युक्त्वा स्थलान्तरे तदनुगुणमेव ते ध्यानेयागानुगता अपश्यन्देवात्मशक्तिं स्वगुणैर्निगूढाम् । पराऽ

स्य शक्तिर्विविधैव श्रूयत इति स्वात्मधर्मावारकशक्तिसद्भावे स्वस्यानुवादकत्वं च संप्रदर्श्य अन्यत्र स एव मायापरिमोहितात्मा 'शरीरमास्थाय करोति सर्वं' मिति पूर्वोक्तश्रुतिविरोधेन आत्मनो मायाख्यतमसावृतत्वं ब्रवीतीति विरोधविमर्शं विना च ।

तथैवैकस्यात्मैवेदं सर्वमिति वाक्येन सर्वस्य जगतः स्वात्ममात्रप्रकृतिकत्वमादिश्यान्यत्र तद्विरोधेन 'सर्वं विकारजातम्मायामात्रमिति' वाक्येन सर्वविकारस्य मायामात्रप्रकृतिकत्वं कथं वदति कथं वा तद्विरोधेन चतुर्थनिरूपणोक्तप्रकारेण जगतः कर्ममात्रप्रकृतिकत्वमादिशतीति पूर्वोत्तरविरोधपरामर्शं विनैव च । सर्वत्र प्रामाण्यग्रहणात् ते पूर्वापरविरोधविमर्शरहिता इत्युच्यन्ते ।

तथैव स्वात्मन्याध्यासिकतमोनिरासकं शास्त्रमुत्तमाधिकारिणं प्रति स्वात्मसत्तातिरेकेण जगति सत्तान्तराभावप्रदर्शनपरमिति च ।

मध्यममधिकारिणं प्रति स्वभिन्नत्वेन प्रतीयमानस्य जगतः स्वात्मन्यध्यस्ततमःप्रकृतिकत्वेनाऽज्ञातसत्तानिषेधपूर्वकं प्रातीतिकसत्वानिर्वचनीयत्वयोर्विधायकमिव प्रतीयमानं श्लो० ॥ स एव मायापरिमोहितात्मा शरीरमास्थाय करोति सर्वं । सर्वं विकारजातं मायामात्रं सुषुप्तिकाले सकले विलीने तमोभिभूतस्सुखरूपमेतीत्यादि शास्त्रं तावत् प्रामाणानन्दभाष्यकारविद्यारण्याचार्यैर्व्याख्यातत्वेन प्रदर्शित-सूत्रतद्भाष्यतद्व्याख्यानतन्मूलश्रुत्यादिभिर्बाधितत्वेन न स्वात्मजगतोरेकसत्तापरशास्त्रबाधकमिति च ।

व्यावहारिकसत्यत्वपराणीव प्रतीयमानानि ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादि लिङादीनि पञ्चमनिरूपणेऽष्टाशीतितमादि श्लोकतद्व्याख्यानोक्तप्रकारेण पारसङ्ख्याविधया निवृत्तिमात्रपरत्वेन न स्वात्मजगतोरेकसत्तापरशास्त्रस्य बाधकानीति च पूर्वोत्तरविरोधपरिहारविमर्शाभावाच्च ते तथोक्ताः ।

किञ्च जगति स्वात्मेतरसत्तानिरतानां शास्त्रेषु पूर्वोत्तरविरोधतत्परिहारविमर्शराहित्यं त्वस्मिन् द्वितीयनिरूपणे षट्चत्वारिंशादिश्लोकत्वेनोदाहृतवासिष्ठवचनैरवगम्यताम् ।

किञ्च नन्वस्त्रैष स्वभावो यत्स्वसम्बन्धिनोऽभावं बोधयतीतिभाष्यानुसारेण सुप्तौ तात्कालिकं यत्तत्वं तदीयानुभवमूलकपरामर्शपरस्य न किञ्चिदवेदिषमिति मद्वचनस्य नञो विरोधपरत्वमवलम्ब्य स्वात्मविवर्त्तविशेषणजगतोर्मध्ये यत् स्वविवर्त्तं विशेषणं यत् प्रातिभासिकजगद्व्यतिरिक्तं व्यावहारिकं जगत्

तद्विषयकतमोरूपावरणाश्रयः आसमित्यवेहीत्यन्यथार्थप्रतिपादने अस्थूलमनणु—नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात् न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येदिति बृहदारण्यादिश्रुत्या सुप्तौ स्वात्मातिरेकेण तद्विवर्त्तविशेषणादिभावरूपजगदसत्वविधायकश्रुतिविरोधेन स्वात्मविवर्त्तविशेषणादि जगदावरणाश्रयत्वे तच्छ्रुतिविरोधापत्तिः अपरोक्षस्य स्वात्मविवर्त्तस्यावरणे विवर्तत्वभङ्ग इति च विरोधविमर्शेन च तथैव तद्बृहदारण्यादिश्रुतिरुत्तमाधिकारिणे स्वात्मजगतोरेकसत्तामात्रमादाय स्वात्मविवर्त्तं तद्विशेषणादिकमन्यथाभानं किञ्चिदपि सुप्तौ नास्तीति बोधयत्यतः सुप्तौ मयि न किञ्चिदप्यस्तीति स्वयंप्रकाशसन्मात्रः प्रत्यभामीत्यमुमर्थं विहाय अन्यथा कथमभावपरत्वमात्रं नश्यो विजानतां मादृशां न किञ्चिदवेदिषमिति वाक्यं अज्ञातसत्ताकवस्तुसद्भावे प्रमाणं भवेत् कथं वा सुप्तौ आवृतसत्ताविषयक लोकदृष्ट्यनुवादकशास्त्रस्य च प्रामाण्यं भवेदतो विवर्तयोः स्वात्मविशेषणजगतोराध्यासिकमावरणं नास्तीति तद्विरोधपरिहारविमर्शेन च रहिता जगति स्वात्मेतरसत्ताग्राहिणः ।

शक्तिमायानुमानबाधकप्रमाणान्यप्यस्मिन्नेव द्वितीयनिरूपणे पञ्चषष्टितमश्लोकादारभ्य द्व्यशीतितमश्लोकान्तैरुदाहृतानि ।

४. शङ्का ॥ ननु स्वात्मजगतोरेकसत्तावादे स्वात्मसत्तातिरेकेण स्वतो घटादिषु त्रिविधसत्तानां मद्ध्येऽन्यतमसत्ताया अप्यभावात् घटमहं जानामि न जानामीत्यादिव्यवहारस्य कथमुपपत्तिरिति चेदुच्यते—

स० ॥ यथा स्वाप्निकगजादीनां ज्ञातैकसत्ताकादपरोक्षभूतात् पार्श्वादन्यं तदीय पार्श्वे चित्रगजीयपार्श्वान्तरञ्च न जानामीत्यत्र तत्पार्श्वान्तरयोः—त्रिविधसत्तानाम्मध्येऽन्यतमसत्ताया अप्यसत्वात् यथा तत्पार्श्वात्मना न भामीति वाक्यार्थो भाति तद्वद्घटमहं न जानामीत्यत्रापि घटात्मना न भामीति वाक्यार्थो भवति—घटमहं जानामीत्यत्र च घटात्मना भामीति च भवति ।

किञ्च ॥ श्लो० ॥ सत्तार्हीनस्य कार्यस्यासत्वमेव हि युज्यत इति श्रीब्रह्मगीतोक्तप्रकारेण स्वात्मसत्तां विना जगति स्वतस्त्रिविधसत्ताराहित्यवादे घटमहं पश्यामीत्यत्रत्यद्वितीयाया राहोश्शिर इत्यत्रत्यषष्ठ्या इव वस्तुसित्यनुसारेण घटात्मना भामीत्यभेदपरत्वं भवेत् यथा च मामहं जानामीत्यत्र मद्रूपतया भामीति भवति यथा वा आत्मावारे द्रष्टव्य इति श्रुतिश्चोदनां ब्रवीतीत्यत्र श्रुतिश्चोदनारूपेण भवतीति चोदनावाक्यस्यापि श्रुतित्वात् ।

एवमेवैकसत्तावादे सर्वव्यवहारोपपत्तिं श्रुतिस्मृतिवादा दर्शयन्ति--श्रु० ॥ अहमन्यवदाभामि अहमेव शरीरवत् । अहं शिष्यवदाभामि अहमेव गुरोर्गुरुः । स्मृ० ॥ जगद्रूपतयाप्येतद्ब्रह्मैव प्रतिभासते । विद्याविद्यादिरूपेण भावाभावादिभेदतः । गुरुशिष्यादिरूपेण ब्रह्मैव प्रतिभासत इति ।

किञ्चास्मिन्नेकसत्तावादे उपपत्त्यन्तरं च प्रथमनिरूपणे पञ्चाशश्लोकतद्व्याख्यानाभ्यां एकोनशततमादिश्लोकषट्कतद्व्याख्यानाभ्यां च उदाहृतब्रह्मगीतावचनैः सम्यग्विस्तरेणावगम्यताम् ।

ज्ञानप्रागभावसद्भावानुभवश्चाशीत्यष्टादशश्लोकतद्व्याख्यानाभ्यां दर्शितः--

अत्रैकोनचत्वारिंशोत्तरशततमश्लोकत्वेनोदाहरिष्यमाणविद्यारण्याचार्यवचनेन च द्वैतभ्रमनिमित्तत्वेन ज्ञानप्रागभावोऽवगम्यताम् ।

तत्प्रतियोगिज्ञानस्वरूपन्तु सप्तमादिश्लोकत्रयतद्व्याख्यानाभ्यामस्मिन्नेव द्वितीयनिरूपणे प्रागेव दर्शितम् ॥ ७२ ॥

अ० ॥ अधुना ब्रह्मगीतायाः पञ्चमाध्यायवाक्यान्यपि तमोरूपाया आवरणशक्तेर्मायायाश्च निरासकत्वेन प्रदर्शयितुकामस्तत्रोक्तानां अज्ञानमितिपदानां अर्थग्रहणे व्यामोहासंभवाय श्लोकचतुष्टयेन तदर्थौ विभज्य दर्शयति **छान्दोग्येति**—

मू ॥ छान्दोग्यषष्ठाध्यायार्थब्रह्मगीतास्थपञ्चमे ।
अध्याये यानि वाक्यानि वदिष्याम्यत्र तत्र तु ॥ ७३ ॥

व्या ॥ **तत्रेति** उत्तरत्रान्वयः ब्रह्मगीतावाक्यानाम्मध्ये इत्यर्थः ॥७३॥

अ० ॥ संप्रति प्रागुदाहृतैः । 'ब्रह्मण्यद्वयस्तमायाया' इत्यादिभिः ब्रह्मगीताचतुर्थाध्यायश्लोकत्रयेण सह 'व्यवहारिकमज्ञानं बाधते विद्ययैव तु । अतो न प्रमितिं वाक्यं कुरुतेऽज्ञानबाधकम् ॥ व्याहारिकमज्ञानमपि ब्रह्मैव वस्तुत' इति वक्ष्यमाणब्रह्मगीतापञ्चमाध्यायवाक्यगताज्ञानशब्दखाविरोधाय स्वतोऽन्यथा भासमानस्वरूपचैतन्यात्मकभ्रमपरत्वमेव सिद्ध्यतीत्याह **यदज्ञानमिति**—

मू ॥ यदज्ञानं ज्ञाननाश्यं यच्च ब्रह्मेति कीर्तितम् ।
स्वतोऽन्यथा भासमानस्वात्मचैतन्यमेव तत् ॥ ७४ ॥

व्या ॥ व्यावहारिकमज्ञानं बाधते विद्ययैव तु--महावाक्यमिति ब्रह्मवाक्येन यदज्ञानं ज्ञाननाश्यमिति कीर्त्तितं--व्यावहारिकमज्ञानमपि ब्रह्मैव वस्तुत इति ब्रह्मवाक्येन च यदज्ञानं ब्रह्मेति च कीर्तितम्--तदज्ञानशब्दवाच्यं तु **स्वतोऽन्यथा भासमानस्वात्मचैतन्यमेव** अन्यथा स्वरूपावारकत्वेन तस्याज्ञानस्य तत्वान्तरत्वे न मुख्यं ब्रह्मरूपत्वं संभवतीत्यर्थः ॥ ७४ ॥

अ० ॥ इदानीं 'वस्तुतो नास्ति चाज्ञानं चित्प्रकाशविरोधतः । अतो वाक्यं न चाज्ञानबाधकं स्यान्निरूपणे' । इति वक्ष्यमाणब्रह्मवाक्ये यदज्ञानं नास्तीति वाक्यं' तदनिर्वचनीयतमोनिरसनपरमिति दर्शयति । **चिद्विरोधमिति**—

मू ॥ चिद्विरोधं यदज्ञानं ज्ञानानाश्यं समीरितम् ।
तस्यावारकतत्वस्य ह्यसत्वान्नाभिदोदिता ॥ ७५ ॥

व्या ॥ **चिद्विरोधमिति** चिता स्वरूपचैतन्येन कृतो विरोधः स्वरूपलाभे यस्य तमोरूपाज्ञानस्य तत् चिद्विरोधं तस्य व्यावहारिकमज्ञानमपि ब्रह्मैव वस्तुत इति ब्रह्मवाक्येन न ब्रह्माभेद उक्त इत्यर्थः ॥ ७५ ॥

अ० ॥ इदानीं विभागेनाज्ञानशब्दार्थवेदनस्य फलमाह **अनादीति**—

मू ॥ अनादितमसोऽसत्वग्रहायैतद्विचिन्यताम् ।
पूर्वापरविरुद्धार्थवक्तृताऽस्यान्यथाऽऽपतेत् ॥ ७६ ॥

व्या ॥ **एतदिति** अज्ञानशब्दवाच्यमित्यर्थः । अस्येति श्रीब्रह्मण इति यावत् ॥ ७६ ॥

अ० ॥ अधुना छान्दोग्यषष्ठाध्यायार्थब्रह्मगीतास्थपञ्चमे इत्यादिभिः प्रागुक्तश्लोकैः येषां ब्रह्मगीतागतपञ्चमाध्यायवचनानां पूर्वापराविरोधेनार्थग्रहणाय तत्रोक्ताज्ञानादिशब्दार्थो दर्शितः तान्येव ब्रह्मगीतावचनानि तमोरूपाज्ञानासत्वपराण्याह **तत्वमिति**—

मू ॥ तत्त्वं शब्दार्थभूतस्य चिन्मात्रस्य परात्मनः ।
एकत्वं यत्स्वतस्सिद्धं स हि वाक्यार्थ आस्तिकाः ॥ ७७ ॥

व्या ॥ तत्त्वंशब्दयोर्यो लक्ष्यार्थश्चिन्मात्रः परमात्मा तस्य स्वरूपभूतं यदेकत्वं प्रकाशान्तरनैरपेक्ष्येण स्वयं प्रकाशमानं भवति स एव तत्वमस्यादिवाक्यार्थ इत्यवगन्तव्यमित्यर्थः ॥ ७७ ॥

अ० ॥ ननु स्वप्रकाशस्य ब्रह्मणस्स्वरूपभूतं यदेकत्वं तदपि स्वप्रकाशमेवास्तस्य वाक्यबोध्यत्वे स्वप्रकाशत्वभङ्ग इत्यत आह **एकत्वेति**—

मू ॥ एकत्वप्रमितिं वाक्यं न करोति सुरर्षभाः ॥ ७७॥ ॥

व्या ॥ स्पष्टोऽर्थः ॥ ७७॥ ॥

अ० ॥ ननु तत्वमस्यादिमहावाक्यस्य जीवब्रह्मैक्यविषयकप्रमितिजनकत्वाभावे वैयर्थ्यं स्यादित्यत आह **व्यावहारिकेति**—

मू ॥ व्यावहारिकमज्ञानं बाधते विद्ययैव तु ॥ ७८ ॥

व्या ॥ 'तत्त्वमसि' 'नेह नानास्ति किञ्चने' त्यादि वाक्यं तावत् **व्यावहारिकं** इह जगदस्तीति व्यवहारकालिकं **अज्ञानं** भ्रमप्रतिबन्धकस्य यथावत्स्वयं प्रकाशिष्यमाणात्मभूतचैतन्यस्य प्रागभावसाहचर्यात् स्वतोऽन्यथा भासमानं स्वरूपचैतन्यं तथा विद्यायाः प्रागभावरूपामविद्याञ्च **विद्यया** यथावत् स्वतः प्रकाशमानस्वरूपचैतन्यभूतया **बाधते** आत्मनः पूर्वावस्थामपरित्यज्य नानात्मना भासमानतामुच्छिनत्ति—उक्तविधस्य व्यावहारिकाज्ञानस्य विद्याप्रागवस्थारूपत्वात् बाधत––एवेति एवकारेण वाक्यवैयर्थ्यं व्यावर्त्य तुशब्देन एकत्वावारकादज्ञानात् व्यावहारिकाज्ञानस्य भेदः प्रतिबोध्यते ॥ ७८ ॥

अ० ॥ ननु तत्त्वमस्यादिवाक्यमेकत्वविषयकप्रमितिं न जनयेच्चेत् प्रमाणाविषयस्यैकत्वस्य नरविषाणवदसत्वं स्यादतस्तस्य ज्ञानाज्ञानविषयत्वं अङ्गीकार्यमित्यत आह **सदेति**—

मू ॥ सदा प्रमितमेकत्वं स्वत एव न चान्यतः ।
अतो न प्रमितिं वाक्यं कुरुतेऽज्ञानबाधकम् ॥ ७९ ॥

व्या ॥ परप्रकाश्यस्य हि प्रमाणविषयत्वप्रयुक्तं सत्वमवगम्यते । एकत्वन्तु स्वप्रकाशचिदनन्यत्वात् सदा अहमहमिति स्वतः प्रकाशत एव । ततः **न चान्यतः** अन्यस्मात् वाक्यजन्यवृत्तिज्ञानात् न प्रतीयते यत एवं **अतः** एकत्वस्य स्वप्रकाशात्मरूपत्वादेव **न प्रमितिं वाक्यं कुरुते** न वाक्यमेकत्वविषयं ज्ञानं जनयति किन्तु **अज्ञानबाधकं** अज्ञानस्य व्यावहारिकमज्ञानं बाधते विद्ययैव त्विति पूर्वश्लोकव्याख्यानोक्तप्रकारेण बाधकं भवति । अतो न स्वरूपचैतन्यस्य ज्ञानाज्ञानविषयत्वमङ्गीकार्यमित्यर्थः ॥ ७९ ॥

अ० ॥ ननु श्लो. ॥ 'एकत्वप्रमितिं वाक्यं न करोति सुरर्षभाः । सदा प्रमितमेकत्वं स्वतएव न चान्यतः ॥ अतो न प्रमितिं वाक्यं कुरुत' इति यदेकत्वविषयकप्रमित्यजनकत्वं वाक्यस्याभिप्रेतम् तत् किमनिर्वचनीयतमोरूपाज्ञानस्य अनावारकत्वात्, उत नित्यत्वात् आहोस्विदसत्वादित्याशङ्क्य असत्वादेवेति सोपपत्तिकमाह **वस्तुत इति**—

मू ॥ वस्तुतो नास्ति चाज्ञानं चित्प्रकाशविरोधतः ।
अतो वाक्यं न चाज्ञानबाधकं स्यान्निरूपणे ॥ ८० ॥

व्या ॥ **वस्तुत इति** अनिर्वचनीयतमोरूपाज्ञानाख्यतत्त्वतः **नास्ति चाज्ञानमिति** अस्तिशब्दस्सद्वाचकः न शब्दो भेदपरः—तथा चाज्ञानं सद्भिन्नमसदित्युक्त्या तृतीयविकल्पः अङ्गीकृतः । तथैव ॥ श्लो० ॥ 'अज्ञानमिति वार्तापि त्वर्थसद्भाव एव हि' इत्यादिना स्वयमेव वक्ष्यति ब्रह्मा । चकारेण द्वितीयविकल्पं व्यावर्त्य इङ्गाले तत्काष्ण्यविरुद्धरजताद्ध्यासस्येव न प्रथमविकल्पस्यावकाश इत्याह **चित्प्रकाशविरोधत इति** तमस इति शेषः । एवं प्रागुदाहृतैः सप्तषष्टितमादिश्लोकैः श्रुत्याद्यभिमतोपपत्तिश्च दर्शिता **अतः** स्वप्रकाशचैतन्यज्योतिषि आध्यासिकतमसः **स्वरूपासंभवात् निरूपणे** उपपत्तिपूर्वकमविद्याविषयकविचारे क्रियमाणे वाक्यं न चाज्ञानबाधकं स्यादित्यर्थः ॥ ८० ॥

अ० ॥ ननु तेजसि तिमिरस्येव स्वयंज्योतिष्यात्मनि तद्विरुद्धस्य तमोरूपाज्ञानस्य स्वरूपलाभासंभवात् तन्निवृत्त्यर्थं वृत्तिविषयत्वाभावेऽपि एकत्वप्रकाशार्थं वृत्तिविषयत्वं स्यादिति प्राप्ते—एकत्वस्य स्वरूपभूतत्वात् शब्दप्रवृत्तिनिमित्तानां जातिगुणक्रियाणां अभावाच्च 'एकमेवाद्वितीयं' 'नेह नानास्ति किञ्चने' त्यादि वाक्यवत् तत्वमस्यादि प्रमाणमपि प्रत्यगात्मस्वरूपावेदनात् प्रत्यावृत्य तस्य सजातीयभेदभ्रममेव व्यावर्तयतीत्याह **एकत्वमिति**—

मू ॥ एकत्वं यत्पुरा प्रोक्तं तत् स्वयं बोद्धुमर्हति ।
न प्रमाणेन मानानि तस्मिन् कुण्ठीभवन्ति हि ॥ ८१ ॥

व्या० ॥ स्पष्टोऽर्थः ॥ ८१ ॥

अ० ॥ इदानीं ॥ श्लो० ॥ 'व्यावहारिकमज्ञानं बाधते विद्ययैव' त्वित्यत्र व्याख्यातस्याज्ञानविशेषस्य पूर्वावस्थामपरित्यज्यावस्थान्तरेण भानं विवर्त इति

विवर्तलक्षणोक्तप्रकारेण कूटस्थचिदवस्थान्तररूपत्वात् तदभिन्नत्वमाह ॥ **व्यावहारिकमज्ञानमिति**--

मू ॥ व्यावहारिकमज्ञानमपि ब्रह्मैव वस्तुतः ॥ ८१॥ ॥

व्या ॥ अवतरणादेवावगतार्थः ॥ ८१॥ ॥

अ० ॥ ननु 'वस्तुतो नास्ति चाज्ञानं चित्प्रकाशविरोधतः । अतो वाक्यं न चाज्ञानबाधकं स्यान्निरूपणे'--इत्यनेन वचनेन पारमार्थिकाकारेणैवाज्ञानस्यासत्वमुक्तम्--न तु सदसद्विलक्षणाकारेणेत्याशङ्क्य व्यावर्तयन्युत्तरग्रन्थसन्दर्भेण ब्रह्मा **अज्ञानमिति**--

मू ॥ अज्ञानमिति वार्तापि त्वर्थसद्भाव एव हि ॥ ८२ ॥

व्या ॥ हि यस्मात्--'यत् साक्षादपरोक्षाद्ब्रह्म' 'य आत्मा सर्वान्तर' इत्यादिश्रुत्या नित्यापरोक्षस्य निरवयवस्य प्रत्यगात्मन उपादानत्वमवगम्यते--ततस्तत्र तद्विरुद्धं तमोरूपं सदसद्विलक्षणं **अज्ञानमिति** अज्ञानमस्तीति **वार्तापि** वचनमपि अपिशब्दात् तद्विषयकं ज्ञानं च तदुभयं **अर्थसद्भाव एव** अर्थस्य सदसद्विलक्षणरूपस्यार्थस्य प्रमेयस्य स्थितावेव भवितुमर्हति नान्यथा अतो न तादृक् तत्वमस्तीत्यर्थः ॥ ८२ ॥

अ० ॥ ननु व्यवहारबलादेवाज्ञानस्य सत्वं किं न स्वीक्रियत इत्यत आह **सत एव हीति**--

मू ॥ सत एव हि सद्भावो नासतस्सूक्ष्मदर्शने ॥ ८२॥ ॥

व्या ॥ चिद्रूपस्यैव हि सद्वस्तुनः सद्भावः **नासतस्सूक्ष्मदर्शने** सूक्ष्मतो विचार्यमाणे सद्भिन्नस्य न सद्भावसिध्यतीत्यर्थः ॥ ८२॥ ॥

अ० ॥ ननु प्रतीतिबाधान्यथानुपपत्या सदसद्विलक्षणं तदज्ञानमस्तीति तत्राह **सदसत्कोटीति**--

मू ॥ सदसत्कोटिनिर्मुक्तमित्युक्तिश्चार्थभासने ।
खलु नाभासने भानं ब्रह्मवस्त्वेव केवलम् ॥ ८३॥ ॥

व्या ॥ सदसद्वैलक्षण्यप्रतिपादनमपि तत्तत्प्रकारनिरूपणासहत्वप्रतिपादनपरम् न तादृगर्थसद्भावपरम् तथाहि अज्ञानस्य सतो बाधायोगात् असतः प्रतीत्ययोगात् सदसद्विलक्षणमिति यदुक्तम् तदपि उभयथा दुर्निरूपणमित्यभिप्रा-

वेणेत्युक्तम् । न तादृग्वस्तुसद्भावेन अतः **अर्थभासने खलु** ईदृग्विधस्याज्ञानस्य स्वतोभाने सति हि सदसद्विलक्षणं तदिति व्यवहारो भवितुमर्हति **नाभासने** न स्वतो भानवर्जिते अज्ञाने सदसद्विलक्षणमिति व्यवहारस्संभवति ॥ अतः भानरूपं ब्रह्म वस्त्वेव केवलमज्ञानविनिर्मुक्तं सदा भासत इत्यर्थः ॥ ८३॥ ॥

अ० ॥ एवं सदसद्विलक्षणं तमोरूपमज्ञानं नास्तीत्युक्तेऽपि माभूदज्ञानस्य स्वतो भानं भानरूपब्रह्मसबन्धवशात् कुतो न भासेतेति तमोरूपस्याज्ञानस्य स्वरूपतः अनादित्ववादिनामाशङ्कां निराकरोति ब्रह्मा **भानेति**—

मू ॥ भानसंबन्धतो भानमिति वार्ताप्यसङ्गता ।

संबन्धिरूपसद्भावे सति संबन्धसंभवः ॥ ८४॥ ॥

व्या ॥ संबन्धस्य संबन्धिद्वयसापेक्षत्वात् संबन्धात् प्रागेव ब्रह्मण इवाज्ञानस्याऽपि पृथक् स्वरूपसत्वे संबन्धस्संभवति नान्यथेत्यर्थः ॥ ८४॥ ॥

अ० ॥ इदानीं यस्याज्ञानस्य ब्रह्मसंबन्धतो भानमाशङ्कितम् तस्य ब्रह्मभिन्नं सत्वमस्ति किं न वा आद्ये द्वैतापत्तिरित्याभिप्रेत्य द्वितीये न संबन्धसिद्धिरित्याह **सद्भाव इति**—

मू ॥ सद्भावेऽसति संबन्धिरूपं ब्रह्मैव केवलम् ॥ ८५ ॥

व्या० ॥ **सद्भावेऽसतीति** अज्ञानस्य ब्रह्मातिरिक्तसत्वाभावे **केवलं** एकं 'निर्णीते केवलमिति त्रिलिङ्गन्त्वेककृत्स्नयो' रित्यमरः **संबन्धिरूपं ब्रह्मैव** अस्तीति शेषः । एवकारात् न द्वितीयसंबन्धि अज्ञानमस्तीत्युक्तं अतो दुर्निरूपस्सबन्ध इत्यर्थः ॥ ८५॥

अ० ॥ परमतमनूद्य तत् न स्वमतबाधकमित्याह **अनिरूपितेति**—

मू ॥ अनिरूपितरूपेण सद्भाव इति चेन्मतम् ।

अनिरूपितरूपस्य रूपन्तु ब्रह्म केवलम् ।

ब्रह्मैव रूपं नैवान्यन्न रूपमितरस्य हि ॥ ८६॥ ॥

व्या ॥ अपाततः प्रतीयमानस्य तमसः यदनिरूपितरूपमाशङ्कितं तद्रूपन्तु केवलं ब्रह्मस्वरूपमेव तद्व्यतिरिक्तस्य सर्वस्य तद्विवर्त्तत्वेन स्वतो निस्स्वरूपत्वात् ब्रह्मस्वरूपातिरेकेण न तमसः किञ्चिदनिरूपितं रूपमस्त्यतो न तयोस्सदसतोस्संबन्ध इत्यर्थः ॥ ८६॥ ॥

अ० ॥ इदानीमज्ञानस्यानिरूपितरूपेण स्वरूपाभावेऽपि तदतिरेकेण निरूपणार्हस्वरूपेण रूपवत्त्वमाशङ्क्याह **अस्ति चेदिति**--

मू ॥ अस्ति चेदपरस्यापि रूपं तर्हि सुरोत्तमाः ।
रूपरूपेण रूपं हि ब्रह्मरूपं भवेत् खलु ॥ ८७॥ ॥

व्या ॥ रूप्यत इति रूपं निरूपणार्हं स्वरूपं तत् ब्रह्मणोऽन्यस्यापि विद्यते चेत् तदपि रूपं ब्रह्मरूपमेव रूपात्मना उभयोरपि भेदाभावादित्यर्थः ॥ ८७॥ ॥

अ० ॥ भवेदेवं यदि ब्रह्माज्ञानयोरेकरूपत्वे ब्रह्मणो यद्रूपं ततोऽन्येनैव रूपेणाज्ञानस्य रूपवत्त्वं स्यादिति शङ्कते **ब्रह्मेति**--

मू ॥ ब्रह्मरूपेण नान्यस्य रूपं रूपान्तरेण चेत् ॥ ८८ ॥

व्या ॥ ब्रह्मसत्तया नास्य सत्ता किन्तु सत्तान्तरेणैवेति चेदित्यर्थः ॥८८॥

अ० ॥ एकत्वावारकस्याज्ञानस्य ब्रह्मस्वरूपात् रूपान्तरं दूषयितुं त्रिधा विकल्प्य तान् निराकरोति **तर्हीति**--

मू ॥ तर्हि रूपान्तरं रूपाद्भिन्नं वा भिन्नमेव वा ।
भिन्नाभिन्नन्तु वा भिन्नं यदि रूपाद्भिदेदतः ॥ ८९ ॥
तुच्छवत्तदरूपं स्यादभिन्नं चेत्तदेव तत् ।
उक्तदोषद्वयापत्तेर्भिन्नाभिन्नं न तद्भवेत् ॥ ९० ॥

व्या ॥ आद्यं विकल्पं दूषयति **भिन्नं यदीत्यादिना** विमतं तमः अरूपं भवितुमर्हति-निरूपणार्हसत्स्वरूपभिन्नत्वात्-तृष्टज्ञवदित्यभिप्रायः । द्वितीये ब्रह्मव्यतिरिक्तस्य अज्ञानस्य पृथक्स्वरूपलाभो नास्तीत्याह **अभिन्नञ्चेत्तदेव तदिति** तृतीयं निरस्यति **उक्तदोषद्वयापत्तेरिति** भेदाभेदपक्षयोर्यौ दोषावुक्तौ तयोरापत्तेरित्यर्थः ॥ ९० ॥

अ० ॥ 'अनिरूपितरूपेण सद्भाव इति चेन्मत' मिति श्लोकेन प्राग्यदज्ञानस्यानिर्वचनीयस्वरूपमाशङ्कितं तदनया रीत्या वार्तामात्रमेवावशिष्यत इति निगमयति **अत इति**—

मू ॥ अत एव सुरश्रेष्ठा अनिरूपितरूपतः ।
सद्भाव इति वार्ता च वार्तैव खलु केवलं ॥ ९१ ॥

इत्यन्तवचनैस्तद्वत्तमोऽज्ञानं निराकृतम् ॥ ९१॥ ॥

व्या ॥ 'वस्तुतो नास्ति चाज्ञानं चित्प्रकाशविरोधत' इत्यारभ्य 'अत एव सुरश्रेष्ठा अनिरूपितरूपतः । सद्भाव इति वार्ता च वार्तैव खलु केवल' मित्यन्तैर्ब्रह्मगीतायाः पञ्चमाद्ध्यायवचनैर्यद्वत् सदसद्विलक्षणं जीवब्रह्मैक्याद्यावारकं तमोरूपमज्ञानं नास्तीत्युक्तम्—तद्वदुत्तरत्रापि वक्ष्यमाणैः—तस्मादज्ञानमेवैतद्ब्रह्मैव सततोदितम् । अज्ञानमयमेवेदं सर्वमित्यभिभाषणम् ॥ नैव भाषणमज्ञानाभावादेव शिवं विना । तस्मादज्ञानमज्ञानकार्यञ्च सुरपुङ्गवाः ॥ एतद्ब्रह्मैव नैवान्यदिति मे निश्चिता मति' रिति ब्रह्मवचनैः—प्राग्व्याख्यातैः 'ब्रह्मण्यद्वयस्तमायाया निवृत्तिं कुरुते तु सा । विद्या यदी' त्यादिकैर्ब्रह्मगीतायाश्चतुर्थाध्यायवचनैश्चात्मा नित्यापरोक्षः कार्यकारणयोरेकैव सत्तेति स्वमतं दर्शयितुमात्मन्यूनसत्ताकत्वेन केषांचिदभिमतं तमोरूपमज्ञानं निराकृतमित्यास्थेयम् ॥ ९१॥ ॥

अ० ॥ प्रकारान्तरेण चोद्यमनूद्य परिहरति **नन्विति**—

मू ॥ नन्वेकत्वं स्वतोभायात्पूर्णानन्दो न भात्यतः ॥ ९२ ॥
तदावारकमज्ञानं ज्ञाननाश्यं भवेद्यदि ।
पूर्णानन्दे स्वप्रकाशे विरोधान्न तमो भवेत् ॥ ९३ ॥

व्या ॥ स्पष्टोऽर्थः ॥ ९३ ॥

अ० ॥ इदानीमज्ञानस्य ब्रह्मानन्दसत्तातिरिक्तसत्ताकत्वे सति पूर्णानन्दावारकत्वं भवितुमर्हति । ब्रह्मानन्दमात्रसत्ताकत्वे तु मृन्मात्रसत्ताकस्य घटस्य तदुपादानविषय इव न तदावारकत्वं सम्भवतीत्याह **अज्ञानमिति**—

मू ॥ अज्ञानं भिन्नरूपञ्चेत् सुखाद्यावारकं भवेत् ।
प्रागुक्तब्रह्मगीतायां पञ्चमाध्यायतस्सुरैः ॥
अनिरूपितरूपेण सद्भावोऽस्त्विति शङ्किते ।
तच्छङ्काया निराकर्त्री पृथक् सत्तानिराकृतेः ॥
अज्ञानानन्दयोरत्र नानन्दस्यावृतिर्भवेत् ॥ ९५॥ ॥

व्या ॥ अत्रेति कार्यकारणयोरेकसत्तावाद इत्यर्थः । शेषस्सुगमः ॥ ९५॥ ॥

अ० ॥ विवर्तस्य लक्षणं प्रश्नपूर्वकमाह **एकसत्व इति**—

मू ॥ एकसत्वे विवर्तस्य लक्षणं किं यदि ब्रुवे ।

अवस्थान्तरभानञ्च विवर्तो व्योमनैल्यवत् ॥ ९६॥ ॥

व्या ॥ यथा नभो नीलमित्यत्र भासमानं निरंशं नीरूपञ्च व्योम पूर्वावस्थारूपं नीरूपत्वादिकमविहाय नैल्यभानात्मना विवर्तते—चकारेण यथा वा अज्ञातसत्ताकत्वाभावेन निरावृतो भ्रमरूपो देहात्मप्रत्ययः स्वप्रकाशस्सन्स्वभ्रमत्वमविहाय तदनावारकात् स्वगतात् भ्रमत्वेन यथावत् स्वयंप्रकाशिष्यमाणस्वावस्थान्तरभूतज्ञानस्य प्रागभावादेव प्रमारूपेणान्यथा प्रतिभासते । तद्वत् सदा स्वयं भासमानस्स्वात्माऽपि स्वप्रकाशकूटस्थत्वमविहाय अवस्थान्तरभूतजगद्भानात्मना स्वयं विवर्तत इत्यर्थः ॥

अ० ॥ इदानीमविचारदशायामप्येकसत्ताकत्वे ब्रह्मतद्विवर्तयोरावरणाभावे च श्रुतिसम्मतिं दर्शयति **अस्तीति**—

मू ॥ अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् ।
आद्यत्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् ॥ ९७॥ ॥

व्या ॥ लोकबुद्ध्यनुसारेणांशत्रयरूपेण व्यवहारार्थं प्रदर्शितात् निष्कलात् सच्चिदानन्दात् चतुर्थावयवत्वेन निर्दिष्टस्य रूपस्य वाचारम्भणमात्रत्वात् कार्यकारणयोरनावृतत्वं सिद्धमित्यर्थः ॥ ९७॥ ॥

अ० ॥ अधुना कारणस्य सच्चिदानन्दस्यानावृतत्वे सर्वानुभवञ्च 'आत्मनस्तु कामाय सर्वं प्रियं भवति' इति श्रुतिञ्च दर्शयति **सत्पुत्र इति**—

मू ॥ सत्पुत्रोऽयं प्रियो भाति सदा प्रियतमोऽस्म्यहम् ।
प्रियं भवति सर्वञ्च स्वात्मकामाय तु श्रुतेः ॥ ९८॥ ॥

व्या ॥ स्पष्टोऽर्थः ॥

अ० ॥ इदानीं जगतः स्वात्मानन्दाभेदानुमानेनात्मानन्दस्यानावृतत्वं दर्शयति **सर्वमिति**—

मू ॥ सर्वं प्रेमास्पदत्वाद्धि स्वात्मानन्दात्मकं भवेत् ।
सुखमस्वाप्समित्येवं परामृष्टं सुखं यथा ॥ ९९॥ ॥

व्या ॥ सर्वस्य जगतः स्वात्मानन्दानन्यत्वं प्रतिज्ञाय तत्र हेतुमाह—**प्रेमास्पदत्वादिति** तत्र निरावृतं सुषुप्तिसुखं निदर्शयति **सुखमस्वाप्समित्यादिना** ॥ ९९॥ ॥

अ० ॥ ननु तत्तद्विषयेषु पार्थक्येन प्रतीयमानस्यानन्दस्यापि परिच्छेदसम्भवात् कथं तस्य पूर्णत्वमित्याशङ्क्य दृष्टान्तेन परिहरति **सर्वेति**—

मू ॥ सर्वत्राप्युपलब्धस्य सद्रूपस्येव पूर्णता ।
सर्वत्राप्युपलब्धस्य प्रियभूतसुखस्य च ॥ १००॥ ॥

व्या ॥ आकाशादीनां तत्तद्रूपेण नानात्वेऽपि सर्वत्र सामान्यत एकरूपेणानुस्यूतस्य सद्रूपस्येव आनन्दस्यापि पूर्णत्वं सिद्धमित्यर्थः ॥ १००॥ ॥

अ० ॥ इदानीं नित्यापरोक्षात्मतद्विवर्तयोरेकसत्तावादे तयोः स्वेतरावारकस्वरूपाभावात् विचाराद्यथावत् स्वयंप्रकाशिष्यमाणस्वरूपचैतन्यात्मकविद्याप्रागभाव एव विवर्तस्य जगतो निमित्तकारणमित्याह **इत्यानन्देति**—

मू ॥ इत्यानन्दतिरोधानं विनारोप्यस्य दर्शनात् ।
भ्रमापहप्रागभावो हेतुर्नैव तमोऽत्र हि ॥ १०१॥ ॥

व्या ॥ **अत्रेति** कार्यकारणयोरेकसत्तावादे इत्यर्थः ॥ १०१॥ ॥

अ० ॥ इदानीं निरंशस्यानन्दस्य विवर्तकारणत्वमाक्षिप्य परिहरति **सांश इति**—

मू ॥ सांशे तु किल शुक्त्यादौ विवर्तो दृश्यते यदि ।
निर्गुणे च निरंशेऽसौ जात्यादौ शूद्रता भ्रमः ॥ १०२॥ ॥

व्या ॥ अयं शूद्र इति भ्रमस्थले शूद्रताध्यासाधिष्ठानस्येदंशब्दार्थभूतस्य ब्राह्मण्यस्य निरंशत्वेन तमसा आवार्याशाभावात्–तत्र भ्रमसहकारिसाधनेन ज्ञानाभावरूपाज्ञानेन शूद्रताभ्रमो भवेत् । एवमेवायं कृष्ण इत्यत्रापि रक्तगुणस्य निर्गुणत्वेन निरंशत्वेन चावरणासम्भवात्तत्र तज्ज्ञानाभावरूपेणैवाज्ञानेन कार्ष्ण्यभ्रमोऽपि भवतीत्यर्थः ॥ १०२॥ ॥

अ० ॥ प्रतिपादितार्थे श्रीविद्यारण्याचार्यप्रणीताद्वैतानन्दाख्यप्रकरणवाक्यं संवादयति **निरंशेति**—

मू ॥ निरंशेऽप्यस्त्यसौ व्योम्नि तलमालिन्यकल्पनात् ॥१०३॥
तथा निरंश आनन्दे विवर्तो जगदिष्यताम् ।
आद्यो विकार आकाशस्सोऽस्ति भात्यपि च प्रियः ॥१०४॥
अवकाशस्तस्य रूपं तन्मिथ्या न तु तत्त्रयम् ।
अनेकधा विभिन्नेषु नामरूपेषु चैकधा ॥ १०५ ॥

तिष्ठन्ति सच्चिदानन्दा विसंवादो न कस्य चित्।
सच्चिदानन्दरूपेऽस्मिन् पूर्णे ब्रह्मणि वीक्षिते ॥ १०६ ॥
स्वयमेवावजानाति नामरूपे शनैश्शनैः ॥ १०६॥ ॥

व्या ॥ **तन्मिथ्येति** तत् चतुर्थावयवत्वेन निर्दिष्टं रूपं तावत् मिथ्या अनृतवचनात्मकमित्यर्थः ॥ १०६॥ ॥

अ० ॥ नन्वानन्दस्य ब्रह्मांशत्वावृतत्वयोरभावे कथं तत्र जगद्विवर्तेतेत्याशङ्क्य नैवमिति दृष्टान्तेन स्वयमेव परिहरन्ति यैर्विद्यारण्याचार्यास्तद्वाक्यान्यप्युदाहरति **अदृष्ट्वेति**—

मू ॥ अदृष्ट्वा दर्पणं नैव तदन्तस्थे क्षणं यथा ॥ १०७ ॥
अमत्वा सच्चिदानन्दं नामरूपमतिः कुतः।
प्रथमं सच्चिदानन्दे भासमानेऽथ तावता ॥ १०८ ॥
बुद्धिं नियम्य नैवोर्ध्वं धावयेन्नामरूपयोः।
एवं यन्निर्जगद्ब्रह्म सच्चिदानन्दलक्षणम् ॥ १०९ ॥
अद्वैतानन्द एतस्मिन् विश्राम्यन्तु जनाश्चिरम् ॥ १०९॥ ॥

व्या ॥ स्पष्टोऽर्थः ॥ १०९॥ ॥

अ० ॥ उदाहृतब्रह्मगीतादिवाक्यतात्पर्यमाह **अस्येति**—

मू ॥ अस्य ग्रन्थस्य तात्पर्यं सङ्गृह्य स्फुटमुच्यते ॥ ११० ॥
जगत् प्रतीतिवेलायां पूर्णानन्दप्रदर्शनात्।
अनावारकमज्ञानं मायाशक्त्यादिशब्दितम् ॥ १११ ॥

व्या० ॥ सर्वभ्रमप्रतिबन्धकभूतज्ञानप्रागभावरूपस्याज्ञानस्यानावारकत्वेन तदेव द्वैतभ्रमसहकारिकारणमज्ञानं मायादिशब्दावाच्यमित्यास्थेयम् एकत्वपूर्णानन्दयोस्सदा पूर्वोक्तप्रकारेण निरावृतत्वस्य प्रदर्शितत्वात् इत्यर्थः ॥ १११ ॥

अ० ॥ इदानीमुपपादितार्थे दृढप्रत्ययार्थं पुनरपि श्रीविद्यारण्याचार्यैकृतयोगानन्दाख्यप्रकरणगतानि भृगुवल्ल्यादिश्रुतिमूलकानि कानि चित् वाक्यान्यन्विष्य संवादयितुं स्वप्रतिज्ञां स्मारयति **योगेति**—

मू ॥ योगानन्दाख्यशास्त्राच्च ब्रह्मानन्दस्य नावृतिः ॥ १११॥ ॥

व्या ॥ स्पष्टोऽर्थः ॥ १११॥ ॥

अ० ॥ तत्रानन्दत्रैविध्यं प्रतिज्ञाय तत्र ब्रह्मानन्दविवेचनं प्रतिजानीते भगवान् विद्यारण्याचार्य **आनन्द इति**--

मू ॥ आनन्दस्त्रिविधो ब्रह्मानन्दो विद्यासुखं तथा ॥ ११२ ॥
विषयानन्द इत्यादौ ब्रह्मानन्दो विविच्यते ॥ ११२॥ ॥

व्या ॥ स्पष्टोऽर्थः ॥ ११२॥ ॥

अ० ॥ इदानीं तत्रत्यं भृगुवल्ल्यर्थसङ्ग्राहकं वचनमुदाहरति **भृगुरिति**--

मू ॥ भृगुः पुत्रः पितुश्श्रुत्वा वरुणाद्ब्रह्मलक्षणम् ॥ ११३ ॥
अन्नं प्राणमनोबुद्धीस्त्यक्त्वानन्दं विजिज्ञवान् ।
आनन्दादेव भूतानि जायन्ते तेन जीवनम् ॥ ११४ ॥
तेषां लयश्च तत्रेति स्वात्मानन्दो ह्यनावृतः ॥ ११४॥ ॥

व्या ॥ कार्यानन्दमयवाक्यघटकीभूतपुच्छवाक्येन सुषुप्तस्थान इत्यारभ्य 'सर्वस्य प्रभवाप्ययौ हि भूतानां' मिति कारणानन्दमयवाक्येन च निर्दिष्टं सुषुप्तावपरोक्षत्वेनानुभूयमानमानन्दं जगज्जन्मादिकारणमिति ज्ञातवान् भृगुः तथाहि । यथा भूमौ दृश्यमानानां गृहप्रासादवृक्षादीनां क्षयवशात्तद्भूम्यतिरेकेणादृश्यमानत्वे सति सैव भूमिः लयाधिकरणं भवति । सैव प्राक् उत्पत्तिस्थितिकारणमुपादानं चाभवत् । यथा च स्वप्नदृशि पुनर्जाग्रदवस्थायां परिशिष्यमाणे सति--तदानीं विनाशादृश्यमानानां सौप्रिक्कानां तस्मिन् लयः स एव प्राक् स्वप्नावस्थायामुत्पत्तिस्थितिकारणमुपादानमभवत् एवमवस्थाद्वयवत्यात्मनि सुषुप्तावानन्दात्मना परिशिष्यमाणे सति तदानीं विनाशादृश्यमानानामवस्थाद्वयकल्पितानां तस्मिन् लयः स एव प्राग्भूतानामुत्पत्तिस्थितिकारणमुपादानमभवदिति स्वयं ज्योतिस्स्वरूपे नित्यापरोक्षे स्वात्मानन्दे ब्रह्मलक्षणं भृगुरयूयुजत् । अन्यथा पूर्णानन्दस्यावृतत्वे कथमज्ञाते तस्मिन् ब्रह्मलक्षणं योजयितुं शक्यते । कथं वा 'सैषा भार्गवी वारुणी विद्या परमे व्योमन् प्रतिष्ठिते'ति श्रुत्या च भृगोरुत्पन्नाया विद्याया अपरोक्षपरब्रह्मविद्यात्वञ्च प्रदर्शितं । सौषुप्तानन्दमयस्य परिच्छिन्नत्वे कथन्नु भृगुर्ब्रह्मजिज्ञासात उपरराम ॥ श्रुत्या वा 'परमे व्योमन् प्रतिष्ठिते'त्यनुमोदिता तद्विद्या । अतस्सौषुप्तानन्दमयस्त्वनावृतः पूर्णश्चेति सिद्धम् एवमेव श्रुतिसूत्रभाष्यकारैरभिप्रेतामिति प्रथम-

निरूपणे सप्तषष्टितमादिश्लोकैर्विस्तरेण दर्शितं आनन्दमयद्वैविध्यं तु सप्तमनिरूपणे 'स्वप्नानन्दमय' इत्यादिश्लोकैर्वक्ष्यति च ॥ ११४॥ ॥

अ० ॥ पुनरप्युपपादितार्थे 'यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा यो वै भूमा तत् सुखं नाल्पे सुखमस्ती'ति सुषुप्तावपरोक्षत्वेन स्वतः प्रकाशमानस्य भूमानन्दस्य निरावृतत्वादिबोधकभूमविद्यार्थसङ्ग्राहकं योगानन्दवाक्यमुदाहरति **भूतेति**—

मू ॥ भूतोत्पत्तेः पुरा भूमा त्रिपुटी द्वैतवर्जनात् ॥ ११५ ॥
ज्ञातृज्ञानज्ञेयरूपा त्रिपुटी प्रलये हि नो ।
विज्ञानमय उत्पन्नो ज्ञाताज्ञानं मनोमयः ॥ ११६ ॥
ज्ञेयाश्शब्दादयो नैतत् त्रयमुत्पत्तितः पुरा ।
त्रयाभावे तु निर्द्वैतः पूर्ण एवानुभूयते ॥ ११७ ॥
समाधिसुप्तिमूर्छासु पूर्णस्सृष्टेः पुरा तथा ।
यो भूमा स सुखं नाल्पे सुखं त्रेधा विभेदिनि ॥ ११८ ॥
सनत्कुमारः प्राहैवं नारदायातिशोकिने ॥ ११८॥ ॥

व्या ॥ यथा स्वतः सुषुप्त्यादावहमित्यापरोक्ष्येण प्रकाशमानस्यानन्दस्य परिच्छेदकाभावात् पूर्णत्वं तथा सृष्टेः पुराऽपि भवितुमर्हतीति 'यो वै भूमा तत् सुख'मित्यादि वाक्येन सनत्कुमारो नारदायोपदिदेशेत्यर्थः ॥ ११८॥ ॥

अ० ॥ अधुना मन्दानां तत्त्वप्रतिपत्त्युपायत्वेन ब्रह्मणः अंशत्वेन गुणत्वेन धर्मत्वेन वा आनन्दं परिकल्प्य तस्मिन्नज्ञानेनावृते सति तत्र तद्विपरीतजगदध्यासो जायत इति यत् शास्त्रं, तत् तत्तदाचार्यबुद्धिपरिकल्पितमेवेति दिदर्शयिषुः तदनुकूलमानन्दानुभवतत्परश्रुतिप्रदर्शनपरं योगानन्दाख्यप्रकरणगतं 'चिदात्मत्वात् स्वतो भाति सुख'मित्यादिवाक्यमर्थतस्सङ्गृह्णाति **वृत्तीति**—

मू ॥ वृत्त्यभावे कथं सुप्तावानन्दानुभवो यदि ॥ ११९ ॥
चिदात्मत्वात् स्वतो भाति सुखमित्यनुशासनात् ॥ ११९॥ ॥

व्या ॥ **चिदात्मत्वादिति** चित् प्रत्यक्त्वमात्मा स्वरूपं यस्य सुखस्य तत् सुखं चिदात्म तस्य भावश्चिदात्मत्वं तस्मात् **स्वतो भाति सुखं** साधनान्तरनिरपेक्षेण स्वरूपभूतसुखं सुषुप्तौ भातीत्यर्थः ॥ ११९॥ ॥

अ० ॥ भवतु नाम आनन्दस्य चिदात्मत्वं । ततः किमित्यत आह मूलकारः **नानन्दस्येति**--

मू ॥ **नानन्दस्य गुणत्वं वाऽप्यंशता धर्मताऽन्यथा** ॥ १२० ॥

व्या ॥ **अत्रेदमनुमानमुक्तं** । आनन्दः न वैशेषिकाभिमतगुणात्मको भवितुमर्हति चिदात्मत्वात् ॥ गुणस्य गुणी अश्रयो भवति न तु स्वरूपं लोके । चिद्रूपस्य साक्षिणः 'साक्षी चेता केवलो निर्गुणश्चे'ति श्रुत्या निर्गुणत्वानुशासनाच्च नानन्दस्य गुणत्वं सम्भवति । तथा नाप्यंशत्वं संभवति चिदात्मत्वात् 'निष्कलं निष्क्रिय'मिति श्रुत्या निरंशत्वविधानाच्च लोके चांशी अंशस्याधारो दृश्यते यथा हस्तादेश्शरीरमाधारः नात्मा । एवं ब्रह्मधर्मोऽपि न भवतीत्यर्थः ॥ १२० ॥

अ० ॥ अन्यथा बाधमाह **चिदिति**--

मू ॥ **चिद्गुणत्वाच्चिदंशत्वात्स्वतो भातीति संवदेत्** ॥ १२०॥ ॥

व्या ॥ चिदात्मत्वात् स्वतो भाति सुखमिति किल प्राग्विद्यारण्याचार्यैर्दर्शितं अतो नानन्दस्य ब्रह्मगुणत्वादिकं भवेदित्यर्थः ॥ १२०॥ ॥

अ० ॥ उपपादितार्थे तत्रत्यमेव वाक्यमुदाहरति **ब्रह्मेति**--

मू ॥ **ब्रह्मविज्ञानमानन्दमिति वाजसनेयिनः ।**
पठन्त्यतः स्वप्रकाशं सुखं ब्रह्मैव नेतरत् ॥ १२१॥ ॥

व्या ॥ यस्मात् 'विज्ञानमानन्दं ब्रह्मे'ति वाजसनेयशाखिन आनन्दस्य विज्ञानेन ब्रह्मणा च सामानाधिकरण्यं पठन्ति । अतस्स्वप्रकाशं सुखमेव ब्रह्मेत्यानन्दस्य ब्रह्मरूपत्वमादिश्य 'साक्षी चेता केवलो निर्गुणश्च' 'निष्कल' मित्यादि श्रुतेरानन्दस्य न ब्रह्मगुणत्वादिकं सम्भवतीत्याह **नेतरदिति** ॥ १२१॥ ॥

अ० ॥ योगानन्दवाक्योदाहरणफलमाह कविः **एकत्ववदिति**--

मू ॥ **एकत्ववत् सुखस्यापि स्वतो भानात्तमो न हि** ॥ १२२ ॥

व्या ॥ एकत्वादेरनावारकं द्वैतभ्रमसाधनभूतं ज्ञानप्रागभावरूपमज्ञानं विना तदावारकं तमोरूपमज्ञानं नास्तीत्यर्थः ॥ १२२ ॥

अ० ॥ पुनः प्रकारान्तरेण परिचोद्य दृष्टान्तेन समाधत्ते **आवारकेति**--

मू ॥ **आवारकतमो नो चेद्दुःखकाले सुखं स्फुरेत् ।**
देहात्मप्रत्ययस्यास्य यथाऽनावरणेऽन्यतः ॥ १२३ ॥

प्रमात्वकल्पने तत्र भ्रमत्वं न प्रतीयते ।
सुखस्यावरणाभावे ज्ञानाभावाद्यदा पुनः ॥ १२४ ॥
दुःखात्मना विवर्तत्वं सुखं तद्वन्न भासते ।
प्रतिबन्धकरूपत्वाद्दुःखस्यानन्दभासने ॥ १२५ ॥

व्या ॥ **सुखं स्फुरेदिति** पूर्वपक्षे सति । देहेत्यादिना समाधत्ते देहात्मभ्रमस्यानुभवरूपत्वात् वृत्तिरूपत्वाच्च निरावृतत्वेन प्रकाशरूपत्वे सति तद्गतभ्रमत्वेन स्वयंप्रकाशिष्यमाणज्ञानाभावात् भ्रमत्वमविहायैव प्रमात्वरूपेण विवर्तमानत्वे सति तेनैव भ्रमत्वभानप्रतिबन्धकभूतेन भ्रमत्वानावारकप्रमात्वभानेन यथा भ्रमत्वं न प्रतीयते तद्वत् स्वरूपसुखस्यापि स्वप्रकाशत्वेनावरणाभावेऽपि वक्ष्यमाणादज्ञानात् प्रमाणादिभावेन स्वतोभासनानन्तरं यथावत्स्वयंप्रकाशिष्यमाणस्य स्वरूपज्ञानस्य प्रागभावरूपात् यदा दुःखात्मना विवर्तत्वं भवति तदा दुःखस्य स्वरूपसुखापरोक्ष्यप्रतिबन्धकत्वात् न स्वरूपानन्दः प्रतीयते । एवमेवात्रोक्तदृष्टान्तः 'देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः । लौकिकं तद्वदेवेदं प्रमाणं त्वात्मनिश्चया' दिति च यथा देहात्मप्रत्ययः कल्पितो भ्रमोऽपि व्यवहाराङ्गतया मानत्वेन इष्यते वैदिकैस्तद्वत् लौकिकमध्यक्षादिकमात्मबोधावधिव्यवहारकाले बाधाभावात् **भ्रमत्वनिश्चयाभावरूपात्** व्यावहारिकं प्रामाण्यमिष्यतामिति च समन्वयाधिकरणभाष्यतद्व्याख्यानावसाने दर्शितः ॥ १२५ ॥

अ० ॥ इदानीं दार्ष्टान्तिकत्वेन प्रदर्शितार्थे भाष्यादिसम्मतिमाह **प्रतिबन्धकेति**—

मू ॥ प्रतिबन्धकदुःखानामभावात्परमं सुखम् ।
सुप्तौ भातीति माण्डूक्यप्राज्ञपादस्य भाष्यतः ॥ १२६ ॥
व्याख्यानात्तमसानन्दो नावृतोऽलोपमां शृणु ॥ १२६॥ ॥

व्या ॥ स्पष्टोऽर्थः ॥

अ० ॥ उक्तमेवार्थं सदृष्टान्तमुपसंहरति **कृष्णेति**—

मू ॥ कृष्णपक्षाद्यभागे च पूर्वाह्णे पश्चिमे विधौ ॥ १२७ ॥
शुक्लपक्षान्तिमे भागे सायाह्णे प्राग्दिशि स्फुटम् ।

अनावृते च प्रत्यक्ष आदित्यस्य प्रभा यथा ॥ १२८ ॥
दृष्टचन्द्रस्य कान्तेस्तु ग्रहणप्रतिबन्धिका ।
दुःखात्मना स्वतोभानं सुखभानविरोधकम् ॥ १२९ ॥

व्या ॥ कृष्णपक्षे सूर्यास्तङ्गमनानन्तरं पञ्चमीपर्यन्तं प्रायशो वैशाल्येन समुदितस्य क्षयिष्णुचन्द्रस्य तत्तत्परेऽहनि सूर्योदयानन्तरमस्तङ्गमनसंभवात् पञ्चमीपर्यन्तं पश्चिमे देशे विस्पष्टश्चन्द्रो दृश्येत शुक्लपक्षे तु क्रमशो वर्धमानस्य चन्द्रस्य सूर्योदयानन्तरमुदयात् शुक्लपक्षैकादश्यां कृष्णपक्षचतुर्थीचन्द्रसमानाकारेण उत्पन्नः अह्नि प्राग्दिशि च स्पष्टं दृश्येत । तथा सति अनावृतत्वेन चक्षुस्सन्निकृष्टे सति चन्द्रमण्डले यथा चक्षुष्यारूढादित्यप्रभायाः चन्द्रप्रभाविषयकज्ञानोत्पत्तिप्रतिबन्धकत्वमन्तरेण न तदावारकत्वं संभवति विषयप्रकाशनमात्रशक्तिमत्वात् । एवं दुःखात्मना विवर्तमानं स्वरूपचैतन्यमपि तत् प्रागवस्थाभूतस्वरूपसुखापरोक्ष्यप्रतिबन्धकत्वमन्तरेण न तदावारकत्वं भजतीत्यर्थः ॥ १२९ ॥

अ० ॥ अधुना प्रश्नपूर्वकं सुषुप्तौ परमानन्दानुभवपराया: 'एषोऽस्य परम आनन्द एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती'ति श्रुतेः न परमानन्दावरणमस्तीत्याह **परानन्देति—**

मू ॥ परानन्दात्मकत्वादौ किम्मानमिति चेच्छृणु ।
बृहदारण्यगे षष्ठे तृतीयब्राह्मणे तु यत् ॥ १३० ॥
खण्डं सलिल इत्यादि तत्रोक्तोऽनुभवोऽपि च ।
एषोऽस्य पर आनन्दस्तस्य मात्राभुजः परे ॥ १३१ ॥
मनुष्यदेवब्रह्मान्ता इति नास्ति तदाऽऽवृतिः ॥ १३१॥ ॥

व्या ॥ 'सलिल एको द्रष्टेत्यादिखण्डं चास्य विज्ञानमयस्य च एष पर आनन्दस्तस्य मनुष्यादिब्रह्मान्ताः परे प्राणिनो मात्राभुज' इति तत्रोक्तोऽनुभवोऽपि च प्रमाणं भवति । अतस्सुखमहमस्वाप्स'मिति परामर्शविषयस्य परमानन्दस्य नावरणं सुषुप्तिकालेऽप्यस्तीत्यर्थः ॥ १३१॥ ॥

अ० ॥ ननु सुषुप्तावावरणाभावहेतुना परमानन्दः स्वस्वरूपत्वेनानुभूतश्चेत् न विहाय पुनरुत्थितौ को हेतुरित्याशङ्क्य तदुत्तरमाह **परानन्द इति—**

मू ॥ परानन्देऽनुभूतेऽतः कुतश्चेत् पुनरुत्थितिः ॥ १३२ ॥
अद्वितीयतया भानं विघ्नकृद्द्वैतविभ्रमे ।

तदीयप्रागभावोऽयं पुनरुत्थितिहेतुकः ॥ १३३ ॥

व्या ॥ अद्वितीयतया भानमिति आत्मनो यत् 'नेह नानास्ति किञ्चने'त्यादि वाक्यभावापत्त्यनन्तरमद्वितीयतया स्वतोभासमानं स्वरूपचैतन्यमित्यर्थः । शेषस्सुगमः ॥ १३३॥ ॥

अ० ॥ एवं श्रुतियुक्त्यनुभवैः द्वितीयतृतीयपक्षत्वेनाभिमततमोरूपाज्ञानस्य स्वयंज्योतिष्ट्यात्मनि स्वरूपलाभाभावावगमेऽपि तैरनिराकृते ज्ञानप्रागभावात्मकज्ञाने कथं भावार्थवाचकानां शक्तिः प्रकृतिस्तम इत्यादिशब्दानां प्रवृत्तिरिति प्रश्नपूर्वकं सदृष्टान्तमुत्तरमाह **अस्मिन्निति**—

मू ॥ अस्मिञ्ज्ञानप्रागभावे प्रागुक्तैरनिराकृते ।
चित्प्रकाशाविरोधेन चित्स्थेऽनावारके कथम् ॥ १३४ ॥
शक्त्यादिशब्दवृत्तिश्चेच्छक्तौ प्रकृतिशब्दवत् ॥ १३४॥ ॥

व्या ॥ यथा अविद्याया आत्मशक्तित्वेन द्वारकारणत्ववादिभिः सङ्क्षेपाचार्यादिभिः मृदादौ परिणामिकारणत्ववादिनः प्रकृतिरिति पदस्य 'मायान्तु प्रकृतिं विद्यादित्यत्र अपरिणामिन्यात्मशक्तौ कारणत्वमात्रमादाय परिभाषात्मिका प्रवृत्तिरङ्गीकृता तद्वत् ज्ञानाभावात्मकाज्ञानेऽपि कारणत्वमात्रमादाय भाववाचिवत् प्रतीयमानानां शक्त्यादिपदानां परिभाषया प्रवृत्तिर्भवितुमर्हतीत्यर्थः ॥ १३४॥ ॥

अ० ॥ इदानीं जगदध्यासाय आत्मनः प्रथमपक्षाभिमताज्ञानापेक्षकत्वासिद्धये तमोरूपाज्ञानानपेक्षकत्वपराणि ब्रह्मगीतापञ्चमाध्यायवचनानि प्रमाणयति **अतश्चेति**—

मू ॥ अतश्च कारणं नित्यमेकमेवाद्वयं सुराः ॥ १३५ ॥

व्या ॥ यस्मात् 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं' 'तदैक्षत बहु स्यां प्रजायेयेति'–'नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीरा' इति जगत्कारणं प्रकृत्य श्रूयते अतश्च जगत्कारणं देशकालवस्तुकृतपरिच्छेदशून्यमित्यर्थः ॥ १३५ ॥

अ० ॥ ननु लोके घटादिकार्याणामुपादानं निमित्तं च परस्परं भिन्नमेव दृश्यते तद्वत् जगत्कारणमपि ब्रह्मकारणान्तरेण भावपदार्थेन सद्वितीयं किन्न स्यादिति प्राप्ते विषमोऽयं दृष्टान्त इत्याह ब्रह्मा **कुलालेति**—

मू ॥ कुलालादेर्मृदादेश्च भेदे दृष्टेऽपि भूतले ।
अचैतन्यान्मृदादिस्तु कुलालादिमपेक्षते ॥ १३६ ॥

अत्र कारणमद्वैतं शुद्धचैतन्यमेव हि ।
तेन नापेक्षते ह्यन्यत्कारणं चेतनात्मकम् ॥ १३७ ॥
स्वयं चेतनमप्येतत्कारणं न कुलालवत् ।
अपेक्षते मृदा तुल्यमचिद्रूपन्तु कारणम् ॥ १३८ ॥

व्या ॥ अत्रेति मृद्घटयोरिव कार्यकारणयोरेकसत्तावादे **हि** यस्मात् 'तदेतदच्छाय' मिति श्रुतिवत् अद्वितीयमिति श्रुत्यापि स्रष्टेः पूर्वमपि सदाख्यमात्मतत्वं तद्विजातीयेन द्वितीयेन स्वरूपावारकतमोरूपाज्ञानेन वर्जितमित्युपदिष्टमतः शुद्धचैतन्यमेव निरावृतप्रत्यक्चैतन्यमेव कारण सर्वोपादानं तेन निरावृतचैतन्यस्य जगदुपादानत्वहेतुना मृद्वत् स्वातिरिक्तं चेतनात्मकं कारणं नापेक्षत इत्यर्थः । ननु चेतनत्वात् स्वयं चेतनान्तरं नापेक्षते चेत् तर्हि कुलालवत् स्वातिरिक्तमचेतनमपेक्षेतेत्यत आह **स्वयं चेतनमप्येतदिति** 'तदैक्षत बहु स्यां प्रजायेयेती' त्यादिश्रुत्युक्तं जगत्कारणमात्मचैतन्यं कुलालवत् मृदा तुल्यमाचिद्रूपं तु कारणं नापेक्षत इति संबन्धः ॥ १३८ ॥

अ० ॥ एवं कार्यकारणयोरेकसत्तावादे 'तदेतदच्छायमशरीरमलोहितं शुभ्रमक्षरं वेदयते यस्तु सोम्य स सर्वज्ञस्सर्वीभवति 'एकमेवाद्वितीयमिति' आत्मचैतन्यस्य जगत्सर्जने तमोरूपप्रकृत्यज्ञानानिरपेक्षत्वपरश्रुतिञ्च 'वाचारंभणं विकारो नामधेय'मिति नामधेयातिरेकेण विकारस्य स्वरूपासत्वपरश्रुतिञ्च अनुसृत्य चेतनस्य जगत्कारणतमोरूपाज्ञानानिरपेक्षत्वमुपादिश्य इदानीं या त्वविद्याऽचिद्रूपा चित्प्रागभावरूपा तत्र कार्यकारणयोर्विषमसत्तावादिनां शक्तित्वादिविभ्रमं च तद्दृष्ट्यनुसारेण स्वरूपावारकभावरूपशक्तित्वादिकं च सिद्धवत्कृत्वा तत्सापेक्षत्वं स्रष्टुः अनुवदति श्रुतिरित्याह ब्रह्मा **प्रतीत्येत्यादिना—**

मू ॥ प्रतीत्या केवलं शक्तिरचिद्रूपा तमोमयी ।
सर्वप्रकारैर्विद्वद्भिरनिरूप्या हि शाङ्करी ॥ १३९ ॥
तया दुर्घटकारिण्या तादात्म्येनैव संगतम् ।
कारणं सकलस्रष्टृ सर्वसंहर्तृ चास्तिकाः ॥ १४० ॥

व्या ॥ या त्वविद्या स्वयं **अचिद्रूपा** सती प्रथमपक्षत्वेन निर्दिष्टविद्याप्रागभावरूपा सती कार्यकारणयोः विषमसत्तावादिनां दृष्टिमात्रेण भावरूपशक्त्यात्मना भाति न तादृगनिर्वचनीयतमस्तत्वस्वरूपसद्भावतः—यथा अनन्तया-

सविस्तारोऽपि चन्द्रः लौकिकानां प्रतीत्या केवलं प्रादेशपरिमाणवानिव भाति तद्वत् **प्रतीत्या केवलमिति** पदद्वयेनादिश्य तत्र मन्दद्दष्ट्यनुसोरणैव अविद्यायाः तेजोबन्नभूतभौतिकप्रकृतित्वं सिद्धवत् कृत्वा तत्तादात्म्यापन्नमेव सदाख्यमात्मतत्त्वं जगत् सृजतीति मन्दाधिकारिणं प्रत्याह **तयेत्यादिना** ॥ १४० ॥

अ० ॥ ननु कथं कार्यकारणयोर्विषमसत्ताद्वयादिनां प्रागुक्तचित्प्रागभावे भावरूपशक्तित्वादिभ्रमोपपत्तिरित्यत आह कविः **विवेकेति**—

मू ॥ विवेकाभावतोऽज्ञाने भावत्वस्य चिदात्मनः ।
अद्धयासे भावता भानाच्छक्तित्वेन प्रतीयते ॥ १४१ ॥

व्या ॥ **अज्ञान इति** आत्मनो विचारभावापत्त्यनन्तरं स्वतो यथावत्प्रकाशिष्यमाणस्वरूपचैतन्यप्रागभावे यदा तदाश्रयात्मगतभावत्वाद्धयासो भवति तदा तद्भावत्वाध्यासविशिष्टज्ञानप्रागभावः शक्तित्वेन प्रतीयत इत्यर्थः ॥ १४१ ॥

अ० ॥ उक्तमेव शक्तित्वाध्यासमाक्षिप्य निमित्तदृष्टान्ताभ्यां व्यवस्थापयति **अभाव इति**—

मू ॥ अभावो भाव इत्येव गृह्यतां नान्यथेति चेत् ।
भावत्वेन प्रतीतत्वाद्धेतुत्वाद्वस्तुसत्वतः ॥ १४२ ॥
यथा दाहक्रियाहेतुश्शक्तित्वेन प्रतीयते ॥ १४२॥ ॥

व्या ॥ यथा दाहहेतोः बह्निधर्मस्य वस्तुगतत्वभावत्वनिमित्तकारणत्वेभ्यः शक्तित्वेन प्रतीयमानत्वं तद्वत् ज्ञानप्रागभावस्यात्मवस्तुगतत्वं हेतुत्वञ्च स्वतस्सिद्धम् भावत्वन्तु तदधिकरणभूतात्मगतभावत्वसंसर्गाध्यासात् प्राप्तम्। अतस्तस्यापि शक्तित्वेन द्रव्येतरत्वेन प्रतीयमानत्वं भवतीत्यर्थः ॥ १४२॥ ॥

अ० ॥ श्रुतिपादितशक्तेरात्मसंबन्धञ्च श्रुतेस्तत्परत्वं च दर्शयति **स्वकीयत्वेति**—

मू ॥ स्वकीयत्वभ्रमात्सा स्यात्स्वशक्तिस्तत्परा श्रुतिः ।
परास्य शक्तिर्विविधेत्येवमादिः पुरेरिता ॥ १४३॥ ॥

व्या ॥ स्पष्टोऽर्थः ॥ १४३॥ ॥

अ० ॥ इदानीं कस्य चिदप्यनावारके प्रागुक्तज्ञानप्रागभावे विषयावारकत्वतमस्त्वाद्धयासं सदृष्टान्तमाह **दीपस्येति**—

मू ॥ दीपस्य द्रव्यताद्येन संसर्गाद्ध्यासतो यथा ॥ १४४ ॥
आलोकाभावको भाति विषयावारकं तमः ।
द्रव्यं तथानुमातॄणां ज्ञानाभावस्तमो महत् ॥ १४५ ॥
महत्वेनात्मनोऽध्यासाच्छक्तित्वादिभ्रमो भवेत् ॥ १४५॥ ॥

व्या ॥ **दीपस्येति** प्रदीपस्य । द्रव्यताद्येन द्रव्यता आद्या यस्य चलनादेस्तत् द्रव्यताद्यं तेन सह संसर्गाद्ध्यासेन **आलोकाभावकः** स्वत एव विषयाप्रकाशकः प्रकाशाभावः **विषयावारकं तमः द्रव्यमिति** यथा मीमांसकानां भाति **तथानुमातॄणां** प्रागुक्तप्रकारेण जगत्प्रकृत्यनुमातॄणां आत्मनो महत्वेनाद्ध्यासात् ज्ञानाभावः इयं शक्तिरिदम्महातम इति भाति अतश्शक्तित्वादिभ्रमो भवेदित्यर्थः ॥ १४५॥ ॥

अ० ॥ विपक्षे बाधमाह कविः **अन्यथेति**—

मू ॥ अन्यथाऽद्ध्यायशेषेणास्यैकार्थत्वं न संभवेत् ॥ १४६ ॥

व्या ॥ **अस्येति** प्रागुदाहृतस्य प्रतीत्या केवलं शक्तिरचिद्रूपा तमोमयीति ब्रह्मगीतायाः पञ्चमाद्ध्यायवचनस्य **अन्यथा** भावरूपानिर्वचनीयतमस्सद्भावपरत्वे **अध्यायशेषेण** प्राक्शक्तिमायानुमानयोर्बाधप्रदर्शनार्थमुदाहृतेन अज्ञानमिति वार्ताऽपि त्वर्थसद्भाव एव ह्यीत्यादि श्लोकेन अनिर्वचनीयतमोरूपाज्ञाननिरासपरेण एतत्पञ्चमाद्ध्यायशेषेण **एकार्थत्वं न संभवेत्** समानार्थकत्वं भज्येतेत्यर्थः ॥ १४६ ॥

द्वितीयनिरूपणे
॥ तृतीयप्रदर्शकप्रारम्भः ॥

अ० ॥ इदानीं प्रतिज्ञापूर्वकाद्यपक्षत्वेनाभिप्रेतस्याऽज्ञानस्य लक्षणमाह **वदामीति**—

मू ॥ वदामि पक्षभेदेनाज्ञानानां लक्षणं क्रमात् ।
साक्षादाद्यं ज्ञाननाश्यं प्रतियोगिप्रकारतः ॥ १४७ ॥

व्या ॥ श्लो० ॥ प्रतिबन्धकरूपं यत् द्वैतविभ्रमजन्मनि । ज्ञानं तत्प्रागभावस्यादज्ञानं भ्रमकारणं ॥ द्वितीयाऽऽवारिका शक्तिस्तमो द्रव्यं तृतीयकमिति प्रथम-

प्रदर्शकारम्भे पक्षभेदेन प्रतिज्ञातेष्वज्ञानेषु प्रथमपक्षाभिमतमज्ञानं लक्षयति **आद्यमिति** तस्य लक्षणमाह साक्षाज्ज्ञाननाश्यमिति । तदज्ञानकार्येषु द्वैतभ्रमेषु अतिव्याप्तिवारणार्थं साक्षात्पदं । अस्मिन्पक्षे केन प्रकारेण ज्ञानं नाशयत्यज्ञानमित्यत आह **प्रतियोगिप्रकारत इति** प्रतियोगिविधयैव-न तु तदज्ञानाधारावगाहिज्ञानविधयेत्यर्थः ॥ १४७ ॥

अ० ॥ तत्र दृष्टान्तमाह **घट इति**—

मू ॥ घटस्त्वप्रागभावस्य कपालाग्राहको यथा ।
प्रतियोगितया ज्ञानं प्रागभावविनाशकम् ॥ १४८ ॥

व्या ॥ स्पष्टोऽर्थः ॥ १४८ ॥

अ० ॥ आद्यपक्षेऽज्ञाननिवर्तकस्य ज्ञानस्य विषयमाह **आद्यपक्ष इति**—

मू ॥ आद्यपक्षे तु विज्ञानं द्वैतस्यासत्वगोचरम् ॥ १४८॥ ॥

व्या ॥ स्पष्टोऽर्थः ॥ १४८॥ ॥

अ० ॥ तत्र ब्रह्मगीतायाः पञ्चमाद्ध्यायवाक्यञ्च बृहदारण्ये षष्ठपञ्चमाध्याययोश्चतुर्थं सप्तमञ्च ब्राह्मणं क्रमात् प्रमाणयति **सत्तेति**—

मू ॥ सत्ताहीनस्य कार्यस्यासत्वमेव हि युज्यते ॥ १४९ ॥
नेह नानास्ति नान्योऽतो द्रष्टा श्रोतेति च श्रुतेः ॥ १४९॥ ॥

व्या ॥ स्पष्टोऽर्थः ॥ १४९॥ ॥

अ० ॥ द्वितीयतृतीयपक्षाभिमतयोः शक्तिमाययोर्लक्षणमाह **अनादिरिति**—

मू ॥ अनादिर्भावरूपा हि नाश्या शक्तिश्च विद्यया ॥ १५० ॥

व्या ॥ चकारेण मायाद्वयं गृह्यते-परवाद्यभिमतसत्यरूपकार्ये अतिव्याप्तिवारणाय विद्यानाश्यत्वं-मिथ्यावाद्यभिमते शक्तिमायाकार्ये अतिव्याप्तिवारणायानादित्वं-विद्याप्रागभावे अतिव्याप्तिनिरासार्थं भावत्वं ॥ १५० ॥

अ० ॥ केन प्रकारेण ज्ञानं तमोरूपशक्तिमाययोः विनाशकमित्यत आह **ज्ञानमिति**—

मू ॥ ज्ञानन्तु ज्ञानविधया शक्तिमायाविनाशकम् ॥ १५०॥ ॥

व्या ॥ स्पष्टोऽर्थः ॥ १५०॥ ॥

अ० ॥ द्वितीयतृतीयपक्षाभिमतशक्तिमायानिवर्तकज्ञानस्य विषयमाह **तमसोरिति**—

मू ॥ तमसोर्हि विनाशाय ज्ञानं चैतन्यगोचरम् ॥ १५१ ॥

व्या ॥ स्पष्टोऽर्थः ॥ १५१ ॥

अ० ॥ तत्र विचारण्याचार्यसम्मतिमाह **ब्रह्मणीति**—

मू ॥ ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता ॥ १५१॥ ॥

व्या ॥ स्पष्टोऽर्थः ॥ १५१॥ ॥

द्वितीयनिरूपणे

॥ चतुर्थप्रदर्शकारम्भः ॥

अ० ॥ इदानीं तुरीयप्रदर्शकारम्भार्थं शिष्यप्रश्नमनुवदति **यथावदिति**—

मू ॥ यथावत् स्वात्मभानस्य प्रागभावे प्रकाशिते ॥ १५२ ॥
विचारभावमापन्नस्वात्मचैतन्यतस्स तु ।
नास्तीति सिद्धिकाराद्यैः किमर्थं भाषितं यदि ॥ १५३ ॥

व्या ॥ 'नेह नानास्ती' त्यादिवाक्यविचारभावापन्नस्वात्मचैतन्येन तद्वृत्ते द्वैतासत्वगोचरस्य स्वतो यथावत्प्रकाशिष्यमाणस्वात्मचैतन्यस्य प्रागभावे प्रकाशिते सति किमर्थं स प्रागभावो नास्तीति वृद्धैरुक्तमित्यर्थः ॥ १५३ ॥

अ० ॥ अद्वैतसिद्धिकृतामभिसन्धिं तत्र वृद्धसम्मतिञ्च प्रतिजानीते **श्रोतुरिति**—

मू ॥ श्रोतुश्चित्तविपाकं हि निरीक्ष्यादेष्टुमुद्यता ।
स्वोपदेशे प्रवेशार्थमेवमुक्तं तथैव हि ॥ १५४ ॥
विद्वद्भिर्ब्रह्मणाप्युक्तं तत्तद्वाक्यं क्रमाद्भुवे ॥ १५४॥ ॥

व्या ॥ **चित्तविपाकमिति** चित्तस्य विषयासक्तिरूपं कालुष्यं निरीक्ष्य तत्त्वमादेष्टुमुद्यता सिद्धिकारेण यत् आधिदैविकेन परमेश्वरेण द्रव्यापूर्वमयं विचित्रं जगत्सृष्टं—तस्य जीवगतासंगत्वाद्यावारकत्वेन यत्कर्तृत्वापादकं तमः तद्वारकत्वेन भावरूपाज्ञानजन्यमेकमेव सत् जीवान् प्रतिकर्मभूतमिति प्रतिकर्मव्यवस्थावादे—

अथ वा जगतः प्रातिभासिकत्ववादे वा सत्तैक्यवादात् व्यावृत्य प्रवेशयितुं निरंशस्य सच्चिदानन्दस्य स्वत एव जगदाकारेण विवर्तत्वसिद्धये निमित्तभूते ज्ञानप्रागभावरूपाज्ञाने कारणत्वग्रहणासंभवाय प्रागभावसामान्यं नास्तीति केवलयुक्तिवादः प्राचीनानामद्वैतिनां न्यायविदामप्यसम्मतो दर्शित इत्युक्त्वा तत्र वृद्धसम्मतिं प्रतिजानीते **तथैव इत्यादिना** अपिशब्देन श्रीभगवान् कृष्णोऽपि ग्रहीतव्यः ॥

अ० ॥ तदेव वृद्धवचनं दर्शयति **प्राचीनैरिति**—

मू ॥ प्राचीनैर्व्यवहारसिद्धविषयेष्वात्मैक्यसिद्धौ परं
सन्नह्यद्भिरनादरात्सरणयो नानाविधा दर्शिताः ।
श्रोतुश्चित्तविपाकपाकमननादाचार्यधर्मे रतै-
रेवं ह्यप्पयदीक्षितैस्समुदितास्सिद्धान्तिनामाशयः ॥ १९५॥ ॥

व्या ॥ **प्राचीनैरिति** तत्त्वनिर्णयकारसंक्षेपाचार्यादिभिः **अनादरात्** तात्पर्यमन्तरा **सरणयः** अद्वितीयात्मवेदनमार्गभूताः जगत्सृष्टितत्कारणमायास्वरूपादिभेदोपदेशाः । शेषस्सुगमः ॥ १९५॥ ॥

अ० ॥ नन्वाचार्यधर्मे रतैः सरणयो नानाविधा दर्शिता इत्युक्तं । कोऽयमाचार्यधर्मः ॥ तत्र किं प्रमाणमित्यत आह **यज्ञेति**—

मू॥ यज्ञवैभवखण्डेऽयं गुरूणां धर्म ईरितः ॥ १९६ ॥
पुनरशिष्यस्य मेधावी चित्तपाकमवेक्ष्य च ।
अविद्यापाशविच्छेदं कुर्यात्प्राज्ञस्तु देशिकः ॥ १९७ ॥
विदित्वा शिष्यचित्तस्य विपाकं पुनरास्तिकाः ।
दद्यात्पाकानुगुण्येन विद्यामेनाम्महेश्वरीम् ॥ १९८ ॥

व्या ॥ पुनरशिष्यस्येत्यारभ्य कुर्यादित्यन्तेन चित्तपरिपाकवतशिष्यस्य सर्वं रहस्यमप्रच्छाद्य यथातत्त्वमुपदेष्टव्यमित्युक्त्वा प्राज्ञस्तु देशिक इत्यारभ्य चित्तपरिपाकभेदानुसारेण तस्मै तस्मै शिष्याय यथातत्त्वं सर्वं रहस्यमनुक्त्वा यथा कथंचिदापाततः तत्त्वमुपदेष्टव्यमिति आचार्यधर्मो द्वितीयो विहितः ॥ १५८ ॥

अ० ॥ इदानीं सिद्धिकारस्य प्राग्विहितद्वितीयाचार्यधर्मानुसारित्वं मन्दाधिकारिभिर्मोघैर्विवदमानस्य दर्शयति **एतदिति**—

मू ॥ एतन्मानानुसारित्वात्कर्मजं तामसं जगत् ।
इति सिद्धिकृता प्रोक्तं सिद्धौ मन्दाधिकारिणे ॥ १५९ ॥

व्या ॥ **कर्मजं तामसं जगदिति** कर्मजन्यत्वे सति जीवगताविद्याद्वारकं तत्परिणामो वा भवेत् । तयोर्विभागस्तु अष्टमप्रदर्शके वक्ष्यति ॥ १५९ ॥

अ० ॥ प्रतिज्ञातार्थं ब्रह्मगीतावचनं संवादयति **इत्थमिति**—

मू ॥ इत्थञ्च ब्रह्मगीतायां पञ्चमाध्यायगं जगौ ।
ऐतदात्म्यमिदं सर्वमित्याह हि परा श्रुतिः ॥ १६० ॥

व्या ॥ एवमेवाधिकारिचित्तस्य मन्दपाकादिकमालक्ष्य कर्तव्योपदेशविशेषप्रकारः श्रुत्यभिप्रेत इति पञ्चमाध्यायवचनजातं जगावित्युक्त्वा श्रुतिप्रिपादयिषितब्रह्मवाक्यजातस्य पूर्वप्रकृतमाह **ऐतदात्म्यमित्यादिना** आत्मनो निरङ्कुशाद्वितीयत्वबोधकत्वेन **परा श्रुतिः** हि यस्मात् निखिलस्य नित्यापरोक्षात्ममात्रप्रकृतिकत्वात **ऐतदात्म्यमिदं सर्वमित्याह** अतो न जगदितरप्रकृतिकमित्यर्थः ॥१६०॥

अ० ॥ ननु आत्मातिरिक्तस्य जगतः "पश्यसि हीदं सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च नेती'ति बृहादारण्यश्रुत्या 'असौ वा व लोको गौतमाग्नि' रित्यारभ्य तस्या आहुतेर्गर्भस्संभवतीति पञ्चाग्निविद्यादिना च कर्मप्रकृतिकत्वमुपदिष्टम् मायान्तु प्रकृतिं विद्यात् ' सर्वं विकारजातं मायामात्र' मित्यादिश्रुत्या तावत् केवलमायाप्रकृतिकत्वमस्य जगतोऽवगम्यते तथा च सति कथं 'ऐतदात्म्यमिदं सर्व' मिति श्रुत्या सर्वस्यात्ममात्रप्रकृतिकत्वेन तदनन्यत्वमवगन्तुं शक्यत इत्यत आह ब्रह्मा **साक्षादिति**—

मू ॥ साक्षादर्थस्वभावेन श्रुतिस्सेयं प्रवर्तते ।
श्रोतुश्चित्तविपाकेन विषण्णा विवशा श्रुतिः ॥ १६१ ॥
क्वचित्कदाचिदन्यार्थं वक्ति च ब्रह्मणः पृथक् ॥ १६१॥ ॥

व्या ॥ 'ऐतदात्म्यमिदं सर्व'मिति या श्रुतिः **साक्षात्** किञ्चिदपि व्यवधानमन्तरा **अर्थस्वभावेन** विवर्तोपादानभूतप्रत्यगर्थस्वरूपेण जगत्प्रतिपादयितुं प्रवर्तते सेय श्रुतिः स्वगृहीतेन **श्रोतुश्चित्तविपाकेन** भोगातिलम्पटत्वादिरूपचित्तकालुष्येण हेतुना **विषण्णा** ततस्तदानीं तदनुसरणस्यावश्यकत्वेन **विवशा** परवशा च सती **क्वचित्** स्वैकदेशे **कदाचित्** शिष्यचित्तस्य मन्दपाकसमये **अन्यार्थं** शिष्यबुद्ध्यनुसरणार्थं **ब्रह्मणः पृथक्** स्वाभिप्रेतात् जगत्कारणभूतात्

प्रत्यगात्मनः पृथगन्यत् द्रव्यापर्वात्मकं कर्म **वक्ति च** जगत् प्रकृतिलेनेति शेषः । चकारेणाधिदैविकस्य परमेश्वरस्य फलदातृत्वमभिप्रेतम् ॥ १६१॥ ॥

अ० ॥ इदानीं स्वप्रतिज्ञातार्थप्रदर्शनार्थं मन्दचित्तपाकोपेतशिष्योपदेशाय प्रवर्तमानां 'असौ वा व लोको गौतमाग्निस्तस्यादित्य एव समित् रश्मयो धूमाः अहरर्चिः चन्द्रमा अङ्गाराः नक्षत्राणि विष्फुलिंगाः तस्मिन्नेतस्मिन्नग्नौ देवाश्श्रद्धां जुह्वति तस्या आहुतेस्सोमो राजा संभवती'त्यारभ्य तस्माज्जुगुप्सेतेति पञ्चाग्निविद्यापरां छान्दोग्यश्रुतिं पयसि हीदं सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च नेती' त्यादिबृहदारण्यश्रुतिञ्च 'स क्रतुं कुर्वीते'त्यादिमानसक्रियापराञ्च 'तदेतत् सत्यं मन्त्रेषु कर्माणि कवयो यान्यपश्यंस्तानि त्रेतायां बहुधा सन्ततानि तान्याचरथ नियतं सत्यकामा एष वः पन्थास्सुकृतस्य लोक' इत्यादिमुण्डकश्रुतिं चाथर्तस्संगृह्य प्रमाणयति ब्रह्मा **साध्यति**--

मू॥ साध्यसाधनसंबन्धकथनं फलभाषणं ॥ १६२ ॥
जगद्वैचित्र्यनिर्देशो धर्माऽधर्मार्थभाषणम् ।
वर्णाश्रमविभागोक्तिस्तद्धर्मोक्तिस्तथैव च ॥ १६३ ॥
शोभनाशोभनोक्तिश्च भूतभौतिकभाषणम् ।
शब्दानां भेदनिर्देशस्तदर्थानाञ्च भाषणम् ॥ १६४ ॥
आत्मनोऽन्यस्य सर्वस्य सद्भावोक्तिस्सुरर्षभाः ॥ १६४॥ ॥

व्या ॥ 'सोमेन यजेत' 'आज्येन जुहुयात् तेजस्कामस्य पयसा जुहुयात्' 'दध्ना जुहोती' त्यादिश्रुत्या सोमादेस्तत्साध्यकर्मणा सह संबन्धकथनं–तथा प्रागुक्तपञ्चाग्निविद्यादिपरश्रुत्या सोमाज्यपयोदधिपरिणामस्य श्रद्धाहुतिशब्दवाच्यस्य द्रव्यापूर्वस्य परिणामभूतं यत् सोमलोकनिवासार्हं शरीरं तदेव सोमादिद्रव्यसाद्ध्यकर्मणः फलमित्युपदेशश्च क्रियते । तथा आत्मनोऽन्यस्य सर्वस्य कर्मप्रकृतिकस्य तन्निमित्तकस्य वा जगतः–प्रातिभासिकस्येव ज्ञाननिवर्त्यत्वाभावात् 'आचार्यवान् पुरुषो वेद' 'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य' इत्यादिश्रुत्या च **सद्भावोक्तिः** सतस्सत्यस्य भावस्सद्भावः तस्य द्वैतिनामभिमतस्य निर्विचिकित्सब्रह्मज्ञानादनिवर्त्यत्वस्य कर्मजत्वस्य वा उक्तिरूपदेशश्च क्रियते न तात्पर्येणेत्युक्तम् इयमेव प्रक्रिया–प्रतिकर्मव्यवस्थेति गीयते–तत्रैव कर्मप्रकृतिकस्य चैत्रशरीरस्य तच्चैत्रेण मैत्रादिभिश्च दृश्यमानत्वोक्तेः । दृष्टिसृष्टिवादे तावत् । **आर्यावृत्तम्** अन्ये तु सङ्गिरन्ते तत्तदविद्याविनिर्मितं विश्वं । प्रतिपुरुषमेव भिन्नं भवति यथा

रज्जुसर्प इत्यत्र। चैत्राध्यस्तं विश्वं मैत्राय स्वप्नवन्न भातीति एवं राद्धान्ततत्वात् प्रातिभासिकस्य जगतो ज्ञाननिवर्त्यत्वरूपमिथ्यात्वातिरेकेण नोक्तसद्भावः—सत्तैक्य-वादे तु ॥ श्लो० ॥ 'सत्ताहीनस्य कार्यस्यासत्वमेव हि युज्यत।' इति ब्रह्मगीतायाः पञ्चमाध्यायवचनाच्च—स्वतस्सत्ताहीनस्य कार्यस्य न सद्भावश्च संभवतीत्यर्थः ॥

अ० ॥ इदानीं ब्रह्मा तावत् शिष्यचित्तस्य मन्दपरिपाकानन्तरं मध्यमपरिपाकमालक्ष्य जगतः कर्मवर्जितमायाप्रकृतिकत्वं शुक्तिज्ञानेन प्रातिभासिकरजतस्येव ब्रह्मज्ञानसमकालमेव तज्ज्ञाननिवर्त्यत्वं चोपदिदिक्षु 'सर्वं विकारजातं मायामात्रं' मित्यादिशास्त्रमर्थतस्संगृह्णाति **मिथ्येति**—

मू ॥ मिथ्यात्वभाषणं तस्य मायासद्भावभाषणम् ॥ १६५ ॥
मायात्वोक्तिश्च मायाया बन्ध इत्यभिभाषणम्।
गुरुशिष्यकथोक्तिश्च ब्रह्मविद्याभिभाषणम् ॥ १६६ ॥
शास्त्राणामपि निर्देशस्तर्काणामपि भाषणम्।
अन्यद्विकल्पजातं यत्तदुक्तिश्च समासतः ॥ १६७ ॥
अन्यार्थे न परं ब्रह्म श्रुतिस्साध्वी न तत्परा ॥ १६७॥ ॥

व्या ॥ गगने नीलिमा सत्ये जगत् सत्यं भविष्यति—'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येदित्यादिश्रुत्या **तस्य** पयसि हीदं सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च नेतीति हि शब्देन स्वस्य लोकप्रसिद्धयनुवादकत्वप्रदर्शकश्रुत्यादिना प्रतिपादितस्य सर्वस्य जगतः कर्मप्रकृतिकत्वादिप्रयुक्तसत्यत्वनिरासार्थं ज्ञानसमकालमेव ज्ञाननिवर्त्यत्वरूपमिथ्यात्वोक्तिः क्रियत इत्याह **मिथ्यात्वभाषणमिति** तस्य जगतः ब्रह्मसत्तातिरिक्तसत्तासिद्धयर्थं 'मायान्तु प्रकृतिं विद्यात्' 'सर्वं विकारजातं मायामात्र'मित्यादिश्रुत्या तमोरूपमायासद्भावभाषणञ्च क्रियत इत्याह **मायासद्भावभाषणमिति** तर्हि जगदाकारेण परिणममानस्य मायिकस्य विक्षेपांशस्य आरब्धफलकद्रव्यापूर्वस्येवावरणांशेन सह ज्ञाननिवर्त्यत्वरूपं सत्यत्वं स्यादित्याशङ्क्य 'तत्र को मोहः कश्शोक एकत्वमनुपश्यत' इत्यादिश्रुत्या विक्षेपांशपरिणामेन शोकादिना सह आवरणविक्षेपांशयोरपि ज्ञानसमकाल एव ज्ञाननिवर्त्यत्वरूपमिथ्यात्वादेशः क्रियत इत्याह **मायात्वोक्तिश्च मायाया इति** एवमेव 'स एव मायापरिमोहितात्मा शरीरमास्थाय करोति सर्व'मिति श्रुत्या बन्धस्य मायाधीनतादेशः क्रियत इत्याह **बन्ध इत्यभिभाषणमिति** 'भृगुर्वै वारुणिः। वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मे' त्यादिश्रुतेराख्यायिकामात्रत्वमवगम्यत इत्याह **गुरुशिष्य-**

कथोक्तिश्चेति अनेन अनेकशरीरैकजीववादोऽभिप्रेतः—तथैव 'ब्रह्मविदाप्नोति पर'मित्यादिना च अविद्यानिवर्तकब्रह्मविद्याभिभाषणं च तद्ब्रह्मविद्यासाधनानां तत्वमसि 'प्रज्ञानं ब्रह्म' 'अयमात्मा ब्रह्म' 'अहं ब्रह्मास्मी' त्यादि शास्त्राणामपि निर्देशश्च—घटे नष्टे यथा व्योम व्योमैव भवति स्वयम् । तथैवोपाधिविलये 'ब्रह्मैव ब्रह्मवित् स्वय'मित्यादिश्रुत्या तर्कोणामपि भाषणञ्च । मायन्तु प्रकृतिं विद्यात्' 'ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढा'मित्यादिश्रुत्या अज्ञानस्य मृद्वत् द्रव्यत्वात् द्रव्यकारणत्वं--अथ वा हरिद्रासुधागतशक्तिवदात्मशक्तित्वेन अद्रव्यत्वात् गुणकारणत्वं वा स्यादिति प्रागुक्तेभ्यः **अन्यद्विकल्पजातं यत्तदुक्तिश्च समासतः** क्रियत इत्यर्थः । इदानीं 'साक्षादर्थस्वभावेने' त्यादिना सार्धेन श्लोकेनोपक्रमे यत् प्रतिज्ञातं तदुपसंहरति ब्रह्मा **अन्यार्थं न परं ब्रह्म श्रुतिरिति** प्रागुक्तमन्दचित्तपाककात् यो अन्यो मध्यमचित्तपाककः तस्मिन् विषये जगतो मिथ्यात्वमावेदयितुं मायाया एव प्रकृतित्वप्रतिपादिकेयं 'मायान्तु प्रकृतिं विद्यात्' 'सर्वं विकारजातं मायामात्र' 'मित्यादिका श्रुतिः न परं ब्रह्म जगत्प्रकृतित्वेन वक्तीति क्वचित् कदाचिदन्यार्थं वक्ति च ब्रह्मणः पृथगित्युपक्रमवाक्यगतक्रियापदेनान्वयः । इदानीं मायान्तु प्रकृतिं विद्यात् सर्वं विकारजातं मायामात्रमित्यादिश्रुत्या सह 'सदेव सोम्येदमग्र आसी' दित्युपक्रम्य ऐतदात्म्यमिदं सर्वमित्यादिश्रुतेरपि अवगतिसामान्यवत्वाय मायायामेव तात्पर्यं वक्तव्यमित्याशङ्क्य अस्याः श्रुतेः उत्तमाधिकारिणे जगतो ब्रह्ममात्रसत्ताकत्वबोधकत्वान्न मायापरतेत्याह **साध्वी न तत्परेति** साध्वीति श्रुतेर्हेतुगर्भविशेषणं—'अस्य महतो भूतस्य निश्वसितमेवैतद्यदृग्वेदो यजुर्वेदस्सामवेद' इति श्रुतेः स्वपतावात्मन्येव तात्पर्यवत्वात् न मायापरेत्यर्थः ॥१६७॥॥

अ० ॥ प्रागुपपादितैः 'साक्षादर्थस्वभावेने' त्यादिश्लोकैः लिलक्षयिषितानां श्रुतीनामुक्तमेवाधिकारित्रैविध्यपरत्वं ब्रह्मा स्वयमेव दर्शयति **चित्तेति**—

मू॥ चित्तपाकानुगुण्येन श्रोतृणां परमा श्रुतिः ॥ १६८॥

सोपानक्रमतो देवा मन्दम्मन्दं हितं नृणाम् ।
उपदिश्य विषण्णापि ततः पक्काधिकारिणाम् ॥ १६९ ॥
ऐतदात्म्यमिदं सर्वमित्याह परमाद्वयम् ॥ १६९॥ ॥

व्या ॥ परमेति अबाधितार्थबोधकत्वेन परमा श्रुतिः **चित्तपाकानुगुण्येन श्रोतृणां** चित्तपरिपाकतारतम्यक्रमेण **मन्दम्मन्दं** शनैश्शनैः **नृणां** तत्वजिज्ञासूनां **सोपानक्रमतः** तात्तत्कालिकाधिकारवशात् **हितं** विषयासक्ति-

दशायां फलानां द्रव्यापूर्वं कर्मैव प्रकृतिरित्युक्त्वानन्तरं त एव मन्दाधिकारिणां यदा पुनः 'तरति शोकमात्मवित्' 'तत्र को मोहः कश्शोक एकत्वमनुपश्यत' इत्यादि शास्त्रोक्तेनात्मवेदनेन तरणीयस्य शोकस्य कर्मजन्यत्वे प्रारब्धकर्मफलत्वेन भोगमन्तरेण शोकतत्कर्मणोः ज्ञानेन निवृत्त्यसंभवात् शोकस्य ज्ञाननिवर्त्यत्वसमर्पकं किमित्यपेक्षन्ते—तदा तेषां मध्यमाधिकारित्वं भवति । तदा तान् प्रति श्रुतिः'मायान्तु प्रकृतिं विद्यात्' 'सर्वं विकारजातं मायामात्रं' मिति हितं शोकादिकारणं मायैवेत्यादिश्य अथ तत्वयाथात्म्योपदेशातिक्रमेण प्राप्तानृतभयात् **विषण्णापि ततः पक्वाधिकारिणां** कालान्तरे पक्वाधिकारित्वं प्राप्तानां पूर्वोक्तानामेव जगतो मायिकत्वे तेनाप्यनिर्वचनीयेन तत्वेनात्मनो द्वैतापत्तिस्स्यादेव अतः केन मार्गेणात्मनः अद्वितीयत्वमभिप्रेतामिति चिन्ता भवति—तदा तेषामाह **ऐतदात्म्यमिदं सर्वमित्याह परमाद्वयं श्रुतिरिति** पूर्वेण संबन्धः यस्मादात्मतत्त्वं कूटस्थमेव सत् पूर्वावस्थामविहायावस्थान्तरञ्चाप्राप्यावस्थान्तरवदिव स्वयमेवावभासते । ततोऽस्य जगत आत्मतत्वव्यतिरेकेण स्वतः असत्वात् प्रत्यक् तत्वं निरङ्कुशमद्वितीयं भवेदित्यर्थः ॥ १६९॥ ॥

अ० ॥ किञ्च मिथ्यात्वभाषणं तस्येत्यारभ्यान्यार्थं इत्यन्तं ब्रह्मवाक्यं तावन्मध्यमाधिकारिपरमेव न मुख्याधिकारिणे प्रवृत्तमिति यत् प्रागुपपादितं तत्र ब्रह्मगीतायाः पञ्चमाध्यायवचनं संवादयति **अज्ञानेति**—

मू ॥ अज्ञानमयमेवेदं सर्वमित्यभिभाषणम् ॥ १७० ॥
नैव भाषणमज्ञानाभावादेव शिवं विना ॥ १७०॥ ॥

व्या ॥ 'सुखमहमस्वाप्स'मिति सुषुप्तावहमित्यात्मत्वेन आनन्दे स्वयं प्रकाशमाने सति तं शिवं विना तदा तदावरणाभावादज्ञानं तमोरूपं जगदुपादानमिति वचनमभिधेयवर्जितमेवेत्यर्थः ॥ १७०॥ ॥

अ० ॥ ब्रह्मगीतायाः द्वादशाध्यायवाक्यमप्यत्र प्रमाणयति **जगदिति**—

मू ॥ जगन्मायेति विज्ञानमज्ञानं फलतो भवेत् ॥ १७१ ॥

व्या ॥ मायामयत्वेन यत् जगद्विषयकं ज्ञानं तत् विचार्यमाणे **अज्ञानं भवेत्** अयथाभानं भवितुमर्हति आत्ममात्रोपादानकत्वात्—सच्चिदानन्दात्मकत्वेनावस्थितस्य जगतोऽनृतजडदुःखात्मनान्यथा भानादित्यर्थः ॥ १७१ ॥

अ० ॥ 'ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढा' मितिश्वेताश्वरवाक्यं समवलम्ब्यात्मन आवरणशक्तिरद्रव्यात्मिका तत्कार्यं पुनर्जगद्गुणात्मक-

मेव—न द्रव्यात्मकं यथा पटगतशक्तिद्वारतया पटोपादानकं संकोचप्रसरणादिकं कार्यं न द्रव्यात्मकमिति केचिन्मन्यन्ते तथैव केचित् प्राङ्निराकृतोऽपि जगतो मायिकत्ववादो यथा तत्वविषय एवेति च मन्यन्ते ॥ तदुभयवादिनिरासकं ब्रह्मगीतायाश्चतुर्थाद्ध्यायवचनमप्यत्रोदाहरति **माययेति**—

मू॥ मायया विद्यते सर्वमिति केचन मोहिताः ॥ १७१॥ ॥

व्या ॥ **माययेति** शक्त्या प्रकृत्या वा अस्मिन्प्रकरणे उत्तरश्लोके मायया वेति विकल्पस्य विवक्षितत्वादतः क्रमात् सर्वं गुणात्मकं द्रव्यात्मकं वा कार्यं स्वरूपानन्दातिरेकेण विद्यत इति मोहिताः केचित् वदन्तीति शेषः ॥ १७१॥ ॥

अ० ॥ तेषां मोहितत्वोपपादकमेव ब्राह्मं वाक्यमाह **शिवेति**—

मू॥ शिवरूपातिरेकेण नास्ति माया च तत्वतः ॥ १७२ ॥

व्या ॥ यतः 'न किञ्चिदवेदिष'मिति परामर्शविषयस्य परमानन्दावारकत्वं तावत् 'एषोऽस्य परम आनन्द' इत्यादिकया सौषुप्तिकालिकपरमानन्दानुभवपरश्रुत्या 'सुखमहमस्वाप्स' मिति परामर्शमूलसुखापरोक्ष्येण च 'अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम्। आद्यत्रयं ब्रह्मरूप' मिति श्रुत्युक्तप्रकारेण पूर्वावस्थामपरित्यज्य जगद्रूपेण भानदशायामपि ब्रह्मानन्दानुभवेन च बाधितं अतो नित्यापरोक्षानन्दस्वरूपातिरेकेण तदावारकं तमोरूपं मायाख्यं **तत्वत इति** प्रथमार्थे तासिः तत्वं नास्ति अत एव तज्जन्यं गुणात्मकं द्रव्यात्मकं वाऽनिर्वचनीयं कार्यं नास्तीति चकारेणोक्तं एतेन'न किञ्चिदवेदिष'मिति नञः अभावपरत्वमात्रं विजानतां वाक्यं नाज्ञातवस्तुसद्भावे प्रमाणं भवेदित्युक्तम् अत एव च कार्यकारणयोरेकसत्तावादे कारणसदात्मातिरेकेण इन्द्रियग्राह्यवस्त्वन्तरासत्वपरवाचारंभणश्रुत्यनुगुणमेव 'पश्यत्यचक्षुस्स शृणोत्यकर्ण' इति श्रुत्यन्तरमपि चक्षुरादीन्द्रियानिराकरणपूर्वकं पश्यतीत्यादिशब्देन रूपाद्यात्मनाऽन्यथा स्वयंप्रकाशते ह्यात्मेति दर्शयतीत्यास्येयम् ॥ १७२ ॥

अ० ॥ अन्यथा बाधप्रदर्शनपरं ब्राह्मं वाक्यमुदाहरति **मायया वेति**—

मू॥ मायया वा शिवादन्यद्विद्यते चेच्छिवस्य तु।
महत्वं परमं साक्षाद्धीयेत सुरपुङ्गवाः॥ १७३ ॥

व्या ॥ ब्रह्मवत् पारमार्थिकवस्त्वन्तराभावेऽपि तमसा प्रसूतमनिर्वचनीयमानन्दातिरिक्तं वस्त्वन्तरं विद्यते चेत् तदा तेनैव परिच्छेदसंभवात् शिवस्य निरङ्कुशमपरिच्छिन्नत्वं भज्येतेत्यर्थः ॥ १७३ ॥

अ० ॥ इदानीं पूर्वावस्थामपरित्यज्यावस्थान्तरमलब्ध्वा चावस्थान्तरवत इव ब्रह्मणः स्वतो भानमेव विवर्तः इन्दुवादिति विवर्तलक्षणोक्तप्रकारेणान्यथा स्वतः प्रकाशमानब्रह्मसत्तातिरिक्तकार्यस्वरूपाभावात् न कार्येण ब्रह्मणः परिच्छेदस्खादित्यत्र ब्राह्मं वाक्यमुदाहरति **महत्वस्येति**--

मू॥ महत्वस्य च संकोचो नास्ति सम्यङ्निरूपणे ॥ १७३॥ ॥

व्या ॥ सम्यङ्निरूपण इति कार्यकारणयोरेकसत्तावादमाश्रित्य कारणसत्तास्फुरणातिरेकेण कार्यस्य पृथक्सत्तास्फुरणं वास्ति किं न वेति सम्यग्विचारे क्रियमाणे सति न कियानप्यात्मनः परिच्छेदस्संभवतीत्यर्थः ॥ १७३॥ ॥

अ० ॥ कार्यस्य ब्रह्मसत्तातिरिक्तसत्ताभ्युपगमे एकमेवाद्वितीयमिति श्रुतिव्याकोपस्स्यादित्यत्र ब्राह्मं वाक्यमुदाहरति **अस्ति चेदिति**--

मू॥ अस्ति चेदप्रमाणं स्याच्छ्रुतिस्सत्यार्थवादिनी ॥ १७४ ॥

व्या ॥ स्पष्टोऽर्थः ॥ १७४ ॥

अ० ॥ आनन्दाद्ध्येव खल्विमानि भूतानि जायन्त इत्यत्र ह्येवेति पदद्वयेन आनन्दावरणं जगदुपादानान्तरञ्च निवार्य खल्विति पदेन जगत्कारणस्यानन्दस्य सुषुप्त्यादौ स्वतः प्रकाशमानत्वस्य दर्शितत्वेन अस्मिन्निरूपणे प्रथमपक्षत्वेन प्रदर्शिताज्ञानसाहचर्यादेव विवर्तवादमङ्गीकृत्य तत्रैव सर्वशास्त्राणां तात्पर्यबोधके ब्रह्मगीतायां चतुर्थाध्यायवचनजातमुदाहरति **तस्मादिति**--

मू॥ तस्मादस्ति महादेव एव साक्षात्स्वयंप्रभः ।
अनन्दरूपस्संपूर्णो न ततोऽन्यत्तु किंचन ॥ १७५ ॥
इयमेव तु तर्काणां निष्ठा काष्ठा सुरोत्तमाः ।
प्रत्यक्षादिप्रमाणानां वेदान्तानामपीश्वराः ॥ १७६ ॥
स्मृतीनां च पुराणानां भारतस्य तथैव च ।
वेदानुसारिविद्यानामन्यासामास्तिकोत्तमाः ॥ १७७ ॥
शैवागमानां सर्वेषां विष्णुप्रोक्तागमस्य तु ।
अस्मदुक्तागमस्यापि सुरास्सूक्ष्मनिरूपणे ॥ १७८ ॥

बुद्धागमानां सर्वेषां तथैवान्यागमस्य तु ।
यक्षगन्धर्वसिद्धादिनिर्मितस्यागमस्य तु ॥ १७९ ॥

व्या ॥ तस्मादिति यस्मात् वस्तुतो नास्ति चाज्ञानं चित्प्रकाशविरोधत' इत्यादिवचनैः—तदेतदच्छायमिति श्रौतेन जगत्कारणभूताक्षराख्यप्रत्यगविशेषणेन च शिष्यकर्तृकतत्त्वनिर्धारणपरया 'आनन्दाद्धयेव खल्विमानि भूतानि जायन्त' इति श्रुत्या च तत्प्रदर्शितेनावधारणार्थकेन हिशब्देन च जगत्कारणभूतस्यानन्दस्यावरणञ्च व्यावर्त्य एवकारेण चानन्दातिरिक्तं जगदुपादानं च निराकृत्य खल्विति पदेन च आनन्दस्य सुषुप्त्याद्यवस्थासु सर्वानुभवश्च दर्शितः । तस्मात् **अस्ति ब्रह्मादेव एव** 'ब्रह्मरूपतया ब्रह्म केवलं प्रतिभासते । जगद्रूपतयाप्येतद्ब्रह्मैव प्रतिभासते' । इत्यादिवचनोक्तप्रकारेण महान् त्रिविधपरिच्छेदरहितश्चासौ देवश्च महादेवः प्रत्यगात्मैव कालत्रयेऽप्यस्तीत्युक्त्वा तमेव विशिनष्टि **साक्षात्स्वयंप्रभ इति** सदा स्वयं प्रकाशमानत्वे अनुभवं दर्शयति **आनन्दरूप इति** तमेव विशदयति **संपूर्ण इति** 'अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् । आद्यत्रयं ब्रह्मरूप' मिति श्रुत्युक्तप्रकारेण स्वयंप्रकाशमानत्वेन सच्चिदानन्दस्य संपूर्णत्वमावेद्य तस्य प्राक् प्रतिज्ञातमेव महत्वं निगमयति **न ततोऽन्यत्तु किञ्चनेति** एवं परिपूर्णसच्चिदानन्दातिरिक्तमनिर्वचनीयं सत्यं वा दृश्यं शब्दप्रत्ययगम्यं नास्तीति निराकृत्य तत्रैव द्वैतनिरसने तर्कादिसर्वप्रमाणानां तात्पर्यं मर्यादा चेति दर्शयति **इयमेव हि तर्काणां निष्ठा काष्ठेत्यादिना** ननु कथं बुद्धागमानामपि प्रत्यगात्मनः नित्यत्वपरिपूर्णत्वाभ्युपगमपूर्वकं तदतिरिक्तवस्तुनिराकरणे तात्पर्यं भवेदिति चेत् तैर्दृश्यानामुत्पत्तिविनाशत्वेनाभिप्रेतयोः दर्शनादर्शनयोः जगद्रूपेणात्मभानतदभावात्मकत्वात् द्रष्टृधर्मत्वेन तद्धर्मद्वयाश्रयात् शाश्वतात् द्रष्टुरात्मनो नान्यत् दर्शनादर्शनधर्मकवस्त्वस्तीत्यभिप्रेतत्वात् तत्रैव तेषामभिप्राय इति सर्वज्ञेन श्रीब्रह्मणा प्रदर्शितम् एवमेव द्वितीयाद्धयाये द्वितीयपादे 'उत्तरोत्पादे च पूर्वनिरोधा'दिति सूत्रस्य भाष्यावसाने यदि च दर्शनादर्शने दृश्यवस्तुन उत्पादनिरोधौ स्यातां एवमपि द्रष्टृधर्मौ तौ न दृश्यवस्तुधर्मावितिं द्रष्टृवस्तुनः शाश्वतत्वप्रसङ्ग एवेति भाष्येण तन्मते फलितार्थो दर्शितः । तर्हि 'नाभाव उपलब्धे' रिति तदुत्तराधिकरणसूत्रेण दर्शनातिरिक्त दृश्यवस्तुव्यवस्थापनस्य का गतिरिति चेत् तस्य वितण्डामात्रत्वमुत्तरत्र षष्ठे दृष्टिसृष्टिनिरूपणे प्रदर्शयिष्यत्यतो न कश्चित् विरोधः । तर्हि तथैव प्रागुदाहृतस्य 'यदि च दर्शनादर्शने दृश्यवस्तुन उत्पादनिरोधौ स्याता' मित्यादिभाष्यस्य

परमतनिराकरणार्थं प्रवृत्तत्वात् वितण्डात्वमेव किन्न स्यादिति चेन्न परमाद्वैतिनामस्मदाचार्याणां द्रष्टुः प्रत्यगात्मनः शाश्वतत्वस्यानभिप्रेतत्वाभावात् ।

बाढमेवैतत् तथापि समवायिकारणस्य कार्यादद्वितीयत्वं तर्कादिना कुतो ज्ञातुमर्हतीति चेदुच्यते ।

उपादानेऽद्वैतशास्त्रेणेव समवायिकारणे तर्कादिनापि कार्यस्योत्पत्तिस्थितिविलयानामङ्गीकारात् तदवगम्यताम् ।

ननु तन्मते कारणे कार्यजन्मस्थितिभङ्गेष्वपि तयोर्भेदाङ्गीकारात् कथं कारणस्याद्वितीयत्वसिद्धिरिति चेत् तत्रैवमापाततः प्रतीतावपि भवांस्तावत्पृष्टव्यः ।

तन्मते कार्यं तावत् कारणावयवसन्धौ किं अवयवद्वयोपरि वा ततोऽन्यत्र वाऽस्ति सर्वथापि प्रत्यक्षविरोधेन दुर्निरूप्यत्वात् न तयोर्भेदासिद्धिः ।

किन्तु कारणात्मकावयवद्वये च एकस्मिन्नेव दारुखण्डे च पाषाणपिण्डे च स्निग्धमृद्द्रव्ये च जायमानस्य घटादेः कारणात्मनावस्थानप्रत्यक्षाच्च कारणस्याद्वितीयत्वसिद्धिः ।

तथैव कारणे कार्यस्य त्रैकालिकासत्वरूपात्यन्ताभावस्याङ्गीकाराच्च कारणस्याद्वितीयत्वसिद्धिः ।

नन्वेवं कारणस्य कार्यात्सद्वितीयत्वाभावेऽपि नित्याभ्यां कार्यप्रध्वंसात्यन्ताभावाभ्यां सद्वितीयत्वं स्यादिति चेत् ।

उपनेत्रनीडाद्यवयवद्वयोः यथोचितसंयोगवियोगाभ्यां तत्र पौनःपुन्येन जाता इमे तदीयध्वंसाः एतावन्तस्सन्ति इमे तदीयात्यन्ताभावाः एते तु तदीयाभावद्वयातिरिक्ताः घटाद्यत्यन्ताभावाश्चेति पार्थक्येनानुपलब्धिसिद्धतदसत्वाच्च कारणस्याद्वितीयत्वसिद्धिः ।

एवमेव स्वात्मन्यपि तत्कार्याणां तदभावानां च पार्थक्येनानुपलब्धिसिद्धतदसत्वाच्च कारणस्य स्वात्मनोऽद्वितीयत्वासिद्धिः ।

किं च सर्वं ज्ञातृप्रकृतिकं ज्ञात्रभिव्याप्तत्वात् ज्ञानवदित्यनुमानाच्च आत्मनोऽद्वितीयत्वसिद्धिः ।

तदर्थमेव पाण्डवानां पतनाय परिकल्पितलाक्षागृहे तद्रक्षणार्थं तत्र यथा महता विदुरेण गुहामार्गश्च परिकल्पितः तथा प्राणिनां दृष्टयनुसारिणा तर्केणापि तत्राद्वैतसिद्धान्तग्रहणार्थं तस्मिंस्तस्मिन् समवायिनीव स्वात्मन्यपि तत्कार्याणामन्येषां च त्रैकालिकनिषेधरूपात्यन्ताभावस्य 'नेह नानास्ति किञ्चने'त्याद्यागमैरिवाङ्गीकृतत्वाच्चात्मनोऽद्वितीयत्वमवगच्छेत् एवमेव तदन्येषामपि शास्त्राणां ब्रह्मादिष्टं परमतात्पर्यं तत्र तत्र यदि सूक्ष्मा प्रज्ञा तदा प्रतिभायात् अन्यथा तां संपादयेत् ॥ १७९

अ० ॥ इदानीमुपपादितब्रह्मगीतावचनानामुत्तमाधिकारिणं प्रति प्रवर्तमानत्व-प्रदर्शनाय मन्दाधिकारिणं प्रति आचार्यधर्मविधायकं भगवद्गीतावाक्यमुदाहरति **न बुद्धीति**—

मू ॥ न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ।
जोषयेत् सर्वकर्माणि विद्वान्युक्तस्समाचरन् ॥ १८० ॥

व्या ॥ **कर्मसङ्गिनामिति** कर्मतत्फलसङ्गिनां विषयलम्पटानां यथातत्वोपदेशेन जगत्सत्यत्वबुद्धिमबाधयन् सन् विद्वान् स्वयमपि कर्मैवाचरेदित्यर्थः ॥१८०॥

अ० ॥ अधुनोपपादितं चतुर्थप्रदर्शकमुपसंहरति **अत इति**—

मू ॥ अतो मद्वचममन्दाभ्यां सिद्धिग्रन्थः प्रकल्पितः ।
यस्तेन बाधितुं ज्ञानप्रागभावसहायकः ॥ १८१ ॥
आत्मा जगदुपादानमिति वादो न शक्यते ॥ १८१॥ ॥

व्या ॥ यतः पूर्वोक्तप्रकारेण श्रीब्रह्मणा प्रतिकर्मव्यवस्थावादं ततोऽपि वरं दृष्टिसृष्टिवादञ्च निराकृत्य सत्तैकवादावष्टम्भेन कार्यस्य कारणसत्तातिरिक्तसत्ता-निरासे श्रुतिस्मृतीतिहासपुराणागमादीनां तात्पर्यं दर्शितम्–अतो जगतो व्यावहारिकसत्ताप्रातिभासिकसत्तापरशास्त्रावष्टम्भेन न पण्डितः सत्तैकवादमाक्षिपेदित्यर्थः ॥

——:o:——

द्वितीयनिरूपणे
पञ्चमप्रदर्शकारम्भः ।

अ० ॥ अधुना पञ्चमप्रदर्शकं प्रतिजानीते **पञ्चम इति**—

मू ॥ पञ्चमे तु विभेदेनाज्ञानानां हेतुतोच्यते ॥ १८२ ॥
आद्ये स्यात्सहकारित्वं द्वितीये द्वारहेतुता ।
तृतीये परिणामित्वं तन्मानानि क्रमाद्ध्रुवे ॥ १८३ ॥

व्या ॥ अस्मिन्द्वितीयनिरूपणे । 'प्रतिबन्धकरूपं यद्वैतविभ्रमजन्मनि । ज्ञानं तत्प्रागभावस्स्यादज्ञानं भ्रमकारण' मिति अष्टमादिश्लोकोक्तप्रकारेण क्रमादाद्यपक्षत्वेनाभिप्रेते सर्वोपादानस्यात्मनः श्रवणादिभावापत्त्यनन्तरं यथावत् स्वतः प्रकाशिष्यमाणस्वरूपचैतन्यात्मकज्ञानस्य प्रागभावरूपाज्ञाने सहकारिसाधनत्वम् । तथा द्वितीयपक्षत्वेनाभिप्रेतावरणशक्त्यात्मकाज्ञाने तु द्वारकारणत्वञ्च तृतीयपक्षत्वेनाभिमततमोद्रव्यात्मकाज्ञाने तु परिणामिकारणत्वं च भवेदित्यर्थः ॥ १८३ ॥

अ० ॥ तत्राद्यपक्षत्वेनाभिमताज्ञानस्य सहकारिसाधनत्वे वृद्धसम्मतिं प्रति-जानीते **आद्य इति**—

मू ॥ आद्ये न्यायविदामुक्तिः प्राचां विद्यामुनेरपि ॥ १८३॥ ॥

व्या ॥ प्राचीनानां न्यायशास्त्रविदां श्रीविद्यारण्याचार्याणामद्वैतिनाञ्च **वचनं** प्रमाणमित्यर्थः ॥ १८३॥ ॥

अ० ॥ तत्र प्राचीनतार्किकाणां मते प्रतिबन्धकप्रागभावहेतुत्वस्यं **सुप्रसि-द्धत्वात्** उत्तरस्मिन् प्रदर्शके **वक्ष्यमाणत्वाच्च** संप्रति विद्यारण्याचार्यकृततृप्तिदीप-वचनं दर्शयति **न जानामीति**—

मू ॥ न जानामीत्युदासीनव्यवहारस्य कारणम् ।
विचारप्रागभावेन युक्तमज्ञानमीरितम् ॥ १८४॥ ॥

व्या ॥ **उदासीनव्यवहारस्येति** उदासीनस्य स्वात्मस्वरूपविचारवि-मुखस्य यो व्यवहारः अहं कर्ता भोक्तेत्येवमादिभ्रमप्रत्ययस्तस्य प्रतिबन्धकभूतो यो नाहं कर्ता भोक्तेत्येवमादिविचारः प्रमात्मकप्रत्ययस्तत्प्रागभावस्य कर्तृत्वादि-भ्रमप्रत्ययसाधनत्वात् तेन विचारप्रागभावेन युक्तं न जानामीत्यसङ्गत्याद्यावारकं तमोरूपमज्ञानं कारणं भवतीत्यत्र तमोरूपस्य भावात्मकस्याज्ञानस्य कारणत्वादा-दिभिरपि भ्रमप्रतिबन्धकस्य विचारस्य यः प्रागभावस्तस्यापि यत् भ्रमं प्रति सह-कारिकारणत्वमङ्गीकृतं तावन्मात्रमादायात्रेदं वचनमुदाहृतमिति मन्तव्यम् अत्र कार्यकारणयोरेकसत्तावादे प्रत्यक्चैतन्यमात्रस्य प्रकृतित्वावगमादित्यर्थः॥१८४॥ ॥

अ० ॥ इदानीमज्ञानस्यावरणशक्तिरूपत्वपक्षे यत् द्वारकारणत्वं प्रतिज्ञातं तत्र वृद्धसम्मतिं दर्शयति **संक्षेपेति**—

मू ॥ संक्षेपाचार्यास्तु ब्रह्मैवाशेषजगदुपादानम् ।
द्वारतया सच्छक्तिः कार्ये श्लक्ष्णत्वमिव मृदाऽऽयाति ॥१८५॥ ॥

व्या ॥ पूर्वार्द्धेन यदुक्तं ब्रह्मणो जगद्भ्रमाधिष्ठानत्वरूपमुपादानत्वं **तस्य** य-त्किञ्चिद्ब्रह्मधर्माच्छादिनीं तच्छक्तिमन्तराऽसंभवेन तच्छक्तेरद्रव्यत्वादुपादानत्वा-संभवेन द्वारकारणत्वमङ्गीकरणीयम् । द्वारकारणत्वन्नाम यदनुपादानमपि कार्यानु-गतं भवति तत् द्वारकारणमित्युच्यते । एवं द्वारकारणत्वेन सद्रूपे ब्रह्मणि कल्प्य-माना शक्तिः स्वाश्रयभूतब्रह्मणा सह जगति घटादिषु मृदा सहानुपादानमपि मृद्गतश्लक्ष्णतेवायातीति मन्यन्त इति शेषः ॥ १८५॥ ॥

अ० ॥ यदज्ञानस्य तमोद्रव्यत्वपक्षे परिणामिकारणत्वं प्रतिज्ञातं तत्र वृद्धसंमतिं दर्शयति **अथेति**—

मू॥ अथ तत्वनिर्णयकृतः परिणामितया विवर्तमानतया ।
माया ब्रह्म च विश्वोपादानं श्रुतित इत्याहुः ॥ १८६॥ ॥

व्या ॥ **श्रुतित इति** 'मायान्तु प्रकृतिं विद्यात्' 'सोऽकामयत बहु स्यां प्रजायेये' त्यादि श्रुतेरित्यर्थः । एतत् वचनद्वयं सिद्धान्तकल्पवल्ल्यामुक्तम् । एवमेव संक्षेपाचार्याणां तत्वनिर्णयकृतां च मतं—सिद्धान्तलेशसङ्गृहतद्व्याख्यानाभ्याञ्चोपवर्णितम् ॥ १८६॥ ॥

द्वितीयनिरूपये
षष्ठप्रदर्शकारम्भः ।

अ० ॥ षष्ठप्रदर्शकं प्रतिजानीते **विघ्नेति**—

मू॥ विघ्नात्यन्ताभाव एव हेतुस्स्यादिति ये जगुः ॥ १८७ ॥
तन्निरासाय हेतुत्वं ध्वंसादेरुच्यतेऽत्र हि ॥ १८७॥ ॥

व्या ॥ स्पष्टोऽर्थः ॥

अ० ॥ कार्ये प्रति प्रतिबन्धकप्रागभावादीनां कारणत्वं दिदर्शयिषुरादौ अत्यन्ताभावस्य द्रव्यप्रतियोगित्वे सत्येव कारणत्वं नेतरप्रतियोगिकत्वे संभवतीत्याह **कार्येति**—

मू॥ कार्यदेशाद्धि यद्द्रव्यं विघ्नकृन्निर्गमक्षमम् ।
तस्यात्यन्ताभाव एव हेतुस्स्यान्मण्यभाववत् ॥ १८८॥ ॥

व्या ॥ स्पष्टोऽर्थः ॥

अ० ॥ इदानीं यस्मिन् कार्ये द्रव्यातिरिक्तो भविष्यद्धर्मः प्रतिबन्धको भवति तत्र तत्प्रागभाव एव कारणमित्याह **भविष्यत इति**—

मू॥ भविष्यतस्तु धर्मस्य विघ्नकृत्वे हि कारणम् ।
प्रागभाव इति प्रोक्तं प्रथमे तु प्रदर्शके ॥ १८९॥ ॥

व्या ॥ **धर्मस्येति** अवस्थान्तरस्येति यावत् प्रथमप्रदर्शके ॥ श्लो ॥ 'प्रतिबन्धकरूपं यद्वैतविभ्रमजन्मनि । ज्ञानं तत्प्रागभावस्स्यादज्ञानं भ्रमकारणमित्यत्र प्रोक्तम् । तत्रैव तद्व्याख्यातञ्च ॥ १८९॥ ॥

अ० ॥ संप्रति यदुत्पत्तौ वार्तमानिकस्य द्रव्येतरगुणादेः प्रतिबन्धकत्वं तत्र तत्प्रध्वंसाभाव एव कारणमित्याह **वर्तमानेति**—

मू॥ वर्तमानगुणादीनां विघ्नकृत्त्वे तु कारणम् ॥ १९० ॥
ध्वंस एव न चात्यन्ताभावो हेतुर्यतो न हि ।
विहायाश्रयमन्यत्र गुणादीनां गतिस्ततः ॥ १९१ ॥

व्या॥ **वर्तमानगुणादीनामिति** वर्तमानः पापरूपो गुण आदिर्येषामविचाराश्रद्धादीनां ते वर्तमानगुणादयः तेषां वर्तमानगुणादीनां यस्मात् स्वाश्रयं विहायान्यत्र मणेरिव गमनं न संभवति अतस्तत्प्रध्वंसाभावस्यैव कारणत्वं न तदत्यन्ताभावस्येत्यर्थः ॥ १९१ ॥

अ० ॥ यत्तावदभिहितं भविष्यद्धर्मस्य प्रतिबन्धकत्वे तदीयप्रागभाव एव कारणमिति तत्राचार्यादिसम्मतिमाह **ध्यानेति**—

मू॥ ध्यानदीपे तथैवोक्तं विद्यारण्यैस्तदुच्यते ।
परोक्षज्ञानमश्रद्धा प्रतिबध्नाति नेतरः ॥ १९९ ॥
अविचारोऽपरोक्षस्य ज्ञानस्य प्रतिबन्धकः ॥ १९२॥ ॥

व्या॥ **अश्रद्धेति** श्रद्धायाः प्रागभाव एवोक्तः ॥ नात्यन्ताभावो ध्वंसो वा तयोर्निर्ज्ञानन्तयोर्निवृत्त्यसंभवात् । परोक्षज्ञानमश्रद्धैव प्रतिबध्नाति न तदितरः अविचारः । ततश्चाश्रद्धानिवृत्तौ सकृदुपदेशादेव अस्ति ब्रह्मेति परोक्षज्ञानं जायते । 'अहं ब्रह्मास्मी'त्यपरोक्षज्ञानस्य तु विचारप्रागभाव एव प्रतिबन्धकः अस्य भ्रमकृत्त्वे च न जानामीत्युदासीनव्यवहारस्य कारणम् । विचारप्रागभावेन युक्तमज्ञानमीरितामिति विद्यारण्यीयमेव तृप्तिदीपिकावाक्यं च प्रागुदाहृत्य व्याख्यातं एतेन केषाञ्चित्प्रागभावानां भावानाञ्च प्रतिबन्धकत्वं सिद्धं प्रतिबन्धकत्वं नाम स्वातिरिक्तकार्यसहकारिभूताभावप्रतियोगित्वमिति ध्येयं ॥ १९२॥ ॥

अ० ॥ यद्वर्तमानगुणादेः प्रतिबन्धकत्वे लङ्घ्वंस एव कारणमित्युक्तं तत्र प्रमाणत्वेन यत् विचारवैय्यर्थ्यमाशङ्क्य तत्परिहारपरं विद्यारण्यवाक्यं तदुदाहरति **विचारयन्निति**—

मू॥ विचारयन्नामरणं नैवात्मानं लभेत चेत् ॥ १९३ ॥
जन्मान्तरे लभेतैव प्रतिबन्धक्षये सति ॥ १९३॥ ॥

व्या ॥ प्रतिबन्धक्षये सति जन्मान्तरे आत्मानं लभेतेति **विद्यारण्याचार्योक्त्या** यः प्रतिबन्धकभूतो वार्तमानिकः पापरूपो गुणस्तत्प्रध्वंसाभावस्यैव ज्ञानकारणत्वं सिद्धमित्यर्थः ॥ १९३॥ ॥

अ० ॥ नन्विदं कुतोऽवगतमित्याशङ्क्य ऐहिकमप्यप्रस्तुतप्रतिबन्धे तदृर्शनादिति, सूत्रकृता तदभिधानादिति विद्यारण्याचार्यकृतं परिहारवचनमुदाहरति **इह वेति**—

मू॥ इह वाऽमुत्र वा विद्येत्येवं सूत्रकृतोदितम् ॥ १९४ ॥

व्या ॥ विद्यासाधनश्रवणादेः प्रतिबन्धककर्मण्यसतीह जन्मनि विद्या भवति। सति तु तत्क्षयानन्तरं जन्मान्तरे भवेदित्यर्थः ॥ १९४ ॥

अ० ॥ इदानीमुपपादितार्थे तत्सूत्रभाष्यसम्मतिमप्याह **प्रतिबन्धेति**—

मू॥ प्रतिबन्धक्षयापेक्षं विद्याजन्मेति भाष्यकृत् ॥ १९४॥ ॥

व्या ॥ आहेति शेषः ॥ १९४॥ ॥

अ० ॥ प्रतिज्ञातार्थं श्रीमद्विद्यारण्याचार्यप्रदर्शितां वार्तिकाचार्यसम्मतिमुदाहरति **पुनरिति**—

मू॥ पुनः पुनर्विचारेऽपि प्रतिबन्धे तु जीविते ॥ १९५ ॥
न वेत्ति तत्वमित्येतद्वार्तिके सम्यगीरितम् ॥ १९५॥ ॥

व्या ॥ **स्पष्टोऽर्थः** ॥ १९५॥ ॥

अ० ॥ तान्येव वार्तिकान्युदाहरति **कुतस्तज्ज्ञानमित्यारभ्य भरतस्य त्रिजन्मभिरित्यन्तेन**—

मू॥ कुतस्तज्ज्ञानमिति चेत्तद्धि बन्धपरिक्षयात् ॥ १९६ ॥

व्या ॥ **बन्धपरिक्षयादिति** प्रतिबन्धक्षयादित्यर्थः ॥ १९६ ॥

अ० ॥ कोऽसौ ज्ञानप्रतिबन्ध इत्यत आह **प्रतिबन्ध इति**—

मू॥ प्रतिबन्धो वर्तमानो विषयासक्तिलक्षणः ।
प्रज्ञामान्द्यं कुतर्कश्च विपर्ययदुराग्रहः ॥ १९७ ॥

व्या ॥ वर्तमानप्रतिबन्धस्तावत् चित्तस्य विषयासक्तिरूप एकः, बुद्धेस्तैक्ष्ण्याभावश्चापरः, शुष्कतार्किकत्वेन श्रुत्यर्थस्यान्यथोहनमितरः । आत्मनः कर्तृत्वादिधर्मत्वज्ञाने युक्तिरहितोऽभिनिवेशश्चान्यः । एतेषामन्यतमस्यापि सत्वे ज्ञानासंभवात्तत्क्षयादेव हेतोर्ज्ञानं भवतीत्यर्थः ॥ १९७ ॥

अ० ॥ तर्हि तेषां केन निर्वाणोत्पत्तिरत आह **शमादयैरिति**--

मू॥ शमाद्यैश्श्रवणाद्यैश्च तस्य तत्तत्तिरैः क्षयम् ।
नीतेऽस्मिन्प्रतिबन्धेऽनस्वस्य ब्रह्मत्वमश्नुते ॥ १९८ ॥

व्या॥ 'शान्तो दान्त उपरतस्तितिक्षुस्समाहितो भूत्वेति श्रुत्युक्ताः ये **शमादयः** 'श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इति श्रुतिविहिता ये श्रवणादयः **तत्तत्प्रतिबन्धनिवर्तनक्षमास्तैस्तत्तत्प्रतिबन्धे क्षय नीते सति अतः** तत्प्रतिबन्ध-**क्षयादेव स्वस्य** प्रत्यगात्मनो **ब्रह्मत्वमवगच्छतीत्यर्थः** ॥ १९८ ॥

स० ॥ इदानीं वर्तमानप्रतिबन्धकान्तरप्रदर्शनेन तत्प्रध्वंसाभावस्यैव **कारणत्वं दर्शयति प्रारब्धेति—**

मू॥ प्रारब्धकर्मशेषश्च वामदेवे समीरितः ॥ १९९॥ ॥

व्या॥ स्पष्टोऽर्थः ॥

अ० ॥ ज्ञानप्रतिबन्धकभूतस्य प्रारब्धस्य भोगमन्तरेण निवृत्त्यभावात् तन्निवृत्तौ कालनियमो नास्तीत्याह **एकेनेति**--

मू॥ एकेन जन्मना क्षीणो भरतस्य त्रिजन्मभिः ॥ १९९ ॥

व्या॥ एकेनैव जन्मना प्रारब्धशेषरूपप्रतिबन्धो वामदेवस्य क्षीणः ॥ जडभरतस्य त्रिजन्मभिः क्षीण इत्यनेनापि प्रतिबन्धकध्वंसस्यैव कारणत्वमङ्गी-कृतमित्यर्थः ॥ १९९ ॥

अ० ॥ प्रागुदाहृतविद्यारण्यवार्तिककारवाक्यानामर्थान्तरमाशङ्क्य निराकरोति **नन्विति—**

मू॥ ननु वार्त्तिकपञ्चम्या आनन्तर्यस्य संभवात् ॥
प्रतिबन्धक्षये ज्ञानमत्यन्ताभावतो भवेत् ।
इति विद्यामुनेर्वाक्याद्गम्यते चेन्न तन् कुतः ॥
कुतस्तज्ज्ञानमित्येष हेतुप्रश्नस्तदुत्तरम् ।
क्षयादिति च नैवैते युज्येते त्वन्मते किल ॥२०१॥ ॥

व्या॥ आनन्तर्यार्थेऽपि पञ्चमीति शाब्देन तावद्धि ज्ञानं बन्धपरिक्षयात् **भवतीति** वार्त्तिकोक्तपञ्चम्याः आनन्तर्यार्थसंभवे 'जन्मान्तरे लभेतैव प्रतिबन्ध-

क्षये स'तीति विद्यारण्याचार्यवाक्येन प्रतिबन्धक्षयकाले ज्ञानोत्पत्त्यङ्गीकारेऽपि तदानीन्तनस्य प्रतिबन्धकात्यन्ताभावस्यैव ज्ञानहेतुत्वमवगम्यते इति प्राप्ते : निराकरोति **न तदिति** तत्र हेतुं पृच्छति **कुत इति** उत्तरमाह **कुत इत्यादिना** वार्तिकादिवाक्यानां भवदभिमतार्थपरत्वे एते प्रश्नप्रतिवचने नैव युज्येते इत्यर्थः ॥ २०१॥ ॥

अ० ॥ कथं तर्हि तद्वाक्यानां मदभिमतार्थपरत्वे प्रश्नप्रतिवचनाभ्यां भवितव्ये इत्यत आह **प्रश्न इति**—

मू ॥ प्रश्नः कदेति कर्तव्यः क्षये सत्युत्तरं वदेत् ॥ २०२ ॥

व्या ॥ कदा तज्ज्ञानं भवतीति प्रश्नः तद्धि बन्धपरिक्षये इति प्रतिवचनं च वार्तिके भवेदित्यर्थः ॥ २०२ ॥

अ० ॥ प्रागुदाहृतवार्त्तिकवचनानामर्थान्तरत्वाभावे तद्व्याख्यातृसम्मतिमाह **शमाद्यैरिति**—

मू ॥ शमाद्यैः श्रवणाद्यैश्च तत्र तत्रोचितैः क्षयम् ।
नीतेऽस्मिन्प्रतिबन्धेऽतस्स्वस्य ब्रह्मत्वमश्नुते ॥
इत्यत्रत्योऽप्यतश्शब्दो व्याख्यात्रा क्षयवाचकः ।
दर्शितोऽतश्च विघ्नस्य प्रध्वंसः कारणं ननु ॥ २०४ ॥

व्या ॥ स्पष्टोऽर्थः ॥ नन्वित्युत्तरश्लोकेन संबध्यते ॥ २०४ ॥

अ० ॥ इदानीं तन्तुरज्ज्वोरिव कार्यकारणयोरप्येकसत्ताकत्वे एकस्मिन् तन्तौ पौनःपुन्येन जाय्यमानानां रज्जूनां तत्तत्प्रागभाववत् आत्मन्यप्यनेकज्ञानप्राग्भावस्य संभाव्यमानत्वात् यथावत् स्वतो भासमानस्वरूपचैतन्यात्मकज्ञानोत्पत्त्या तत्प्रागभावनाशोऽपि तदितरज्ञानप्रागभावायत्ते पुनरप्ययथावद्भासमानस्वरूपचैतन्यात्मके द्वैतभ्रमे जाते सति अनिर्मोक्षस्स्यादिति दृष्टान्तेन चोदयति **तन्त्विति**—

मू ॥ तन्तुस्थप्रागभावेषु ह्येकैकस्मिन् विनाशिते ।
तदन्योऽतो यथा रज्जुं क्रमादेव सृजेत्तथा ॥
भ्रमापहानां ज्ञानानां प्रागभावेषु चात्मनि ।
ज्ञानोत्पत्त्यैव चैकस्मिन्नष्टेऽन्योऽतो भ्रमं सृजेत् ॥
तथासति विमुक्तत्वं न कदापि प्रसिध्यति ॥ २०६॥ ॥

व्या ॥ एकस्मिन्नेवातिदीर्घतन्तौ पौनःपुन्येन रज्जूत्पत्तिविनाशानुकूल-व्यापाराभ्यामनेकरज्जूत्पत्तिदर्शनात् तदेकतन्तुगतानामनेकरज्जुप्रागभावानाम्मध्ये एकैकरज्जूत्पत्त्या एकैकस्मिन् प्रागभावे विनष्टे सति तदन्यः प्रागभावः पूर्वप्रागभावध्वंसाधिकरणत्वेन विद्यमानस्य स्वाश्रयस्य तन्तोः सकाशात् स्वप्रतियोगिनं रज्ज्वन्तरं क्रमाद्यथा सृजति तद्वत् स्वात्मगतज्ञानप्रागभावानाम्मध्ये एकैकज्ञानप्रागभावस्यापि क्रमात् भोक्तृभोग्याद्यात्मना अयथाभानापादकत्वसंभवादनिर्मोक्षः प्रसज्येतेत्यर्थः ॥ २०६॥ ॥

अ० ॥ किं द्वैतभ्रमसाधनभूताज्ञानप्रतियोग्यात्मकं ज्ञानमन्त्यजन्मन्येव भवेदुत सर्वजन्मनि । आद्यपक्षे नानिर्मोक्षप्रसङ्ग इति परिहरति **यदिति**—

मू॥ यदन्त्यजन्मजं ज्ञानं द्वैतविभ्रमविघ्नकृत् ।
तदेकप्रागभावेन सर्वा भ्रान्तिर्भवेद्यदि ॥
ज्ञानोत्पत्त्या प्रागभावभ्रान्तिनाशे हि मुच्यते ॥ २०८ ॥

व्या ॥ **तदेकप्रागभावेनेति** तस्यान्त्यजन्मनि जनिष्यमाणस्य ज्ञानस्य एकेनैव प्रागभावेन सर्वा भ्रान्तिः यतो भवेत् अतो ज्ञानोत्पत्त्या तत्प्रागभावतन्निमित्तकभ्रान्त्योः विनाशे सति स ज्ञानी मुच्यत एवेत्यर्थः ॥ २०८ ॥

अ० ॥ द्वितीये तु स्मृत्यादिव्याकोपस्स्यादित्याह **बहूनामिति**—

मू॥ बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ।
वासुदेवस्सर्वमिति स महात्मा सुदुर्लभः ॥२०९ ॥

सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ।
इति स्मृतिः प्रकुप्येत द्वितीये तु तथा श्रुतिः ॥ २१० ॥

व्या ॥ सर्वेष्वपि जन्मसु सम्यग्ज्ञानं भवतीति चेत् । तदा **बहूनां जन्मनां** ज्ञानार्थसंस्काराश्रयाणामन्ते समाप्तौ चरमजन्मनि **ज्ञानवान्** प्राप्तपरिपाकज्ञानः मामस्मत्प्रत्ययगोचरं प्रत्यगात्मानमहमेव वासुदेवस्सर्वमिति च प्रतिपद्यते । 'य एवं जानाति स महात्मा सुदुर्लभ' इत्यादिकेयं स्मृतिः चरमजन्मन्येव सम्यग्ज्ञानस्य जनिष्यमाणत्वं ज्ञानिनो दुर्लभत्वञ्च ज्ञानानन्तरं सर्वव्यापारपरिसमाप्तिञ्चोपदिशन्ती श्रुतिश्च व्याहन्येतेत्यर्थः ॥ २१० ॥

अ० ॥ केयं श्रुतिरिति प्राप्ते 'तत्र को मोहः कश्शोक एकत्वमनुपश्यतः' 'यत्र त्वस्य सर्वमात्मैवाभूत्तत् केन कं पश्ये'दितीमां श्रुतिमर्थतस्सङ्गृह्य दर्शयति **क इति**—

मू ॥ को मोहस्तत्र कश्शोक एकत्वमनुपश्यतः ।
यस्य सर्वमभूत् स्वात्मा कं पश्येदिति च श्रुतिः ॥ २११ ॥

व्या ॥ यस्मादियं श्रुतिस्सम्यग्ज्ञानोदयानन्तरं शोकमोहद्वैतप्रतीत्यभावं दर्शयति अतश्चानेकसम्यग्ज्ञानप्रागभावायत्तविभ्रमादिनिर्मोक्षापत्तिर्दूरतो निरस्तेत्यर्थः ॥

अ० ॥ एवं श्रुतिस्मृतिप्रसिद्धं यच्चरमजन्मनि जनिष्यमाणं सम्यग्ज्ञानं तत्प्रागभावस्य विचित्रभ्रमकारणत्वे दृष्टान्तमाह **एवमिति**—

मू ॥ एवं सर्वान्त्यजज्ञानप्रागभावोऽस्य कारणम् ।
नेतरौ तत्र शास्त्रानुकूलो दृष्टान्त उच्यते ॥
रम्भावेणुफलस्यैव प्रागभावो दळादिषु ॥
कारणं दृश्यते यद्वत्तत्साम्यञ्चात्र योजयेत् ॥ २१३ ॥

व्या ॥ **रम्भावेणुफलस्येति** कदळीवेणुफलस्य प्रागभाव एव तत्किसलयादिकारणं न तत्प्रध्वंसादिरित्यर्थः ॥ २१३ ॥

अ० ॥ तत्साम्यञ्चात्र योजयेदित्युक्तमेवार्थं विशदयति **कदळीति**—

मू ॥ कदळीवृक्षवत्स्वात्मा तत्फलप्रागभाववत् ।
स्वात्मज्ञानप्रागभावः पल्लवा इव विभ्रमाः ॥
सर्वान्त्यफलवज्ज्ञानं सर्वान्त्यं भ्रमविघ्नकृत् ।
प्रागभावस्य नाशादेर्हेतुत्वं नोभयत्र हि ॥ २१५ ॥

व्या ॥ **तत्फलप्रागभाववदिति** तस्य कदलीप्रकृतिकस्य फलस्य प्रागभाव इव स्वात्मोपादानकस्य ज्ञानस्य प्रागभावः **प्रागभावस्य नाशादेरिति** प्रागभावप्रतियोगिकस्य ध्वंसादेर्दृष्टान्तदार्ष्टान्तिकस्थलद्वयेऽपि न कारणत्वमस्तीत्यर्थः ॥२१५॥

अ० ॥ पुनरप्युपपादितमेवार्थं चोद्यनिरासपूर्वकं दृढीकरोति **विघ्नेति**—

मू ॥ विघ्नात्यन्ताभावमात्रकारणत्वे हि लाघवम् ॥
प्रागभावादिहेतुत्वे गौरवं चेन्न गौरवम् ।

प्रत्युत त्वन्मते प्राप्तगौरवस्य निवर्तकम् ॥
विज्ञानप्रागभावस्य जगद्धेतुत्वकल्पनम् ॥ २१७ ॥

व्या ॥ प्रतिबन्धकस्यात्यन्ताभावस्येव तत्प्रध्वंसप्रागभावयोरपि कारणत्वस्वीकारे गौरवमापतेदिति प्राप्ते । तन्निराकरोति **न गौरवमित्यादिना** किं तत् गौरवनिवर्तकमित्यत आह **विज्ञानेत्यादिना** ॥ २१७ ॥

अ० ॥ इदानीं परपक्षे गौरवं स्वपक्षे लाघवञ्च दर्शयति **स्वस्मादिति**—

मू ॥ स्वस्माज्जगदुपादानात् त्वयाऽन्ये ये प्रकल्पिताः ।
विविधा अणवोऽनन्ताः कारणानि तथैव च ॥
पृथग्भूतानि तेभ्यो वै कार्याणि विविधानि च ।
गुणकर्मादयोऽनन्ताः पदार्थास्तदपेक्षया ॥
सर्वभ्रमापहज्ञानप्रागभावस्तदाश्रयः ।
ताभ्यां विचित्रविभ्रान्तिं वदतो न हि गौरवम् ॥ २२० ॥

व्या ॥ **तदाश्रय इति** तस्य ज्ञानप्रागभावस्याश्रयः सदाहमिति **स्वतः** प्रकाशमानः प्रत्यगात्मा । शेषस्सुगमः ॥ २२०॥ ॥

अ० ॥ षष्ठप्रदर्शकान्निष्पन्नार्थं दर्शयति **अत इति**—

मू ॥ अतो ज्ञानप्रागभावस्सहकारीति सिद्ध्यति ॥ २२०॥ ॥

व्या ॥ कार्यकारणयोरेकसत्तावादे प्रत्यगात्मनो जगदात्मना विवर्तमानत्वात् ज्ञानप्रागभावः सहकारिकारणमित्यर्थः ॥ २२९ ॥

——:o:——

द्वितीयनिरूपणे
सप्तमप्रदर्शकप्रारम्भः ।

अ० ॥ इदानीं सप्तमप्रदर्शके पक्षभेदेन प्रागुपपादिताज्ञानत्रयानुगुण्येन तत्कार्यस्वरूपाण्याह **सप्तम इति**—

मू ॥ सप्तमे पक्षभेदेन कार्यरूपाणि तु ब्रुवे ।
आद्ये ब्रह्म स्वतः कार्यमन्यथा भासमानकम् ॥
शक्त्यात्मजो गुणो भिन्नो द्वितीये रागवद्भवेत् ।
मायामयं तृतीये तु द्रव्यं स्यादात्मनः पृथक् ॥ २२२॥ ॥

व्या ॥ स्वतोऽन्यथा भासमानं ब्रह्मैवात्रपक्षे कार्यशब्दवाच्यं न तदतिरेकेण कार्यं नाम किञ्चित्तत्त्वमस्ति । शेषः सुगमः ॥ २२२॥ ॥

अ० ॥ इदानीमुपपादितानां कार्याणां मिथ्यात्ववैलक्षण्यप्रदर्शनेन क्रमादद्वैतं प्रत्यन्तरङ्गत्वादिकमाह **उत्तरोत्तरेति**—

मू ॥ उत्तरोत्तरबाधाय पूर्वपूर्वमतं भवेत् ॥ २२३ ॥
सद्भिन्नं चेज्जगत्तत्र मिथ्यात्वन्त्वसदात्मके ।
मिथ्यालक्ष्यत्वमेवाद्ये द्वितीये शक्तिजत्वतः ॥ २२४ ॥
अलातचक्रवद्द्रव्याभासः कार्यं तृतीयके ।
अविद्याविकृतित्वेन द्रव्यं स्यादन्त्ययोः पुनः ॥ २२५ ॥
स्वात्मविद्याविनाश्यत्वं मिथ्यात्वं जगतो भवेत् ॥ २२५॥ ॥

व्या ॥ 'अथात आदेशो नेति नेति नह्येतस्मात्' 'नेह नानास्ति किञ्चन वाचारम्भणं विकारो नामधेय' मित्यादि श्रुतिभिः श्लो० ॥ ब्रह्म सर्वमिदं ज्ञानं ब्रह्मप्राप्तेस्तु साधनमिति ब्रह्मगीतावचनेन च जगतः स्वात्मसत्तामात्रकत्वप्रक्रियया मिथ्यात्वं तावत् अर्थशून्यमिथ्याशब्दलक्ष्यत्वमिति मुमुक्षूणां परमपुरुषार्थसाधनमुपदिष्टम् तेन बाधनीयमतन्तु 'ते द्ध्यानयोगानुगता अपश्यन्देवात्मशक्ति स्वगुणैर्निगूढाम्। परास्य शक्तिर्विविधैव श्रूयत इत्यात्मशक्तिजं कार्यमिति श्लो० ॥ जगन्मायेति विज्ञानमज्ञानं फलतो भवेत् । तथापि परमाद्वैतज्ञानस्येदन्तु वेदनम् । उपकारकमत्यन्तं तदृष्ट्वा वक्ति तच्छ्रुतिरिति ब्रह्मगीतावचनेन श्रुत्यनुभाषितस्वात्मशक्तिजत्वस्य निरसनीयत्वावगमात् अनेन स्वात्मशक्तिजत्ववादेन निरसनीयं तु 'मायान्तु प्रकृतिं विद्यात्' श्लो० ॥ मायया विद्यते सर्वमिति केचन मोहिताः । शिवरूपातिरेकेण नास्ति माया च तत्त्वतः। मायया वा शिवादन्यद्विद्यते चेच्छिवस्य तु । महत्त्वं परमं साक्षाद्धीयेत सुरपुङ्गवाः । महत्त्वस्य च सङ्कोचो नास्ति सम्यङ्निरूपणे । अस्ति चेदप्रमाणं स्याच्छ्रुतिस्सत्यार्थवादिनीति ब्रह्मगीतया च प्रदर्शितभ्रान्तजनदृष्टिसिद्धं स्वाज्ञानपरिणामं जगदिति मतं दर्शयति **तृतीयक इत्यादिना** एवं द्वितीयतृतीयपक्षयोः जगतः प्रातिभासिकसत्ताकत्वेन स्वात्मज्ञाननाश्यत्वं मिथ्यात्वमित्यादिश्य इतो भिन्नमनिर्वचनीयत्वरूपं मिथ्यात्वं चतुर्थादिमतेषु दर्शयिष्यति ॥ २२५॥ ॥

अ० ॥ श्लो० ॥ उत्तरोत्तरबाधाय पूर्वपूर्वमतं भवेदिति प्राक्प्रतिज्ञातार्थमेवाभिनीय दर्शयति **सत्तैकत्वविधानेति**—

मू ॥ सत्तैकत्वविधानेन शक्तिजत्वं निवार्य च ॥ २२६ ॥
शक्तिजत्वं समालंब्यापोह्याऽज्ञानविकारता ।
तन्मयत्वं समालम्ब्य वार्यतां चिद्विकारता ॥ २२७ ॥

व्या ॥ प्रथमनिरूपणे एकाशीतितमे श्लोके स्वात्मनः यदाध्यासिकमुपादानत्वमुक्तं तत् शक्तिमाययोः तादात्म्याध्यासवशात् द्विविधं भवेदित्यर्थः ॥ २२७ ॥

अ० ॥ इदानीं जगतो ब्रह्मपरिणामत्वमवलंब्य पाशुपताद्यभिमतमीश्वरस्य मुख्यं निमित्तकारणत्वं गौणमुपादानत्वं निवारणीयमित्याह **अहमिति**—

मू॥ अहङ्ग्रहे निजोपास्तावीशोपास्ताविदङ्ग्रहे ।
स्वात्मेशयोर्विकारित्वं विकारार्थं भवेदतः ॥ २२८ ॥
समुद्रफेनन्यायेनाद्वितीयत्वं तयोरिति ।
भोक्त्रापत्तेरभेदश्चेदिति सूत्रात्तदीयतः ॥ २२९ ॥
भाष्याच्च तदनन्यत्वभाष्यान्ताच्च तदीयतः ।
रामानन्दीयतश्चात्र चतुर्थाच्च निरूपणात् ॥ २३० ॥
चिन्मयत्वं समालंब्य यच्छैवादिसमीरितम् ।
निमित्तत्वं तथेशे च गौणोपादानतां त्यजेत् ॥ २३१ ॥

व्या ॥ विकारित्वमिति परिणाम इत्यर्थः ॥ २३१ ॥

अ० ॥ इदानीं पाशुपतादिमतमवलंब्य निरसनीयं केवलकर्मावलंबिनां मतं दर्शयति **एतस्मादिति**—

मू ॥ एतस्मात्कर्मणामीशवश्यतावोधकागमात् ।
कृतप्रयत्नापेक्षेति वैषम्येत्यादिसूत्रतः ॥ २३२ ॥
तत्तद्वाक्याच्च जीवेशफलानाञ्च भिदापरात् ।
फलानान्तु निमित्तेशो विभुत्वादाश्रयो यतः ॥ २३३ ॥
मणीनां सूत्रवत्तस्य गौणोपादानता परात् ।
फलप्रकृतिभूते यत्स्वातन्त्र्यं कर्मणीरितम् ॥ २३४ ॥

तत्त्याज्यं जैमिनेर्मार्गकर्मकाण्डानुसारिणाम् ॥ २३४॥ ॥

व्या ॥ स्पष्टोऽर्थः ॥ २३४॥ ॥

अ० ॥ इदानीं लोकायतिकमतनिरासार्थमेव प्रवर्त्तमानं मीमांसकमतं दर्शयति **पारलौकिकेति**—

मू ॥ पारलौकिककर्मापि तल्लोको नेति वादिनः ॥ २३५ ॥
लोकायतिकसंज्ञस्य देहात्मत्वनिवृत्तये ।
तदेतत्सत्यमित्यादि मुण्डकाख्यश्रुतेरपि ॥ २३५ ॥
तदीयभाष्यतश्चापि ह्याचार्याज्जैमिनेरपि ।
देहादन्योऽयमात्मा हि भोगाय परलोकभाक् ।
तत्फलप्रकृतिः कर्म निरीशमिति दर्शितम् ॥ २३६ ॥
सत्यत्वेऽत्रास्ति मिथ्यात्वं फलेऽनित्यत्वरूपकम् ॥
एवं त्रेधाऽस्ति मिथ्यात्वं सत्तात्रैविध्यभेदतः ॥ २३७ ॥

व्या ॥ स्पष्टोऽर्थः ॥ २३७ ॥

अ० ॥ अधुनोपपादितेषु मिथ्यात्वेषु मिथ्याशब्दप्रवृत्तिं दर्शयति **आद्येति**—

मू ॥ आद्ये लाक्षणिको मिथ्याशब्दोऽन्यत्र तु रौढिकः ।
असतो निष्प्रकारत्वात्सप्रकारत्वतस्सतः ॥ २३८ ॥

व्या ॥ स्पष्टोऽर्थः ॥

अ० ॥ इदानीं द्वाविंशत्युत्तरद्विशततमादिश्लोकैः उदाहृततत्तन्मतभेदविज्ञानवद्भिः कर्त्तव्यविशेषान् दर्शयति **एवमित्यादिना**—

मू ॥ एवं निरूपितेष्वेषु मतेषु किल सप्तसु ।
आद्यत्रयं विस्तरेण पूर्वोत्तरनिरूपणैः ॥ २३९ ॥
विजानीयान्मुमुक्षुश्चेत् भोगार्थी चेद्द्वितीयकम् ।
मतत्रयं विजानीयात् चतुर्थाद्धि निरूपणात् ॥ २४० ॥
उत्क्रान्त्यादिश्रुतेर्भोक्तुः कर्मजन्यक्षयश्रुतेः ॥ २४०॥ ॥

द्वितीयत्रयनिष्ठस्य संमृतिस्सम्भवेत्पुनः ॥ २४१ ॥
सप्तमस्यापि सत्यत्वे तन्मतं नोपयुज्यते ।
मुक्तयेऽतो न तद्ब्राह्यं लोकायतिकदर्शितम् ॥ २४२ ॥

व्या ॥ स्पष्टोऽर्थः ॥ २४२ ॥

अ० ॥ इदानीमाद्यपक्षे स्वात्मातिरेकेण कार्यस्यासत्वे ब्रह्मगीतायाः पञ्चमाध्यायवचनं प्रमाणयति **सत्तेति**—

मू ॥ सत्तैकापि भवेद्भिन्नं कारणात्कार्यसंज्ञितम् ।
इति वार्तापि वार्तैव कार्यसंज्ञमसत्खलु ॥
सत्ताहीनस्य कार्यस्यासत्वमेव हि युज्यते ॥ २४३॥ ॥

व्या ॥ कार्यकारणयोरेकसत्ताकत्वेऽपि कारणात् कार्यं भिन्नमेव **भवेदिति** वचनं गगनारविन्दशब्दवत् अर्थशून्यमेवेत्यर्थः । अत्रोक्तपूर्वपक्ष एव कार्यकारणयोर्विषमसत्तावाद इति जानीयात् तत्रैव हि सर्वत्रानुस्यूतब्रह्मसत्तातिरेकेण **जगतः** भिन्नसत्ताकत्वेन तत्तच्छब्दप्रत्ययग्राह्यस्य ब्रह्मभिन्नत्वाभ्युपगमात् ॥ २४३ ॥ ॥

अ० ॥ उष्णीषतादेः सावयवपटाद्यवस्थाविशेषत्वेन ततः पृथक् **कर्तुमशक्यत्वात्** पटादिस्वरूपातिरेकेण स्वतोऽसत्वे संभाव्यमाने सति सावयवत्वादिधर्मरहितस्वात्मावयवस्य स्वात्मसत्तातिरेकेणासत्वं स्वतः सिद्धमेवेति यद्ब्राह्मं मतं तत्समर्थयति **गुणेति**—

मू ॥ गुणावयवसङ्घैश्च विकारै रहितस्य च ॥ २४४ ॥
निजावस्थाप्रागभावसमेतस्य सदात्मनः ।
स्वतो वा परतो भावाज्ञानकर्मादितोऽपि च ॥ २४५ ॥
पटादेरिव विन्यासविशेषादेरसंभवात् ।
ऋजुवक्रादिकाभासाभावादेव ह्यलातवत् ॥ २४६ ॥
तद्भिन्नस्य विवर्त्तस्यासत्वात्स्वात्मा सदाऽद्वयः ॥ २४६ ॥ ॥

व्या ॥ **तद्भिन्नस्येति** तेभ्यः किसलयपटक्षीरालातेषु क्रमादवस्थान्तरत्वेन भासमानेभ्यः गुणाऽवयवविन्यासविशेषपरिणामद्रव्याभासेभ्यो भिन्नस्या-

तोऽसद्वात्मनि विवर्त्तस्य स्वात्मसत्तातिरेकेण स्वतः सुतरामसत्वात् स्वात्मनस्सात्तत्येन निरङ्कुशमद्वितीयत्वं सिद्धमित्यर्थः ॥ २४६॥ ॥

अ० ॥ इदानीं कार्यकारणयोर्विषमसत्तावादी शङ्कते **असत इति**—

मू॥ असतस्तु सता साकं तादात्म्यस्य भ्रमः कथम् ॥
वन्ध्यासूनोरपि स्यात्तदिति चेदस्ति तच्छृणु ॥ २४७॥ ॥

व्या ॥ अळीकस्यापि विकल्पवृत्तिविषयत्वं वदतां प्रतिकर्म व्यवस्थावादिनां मतेऽपि सदसतोर्विवेकाभावात्तादात्म्यं भवेदित्यर्थः ॥ २४७॥ ॥

अ० ॥ तदस्तित्वमुपपादयति ॥ **वन्ध्येति**—

मू॥ वन्ध्यापुत्रो गृहे त्वस्मिन् धनदः प्रभुरस्ति भोः ॥ २४८ ॥
इति व्यामोहकादेशं श्रुत्वा मूढस्तु याचकः ।
विभ्रान्त्या तद्गृहं गत्वा दरिद्रं जननीसुतम् ॥ २४९ ॥
दृष्ट्वायमेव वन्ध्यायाः पुत्रः पूर्वं मया श्रुतः ।
इति यो वेत्ति तस्यास्ति तादात्म्यं चोदितं त्वया ॥ २५० ॥

व्या ॥ **मूढ इति** वन्ध्याशब्दार्थानभिज्ञत्वेन वन्ध्यातत्सुतयोर्विवेकज्ञानरहित इत्यर्थः ॥ शेषस्सुगमः ॥ २५० ॥

अ० ॥ श्लो० ॥ "शून्यस्यापि ससाक्षित्वात् तदभावे तु कस्य स' इति श्रीविद्यारण्याचार्यवचनाद्यानुगुण्येन प्रथमपक्षाभिमताज्ञानोपेतस्वरूपचैतन्यग्राह्यस्यासतः सदात्मनश्च विवेकाभावरूपहेतुना 'असन्नेव स भवति । असद्ब्रह्मेति वेद चे'दिति श्रुत्याद्युक्तप्रकारेण मृत्सत्तातिरिक्तसत्ताशून्येन घटेन सद्रूपायाः मृद इव कार्यकारणयोरेकसत्तावादेऽपि सदसतोस्तादात्म्यं संभवत्येवेत्याह **असतेति**—

मू॥ असता सह तादात्म्यं सतश्च ब्रह्मणः किल ।
असद्ब्रह्मेति वेदेन दर्शितं च तथैव च ॥ २५१ ॥
ब्रह्मसूत्रकृता सत्वाच्चापरस्येति सूत्रतः ।
अन्यतस्तद्भाष्यकारैस्सत्वमेकं तयोरिति ॥
कारणेनैव कार्यस्य सत्वं नान्यादितीरितम् ॥ २५२॥ ॥

व्या ॥ 'वाचारम्भणं विकारो नामधेय'मिति श्रुत्यनुसारेण कार्यमात्रस्य नामधेयमात्रत्वे कार्यकारणयोरेकैव सत्तेति 'सत्वाच्चापरस्य असदिति चेन्न प्रतिषेधमात्रत्वादिति च सूत्राभ्यां तद्भाष्याभ्यां च यतो दर्शितम्। अतस्सत्तैक्यवादे न कश्चिद्दोष इत्यर्थः ॥ २५२॥ ॥

अ० ॥ इदानीं द्वितीयपक्षे। 'ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढा'मिति श्वेताश्वतरमन्त्रमर्थतस्सङ्गृह्य प्रमाणयति **देवेति**—

मू ॥ देवात्मशक्तिं स्वगुणैर्निगूढां मुनयोऽविदुः ॥
इति मन्त्रोऽस्य जगतो द्वितीये गुणतां जगौ ॥ २५३॥ ॥

व्या ॥ **देवात्मशक्तिमिति** देवस्य प्रत्यगात्मनो या जगत्सर्जनानुकूला शक्तिः तां विशिनष्टि। **निगूढामिति** तत्कार्यमन्तरेण स्वतः अपरोक्षीकर्तुमशक्यामिति यावत्। तथा चोक्तं विद्यारण्याचार्यैरपि श्लो० ॥ 'निस्तत्वाकार्यगम्यास्य शक्तिर्मायाऽग्निशक्तिवदिति' अत एव **स्वगुणैः** स्वस्याः स्वकीयायाः तच्छक्तेः कार्यभूतैर्गुणैः श्रुतिप्रदर्शिता **मुनयो** जगत्कारणत्वेनापश्यन्निति श्वेताश्वतरमन्त्रो द्वितीयपक्षे अस्य जगतो गुणात्मतां जगावित्यर्थः ॥ २५३॥ ॥

अ० ॥ ननु द्वितीयपक्षे अनया श्रुत्या जगतो गुणत्वावगमेऽपि प्राक् पञ्चविंशत्युत्तरद्विशततमश्लोकोक्तं न द्रव्याभासत्वमिति प्राप्ते तथात्वपरां गौडपादीयकारिकां प्रमाणयति **ऋजुवेति**—

मू ॥ ऋजुवक्रादिकाभासमलातस्पन्दितं यथा ॥
ग्रहणग्राहकाभासं विज्ञानस्पन्दितं तथा ॥ २५४॥ ॥

व्या ॥ ऋजुवक्राद्यात्मना आभासत इति ऋजुवक्रादिकाभासं कार्यजातं तावद्यथा अलाते विद्यमानचलनानुकूलशक्तिजन्यं यतो मिथ्याद्रव्यलक्षणहीनं सन्मिथ्याद्रव्यवदाभासते ततो हि मिथ्याद्रव्याभासात्मकं भवति एवं ग्रहणग्राहकात्मनाऽऽभासमानमपि ज्ञानेन्द्रियादिकार्यजातं 'विज्ञानमानन्दं ब्रह्मे'ति श्रुत्युक्ते विज्ञाने कल्पितशक्तिजन्यं मिथ्याद्रव्यवदाभासत इति मिथ्याद्रव्याभासो भवतीत्यर्थः॥२५४॥॥

अ० ॥ इदानीं विद्यया आध्यासिकब्रह्मशक्तिविनाशे तद्ब्रह्म तावत् स्वशक्तिकल्पितमिथ्याद्रव्याभासवर्जितम् भवतीत्यत्र श्रीगौडपादाचार्यसम्मतिमाह **अस्पन्देति** ॥

मू ॥ अस्पन्दमानमलातमनाभासमजं यथा ।
अस्पन्दमानं विज्ञानमनाभासमजं तथा ॥ २५५॥ ॥

व्या ॥ स्पष्टोऽर्थः ॥ २५५॥ ॥

अ० ॥ इदानीमाद्व्यासिकशक्तिकल्पितस्य मिथ्याद्रव्याभासत्वसाधनानुकूल-दृष्टान्तप्रदर्शनपरां गौडपादीयकारिकामुदाहरति **अलाते इति**—

मू ॥ अलाते स्पन्दमाने वै नाभासा अन्यतो भुवः ॥
न ततोऽन्यत्र निष्पन्दान्नालातं प्रविशन्ति ते ।
न निर्गता अलातात्ते द्रव्यत्वाभावयोगतः ॥ २५७ ॥

व्या ॥ **अलाते स्पन्दमान इति** उल्कायामितस्ततश्चाल्यमानायां प्रतीयमानाः **आभासाः** ऋजुवक्राद्यात्मना प्रतीयमानद्रव्याभासाः **नान्यतो भुवः** न कुतश्चिद्देशान्तरादागत्यालाते भवन्ति । न च तस्मान्निष्पन्दादलातादन्यत्र निर्गताः । न च निष्पन्दमानमलातमेव प्रविशन्तीत्युक्त्वा तेषामृजुवक्रादीनां मिथ्याद्रव्यलक्षणहीनत्वे सति मिथ्याद्रव्यवदाभासमानानां मिथ्याद्रव्याभासत्वमनुमानतः साधयति **न निर्गता अलातात्ते इति** गृहाद्घटादय इवेत्यर्थः ॥ तत्र हेतुमाह **द्रव्यत्वाभावयोगत इति** द्रव्यस्य भावो द्रव्यत्वं तदभावो द्रव्यत्वाभावः तस्य योगतः द्रव्यत्वाभावयोगतः—द्रव्यत्वानाश्रयत्वात् वस्तुत्वाभावादित्यर्थः ॥ वस्तुनो हि प्रवेशादिस्संभवति नावस्तुन इति एतत्कारिकाभाष्येऽप्युदाहृतम् ॥ २५७ ॥

अ० ॥ ब्रह्मशक्तिजन्यस्यापि जगतः अलातचक्रवान्मिथ्याद्रव्याभासत्वानुमानपरां श्रीगौडपादकारिकामुदाहरति **विज्ञानेति**—

मू ॥ विज्ञानेऽपि तथैव स्युराभासस्याविशेषतः ।
विज्ञाने स्पन्दमाने वै नाभासा अन्यतो भुवः ॥ २५८ ॥
न ततोऽन्यत्र निष्पन्दान्न विज्ञानं विशन्ति ते ।
न निर्गता विज्ञानात्ते द्रव्यत्वाभावयोगतः ॥ २५९ ॥

व्या ॥ विज्ञाने ब्रह्मणीति यावत् 'विज्ञानमानन्दं ब्रह्मे'ति श्रुतेः ॥ शेषः पूर्ववत् । ननु कथमुक्तं सर्वगतस्य ब्रह्मणः स्पन्दनाख्यं चलनमिति चेदुच्यते 'ते ध्यानयोगानुगता अपश्यन् देवात्मशक्ति'मिति श्रुत्या येषामात्मनि शक्तिमत्वाध्यासो दर्शितः तेषामात्मनि शक्तिकार्यचलनाध्यासस्यापि संभाव्यमानत्वात् तद्दृष्ट्यनुसारेण दर्शितमतो न कश्चिद्दोषः ॥ २५९ ॥

अ० ॥ ननु ब्रह्मपरिणामत्वेन जगतोऽपि द्रव्यत्वं स्यादित्याशङ्क्याव्याकृति-परां गौडपादीयकारिकामप्यत्र प्रमाणयति **कार्येति**—

मू ॥ कार्यकारणताभावाद्यतोऽचिन्त्यास्सदैव ते ॥ २५९॥ ॥

व्या ॥ **यत इति** यस्मात् 'निष्कलं निष्क्रियं शान्तं निरवद्य' मित्यादिश्रुत्या परिणामित्वहेतुभूत सावयवत्वं तदधीनापरिणामादिविक्रिया च निराकृता ततः परिणामपरिणामित्वरूपकार्यकारणत्वयोरभावात् ब्रह्मजगतोः ब्रह्मणि तच्छक्तिजन्याः ये मिथ्याद्रव्याभासाः ते अनिर्वचनीयगुणा एवेत्यर्थः ॥ २५१॥ ॥

अ० ॥ ननूदाहृतगौडपादवचनेन ब्रह्मशक्तिजन्यस्य पदार्थाभासस्य द्रव्यत्वाभावमात्रत्वावगमेऽपि प्रागुक्तश्वेताश्वतरश्रुत्येव न गुणत्वमवगम्यत इत्याशङ्क्य तद्वचनस्य गुणपरत्वं दर्शयति **गुण इति**—

मू ॥ गुणो हि गुणिनोऽन्यत्र न गतोऽस्मिन्न लीयते ॥
इति दृष्ट्वागमेनैव गौडपादैस्समीरितम् ॥ २६०॥ ॥

व्या ॥ **इति दृष्टेति** किसलयादिभावमापन्नेष्वाम्रादिपत्रेषु तद्गतरूपपरिमाणादिगुणानां लयाभावे ततोऽन्यत्र गमनाभावञ्च दृष्ट्वा 'न ततोऽन्यत्र निष्पन्दान्न विज्ञानं विशन्ति ते' इत्यादिश्लोकैः मिथ्याद्रव्याभासानां गुणात्मकत्वमेव श्वेताश्वतरश्रुतिवत् समीरितमिति भावः ॥ २६०॥ ॥

अ० ॥ तृतीयपक्षे कार्यस्य मिथ्याद्रव्यत्वं तावत् प्रतिज्ञातं तत्र प्रमाणमाह **कार्यस्येति**—

मू ॥ कार्यस्य द्रव्यतायान्तु वार्तिकादिप्रमाणकम् ॥
शब्दैकगुणमाकाशं शब्दस्पर्शगुणो मरुत् ।
शब्दस्पर्शरूपगुणैस्त्रिगुणं तेज उच्यते ॥
शब्दस्पर्शरूपरसगुणैरापश्चतुर्गुणाः ।
शब्दस्पर्शरूपरसगन्धैः पञ्चगुणा मही ॥
इत्यत्र गुणवत्वोक्तेर्द्रव्यं कार्यमितीरितम् ॥ २६३॥ ॥

व्या ॥ स्पष्टोऽर्थः ॥ २६३॥ ॥

अ० ॥ अस्मिन् सप्तमप्रदर्शके समीरितानां पक्षाणां तारतम्यं प्रतिजानीते **एतेष्विति**--

मू ॥ एतेषु चाद्यपक्षो हि प्रशस्तो नेतरौ तथा ॥ २६४ ॥

व्या ॥ स्पष्टोऽर्थः ॥ २६४ ॥

अ० ॥ इदानीं प्रतिज्ञातार्थसिद्धये ब्रह्मगीतायाश्चतुर्थाध्यायस्य श्लोकत्रयं प्रमाणयति **माययेति**--

मू ॥ मायया विद्यते सर्वमिति केचन मोहिताः ।
शिवरूपातिरेकेण नास्ति माया च तत्त्वतः ॥ २६५ ॥

व्या ॥ **तत्त्वत इति** तमोरूपाज्ञानाख्यतत्त्वात्मना माया प्रकृतिः चकारेणावरणशक्तिश्च नास्तीत्यर्थः ॥ २६५ ॥

अ० ॥ तदस्तित्वे बाधकं ब्राह्मं वाक्यमुदाहरति **मायया वेति**--

मू ॥ मायया वा शिवादन्यद्विद्यते चेच्छिवस्य तु ।
महत्त्वं परमं साक्षाद्धीयेत सुरपुङ्गवाः ॥ २६६ ॥

व्या ॥ **मायया वेति** मायया प्रकृत्या वाशब्दात् शक्त्या वा निर्मितं शिवादन्यद्द्रव्यरूपं गुणात्मकं वाऽन्यत् कार्यमस्ति चेत् ब्रह्मणस्त्रिविधपरिच्छेदराहित्यं भज्येतेत्यर्थः ॥ २६६ ॥

अ० ॥ नन्वियं 'एकमेवाद्वितीय'मिति श्रुतिः ब्रह्मवत् पारमार्थिकवस्त्वन्तर निरासपरैव न मायिकतत्त्वनिरासपरेत्याशङ्कानिवर्तकं ब्राह्मं वाक्यमुदाहरति **महत्त्वस्येति**--

मू ॥ महत्त्वस्य च संकोचो नास्ति सम्यङ्निरूपणे ॥
अस्ति चेदप्रमाणं स्याच्छ्रुतिस्सत्यार्थवादिनी ।
इत्यादिवचनैरन्यपक्षयोर्बाधदर्शनात् ।
अद्यः पक्षः प्रशस्तस्स्यादिति निश्चीयते किल ॥ २६८ ॥

व्या ॥ स्पष्टोऽर्थः ॥ २६८ ॥

द्वितीयनिरूपणे

अष्टमप्रदर्शकप्रारम्भः ।

अ० ॥ इदानीं प्रतिज्ञापूर्वकमष्टमप्रदर्शकमाह **अथेति**--

मू ॥ अथाष्टमे प्रवक्ष्यामि कार्याणां विलयं क्रमात् ।
अन्यथा भासमानत्वोच्छेदो भूम्नो लयो भवेत् ॥
द्वितीये शक्तिजन्यस्य गुणस्योच्छिन्नता लयः ।
तृतीये सर्वकार्याणां विलयः कारणात्मता ॥ २७० ॥

व्या ॥ प्रथमद्वितीयपक्षयोः कार्यस्य लयो नाम कारणभावापत्तिमन्तरा उच्छिन्नतैव–तृतीयपक्षे तु कारणभावापत्तिरिति विवेकः ॥ २७० ॥

अ० ॥ आद्यपक्षयोर्ब्रह्मवचनादिकं प्रमाणयति **आद्ययोरिति**--

मू ॥ आद्ययोर्गौडपादस्य कारिकाऽलातशान्तिगा ।
प्रमाणं हि भवेत् सेयं सदृष्टान्ता समीर्यते ॥ २७१ ॥
अलाते स्पन्दमाने वै नाभासा अन्यतो भुवः ।
न ततोऽन्यत्र निष्पन्दान्नालातं प्रविशन्ति ते ॥ २७२ ॥
न निर्गता अलातात्ते द्रव्यत्वाभावयोगतः ।
विज्ञानेऽपि तथैव स्युराभासस्याविशेषतः ॥ २७३ ॥
विज्ञाने स्पन्दमाने वै नाभासा अन्यतो भुवः ।
न ततोऽन्यत्र निष्पन्दान्न विज्ञानं विशन्ति ते ॥ २७४ ॥
न निर्गता विज्ञानात्ते द्रव्यत्वाभावयोगतः ।
संयोगाख्यगुणो यद्वत्समवाये लयं विना ॥ २७५ ॥
उच्छिद्यते तथैव स्यात्कूटस्थे शक्तिजो गुणः ॥ २७५॥ ॥

व्या ॥ इमाः कारिकाः प्रागस्मिन्निरूपणे सप्तमप्रदर्शके द्वितीयपक्षे शक्ति-जन्यानां मिथ्याद्रव्याभासत्वावगमाय प्रमाणत्वेनोदाहृताः । अत्र तु विज्ञानतच्छ

क्तिभ्यां परिकल्पिताश्च मिथ्याद्रव्याभासाः न स्वस्वकारणे विलीयन्ते द्रव्यत्वाभावादिति विकाराणां प्रकृतिभावापत्तिरूपलयो न भवेदित्यत्र प्रमाणत्वेनोपपादिताः । ततो न पौनरुक्त्यमिति ज्ञेयम् ॥ २७५॥ ॥

अ० ॥ तृतीयपक्षे प्रमाणमाह **तृतीय इति**--

मू ॥ तृतीये तरुवत्सर्वं द्रव्यत्वादेव लीयते ।
तदा वागेनमप्येतीत्यादिकौषीतकीश्रुतेः ॥ २७६॥ ॥

व्या ॥ भुवि वृक्षादिकमिव सर्वं जगत् स्वपरिणाम्युपादाने विलीयते । अस्मिन् पक्षे लयो नाम विकाराणां स्वप्रकृतिभावापत्तिः । प्रकृतिस्तु मायैव । 'माया-न्तु प्रकृतिं विद्या'दिति श्रुतेः । तत्र 'तदेनं वाक्सर्वैर्नामभिस्सहाप्ये'त्यादिकां कौषीतकीश्रुतिं प्रमाणयति **तदेत्यादिना** एनमिति श्रुत्या जगत्प्रकृतिभूताज्ञानविशिष्टः प्रत्यङ्नुच्यते । सुषुप्त्यवस्थावत्त्वश्रवणात् । अस्मिन्नर्थे श्रुत्यन्तराणि च षष्ठदृष्टिसृष्टिनिरूपणे । श्लो ॥ 'अत्र प्रमाणभूतानि वेदवाक्यान्यमूनि हि'त्यादिना दर्शयिष्यति कौषीतकी श्रुतेः कार्यस्य जगतः द्रव्यत्वे सति वृत्तित्वपरत्वं षष्ठनिरूपणे वक्ष्यामः ॥ २७६॥ ॥

द्वितीयनिरूपणे

॥ नवमप्रदर्शकारम्भः ॥

अ० ॥ नवमे पक्षत्रयाभिमतकार्याणां साधारणलक्षणमाह **नवम इति**—

मू ॥ नवमे संप्रवक्ष्यामि कार्यमात्रस्य लक्षणम् ।
आज्ञानोच्छेदकज्ञाननाश्यं कार्यं भ्रमादिकम् ॥ २७७॥ ॥

व्या ॥ **भ्रमादिकमिति** पक्षत्रयाभिमतः तद्भ्रम आदिर्यस्य तदनन्तरभाविनो भयादेः तद्भ्रमादिकं कार्यं तस्याज्ञानोच्छेदकज्ञाननाश्यत्वं लक्षणं ज्ञानस्य साक्षाद्भ्रमनिवर्तकत्वाभावेन अज्ञानोच्छेदकमिति विशेषणम् ॥ २७७॥ ॥

अ० ॥ इदानीं क्रमात् पक्षत्रयेऽपि भ्रमस्वरूपं प्रमास्वरूपं च दर्शयति **प्रमाया इति**--

मू ॥ प्रमायाः प्रागभावेन युक्त आत्माऽन्यथा स्फुरन् ॥

भ्रमः प्रमा विचारस्सन्यथावत्प्रस्फुरन् स्वतः ।
आद्येऽन्यपक्षयोर्भ्रान्तिर्वृत्तिरूपा तथा प्रमा ॥
भ्रान्तेः प्रमाविनाश्यत्वाल्लक्ष्ये लक्षणसङ्गतिः ॥ २७९॥ ॥

व्या ॥ स्पष्टोऽर्थः ॥ २७९॥ ॥

अ० ॥ आद्यपक्षे भ्रमादिज्ञानस्य को विषय इत्यत आह **आद्यपक्ष इति**——

मू ॥ आद्यपक्षे भ्रमज्ञानं विषयेण विवर्जितम् ।
प्रमा तु स्यात्स्वातिरिक्तद्वैतख्यासत्वगोचरा ॥ २८०॥ ॥

व्या ॥ श्लो० ॥ 'आद्ये ब्रह्मैव कार्यं स्यादन्यथा भासमानक'मिति **सप्तम्**-प्रदर्शकारम्भोक्तप्रकारेणाद्यपक्षे स्वयं प्रकाशमानत्वे सति अज्ञानसाहचर्येणान्यथा भासमानाद्ब्रह्मणः तदानीमप्यतिरिक्तकार्याभावाद्भ्रमस्य जनिमद्विषयशून्यत्वमित्यर्थः । शेषस्सुगमः ॥ २८०॥ ॥

अ० ॥ पूर्वपक्षी चोदयति **प्रतीच इति**——

मू ॥ प्रतीचो भ्रान्तिरूपस्य तदाऽनित्यत्वमापतेत् ॥ २८१ ॥

व्या ॥ **तदेति** भ्रान्तेः प्रमानाश्यत्व इत्यर्थः । शेषस्सुगमः ॥ २८१ ॥

अ० ॥ सिद्धान्ती दृष्टान्तेन समाधत्ते **पटस्येति**—

मू ॥ पटस्य वेष्टनात्तत्र कार्यमुष्णीषता भवेत् ।
प्रसारणेन तन्नाशे पटवच्छिष्यते स्वयम् ॥ २८२ ॥
यथावद्भासनप्रागभावात्स्वस्यात्र जायते ।
अयथाभासनत्वं तन्नाशे तूत्तरभानतः ॥ २८३ ॥
स्वतोऽसत्ताककार्यस्य नाशोऽसत्वं स्वसाक्षिकम् ॥ २८३॥ ॥

व्या ॥ स्वात्मीययथावद्भासनप्रागभावसाहचर्यात् स्वात्मन्येव यत् अयथाभासनत्वमभवत् तस्य नाशे नेह नानास्ति किञ्चनेत्यादि श्रुतितद्विचारभावापत्त्यनन्तर-भाविनः अद्वितीयतया स्वात्मभासात् जायमाने सति पटवच्छिष्यते स्वयमित्युक्ता ।

कार्यकारणयोरेकसत्तावादे नाशशब्दार्थमाह स्वतोऽसत्ताकेत्यादिना । कार्यस्य नाशस्तावदुच्छिन्नतैवेत्यर्थः । शेषस्सुगमः ॥

ननु आत्मन आकाशस्सम्भूत इत्यादिशास्त्रात्कार्यस्याकाशोदेरवोत्पत्त्याद्यवगमे तद्विरोधेन याऽनाद्यनन्तस्यात्मन उत्पत्तिः विनाशश्चाङ्गीकृतः सैषा विप्रतिषिद्धेति चेत् ।

मैवं 'आत्मन आकाशस्सम्भूत' इत्यादिश्रुतेः नाकाशादेर्जनिक्रियाश्रयत्वे तात्पर्यं किन्तु एकविज्ञानेन सर्वविज्ञानश्रुतेरिव आकाशादेरात्मानन्यत्वे तात्पर्यं तथा च सति स्वात्मन एवोत्पत्त्यादिक्रियाश्रयत्वेन भासमानत्वमित्यद्वैतशास्त्रतात्पर्यविदामनुक्रमणमिति विज्ञापयितुं गौडपादाचार्यैः । श्लो ॥ कारणं यस्य वै कार्यं कारणं तस्य जायते । भूतस्य जातिमिच्छन्ति वादिनः केचिदेव हीति स्वकीयेऽलातशान्तिप्रकरणेऽनाद्यनन्तस्य प्रधानस्यैव सांख्याभिमतं जगदाकारेण पारिणामिकजन्मादिकमुदाहृत्य ।

यथा ॥ श्लो ॥ 'नेह नानेति चान्नायादिन्द्रो मायाभिरित्यपि' 'अजायमानो बहुधा मायया जायते तु सः । सतो हि मायया जन्म युज्यते न तु तत्वत' इति तदीयेऽद्वैतप्रकरणे तद्भाष्योक्तप्रकारेण अनाद्यनन्तस्य स्वात्मन एव तदाविद्यकवृत्तिषु तादात्म्यापन्नत्वेन तदविद्यापरिणामवृत्त्यधीनमाद्धयासिकं जन्मादिकञ्च मद्वचमायाधिकारिणेऽङ्गीकृतम् ।

तथाऽद्वैतात्मपरबहुश्रुत्यनुगृहीतब्राह्ममतानुसारिणा चन्द्रिकाचार्येणापि ॥ श्लो॥ कारणाच्चेदनन्यत्वं कार्याणामिष्यते तदा । कारणस्यैव जन्यादिभानं हि समुपेयतामिति । अनाद्यनन्तानावरणीयस्वप्रकाशभानस्वरूपस्य स्वात्मन एव वैवर्त्तिकजन्मादिकं भवतीति उत्तमायाधिकारिणे मतमिदमतिशुभकरमुपदिश्यते तराम् ॥

अ० ॥ प्रतीचः भ्रमत्वापादको ज्ञानप्रागभावोऽपि स्वप्रतियोग्युत्पत्त्या नश्यतीत्याह **विचारेणेति**--

मू ॥ विचारेण प्रमोत्पत्त्या प्रागभावो विनश्यति ॥ २८४ ॥

व्या ॥ स्पष्टोऽर्थः ॥ २८४ ॥

अ० ॥ प्रतीचः प्रातयोः भ्रमत्वप्रमात्वयोर्मध्ये प्रमात्वस्यैव तेजस्तिमिरयोर्मिद्धये तेजस इव बलीयस्त्वात् प्रमात्वेनैव भ्रमत्वं नश्यतीत्याह **प्रमात्वेति**--

मू ॥ प्रमात्ववैरिकित्वेन भ्रमत्वं तस्य नश्यति ॥ २८४॥ ॥

व्या ॥ स्पष्टोऽर्थः ॥ २८४॥ ॥

अ० ॥ नन्वाद्यपक्षे प्रमात्वोपेतस्यात्मनः सविशेषत्वात् किं तद्विशेषनिवर्तकमित्यत आह **प्रमात्वस्येति**--

मू ॥ प्रमात्वस्यादिमत्वेन नश्येत्कतकरेणुवत् ॥ २८५ ॥

व्या ॥ स्वयमेव प्रमात्वं नश्यतीत्यर्थः ॥ २८५ ॥

अ० ॥ शङ्कामनुभाष्य समाधत्ते **भ्रमत्वेति**--

मू ॥ भ्रमत्वाद्यदके ज्ञानप्रागभावे स्थिते तदा ।
प्राज्ञस्यापि भवेत् सुप्तावन्यथा भासनं यदि ॥ २८६ ॥
ज्ञानाभावयुतत्वेऽपि प्राक्तनायासनुत्तये ।
उदास्ते हि यतस्सुप्तौ तदा नास्त्यस्य कार्यता ॥ २८७ ॥

व्या ॥ यस्मात्सुषुप्तौ तत्पौर्वकालिकस्य अन्यथा भासमानत्वप्रयुक्तस्यायासस्य निवृत्त्यर्थमुदासीनो भवति--ततस्तदा नान्यथा भासमानत्वरूपं कार्यत्वं **प्राज्ञस्य** संभवतीत्यर्थः ॥ २८७ ॥

अ० ॥ उपपादितार्थं 'तद्यथाऽस्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तस्संहत्य पक्षौ संलयायैव ध्रियते--एवमेवायं पुरुष एतस्मा अन्ताय **धावति** यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्य'तीति बृहदारण्ये **षष्ठाध्यायगतज्योतिर्ब्राह्मणवाक्यमर्थतः** संगृह्योदाहरति **अन्यथेति**--

मू ॥ अन्यथा भासमानोऽत्र जातायासनिवृत्तये ।
तूष्णीमास्ते सुषुप्तौ हि श्येनो यद्वदिति श्रुतेः ॥ २८८ ॥

व्या ॥ **अन्यथा भासमानोऽत्रेति** जाग्रदवस्थायामन्यथा स्वयं **प्रकाशमानः** प्राज्ञः यस्मात् सुषुप्तौ श्रान्त्या नीडे शयानश्श्येनपक्षीव तूष्णीं भूतो **भवत्यतो** न तदा कार्यात्मतेत्यर्थः ॥ २८८ ॥

अ० ॥ इदानीं ज्ञानप्रागभावसाहचर्यात् उपपादितजगदध्यारोपापवादौ दृष्टान्तेन प्रत्याययति **पञ्चभूतेति**--

मू ॥ पञ्चभूततदायत्तपञ्चीकरणतां विना ।
तेजोबन्न तदायत्तत्रिवृत्करणतो यथा ॥
तथा तमो विनाज्ञानप्रागभावाद्भ्रमस्य हि ।
अध्यारोपापवादाभ्यां प्रत्यग्विज्ञायते ततः ॥
अस्यार्थो धार्यते येन स यथा तत्वविद्भवेत् ॥ २९० ॥

व्या ॥ पञ्चीकरणप्रक्रियां विना त्रिवृत्करणप्रक्रिययैव तमोरूपाज्ञानं विना ज्ञानप्रागभावरूपस्याज्ञानस्य सहकारित्वप्रक्रिययैव भ्रमस्य अध्यारोपापवादाभ्यां यस्मात् सदा निष्प्रपञ्चत्वेनात्मतत्वं स्वतो विज्ञायते–तस्मादेतच्छास्त्रार्थज्ञानवानेव यथार्थतत्वविद्भवेदित्यर्थः ॥ २९०॥ ॥

अ० ॥ इदानीमुपपादितपक्षत्रयोपदेशपात्राणां तारतम्यप्रदर्शनपूर्वकं चतुर्थ-निरूपणे वक्ष्यमाणस्य प्रतिकर्मव्यवस्थाख्यचतुर्थपक्षोपदेशपात्रस्य सौलभ्यं दर्श-यति **आद्यपक्षेति**—

मू ॥ आद्यपक्षोपदेशाय सत्पात्रं हि सुदुर्लभम् ॥
मध्यान्त्यपक्षयोः पात्रं विमृग्यं लभ्यते क्वचित् ।
प्रतिकर्मव्यवस्थायां सर्वं पात्रं न दुर्लभम् ॥
प्रतिकर्मव्यवस्थां तां वदिष्यामश्चतुर्थके ॥ २९२॥ ॥

व्या ॥ प्रतिकर्मव्यवस्था नाम जीवान्प्रति कर्मण इन्द्रियविषयस्य धर्माधर्म-मायासहायकेश्वरनिर्मितस्य जगत एकत्वेन सद्भावव्यवस्था प्रतिकर्मव्यवस्था तद्वि-षयकश्रवणादौ विषयातिलम्पटा अप्यधिकारिण एवेति चतुर्थनिरूपणे दर्शयिष्यामः ।

अ० ॥ एतावता शास्त्रेण विस्तरेण प्रतिपादितार्थसंग्रहं श्रोतॄणां सौकर्याय प्रतिजानीते **विस्तरेणेति**—

मू ॥ विस्तरेण यदुक्तं प्राक् संगृह्य प्रोच्यते हि तत् ॥ २९३ ॥

व्या ॥ **यदुक्तमिति** यत् पक्षभेदेन मायातत्कार्ययो रूपत्रयमुक्तं तत्सङ्क्षे-पेण क्रमादुच्यत इत्यर्थः ॥ २९३ ॥

अ० ॥ तेष्वाद्यपक्षं सङ्गृह्णाति **ज्ञानस्येति**—

मू ॥ ज्ञानस्य प्रागभावस्थादज्ञानं तन्निमित्तकम् ।
अन्यथा भासमानं सच्चैतन्यं कार्यशब्दितम् ॥ २९४ ॥

व्या ॥ स्पष्टोऽर्थः ॥ २९४ ॥

अ० ॥ द्वितीयपक्षं श्लोकद्वयेन सङ्गृह्णाति **कूटस्थ इति**—

मू ॥ कूटस्थे गुणवर्जनाच्च विलसत्कार्यानुमेया परा
शक्तिर्द्वारानिमित्तकं जगति मृच्छब्दलक्षणत्ववन्मृन्मये ।

तत्कार्यन्तु गुणात्मकं गुणतया शक्तेश्च रेखात्मकं
चित्रं हैमगतं यथा सुकृतिनश्शक्त्याद्रुणापूर्ववत् ॥ २९५ ॥

व्या ॥ **कूटस्थ इति** निर्विकारे प्रतीचीति यावत् । तस्य निर्विकारत्वे- 'साक्षी चेता केवलो निर्गुणश्च' 'अस्थूलमनण्व'ित्यादिशास्त्रसिद्धं हेतुमाह **गुणवर्जनाच्चेति** तत्र भ्रान्तैरनुमितशक्तेर्द्वारकारणत्वमाह **विलसत्कार्यानुमेयेत्यादिना** द्वारकारणं भवेदित्यर्थः ॥ द्वारकारणत्वं नाम अनुपादानत्वे सति कार्यानुगतत्वमित्यास्थेयम् । कस्मिन् विषय इत्यत आह **जगतीति** तत्र दृष्टान्तमाह **मृच्छब्दलक्षणत्ववन्मृन्मय इति** मर्दनादिना मृदि आहित मृदुलत्वं तावदनुपादानमपि यथा घटादावनुगच्छति तद्वदित्यर्थः । शक्तिकार्यस्वरूपमाह **तत्कार्यं तु गुणात्मकमिति** तत्रोपपत्तिमाह **गुणतया शक्तेश्चेति** शक्तेर्द्रव्याभिन्नतयेति यावत् । चकारेण ॥ श्लो० ॥ 'द्रव्य द्रव्यस्य हेतुस्स्यादन्यदन्यस्य चैव ही'ति श्रीगौडपादाचार्यसम्मतिस्सूचिता । तत्र दृष्टान्तद्वयमाह **रेखात्मकमित्यादिना** हेमकुम्भे तद्गताघातवहनशक्तिजन्येन रेखात्मकशुकमयूरादिना च कायिकादिक्रियाशक्तिर्मति जीवे जायमानगुणात्मकापूर्वेण च तुल्यं निखिल जगदित्यर्थः ॥ २९५ ॥

अ० ॥ द्वितीयपक्षस्वरूपमेव श्लोकान्तरेणाह **शक्तिरिति**—

मू ॥ शक्तिस्स्वात्माश्रयेऽस्मिञ्जनयति हि गुणानेव नो द्रव्यरूपा-
न्नो चेत्स्याच्छक्तिजानां निलयनमपि तद्द्वारशक्तौ सुषुप्तौ ।
इष्टञ्चेच्छक्तिजानां क्वचिदपि न भवेच्छक्तिमात्रे लय-
स्स्याद्रुच्छेदस्तद्गुणानां निजचिदवगतिश्शक्तिहन्त्रीत्यदोषः ॥

व्या ॥ **शक्तिस्स्वात्माश्रयेऽस्मिन्निति** । ते ध्यानयोगानुगता अपश्यन्देवात्मशक्ति स्वगुणैर्निगूढा' मित्याद श्रुत्युक्ता आत्मशक्तिस्तावत् स्वस्वरूपाश्रये प्रत्यगात्मनि गुणभूतानेव विकाराञ्जनयति । न द्रव्यात्मकान् विकारान् सृजतीत्यर्थः ॥ अन्यथा बाधमाह । **नो चेदित्यादिना शक्तिजानां** शक्तिजन्यानां द्रव्येतरेषां गुणानां **निलयनं** प्रविलयः **तद्द्वारशक्तौ** तेषां गुणानां द्वारकारणभूतायां शक्तौ सुषुप्तावपि स्यादित्यन्वयः इष्टापत्तिं वारयति **इष्टञ्चेच्छक्तिजानां क्वचिदपि न भवेच्छक्तिमात्रे लय इति** तर्हि शक्तिजानां सुषुप्तौ का गति

रित्यत आह । **स्यादुच्छेदस्तद्गुणानामिति** तर्हि आत्मावगतिमन्तरा द्वैतभ्रमाणामुच्छेदे ज्ञानवैयर्थ्यमापतेदित्यत आह । **निजचिदवगतिश्शक्तिहन्त्रीत्यदोष इति** ॥ २९६ ॥

अ० ॥ अधुना तृतीयपक्षं सङ्गृह्णाति **मायेति**—

मू ॥ माया सा परिणामिनी यदि तदा द्रव्यं भवेत् खादिकं
ज्ञानं ज्ञेयमिति द्वयं तत इदं स्वप्ने सुषुप्तौ क्रमात् ।
चित्ते चावृतिधर्मके च तमसि प्राप्याप्ययं जायते
भूमावोषधयो यथा च जलधौ भङ्गः पुनर्जायते ॥ २९७ ॥

॥ **इत्यद्वैतसिद्धान्तगुरुचन्द्रिकायां द्वितीयनिरूपणं समाप्तम्** ॥

व्या ॥ मायायाः प्रकृतित्वपक्षे तत्परिणामभूतं ज्ञानं ज्ञेयमिति उभयात्मकमप्याकाशादिकं द्रव्यं भवेदिति तृतीयपक्षे कार्यजातस्य द्रव्यत्वं विधाय तस्य स्वप्नाद्यवस्थायामन्तःकरणादौ स्वस्वप्रकृतिभावापत्तिरूपं लयं दर्शयति **तत इत्यादिना तत इति** द्रव्यत्वादेवेत्यर्थः ॥ २९७ ॥

इति श्रीपरमहंसपरिव्राजकाचार्यरामब्रह्मश्रीकृष्णानन्देन्द्रभगवत्पादान्तेवासिन-
श्रीमच्चन्द्रिकाचार्याख्ययतीश्वरविरचितायामद्वैतरसझरी-
नामकव्याख्यानोपेतायामद्वैतसिद्धान्तगुरुचन्द्रिकायां
द्वितीयं स्वात्माजगतोरेकसत्तावादादि-
निरूपणं संपूर्णम् ॥

ब्रह्मैवाहमस्मि ।

ओं तत्सत् ॥

॥ हरिः ओम् ॥

अद्वैतसिद्धान्तगुरुचन्द्रिकायां

तृतीयनिरूपणप्रारम्भः ॥

अ० ॥ श्रीमच्छङ्करभगवत्पादनमस्कारपूर्वकं तृतीयनिरूपणमारभते **सर्वज्ञ-मिति**—

मू ॥ सर्वज्ञं देशिकेन्द्रं श्रीशङ्करं तत्वबोधकम् ।
नत्वा निरूपणं वक्ष्ये तृतीयं तत्प्रसादतः ॥ १ ॥

व्या ॥ स्पष्टोऽर्थः ॥ १ ॥

अ० ॥ प्रथमनिरूपणे शिष्योक्तं तृतीयाभिप्रायमङ्गीकृत्य तत्र सप्रयोजन-प्रमाणं प्रतिजानीते **प्राज्ञ इति**—

मू ॥ प्राज्ञस्तु मायातत्कार्य्यैर्भात्यसंवेष्टितश्च नः ।
इति चेत्तत्तथैवात्र प्रमाणन्तु निरूप्यते ॥ २ ॥
सोपाधिकदशायां च स्वव्यापित्वग्रहाय हि ॥ २॥ ॥

व्या ॥ अतिरोहितार्थः ॥ २॥ ॥

अ० ॥ प्रश्नोपनिषदि षष्ठप्रश्ने 'स ईक्षांचक्रे' इत्यस्य वाक्यस्य भाष्यावसरे 'इहैवान्तःशरीरे सोम्य स पुरुष' इति तत्पूर्वश्रुत्यर्थनिर्णयायेत्थं प्रदर्शितम् । ननु श्रुतेरिहैवान्तःशरीरे परिच्छिन्नः कुण्डबदरवत् पुरुष इति पुरुषस्य परिच्छिन्नत्व-परं पूर्वपक्षभाष्यम् । न प्राणादिकलाकारणत्वात् न हि शरीरमात्रपरिछिन्नस्य पुरुषस्य प्राणश्रद्धादीनां कलानां कारणत्वं प्रतिपत्तुं शक्नुयात् कलाकार्यत्वाच्च शरीरस्य न हि पुरुषकार्याणां कलानां कार्यं सत् शरीरं स्वस्य कारणकारणं पुरुषं कुण्डं बदरमिवाभ्यन्तरीकुर्यादित्यारभ्य एतेनाकाशस्यापि शरीराधारत्वमनुपपन्नमिति सिद्धान्तभाष्यञ्च आत्मन उपाध्यसंवेष्टितत्वप्रदर्शनार्थं संगृह्णाति **स ईक्षांचक्र इत्यादिना**—

मू॥ स ईक्षांचक्र इत्यस्य षष्ठप्रश्ने तु भाष्यकृत् ॥ ३ ॥
नन्विहान्तश्शरीरे स पुरुषोऽस्तीति च श्रुतेः।
कुण्डेन बदरस्येव गात्रेण परिवेष्टनात् ॥ ४ ॥
अत्यल्पस्य कथं सर्वकारणत्वं भवेदिति।
आशङ्कां संप्रदर्श्यास्य प्रकृतित्वप्रसिद्धये ॥ ५ ॥
कुण्डवद्बदरं गात्रं स्वस्य कारणकारणम्।
ब्रह्म नाभ्यन्तरीकुर्यान्निरंशत्वाद्विभुत्वतः ॥ ६ ॥
इत्यात्मनस्तथा स्वस्य वेष्टितत्वं निवार्य च।
उपलब्धिनिमित्तत्वादिति तत्त्यभाष्यतः ॥ ७ ॥
इहैवान्तश्शरीरे स इति वेदोऽनुभाषते।
भ्रान्तिसिद्धं वेष्टितत्वमित्याहातो न वेष्टकम् ॥ ८ ॥

व्या॥ **स ईक्षामित्यारभ्याशङ्कां संप्रदर्श्येत्यन्तं** पूर्वपक्षभाष्यपरम्। **अस्येत्यारभ्य निवार्यचेत्यन्तं** सिद्धान्तभाष्यपरम्। अस्यायमर्थः पिप्पलादाख्यमाचार्यमुपसङ्गच्छता भारद्वाजेन यष्षोडशकलः पुरुषः पृष्टः यश्च 'यस्मिन्नेताष्षोडशकलाः प्रभवन्ति स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनोऽन्नमन्नाद्वीर्यं तपो मन्त्राः कर्म लोका लोकेषु च नाम चे' त्युत्तरत्र वक्ष्यमाणः तस्य 'इहैवान्तश्शरीरे सोम्य स पुरुष' इति श्रुत्या शरीरपरिवेष्टितत्वश्रवणात् कुण्डवद्बदरवत् शरीरापेक्षयाप्यल्पपरिमाणस्य पुरुषस्य कथं प्रागुदीरितश्रुत्युक्तं सर्वकलाकल्पनाधिष्ठानत्वरूपप्रकृतित्वं घटत इति चेत् विषमोऽयं दृष्टान्तः कुण्डं तावत् स्वापेक्षया अल्पपरिमाणं बदरफलं स्वाभ्यन्तरीकर्तुमर्हति शरीरन्तु स्वयमल्पपरिमाणं सत् सर्वोपादानं देशतश्चापरिच्छिन्नं पुरुषं कथं स्वाभ्यन्तरीकुर्यात्। नन्वाकाशैकदेशस्येव ब्रह्मैकदेशस्य पुरुषस्य शरीरेण वेष्टितत्वं किं न स्यात् अत आह निरंशत्वादिति आकाशपुरुषयोरिति शेषः। तर्हि समग्रयोरेवाकाशपुरुषयोश्शरीरवेष्टितत्वं स्यादत आह विभुत्वादिति न विभुः परिच्छिन्नवस्तुना कबळीक्रियते इत्याद्याकाशयोः शरीरवेष्टितत्वनिरासानन्तरमपि तत्रत्यात् उपलब्धेः शरीरसंवेष्टितः

पुरुष इत्यविद्वद्दृष्टिः निमित्तं प्रवृत्तिमूलं यस्य 'इहैवान्तरशरीरे सोम्य स पुरुष' इति वेदस्य स उपलब्धिनिमित्तः तस्य भावः उपलब्धिनिमित्तत्वं तस्मादित्यर्थकात् उपलब्धिनिमित्तत्वादिति भाष्यतः 'इहैवान्तरशरीरे सोम्य स पुरुष' इति श्रुतेः भ्रमानुवादकत्वं चाह यतो भाष्यकारः अतोऽपि नात्मपरिवेष्टकं गात्रादिकमिति शेषः ॥ ८ ॥

अ० ॥ इदानीं दहराधिकरणे 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाश' इत्यत्र किं दहराकाशशब्दवाच्यं भूताकाशमुत जीवः अथवा ब्रह्मेति त्रिधा संशये आकाशश्रुत्या भूताकाशं भवितुमर्हति । अथवा अल्पत्वश्रुत्या जीवो भविष्यतीति द्विधा पूर्वपक्षे प्राप्ते—द्वितीयपक्षनिराकरणपरं नह्युपाधिपरिच्छिन्नस्याग्रोपमितस्य जीवस्य पुण्डरीकवेष्टनकृतं दहरत्वं शक्यं निवर्तयितु' मिति भाष्यं आत्मन उपाध्यसंवेष्टितत्वे प्रमाणयति **यदीति**—

मू ॥ यद्यात्मनः पुण्डरीकवेष्टनेन कृताऽल्पता ।
न हि वारयितुं शक्येत्येवं दहरसूत्रके ॥ ९ ॥
भाष्यकारैर्वेष्टितत्वं चितोऽन्येन निवारितम् ॥ ९ ॥ ॥

व्या ॥ आत्मनः पुण्डरीकपरिमाणसंसर्गाद्व्यासातिरेकेण तद्वेष्टनायत्ता चेदल्पता तदा सा 'यावान्वायमाकाशः' तावानेषोऽन्तर्हृदय आकाशः 'अयमात्मा ब्रह्मे'त्यादि श्रुत्युक्तविभुत्ववेदनाय न निवर्तयितुं शक्येत्यर्थः ॥ ९ ॥ ॥

अ० ॥ शङ्कते पूर्वपक्षी **संसारित्वादिति**—

मू ॥ संसारित्वाच्छरीरस्थचितोऽस्तु प्रतिबिम्बता ॥ १० ॥
उतावच्छिन्नता नो चेत्स्वर्गतिर्न तदाप्तये ।
लिङ्गेन वेष्टनं वाच्यं भोक्तुश्चेन्न तथा भवेत् ॥ ११ ॥

व्या ॥ उपाद्ध्यसंवेष्टितत्वेनात्मनो व्यापकत्वाङ्गीकारे न लोकान्तरगतिस्स्यादित्यर्थः ॥ ११ ॥

अ० ॥ इदानीं न तथा भवेदिति प्रतिज्ञातमर्थं सदृष्टान्तमाह **उपाधेरिति**—

मू ॥ उपाधेश्चलने भ्रान्त्या व्योम्नि गत्यादिकं यथा ।
गमनादि च भोगश्च पूर्णे स्वात्मनि भाति हि ॥ १२ ॥

व्या॥ नभस्यचञ्चले घटगतं गत्यादिकमिव पूर्णे भोक्तरि भ्रान्त्यैव मनोगतं गत्यादिकं भातीति भावः ॥ १२ ॥

अ० ॥ दृष्टान्तान्तरमाह **स्वप्न इति**--

मू ॥ स्वप्नेऽस्य गत्यभावेऽपि भ्रान्त्या गत्यादिकं यथा ॥ १२ ॥

व्या ॥ **अस्येति** सन्ध्याधिकरणीयाधिकरणरत्नमालाव्याख्यातृसिद्धिकृदुक्तरीत्या नाड्यन्तर्गतस्य लिङ्गशरीरस्य स्वप्नकाले कुत्रापि गमनाभावेऽपि केवलभ्रान्त्या स्वप्नदृशीवावस्थान्तरेऽपि पूर्णे स्वात्मनि गमनादिभ्रमो भवतीत्यर्थः ॥

अ० ॥ ननु व्यापकत्वेन जीवस्य गमनागमनासंभवात् उपाधिगतगमनाद्यध्यासपूर्वकमथवा उपाधेर्गमनाभावेऽपि केवलभ्रान्त्यैव गन्तृत्वभोक्तृत्वादिविभ्रमे किमर्थं शास्त्रैरस्य गत्यादिरुच्यत इति शङ्कते **तदन्तरादीति**—

मू ॥ तदन्तरादिसूत्रैस्तैः किमर्थं गतिरुच्यते ॥ १३ ॥

व्या ॥ शारीरकमीमांसायां तृतीयाध्यायस्य प्रथमपादे 'तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्या' मित्यादिसूत्रैः शरीरान्तरप्राप्तौ तदारम्भकैः द्रव्यापूर्वैश्चतुर्थनिरूपणे वक्ष्यमाणैः सम्परिष्वक्तस्सन् जीवो लोकान्तरं प्रति गच्छतीति पञ्चाग्निविद्याविषयकप्रश्ननिरूपणाभ्यामवगम्यत इति किमर्थं गतिरुच्यत इत्यर्थः ॥ १३ ॥

अ० ॥ तच्छास्त्राणां न गत्यादिसद्भावे प्रामाण्यमित्याह **स्वाध्यस्तेति**—

मू ॥ स्वाध्यस्तप्राणधर्माय वैराग्यार्थमनूद्यते ॥ १३॥ ॥

व्या ॥ **स्वाध्यस्तप्राणधर्मायेति** स्वात्मन्यध्यस्ताः प्राणधर्माः मुख्यप्राणादीन्द्रियाणां क्षुत्पिपासागमनादिधर्मा येन तस्मै स्वाध्यस्तप्राणधर्माय मेढ्रजन्यरेतोद्वाराऽतिजुगुप्सितभगान्तःप्रवेशपूर्वकं नानाविधजन्मप्राप्तिमिष्टादिकारिणां स्वर्गभोगानन्तरमावेद्य तस्माज्जुगुप्सेतेति पञ्चाग्निविद्यावसाने वैराग्यविधानात् तदर्थमेवाज्ञदृष्टिगोचरो गतिरूद्यते अतो न तत्र श्रुत्यादेः तात्पर्यमित्यर्थः ॥ १३॥ ॥

अ० ॥ किञ्चान्तःकरणावच्छिन्नो जीव इति पक्षावलम्बिनाऽपि स्वपक्षप्राप्तदोषपरिहारार्थं जीवस्य स्वाधेयान्तःकरणावच्छिन्नत्वदशायामपि गमनादिराहित्यव्यापित्वयोः श्रुतिदृष्टान्ताभ्यामङ्गीकृतत्वात् तदन्यथानुपपत्त्यापि न मनःपरिवेष्टितत्वमित्याह **यदीत्यादिना**--

मू ॥ यद्यधस्थस्य कर्तृत्वमूर्ध्वस्थस्य हि भोक्तृता ॥ १४ ॥
कृतहानादिदोषस्स्यादिति तस्यापनुत्तये ।

जीवस्य लिङ्गगात्रेणावच्छिन्नत्वावलम्बिनाम् ॥ १५ ॥
घटसंवृतमाकाशं नीयमाने घटे यथा ।
घटो नीयेत नाकाशस्तद्वज्जीवो नभोपमः ॥ १६ ॥
एवं श्रुतेर्भोगकाले व्यापिताभिमता ततः ।
मनो न वेष्टकं किं तद्यस्मिन्नेता इति श्रुतेः ॥ १७ ॥
आधेयं तदुपाधिस्स तदवच्छिन्न ईर्यते ॥ १७॥ ॥

व्या ॥ प्राणादय इव मनोऽप्यात्मन्याधेयमेव 'यस्मिन्नेताष्षोडशकलाः प्रभवन्ती'ति श्रुतेः । तदाधेयोपाधिक आत्मा अहं ममेत्यभिमन्यमानप्राणादिकलाभिरवच्छिन्न इति सम्यग्विचारवद्भिरीर्यत इत्यर्थः । शेषस्सुगमः ॥ १७॥ ॥

अ० ॥ तत्र दृष्टान्तमाह **यथेति**—

मू॥ यथाधेयघटोपेतभूतलं तद्वदेव सः ॥ १८ ॥

व्या ॥ यथा घटस्याधारमपि भूतलं घटावच्छिन्नमित्युच्यते । तद्वत् मनस आधारभूतोऽप्यात्मा मनोऽवच्छिन्न इत्युच्यत इति भावः ॥ १८ ॥

अ० ॥ षोडशकलात्मकैः कार्यैरिव तत्कारणेनाज्ञानेनापि न प्राज्ञः परिवेष्टित इति दर्शयितुमज्ञानोपाधिको जीव इति मतमवतारयति **मनोऽवच्छिन्नतामिति**—

मू॥ मनोऽवच्छिन्नतां तत्र प्रतिबिम्बत्वमात्मनः ।
वदद्भिः कृतहानादिदोषाणामपनुत्तये ॥
अज्ञाने प्रतिबिम्बत्वं तदवच्छिन्नतेरिता ॥ १९॥ ॥

व्या ॥ जीवस्यान्तःकरणावच्छिन्नत्वम् तथा अन्तःकरणे तदनवच्छिन्नब्रह्मप्रतिबिम्बत्वं च ब्रुवद्भिः स्वस्वपक्षे प्राप्तकृतहानादिदोषपरिहारार्थं व्यापकाज्ञानावच्छिन्नत्वम् तदज्ञाने तदवच्छिन्नब्रह्मप्रतिबिम्बत्वं चोक्तम् । तथा हि अन्तःकरणपरिवेष्टितचैतन्यस्य जीवत्वं कर्तृत्वभोक्तृत्वसमययोः तत्र तत्रान्तःकरणावच्छेद्यचैतन्यप्रदेशस्य भिन्नत्वात् कृतहानादिदोषप्रसङ्गः । तथैव प्रतिबिम्बपक्षेऽपि अन्तःकरणे तदनन्तर्गतः तत्सन्निहितश्च यश्चैतन्यप्रदेशः तत्प्रतिबिम्बस्य वक्तव्यतया तत्र तत्रान्तःकरणस्य गमने बिम्बभेदात् तत्प्रतिबिम्बभेदस्याप्यवश्यभावेन कृतहानादिदोषप्रसङ्गः । एतन्मतद्वयेऽपि उक्तदोषस्य सामञ्जस्येन

परिहारासंभवात् अविद्याप्रतिबिम्बो जीव इति पक्षेनायं दोषः व्यापकत्वादविद्याया: अन्तःकरणवत् गत्यभावेन प्रतिबिम्बभेदानापत्तेः । तथैवाविद्यावच्छिन्नो जीव इति पक्षेऽपि नायं दोषः गत्यभावेनाविद्यायाः तदवच्छेद्यचैतन्यप्रदेशभेदानापत्तेरित्यर्थः ॥ १९ ॥

अ० ॥ प्राज्ञस्याज्ञाने प्रतिबिम्बत्वादिपक्षेऽपि विकल्पपूर्वकं दोषमाह **तत्रेत्यादिना**--

मू ॥ तत्रापि बहवो दोषाः कथं चेत् किं निरङ्कुशम् ॥ २० ॥
विभ्वज्ञानं साङ्कुशं वाऽऽद्ये बिम्बप्रतिबिम्बयोः ।
जीवेशयोरवच्छिन्नानवच्छिन्नस्वरूपयोः ॥ २१ ॥
स्यादसत्वं तदा शुद्धदेशस्थचिदभावतः ।
द्वितीये त्वनवच्छिन्नाबिम्बचैतन्ययोस्थितौ ॥ २२ ॥
न स्यात्तयोः प्रेरकत्वं प्रेर्यगात् प्रेरणश्रुतेः ।
स्वरूपतो विनाशित्वात् प्रतिबिम्बस्य मुक्तुतः ॥ २३ ॥

व्या ॥ अज्ञानं तावत् किं निरङ्कुशं विभु उत साङ्कुशं विभु आद्ये जीवस्य निरङ्कुशमहापरिमाणवदज्ञानप्रतिबिम्बत्वादिपक्षे दोषमाह **बिम्बप्रतिबिम्बयोरित्यादिना** तत्र हेतुं दर्शयति **तदा शुद्धदेशस्थचिदभावत इति** बिम्बप्रतिबिम्बादिव्यवहारकाले ह्यज्ञानादूषितप्रदेशगतब्रह्माभावात् बिम्बप्रतिबिम्बादेरसत्वमापतेदित्यर्थः । द्वितीयपक्षं दूषयति **द्वितीयेत्यादिना** तत्र हेतुमाह **प्रेर्यगात् प्रेरणश्रुतेरिति** 'यः पृथिव्यां तिष्ठ' न्नित्यारभ्य 'यः पृथिवीमन्तरोऽयमयती'त्यादिश्रुत्या 'ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायये'त्यादिस्मृत्या च प्रेर्यस्थचैतन्यादेव प्रेरणश्रवणात् आपेक्षिकमहापरिमाणवदज्ञानात् बहिर्देशगतयोः तदज्ञानावच्छिन्नबिम्बचैतन्ययोः न प्रेरकत्वमित्यर्थः । द्वितीयपक्षे दोषान्तरमाह **प्रतिबिम्बस्य मुक्तुत इति** तत्र हेतुमाह **स्वरूपतो विनाशित्वादिति** किञ्चास्मिन् पक्षे ब्रह्मणस्सांशत्वादयोऽपि बहवो दोषा इति मूलादवगम्यन्ते ॥ २३ ॥

अ० ॥ एवमविद्यायां प्रतिबिम्बादिरूपो जीव इत्यस्यापि पक्षस्यानेकदोषग्रस्तत्वेन तद्दोषासंस्पृष्टं 'पुरत्रये क्रीडति यस्तु जीवस्ततस्तु जातं सकलं चिच्चि'-

मित्यादिश्रुत्युपदिष्टं यत् वार्तिकाचार्यपरिगृहीतं मतं तदिदानीं स्वमते प्रमाणयति **एतदिति**—

मू ॥ एतद्दोषासंभवार्थं पुरत्रय इति श्रुतेः ।
जीवः प्रकृतिभूतोऽयं नाभासादिर्यतो विदुः ॥
अतो बिम्बाद्यसत्वन्तु सम्मतत्वान्न दूषणम् ।
भवेत्तथा च प्राज्ञस्य नाज्ञानं परिवेष्टकम् ॥ २५ ॥

व्या ॥ जगत्प्रकृतिभूतोऽयं जीवः नाज्ञानप्रतिबिम्बः नाज्ञानावच्छिन्नश्चेति यतो वार्तिककारादयो जानन्ति अतो जीवस्याज्ञानप्रतिबिम्बत्वादिपक्षोक्तं बिम्बाद्यसत्वं नास्मिन् पक्षे दूषणं भवेत् इष्टत्वात् । एवं च प्राज्ञस्याज्ञानप्रतिबिम्बत्वाद्यभावेन नाज्ञानं परिवेष्टकं भवेदित्यर्थः ॥ २५ ॥

अ० ॥ इदानीमन्तःकरणावच्छिन्नस्य न तत्परिवेष्टितत्वमित्यत्र उपपत्तिं दर्शयति **किञ्चैवमिति**—

मू ॥ किञ्चैवं कृतहानादिदोषमभ्युपगच्छताम् ।
उपाधेर्गमने तद्वच्चितो नैव गतिर्मता ॥ २६ ॥
ततश्चाच्छिन्न आत्माऽतो नोपाधिपरिवेष्टितः ॥ २६॥ ॥

व्या ॥ **तद्वच्चित** इति अन्तःकरणोपाधिमज्जीवस्येति यावत् । फलितमाह **तत इत्यादिना** यस्मादन्तःकरणावच्छिन्नस्य गतिर्नाभ्युपेता तस्मादखण्डितो जीव इति गम्यते । चकारेण अच्छेद्योऽयमित्यादि शास्त्रं संगृह्यते यतश्चाच्छिन्नः ततो न घटेन गङ्गोदकवत् देशान्तरापसरणार्थमुपाधिपरिवेष्टित इत्यर्थः ॥ २६॥ ॥

अ० ॥ प्रागुक्तार्थे उपपत्त्यन्तरं दर्शयति **वस्तुतस्त्विति**—

मू ॥ वस्तुतस्तु चिदेकत्वात् प्राज्ञवन्नास्य दूषणम् ॥ २७ ॥
कृतहानादिकं चेति पक्षे नैवास्य वेष्टनम् ।
नो चेत्प्राज्ञोपमादानं व्यर्थञ्चातो न वेष्टितः ॥ २८ ॥

व्या ॥ निरतिशयमहाज्ञानप्रतिबिम्बस्य प्राज्ञस्येव अन्तःकरणावच्छिन्नस्य जीवस्येह परत्र च गत्वरान्तःकरणग्रहणकृतावच्छेद्यचैतन्यप्रदेशभेद-

भ्रमेऽपि चैतन्यस्य वस्तुत एकत्वान्न कृतहानादिदोष इति वदतां मते स जीवो नान्तःकरणवेष्टित इति सिद्धान्तलेशसंग्रहे प्रथमपरिच्छेदोक्तरीत्या चावगम्यते इत्युक्त्वाऽन्यथा बाधमाह **नो चेदिति अत इति** प्राज्ञोपमादानान्यथानुपपत्तेश्च अन्तःकरणावच्छिन्नः न तत्परिवेष्टित इत्यर्थः ॥ २८ ॥

अ० ॥ प्रमाणान्तरं दर्शयति **नाकाशस्येति**—

मू ॥ नाकाशस्य घटाकाशो विकारावयवौ यथा ।
नैवात्मनस्सदा जीवो विकारावयवौ तथा ॥ २९ ॥
इति श्रीगौडपादोक्तेर्न जीवोऽन्येन वेष्टितः ॥ २९॥ ॥

व्या ॥ **इति श्रीगौडपादोक्तेरिति** गौडपादकारिकायाः अस्याः निष्कलं निष्क्रियमित्यादि श्रुत्यनुमानानुभवानुसारित्वेन जीवस्य ब्रह्मावयवत्वाभावात् नोपाधिवेष्टितत्वं सिध्यतीत्यर्थः ॥ २९॥ ॥

अ० ॥ बिम्बानवच्छिन्नचैतन्ययोः अनियन्तृत्वापत्त्या जीवस्थाविद्यायां ब्रह्मप्रतिबिम्बत्वादिपक्षमुपेत्य जीवः प्रकृतिभूतोऽयं नाभासादिरिति मतान्तरं प्रवृत्तमित्यत्र किं प्रमाणमित्यत आह **इति मत्वेत्यादिना**—

मू ॥ इति मत्वैव सिद्धान्तलेशसंग्रहनामके ॥ ३० ॥
सिद्धान्तकल्पवल्ल्याञ्च परिच्छेदे किलादिमे ।
जीवरूपपरेणोक्त्वा तत्र भाष्याद्युदाहृतम् ॥ ३१ ॥
ब्रह्म स्वाविद्यया बद्धं स्वज्ञानेन विमुच्यते ।
राजसूनोस्स्मृतिप्राप्तौ व्याधभावो निवर्तते ॥ ३२ ॥
यथैवमात्मनोऽज्ञस्य तत्वमस्यादिवाक्यतः ।
वार्तिककृन्मतमित्थं न प्रतिबिम्बो न चाप्यवच्छिन्नः॥३३ ॥
ब्रह्मैवाविद्यातस्संसरतीवाथ मुच्यत इवेति ॥ ३३॥ ॥

व्या ॥ **जीवरूपपरेणेति** जीवस्वरूपप्रतिपादकेनेत्यर्थः **तत्रेति** जीवस्या विद्याप्रतिबिम्बत्वादिराहित्ये सति ब्रह्मरूपत्वे भाष्यादि उदाहृतं प्रमाणत्वेनेति शेषः। सिद्धान्तलेशसङ्ग्रहे उदाहृतं ब्रह्मैव स्वाविद्यया संसरति स्वाविद्यया मुच्यत इति बृह-

दारण्यभाष्यं संगृह्णाति **ब्रह्मेति** वार्तिकसंमतिं दर्शयति **राजसूनेरिति यथैव-मात्मनोऽङ्गस्य** अज्ञानोपाधिकस्य अवस्थात्रयवतः संसारिब्रह्मणः **तत्त्वमस्यादि-वाक्यतः** त्वमाध्यासिकजगत्कारणत्वकर्तृत्वभोक्तृत्वादिधर्मवान् **तत्** एकमेवा-द्वितीयमित्यादिश्रुत्युक्तं नित्यशुद्धं प्रत्यक्चैतन्यमसीति वाक्यजन्यज्ञानादाध्यासिकं जगत्कारणत्वादिकं निवर्तते । तथा चोक्तं विद्यारण्याचार्यैः ॥ श्लो० ॥ इति शैव-पुराणेषु कूटस्थः प्रविवेचितः । जीवेशत्वादिरहितः केवलस्वप्रभाश्रय इति । सि-द्धान्तकल्पवल्लीवचनमुदाहरति **वार्तिकेति** ॥ ३३॥ ॥

अ० ॥ इतोऽपि नान्तःकरणमात्मसंवेष्टकं भवतीत्याह **किञ्चान्यदिति**—

मू ॥ किञ्चान्यच्छृणु सिद्धान्तलेशमङ्गहनामके ॥ ३४ ॥
द्वितीये तु परिच्छेदे बिम्बाद्भेदनिवृत्तये ।
प्रतिबिम्बस्य तोयादिदेशस्थितिनिरासकात् ॥ ३५ ॥
वचनाद्वेष्टकं नान्तःकरणञ्चेति सिध्यति ॥ ३५॥ ॥

व्या ॥ बिम्बातिरिक्तप्रतिबिम्बस्यैवाभावादित्यर्थः ॥ ३५॥ ॥

अ० ॥ तर्हि प्रतिबिम्ब इति शब्दप्रत्ययोः को विषय इत्याशङ्क्य यथाह्य-विद्वद्विर्घटशब्दप्रत्ययोः मृदतिरिक्तवस्तुगोचरत्वेन गृहीतत्वेऽपि तत्त्वज्ञाः मृदमेव घटशब्दप्रत्ययगम्यां मन्यन्ते तद्वदविद्वद्भिः प्रतिबिम्ब इति शब्दप्रत्ययोः तोयाद्यन्त र्गतवस्त्वन्तरगोचरत्वेन गृहीतत्वेऽपि विचारकुशलाः तत्त्वविदस्तु दर्पणादानस्य ग्रीवास्थस्वमुखप्रत्यक्षीकरणार्थत्वात् दर्पणादीनामभिमुखीभूतमेव वस्तु प्रतिबिम्ब इति शब्दप्रत्ययगम्यमिति मन्यन्त इत्याह **आदर्श इति**—

मू ॥ आदर्शे सति मे वक्त्रं तद्धर्मं भजतीत्यमुम् ॥ ३६ ॥
प्रतिबिम्बति शब्दोऽयं ब्रवीतीति विदुर्बुधाः ॥ ३६॥ ॥

व्या ॥ **तद्धर्ममिति** तस्यादर्शस्य धर्मं द्रष्टृभिमुखत्वादिकं मे वक्त्रं भजति तद्धर्मसमानधर्माध्यासवद्भवतीति अमुमर्थमयं प्रतिबिम्बतीति शब्दो ब्रवी-तीति विदुरित्यर्थः ॥ ३६॥ ॥

अ० ॥ उक्तमेवार्थं सोपपत्तिकं विवृणोति **चक्षुरिति**—

मू ॥ चक्षुर्वृत्तिर्यथा गत्वा जलाहत्या समेत्य च ॥ ३७ ॥
स्वस्याभिमुख्यमद्धर्ममध्यस्यति यदा मुखे ।

प्रतिबिम्बति मे वक्त्रमिति शब्दः प्रवर्तते ॥ ३८ ॥

व्या ॥ यथा च चक्षुर्वृत्तिर्वेगेन गत्वा जलसङ्घट्टनेन पर्वतादिषु प्रक्षिप्तपाषाणवत् स्वमुखदेशमागत्य स्वास्यं प्रति आभिमुख्यरूपमध्यर्धं स्वमुखे यदा अध्यस्यति मन्मुखं ममाभिमुखं वर्तत इत्यन्यथा गृह्णाति तदा मे वक्त्रं ममाभिमुखं यथा तथा प्रतिबिम्बतीति वचनं जायत इत्यर्थः ॥ ३८ ॥

अ० ॥ दार्ष्टान्तिकमाह **मनोवृत्तिरिति**--

मू ॥ मनोवृत्तिस्तथा गत्वा चित्ताहत्त्या समेत्य च ।
कर्तृत्वादींश्चित्तधर्मान् स्वात्मनि ग्राहिणी यदा ॥ ३९ ॥
प्रतिबिम्बति चैतन्यमिति शब्दः प्रवर्तते ॥ ३९॥ ॥

व्या ॥ **मनोवृत्तिरिति** अहं कर्तेत्यन्तःकरणवृत्तिः यदा अन्तःकरणतद्धर्मतत्संसर्गाध्यासविशिष्टात्मग्रहणसमये अनात्मभूतान्तःकरणाघट्टनेन प्रत्यावृत्त्य आत्मनि चित्तधर्मान् गृह्णाति तदा प्रत्यगात्मा प्रतिबिम्बतीति शब्दः प्रवर्तत इत्यर्थः ॥ ३९॥ ॥

अ० ॥ कैरेवं राद्धान्तितमित्यत आह **एवमिति**—

मू ॥ एवं विवरणाचार्यैरुक्तं चाप्पयदीक्षितैः ॥
आभास एव चेत्येतत्सूत्रभाष्यकृदादिभिः ॥ ४०॥ ॥

व्या ॥ स्पष्टोऽर्थः ॥ ४०॥ ॥

अ० ॥ ननु कूटस्थचैतन्यात् पृथक् प्रतिबिम्बस्याभावात् न तत्परिवेष्टकत्वमन्तःकरणस्य सम्भवति तथापि प्राग्भवदुक्तप्रकारेण प्राज्ञाघटितवृत्त्या प्रत्यगात्मनो वेष्टनं स्यादिति दृष्टान्तावष्टम्भेन शङ्कते **वृत्तिश्चेति**—

मू ॥ वृत्तिश्चाहतिगत्यादिमत्वाद्द्रव्यं तयात्मनः ॥
वेष्टनं स्याद्यथा स्थाणोस्तत्राहतकशादिना ॥ ४१॥ ॥

व्या ॥ **तयेति** 'सुखमहमस्वाप्स' मिति परामर्शहेतुभूतया मायावृत्त्या प्राज्ञस्यात्मनो वेष्टनं स्यादित्युक्त्वा तत्र दृष्टान्तमाह **यथेत्यादिना** ॥ ४१॥ ॥

अ० ॥ दृष्टान्तमङ्गीकृत्य परमतं निराकरोति **स्थाणोरिति**--

मू ॥ स्थाणोः परिमितत्वेन कशया वेष्टनं भवेत् ॥ ४२ ॥
ज्ञानाभावात्मकाज्ञानजन्यत्वाद्द्रव्यता नहि ।
यदि भावात्मकाज्ञानप्रकृतित्वेन मूर्तता ॥ ४३ ॥
वृत्त्योदस्सर्वथा पूर्णवेष्टकत्वं न युज्यते ॥ ४३॥ ॥

व्या ॥ ज्ञानप्रागभावरूपाज्ञाननिमित्तकत्वेन निर्गुणचिद्विवर्तायाः वृत्तेर्द्रव्यत्वमेव नास्ति कुतस्तस्य वेष्टकत्वमित्येकं पक्षं निराकृत्य पक्षान्तरं निराकरोति **यदीत्यादिना** परिच्छिन्नाया वृत्तेः पूर्णब्रह्मवेष्टकत्वं न घटत इत्यर्थः ॥ ४३॥ ॥

अ० ॥ उक्तमर्थं दृष्टान्तेन समर्थयति **न स्वात्मेति**—

मू ॥ न स्वात्मवेष्टकत्वं स्याद्वृत्तेराध्यासिकत्वतः ।
द्वितीयेन्दोर्यथा चाद्य चन्द्रवेष्टकता न हि ॥ ४४॥ ॥

व्या ॥ स्पष्टोऽर्थः ॥ ४४॥ ॥

अ० ॥ पूर्वपक्षमनूद्य निराकरोति **चक्षुरिति**—

मू ॥ चक्षुर्वृत्त्या वेष्टितत्वमिन्दुनेमेर्यथात्मनः ॥ ४५ ॥
वेष्टितत्वमहंवृत्त्या तथा स्यादिति चेच्छृणु ।
सीमयास्य विहीनत्वादात्मनो नेमिवन्न हि ॥ ४६ ॥

व्या ॥ चन्द्रनेमेस्तावत् देशतः परिच्छिन्नत्वात् तदपेक्षया व्यापकवृत्तिवेष्टितत्वं स्यादेव देशतश्चापरिच्छिन्नस्यात्मनो न तथा वेष्टितत्वं स्यादित्यर्थः॥ ४६ ॥

अ० ॥ पुनश्शङ्कते **पूर्णत्वेति**—

मू ॥ पूर्णत्वावृतिनाशाय पूर्णं स्याद्वृत्तिवेष्टितम् ॥ ४६॥ ॥

व्या ॥ पूर्णमिति ब्रह्मेत्यर्थः ॥ ४६॥ ॥

अ० ॥ परिहरति **आध्यासिकेति**—

मू ॥ आध्यासिकाख्यसम्बन्धादसङ्गे व्याप्तया तया ॥
वृत्त्या न वेष्टितं ब्रह्म नभोवन्नीतयोखया ॥ ४७॥ ॥

व्या ॥ **उखयेति** पाकस्थाल्या इतस्ततो नीतया आध्यासिकसम्बन्धोपेतया यथा नभो न वेष्टितं तथा ब्रह्मापीत्यर्थः ॥ ४७॥ ॥

तृतीयं सोपाधिकस्यापि जीवस्य विभुत्वनिरूपणम् ।

अ० ॥ असङ्गात्मन्युपमानभूतस्याकाशस्य अन्येनाध्यासिकसम्बन्धसिद्ध्यर्थं संयोगसम्बन्धं निराकरोति **निरंशेति**--

मू ॥ निरंशनभसस्सर्वैस्संयोगः परमाणुवत् ॥ ४८ ॥
न्यायविद्भिरभिप्रेत इति चेत्तन्न युज्यते ।
परमाण्वोर्निरंशत्वे कार्ये मानान्तरं कथम् ॥ ४९ ॥
तत्सिद्ध्यर्थन्तु सांशत्वे न दृष्टान्तो भवेदणुः ।
ततस्स्वस्य निरंशस्य संयोगो नैव सिद्ध्यति ॥ ५० ॥

व्या ॥ **कार्ये इति** द्व्यणुकादौ कारणगतपरिमाणात् परिमाणान्तरं कथ सिद्ध्यतीति प्रदूष्य तत्परिहाराय परमाण्वोस्सांशत्वाङ्गीकारेऽपि दोषमाह **तत्सिद्ध्यर्थमित्यादिना** फलितमाह **तत इति** ततः निरंशस्य संयोगसम्बन्धानुमानाय नैयायिकानां दृष्टान्ताभावात् आकाशस्य सर्वैराध्यासिकसम्बन्धातिरेकेण न संयोगसिद्ध्यतीत्यर्थः ॥ ५० ॥

अ० ॥ इदानीमाकाशस्य संयोगसम्बन्धनिराकरणफलमाह **अवकाशेति**

मू ॥ अवकाशप्रदत्वेन सर्वाधारं वियत् कथम् ।
स्वाधेयाधेयतां गच्छेन्नातोऽन्येनास्य वेष्टनम् ॥ ५१ ॥

व्या ॥ न युगपदेकस्य निरवयवस्याधारत्वाधेयत्वे सम्भवत इत्यर्थः ॥ ५१ ॥

अ० ॥ इदानीं प्रश्नपूर्वकं सोपाधिकस्याकाशस्य व्यापकत्ववेदनप्रकारमाह **तर्हीति**--

मू ॥ तर्हि कुम्भे स्थिते खस्य व्यापित्वं ज्ञायते कथम् ।
घटस्य गमने व्योम्नो गत्यभावात्तथैव च ॥
घटस्यान्तरदेशश्च घटलोष्टप्रदेशकम् ।
घटस्य दशकाष्ठास्संव्याप्याकाशस्य वर्तनात् ॥
व्यापित्वं ज्ञायते सम्यक् तथापि भ्रान्तिमात्रतः ।

भागमारोप्य निर्भागे व्योम्नि तस्यैकदेशकः ।
संवेष्टितो घटेनेति प्रलपन्ति वृथा जनाः ॥ ५४॥ ॥

व्या ॥ तर्हीति आकाशस्योपाधिपरिवेष्टितत्वाभावे सतीत्यर्थः **काष्ठाः** दिशः । शेषस्सुगमः ॥ ५४॥ ॥

अ० ॥ प्रश्नान्तरमनूद्य समाधत्ते **आरोपितैरिति**—

मू ॥ आरोपितैर्वेष्टितश्चेदात्मभेदग्रहः कथम् ।
इन्द्वन्तरप्रतीतिस्सा व्योम्नि यद्वन्नमो भवेत् ॥ ५५॥ ॥

व्या ॥ वास्तवादाद्यादिन्दोः आकाशप्रदेशे इन्द्वन्तरप्रतीतिवदात्मभेदप्रतीतिः अविद्यादुर्विलासेत्यर्थः ॥ ५५॥ ॥

अ० ॥ इदानीं वृत्तानुवादपूर्वकमुदीरितचन्द्रोपमानेन उपमेयान्तराण्यध्याह **आत्मेति**—

मू ॥ आत्मैकोऽनेकधा भाति चन्द्रवद्दृष्टिदोषतः ॥ ५६ ॥
स्वारोपितपदार्थानां सत्तास्फूर्त्तिप्रदोऽब्जवत् ।
सत्यारोपितयोस्सङ्गो नेन्द्वोर्यद्वत् परत्र च ॥ ५७ ॥
आत्मास्त्यारोपितान्नैव वेष्टितस्त्वाच्च तेन वै ।
आत्मानन्दवशादन्ये प्रियामिथ्येन्दुवत् किल ॥ ५८ ॥

व्या ॥ नभसि दृष्टिदोषात् चन्द्रसमीपे दृश्यमानस्य मिथ्याचन्द्रस्य **अब्जवत्** वास्तवचन्द्र इव आत्मा स्वारोपितानां सत्तास्फूर्त्तिप्रदश्च भवति । किञ्चात्मानात्मनोः सत्यारोपितयोश्चन्द्रयोरिव न सङ्गश्च भवति । सत्यचन्द्रस्य मिथ्याचन्द्राधिकदेशवृत्तित्ववत्—आत्मनोऽप्यारोपिताधिकदेशवृत्तित्वमस्ति । द्वितीयचन्द्रेणाद्यचन्द्रवदारोपितेन अज्ञानादिनात्मा न वेष्टितश्च भवति । आद्यचन्द्रवशात् द्वितीयचन्द्रवत् आत्मानन्दवशात् सर्वे प्रियाश्च भवन्तीत्यर्थः ॥ ५८ ॥

अ० ॥ शङ्कान्तरमवतार्य समाधत्ते **न वेष्टित** इत्यादिना—

मू ॥ न वेष्टितस्समग्रश्चेत्पूर्णात्मा ज्ञायते कथम् ।
स्वप्रकाशो न नानास्ति किञ्चनेत्यादिवाक्यतः ॥ ५९ ॥

द्वैतासत्वग्रहेणैवाविद्यादावपलापिते ।
स्वप्रकाशत्वतस्स्वात्मा पूर्णोऽहमिति भासते ॥ ६० ॥

व्या ॥ समग्रतः प्रत्यगात्मा महावाक्यजन्यज्ञानेन न परिवेष्टितश्चेत् कथं पूर्णोऽहमिति ज्ञातुं शक्यत इति प्रश्ने संप्रदर्श्य तत्समाधानार्थं नेह नानास्ति किञ्चनेति श्रुतिगतेहशब्दार्थमाह **स्वप्रकाश इति** एतदुक्तं भवति–आत्मा तावदविद्यादशायां स्वारोपितैस्सह स्वयमेव भासते–विद्यादशायान्तु स्वारोपितैर्विना स्वयमेव भासते--विद्या तु आरोपितमेव अपलपति । एवमेवोक्तं बृहदारण्ये षष्ठाध्याये चतुर्थब्राह्मणे विंशस्य खण्डस्य भाष्येणानेन ज्ञानं च परस्मिन्नात्मनि आत्मभावनिवृत्तिरेवन तस्मिन् साक्षादात्मभावः कर्तव्यः विद्यमानत्वादात्मभावस्य–नित्यो ह्यात्मभावस्सर्वस्य अतद्विषय इव प्रत्यवभासते तस्मादतद्विषयावभासनिवृत्तिव्यतिरेकेण न तस्मिन्नात्मभावो विधीयते । अन्यात्मभावनिवृत्तावात्मभावः स्वात्मनि स्वाभाविको यस्स केवलो भवतीत्यात्मा ज्ञायत इत्युच्यते । स्वतश्चाप्रमेय इति अत्र परस्मिन्नात्मनीति शरीरेन्द्रियसङ्घातो गृह्यते । प्रागप्येतत् विस्तरेण द्वितीयनिरूपणे द्वितीयप्रदर्शके तृतीयपक्षे प्रमाणतारतम्यविचारप्रकरणे 'सदा प्रमितमेकत्व' मित्यादिना प्रदर्शितम् ॥ ६० ॥

अ० ॥ एतावता ग्रन्थेन प्रतिपादितार्थं सूतसंहितावाक्यं प्रमाणयति **पूर्णोऽहमिति**—

मू ॥ पूर्णोऽहं सर्वसाक्षित्वात् सर्वदा परमार्थतः ।
अपूर्णो युगपत् सर्वं न विजानाति कश्चन ॥
इति तत्वपरे सूतसंहिताख्ये समीरितम् ॥ ६१ ॥ ॥

व्या ॥ **सर्वेति** देहादावहम्ममेत्यध्यासतन्निवृत्तिकालादौ **अहं** शरीराद्युपाधिकः **पूर्णः** शरीराद्यसंवेष्टितत्वेन व्यापकः तत्रोपपत्तिमाह **सर्वसाक्षित्वादिति** अन्यथा बाधमाह **अपूर्ण इत्यादिना** । उपाधिपरिवेष्टितत्वेनाल्पपरिमाणवत्त्वे न सर्वज्ञत्वं घटत इत्यर्थः ॥ ६१ ॥ ॥

अ० ॥ उक्तार्थे वृद्धवाक्यानि संवादयति **एकोऽपीति**—

मू ॥ एकोऽप्यसौ सर्वगतस्सर्वज्ञत्वेन हेतुना ॥ ६२ ॥

जडजातमिदं सर्वं वेत्त्यात्मैव न चेतरः ।
नात्मानं तच्च जानाति जडवेत्ताऽत एव सः ॥ ६३ ॥
स्वस्यैव भासते सर्वं दूरवर्ति ध्रुवादि च ।
सर्वज्ञोऽतस्स्वरूपञ्च तस्मादात्मा हि सर्ववित् ॥ ६४ ॥
सर्वगत्वं विना सर्ववेत्तृत्वं नोपपद्यते ।
सर्वज्ञत्वात्सर्वगत्वं सिद्धमेकस्य चात्मनः ॥ ६५ ॥

व्या ॥ **असाविति** शरीरादिसङ्घातवन्तमात्मनमुद्दिश्य सर्वगत इत्युपाधिवेष्टितत्वभ्रमनिरासाय व्यापकत्वं साध्यते । तत्र हेतुमाह **सर्वज्ञत्वेन हेतुनेति** । हेतुमेवोपपादयति जडजातमित्यारभ्य सर्वज्ञोऽतस्स्वरूपञ्चेत्यन्तेन । यतश्चैवं जीवस्य स्वरूपचैतन्यमेव सर्वावभासकं भवत्यतः सर्वावभासकस्य एव सर्वज्ञ इति हेतुमुपन्यस्य हेत्वन्तरं दर्शयति **तस्मादात्मा हि सर्वविदिति** यस्मादात्मैव सर्वज्ञः तस्मात् स एव सर्वं विशेषतोऽप्यवभासयतीत्युक्त्वा आत्मनः अज्ञानादिना परिवेष्टितत्वे बाधमाह **सर्वगत्वं विनेत्यादिना** प्रतिज्ञातमनुमानमुपसंहरति **सर्वज्ञत्वादिति** ॥ ६५ ॥

अ० ॥ एवं जीवे प्रतीयमानस्याल्पत्वस्योपाधिपरिवेष्टनकृतत्वं निराकृत्य अधुनोपाधिगतपरिमाणसंसर्गाध्यासप्रयुक्तत्वमप्यनावश्यकमित्याह **नन्विति**--

मू ॥ ननु गात्रगतालपत्वधर्माध्यासश्चिदात्मनि ।
नोपेयः किमुपेयस्स्यादिति चेन्नात्र निर्भरः ॥ ६६ ॥

व्या ॥ स्पष्टोऽर्थः ॥ ६६ ॥

अ० ॥ प्रतिज्ञातमेव प्रश्नपूर्वकमुपपादयति **जीव इति**--

मू ॥ जीवेऽल्पत्वमुपाधिवेष्टनकृतं तन्मानसंसर्गतो
वा स्याच्चेद्विधुमण्डले कुत इमां प्रादेशतां मन्यसे ।
तद्वृत्त्या यदि वेष्टनान्न हि मतेर्बिम्बाद्विशालत्वतो
मेधीयाद्यदि नाम्बुदेऽसति दृशेर्मिथ्यैवमात्माल्पता ॥ ६७ ॥

व्या ॥ विधुमण्डले पूर्णचन्द्रमण्डल इति यावत् । **कुत इति** । उपाधेः परिवेष्टनपरिमाणाद्वयोर्मद्ध्ये कतरस्माद्धेतोरुत्पन्नत्वेन प्रादेशतां मन्यस

इति परिचोद्य परोक्तिमनुवदति **तद्वृत्त्येत्यादिना** तत्र प्रादेशत्वग्राहकवृत्त्या चन्द्रमण्डलस्य परिवेष्टनादित्यर्थः। निराकरोति **न हीत्यादिना** शकटचक्रनेमिपरिवेष्टकस्यायःपट्टस्येव चन्द्रबिम्बादपि तत्परिवेष्टकवृत्तेरधिकवैशाल्यादित्यर्थः । तर्हि चन्द्रमण्डलसन्निहितस्य मेघखण्डस्य चलनवत् तदीयप्रादेशताभ्रमोऽपि चन्द्रमण्डले भवतीति पूर्वपक्षमनुवदति **मेघीयाद्यदीति** नापि चन्द्रमण्डले मेघखण्डगतप्रादेशताभ्रमसिद्धिरित्याह **नाम्बुदेऽस्तीति दृशेरिति** चन्द्रमण्डलसमीपे असत्यप्यम्बुदे प्रादेशताभ्रमानुभवादित्यर्थः । कथं तर्हि तत्र प्रादेशताभ्रतीतेर्विषयसिद्धिरित्यत आह । **मिथ्येति** अनिर्वचनीयेनाज्ञानेन स्वरूपतः अध्यस्तेति यावत् । इदानीमारोपितचन्द्रगतप्रादेशतानिदर्शनेन परिपूर्णे जीवे परिच्छिन्नत्वस्य स्वरूपतोऽध्यस्तत्वं साधयति **एवमात्मालपतेति** ॥ ६७ ॥

अ० ॥ एवमज्ञानतत्कार्ययोरात्मभिन्नसत्ताकत्वेऽपि निरवयवात्मपरिवेष्टकत्वाभावमुपपाद्याधुना आत्ममात्रसत्ताकत्वप्रक्रिययापि तं साधयति **दीर्घेति**–

मू ॥ दीर्घाधारपटे यथा विरचितः कुम्भः कुसूलो मठ-
स्त्वाधारस्य न वेष्टने तु चतुरस्रसत्ताभिदाऽभावतः ।
तद्वत्स्वात्मनि कल्पितं वपुरिदं सूक्ष्मं च तत्कारणम्
स्वाधारस्य न वेष्टने च चतुरं व्यक्त्यन्तराभावतः ॥ ६८ ॥

व्या ॥ यथा पटे तन्निर्मात्रा धात्वन्तरं विनैव कृतिवैचित्र्यात् कल्पितं चित्रघटादिकं न स्वाधारपटसंवेष्टकं भवति पटसंवेष्टकमृत्कुम्भस्येव पृथक् स्वरूपाभावात् । तद्वत् प्रत्यगात्मनि कल्पितस्य शरीरत्रयस्यापि ततः पृथग्व्यक्त्यभावात् न तत्संवेष्टकत्वमित्यर्थः ॥

किञ्च वियत्पादे–'तदुणसारत्वात्तु तद्व्यपदेशः प्राज्ञव' दिति सिद्धान्तसूत्रस्य अनेन नैतदस्त्यणुरात्मेति उत्पत्त्यश्रवणात् परस्यैव तु ब्रह्मणः प्रवेशश्रवणात्–तादात्म्योपदेशाच्च परमेव ब्रह्म जीव इत्युक्तं–तस्मात् यावत् परं ब्रह्म तावानेव जीवो भवितुमर्हति–परस्य च ब्रह्मणो विभुत्वमाम्नातं तस्मात् विभुर्जीवः । तथा च 'स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणे' ष्वित्येवं जातीयकाः जीवविषया विभुत्ववादाश्रौतास्स्मार्त्ताश्च समर्थिता भवन्तीति भाष्येणान्तःकरणादौ ब्रह्मणस्तादात्म्याध्यासपरां प्रवेशश्रुतिमवलंब्यापिजीवस्य सोपाधिकदशायाञ्च विभुत्वव्यवस्थापनेन नोपाधिपरिवेष्टितत्वं संभवतीति सिद्धम् ॥ ६८ ॥

अ० ॥ इदानीं तृतीयनिरूपणार्थवेदनफलमाह **एतदिति**—

मू ॥ एतन्निरूपणाज्जन्यं ज्ञानं येनैव धार्यते ।
तस्यैव सर्वदा स्वस्य पूर्णत्वं भासते स्वतः ॥ ६९ ॥

व्या ॥ **सर्वदेति** सोपाधिकदशायामपीत्यर्थः ॥ शेषस्सुगमः ॥ ६९ ॥

इति श्रीपरमहंसपरिव्राजकाचार्यरामब्रह्मश्रीकृष्णानन्देन्द्रभगवत्पादशिष्य-
श्रीमच्चन्द्रिकाचार्याख्ययतीश्वरविरचितायामद्वैतरसञ्जरी-
नामकव्याख्यानोपेतायामद्वैतसिद्धान्तगुरुचन्द्रिकायां
तृतीयनिरूपणं संपूर्णम् ॥

ब्रह्मैवाहमस्मि ।
॥ **ओं तत्सत्** ॥

॥ हरिः ओम् ॥

अद्वैतसिद्धान्तगुरुचन्द्रिकायां

चतुर्थं लक्ष्यैक्यमात्राविरोधि जगत्सत्यत्वपरं प्रतिकर्मव्यवस्थावादनिरूपणमारभ्यते ॥

अयमेव ईश्वरेण सृष्टस्य दृष्टिवाद इति सृष्टदृष्टिवाद इत्युच्यते ।

अ० ॥ प्रथमनिरूपणारम्भे धर्मे प्रकृतिता भाती ' ति चतुर्थाभिप्रायमावेद्य ' तद्विशेषाञ्छाधि नो गुरो ' इति शिष्यैः प्रार्थितस्सन् जगतः कर्मजन्यत्वे कर्म-तत्फलयोर्द्वैतवाद्यभिमतं सत्यत्वमेव विशेष इत्याह **जगदिति**—

मू ॥ जगन्मिथ्यात्वदार्ढ्याय पूर्वपक्षतयाऽत्र तु ।
कर्मप्रकृतिकत्वे तु सत्यताऽस्य निरूप्यते ॥ १ ॥

व्या ॥ **अत्रेति** चतुर्थनिरूपण इति यावत् । **अस्येति** जगत इत्यर्थः ॥१॥

अ० ॥ प्रतिकर्मव्यवस्थासिद्धान्तानभिज्ञस्य प्रश्नमवतारयति **जगत इति-**

मू ॥ जगतः कर्मजन्यत्वे लक्ष्यज्ञानादनाश्यता ।
सत्यता कुत आयाति तद्धेतुं मानतो वद ॥ २ ॥

व्या ॥ कर्मजन्यत्व इति जगतः कर्मप्रकृतिकत्वे तन्निमित्तकत्वे वेत्यर्थः । शेषस्सुगमः ॥ २ ॥

अ० ॥ इदानीं 'तदेतत् सत्यं मन्त्रेषु कर्माणि कवयो यान्यपश्यंस्तानि त्रेतायां बहुधा सन्ततानि । तान्याचरथ नियतं सत्यकामा एष वः पन्थास्सुकृतस्य लोक' इति मुण्डकोपनिषदि प्रथममुण्डके श्रूयते । अस्येदं भाष्यं 'तदेतत् सत्यं अवितथं किं तत् मन्त्रेषु ऋग्वेदाद्याख्येषु कर्माणि अग्निहोत्रादीनि मन्त्रैरेव प्रकाशितानि कवयः मेधाविनो वसिष्ठादयः यान्यपश्यन् दृष्टवन्तो यच्चान्यत् तदेतत् सत्यम्-एकान्तपुरुषार्थसाधनत्वात् तानि च वेदविहितानि ऋषिदृष्टानि कर्माणि त्रेतायां त्रेतायां युगे बहुधा बहुप्रकारेण सन्ततानि प्रवृत्तानि कर्मिभिः क्रियमाणानि अतो यूयं तान्याचरथ निर्वर्तयथ नियतं नित्य सत्यकामाः यथाभूतकर्मफलकामास्सन्तः-टिप्पणं-**यथार्थरूपकर्मफलकामास्सन्त इति** एष वः युष्माकं यथा पन्थाः मार्गः सुकृतस्य स्वयं निर्वर्तितस्य कर्मणो लोकं फलनिमित्तं लोक्यते दृश्यते भुज्यते इति कर्मफलं लोक इत्युच्यते तदर्थं तत्प्राप्तये एष मार्ग इत्यर्थः इत्यादिकं सागमं भाष्यादिकं वक्ष्यमाणश्रुत्यादिकञ्चावलम्ब्य ॥ श्लो० ॥ सत्यता कुत आयाति तद्धेतुं मानतो वदेति जगत्सत्यत्वे हेतुं जिज्ञासमानानां साक्षात्प्रणाड्यावा प्रयत्नजन्यत्वात् सत्यत्वं भवेदित्याह **हुतेति** —

मू ॥ हुतसोमादिहोम्यानां परिणामात्मकं हि यत् ।
द्रव्यरूपमपूर्वं तत् सत्यं भवितुमर्हति ॥ ३ ॥
यत्नजन्यत्वतो यद्वत्संयोगः परसम्मतः ।
तज्जन्यकार्यवच्चैतत् जगत्सत्यं भवेत्खलु ॥ ४ ॥

व्या ॥ तज्जन्येति संयोगजन्येत्यर्थः । शेषस्सुगमः । ननु यत्नजन्यत्वत इति हेतोः सञ्चितकर्मणि व्यभिचारः तस्य असङ्गात्मज्ञाननिवर्त्यत्वेन सत्यत्वाभावादिति चेन्न अस्मिन्पूर्वपक्षनिरूपणे धर्मेण पापमपनुदतीत्येवञ्जातीयकशास्त्रानुवर्तिनां द्वैतिनां मतानुसारेण कर्मतत्फलयोः सत्यत्वसाधकमनुमानादिकं निरूप्यते न तन्मते आत्मनोऽसंगत्वं तज्ज्ञाननिवर्त्यत्वं वा कर्मणि अतो न हेतोर्व्यभिचारः

एतदनुमानादेः पञ्चमनिरूपणे वक्ष्यमाणैः अद्वैतिनामनुकूलैः लिङ्गादीनां परिसङ्ख्या-त्वपरैर्जगतः केवलाविद्यकत्वबोधकैश्च शास्त्रैः बाध्यमानत्वमिष्टमेव ॥ ४ ॥

अ० ॥ प्रतिज्ञातार्थं श्रीमद्विद्यारण्याचार्यकृतपञ्चदशीवाक्यं संवादयति **अपरोक्षेति**—

मू ॥ अपरोक्षशिलाबुद्धिर्न परोक्षेशतां नुदेत् ।
इत्यत्र प्रतिमायां सा विहिताऽऽध्यासिकीशता ॥ ५ ॥
नाधिष्ठानधिया नश्येत्प्रयत्नज्ञानजत्वतः ।
अयत्नाज्ञानजस्वप्नवस्तुव्यतिरेकतः ॥ ६ ॥
इति न्यायाद्यत्नजन्यं सत्यं कर्मादिकं भवेत् ॥ ६॥ ॥

व्या ॥ स्पष्टोऽर्थः ॥

ननु यत्पुनरुक्तं प्रयत्नज्ञानाभ्यां जायमानं न मिथ्येति तन्न प्रयत्नज्ञानजन्ये मिथ्येतिशब्दे मिथ्यात्वदर्शनात् न विषमोऽयमुपन्यासः । तथा हि मिथ्यात्वं तावत् द्विविधं शब्दगतमर्थगतञ्चेति शब्दगतं तावदर्थशून्यत्वं अर्थगतं तु ज्ञाननाश्यत्व-मिति विवेकः तथा च सति मिथ्याशब्देऽर्थशून्यत्वरूपमिथ्यात्वस्य विद्यमानत्वेऽपि न ज्ञाननाश्यत्वरूपं मिथ्यात्वं संभवति मिथ्याशब्दाश्रये तत्प्रयोक्तरि साक्षात्कृतेऽपि तदुदीर्यमाणमिथ्याशब्दस्य तदधिष्ठानज्ञाननाश्यत्वाभावदर्शनात् अन्यथा साक्षात्कृ-तात् अनृतवादाय नियुज्यमानात् न मिथ्यावचनमुत्पद्येत कथं तर्ह्यद्वैतिनां नाम-रूपात्मकस्यास्य जगतो ज्ञाननाश्यत्वमिति चेदुच्यते ।

यथा हि स्वप्ने स्वस्य श्रोत्रेन्द्रियाद्यभावेऽपि श्रूयते दृश्यते चेति अन्यथा गृही-तयोर्नामरूपयोः परकीयकण्ठताल्वाद्याभिघातजन्यत्वादिकं विना स्वकीयाविद्या-मात्रजन्यत्वेन तदधिष्ठानस्वात्मज्ञाननाश्यत्वं तद्वदस्यापि नामरूपात्मकस्य जगतः सम्भवति ।

अयमेवाभिप्रायो ज्योतिष्टोमादिश्रुतिबोधितानुष्ठानात्फलसिद्धिस्तु स्वप्नश्रुति-बोधितानुष्ठानप्रयुक्तफलसंवादतुल्येति सिद्धान्तलेशसङ्ग्रहे द्वितीयपरिच्छेदे दृष्टिसृष्टि-वादसमर्थनपरात् दीक्षितवचनाच्चावगम्यते ॥ ६॥ ॥

अ० ॥ अपूर्वस्य द्रव्यात्मकत्वे किं प्रमाणमिति प्राप्ते 'असौ वा आदित्यो देवमधु तस्य द्यौरेव तिरश्चीनवंशः अन्तरीक्षमपूपः मरीचयः पुत्राः तस्य ये प्राच्यो रश्मयः ता एवास्य प्राच्यो मधुनाड्यः ऋच एव मधुकृतः ऋग्वेद एव पुष्पं ता अमृता आपः' इति छान्दोग्ये तृतीयाद्ध्याये प्रथमखण्डे आदित्यस्वर्गान्तरिक्ष-

भौमोदकरश्म्यृग्वेदतत्कर्मतज्जन्यद्रव्यरूपापूर्वेष्वष्टस्वधिकरणेषु मधु तिर्यग्वंशापूपभ्रमरपुत्रमधुरंध्रभ्रमरपुष्परसानां अष्टानां दृष्टिविधायकं वाक्यं श्रूयते अस्येदं भाष्यं–यथा च माक्षिकस्य मधुनः पुष्परसः प्रकृतिः तथा वैदिकस्य फलभूतस्य मधुनः कर्मरसः प्रकृतिः ऋच एव मधुकृतः रोहितरूपं सवित्राश्रयं मधु कुर्वन्ति मधुकृतो भ्रमरा इव यतो रसानादाय मधु कुर्वन्ति तत् पुष्पमिव पुष्पमृग्वेद एव तत्र ऋग्ब्राह्मणसमुदायस्य ऋग्वेदाख्यत्वात् शब्दमात्राच्च भोग्यरूपरसनिस्रावासम्भवात् ऋग्वेदशब्देनात्र ऋग्वेदविहितं कर्माभिलप्यते ततो हि कर्मफलभूतमधुरसनिस्रावसम्भवात् मधुकरैरिव पुष्पस्थानीयादृग्वेदविहितात् कर्मणः अप आदाय ऋग्भिर्मधु निर्वर्त्यते कास्ता आप इत्यत आह ताः कर्मणि प्रयुक्तास्सोमाज्यरूपा अग्नौ प्रक्षिप्तास्तत्पाकाभिनिर्वृत्ता अमृतार्थत्वात् अत्यन्तरसवत्य आपो भवन्तीत्यादि तदेतत् श्रुतितद्भाष्यद्वयमपूर्वस्य द्रव्यत्वप्रकृतित्वपरमर्थतस्सङ्गृह्य प्रमाणयति छान्दोग्य इति––

मू ॥ छान्दोग्ये तु तृतीयस्य प्रपाठस्याद्यखण्डके ॥ ७ ॥

आदित्यादिषु मध्वादिदृष्टिरुक्ता हि तत्र तु ।
ऋग्वेदविहिते धर्मे पुष्पदृष्टिं समीर्य च ॥ ८ ॥
अग्नौ ता हुतसोमाद्या आपो वह्निप्रदाहतः ।
द्रव्यापूर्वात्मिकास्सत्यः पुष्पतोयसमा इमाः ॥ ९ ॥
मधुनः प्रकृतिस्तास्स्युरिति भाष्यादिके स्मृतम् ॥ ९॥ ॥

व्या ॥ अवतरणादेवात्रगतार्थः ॥ ९॥ ॥

अ० ॥ इदानीं समस्तस्य खलु साम्न उपासनं साध्वित्युपक्रम्य 'लोकेषु पञ्चविधं सामोपासीत पृथिवी हिंकारः अग्निः प्रस्तावः अन्तरिक्षमुद्गीथः आदित्यः प्रतिहारः द्यौर्निधन' मित्यादिश्रुतिं तदीयमिदं कानि पुनस्तानि साधुदृष्टिविशिष्टानि समस्तानि सामान्युपास्यानीति–इमानि तान्युच्यन्ते–लोकेषु पञ्चविधमित्यादीनि ।

ननु लोकादिदृष्ट्या तान्युपास्यानि साधुदृष्ट्या चेति विरुद्धम् न साध्वर्थस्य लोकादिकार्येषु कारणस्यानुगतत्वात् मृदादिवद्घटादिविकारेषु–साधुशब्दवाच्यार्थो धर्मो ब्रह्म वा–सर्वथापि लोकादिकार्येष्वनुगतम्–अतः यथा यत्र घटादिदृष्टिः मृदादिदृष्ट्यनुगतैव सा तथा साधुदृष्ट्यनुगतैव लोकादिदृष्टिः–धर्मादिकार्यत्वात् लोकादीनां–

यद्यपि कारणत्वमविशिष्टं ब्रह्मधर्मयोः–धर्म एव साधुशब्दवाच्य इति युक्तम्–साधुकारी साधुर्भवतीति धर्मविषये साधुशब्दप्रयोगदर्शनादिति भाष्यञ्चापूर्वस्य प्रकृतित्वादौ सङ्गृह्णाति **छान्दोग्यस्येति**—

मू ॥ छान्दोग्यस्य द्वितीये तु प्रपाठे चाद्यखण्डके ॥ १० ॥
पाञ्चभक्तिकसामादौ धर्मदृष्टिं तु साध्विति ।
उक्त्वा द्वितीयखण्डेन लोकध्याने समीरिते ॥ ११ ॥
ननु दृष्टिद्वयं कर्तुं कथमेकत्र शक्यते ।
यदि भूरादिकं कार्यं धर्मस्तत्प्रकृतिस्ततः ॥ १२ ॥
भूरादिधीर्धर्मबुद्ध्या साकं भवितुमर्हति ।
विकारविषयत्वान्मृद्धीयुक्ता घटधीर्यथा ॥ १३ ॥
इति भाष्याद्यपूर्वस्य द्रव्यत्वादौ प्रमाणकम् ॥ १३॥ ॥

व्या ॥ पाञ्चभक्तिकसामादावित्यादिशब्देन साम्नभक्तिकसाम परिगृह्यते । तस्मिन्नधिकरणे धर्मभावनां साध्विति पदेन आदिश्य द्वितीयखण्डेन 'लोकेषु पञ्चविधं सामोपासीत पृथिवी हिङ्कार' इत्यादिना हिङ्कारादिसाम्नि पृथिव्यादिलोकदृष्ट्यां समीरितायां तत्र चोद्य तत्परिहारपरं नन्वित्यादिभाष्यं संगृह्णाति **नन्वित्यादिना** एकत्रेति साम्नीत्यर्थः । तत इति पृथिव्यादिलोकानां धर्मप्रकृतिकत्वादित्यर्थः शेषस्सुगमः ॥ १३॥ ॥

अ० ॥ संप्रति छान्दोग्ये पञ्चमाध्याये 'असौ वाव लोको गौतमाग्निः पर्जन्यो वाव गौतमाग्निः पृथिवी वाव गौतमाग्निः पुरुषो वाव गौतमाग्निः योषा वाव गौतमाग्नि' रिति चतुर्थादिखण्डेषु क्रमादग्निदृष्ट्यधिकरणत्वेन द्युलोकादिकमुपदिश्य तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां सोमं वर्षं अन्नं रेतो जुह्वतीत्यावेद्य तस्या आहुतेस्सोमो वर्षं अन्नं रेतो गर्भस्संभवती'ति श्रुतिं तदीयञ्च श्रद्धां अग्निहोत्राहुतिपरिणामावस्थारूपाः सूक्ष्मा आपः श्रद्धाभावितः श्रद्धा उच्यन्त इत्यारभ्य तां श्रद्धामप्रूपां जुह्वति तस्या आहुतेस्सोमो राजा अपां श्रद्धाशब्दवाच्यानां द्युलोकाग्नौ हुतानां परिणामः सोमो राजा संभवति । यथा ऋग्वेदादिपुष्परसाः ऋगादिमधुकरोपनीताः ते आदित्ये यश आदिकार्यं रोहितादिरूपलक्षणमारभन्त इत्युक्तम् तथेमाः अग्निहोत्राहुतिसमवायिन्यः सूक्ष्माः श्रद्धाशब्दवाच्या आपः द्युलोकमनु-

प्रविश्य चान्द्रं कार्यमारभन्ते फलरूपमग्निहोत्राहुत्योरितीदं भाष्यमप्यपूर्वस्य द्रव्यत्वादौ संगृह्य प्रमाणयति **छान्दोग्य इति**—

मू ॥ छान्दोग्ये पञ्चमाध्याये चतुर्थादिषु षट्सु ॥ १४ ॥
तस्य तस्याद्यवाक्येऽग्निमुक्त्वा तत्तद्वितीयके ।
तत्तद्धाष्ये च टीकायामपूर्वं परिणामि यत् ॥ १५ ॥
द्रव्यं तद्विकृतिस्सोमवृष्ट्यन्नेन्द्रियगर्भकाः ।
इत्युक्त्वैवं जगत्सृष्टिरुक्त्वा वाजसनेयके ॥ १६ ॥
इति प्रदर्शितं तस्मादपूर्वं प्रकृतिर्भवेत् ॥ १६॥ ॥

व्या ॥ चतुर्थादिपञ्चखण्डेषु तत्तत्खण्डस्याद्यखण्डिकायां द्युलोकादिकमग्नित्वेनादिश्य द्वितीयखण्डिकातद्भाष्यादिषु यदपूर्वं यागाङ्गानां सोमाज्यादीनां परिणामभूतं द्रव्यरूपं तत् स्वकार्यं प्रति परिणामिकारणं तद्विकारा एव सोमाख्यदेवशरीरादिगर्भान्ता इत्युपदिश्यानन्तरं छान्दोग्य इव वाजसनेयकेऽप्यपूर्वप्रकृतिकत्वेन जगतः सृष्टिरुक्तेति प्रदर्शितं भाष्यकारादिभिरिति शेषः । अतोऽपि प्रतिज्ञातार्थसिद्धिः ॥

अ० ॥ इदानीं प्राग्भाष्यकारैः प्रतिज्ञातमेव 'तस्मिन्सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च नेति पयसि हीदं सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च नेति' वाजसनेयवाक्यं' तदीयमिदं तस्मिन् पश्वन्ने पयसि सर्वमध्यात्माधिभूताधिदैवलक्षणं कृत्स्नं जगत्प्रतिष्ठितं यच्च प्राणिति प्राणचेष्टावत् यच्च न स्थविरं शैलादि तत्र च हिशब्देनैव प्रसिद्धद्योतकेन व्याख्यातम् । कथं पयोद्रव्यस्य सर्वप्रतिष्ठात्वं कारणत्वोपपत्तेः कारणत्वञ्च अग्निहोत्रादिकर्मसमवायित्वं अग्निहोत्राद्याहुतिविपरिणामात्मकञ्च जगत्कृत्स्नमिति श्रुतिस्मृतिवादाश्शतशो व्यवस्थिताः—टि—**विशेषेणावस्थिताः** अतो युक्तमेव हिशब्देन व्याख्यातुमिति भाष्यं चार्थतः संगृह्यापूर्वस्य द्रव्यत्वप्रकृतित्वांशे प्रमाणयति **अध्याय इति**—

मू ॥ अध्याये बृहदारण्ये तृतीये पञ्चमे किल ॥ १७ ॥
ब्राह्मणे पयसीदं हि जङ्गमादि प्रतिष्ठितम् ।
इत्युक्तमस्य वेदस्य भाष्यकारैस्तथेरिते ॥ १८ ॥

कथं तत्पयससस्सर्वप्रतिष्ठात्वं भवेदिति ।
चोद्ये सति समाधाय कारणत्वाद्धवेदिति ॥ १९ ॥
समवायित्वरूपं तत् कारणत्वं क्रियां प्रति ।
अग्निहोत्राद्याहुतीनां परिणामात्मकं जगत् ॥ २० ॥
इति श्रुतेस्स्मृतेर्वादाश्शतशश्च व्यवस्थिताः ।
इति श्रीभाष्यकारोक्त्या द्रव्यापूर्वमयञ्जगत् ॥ २१ ॥

व्या ॥ कारणत्वात्पयसः सर्वप्रतिष्ठात्वोपपत्तेरिति समाधानस्यैव विवरणपरं भाष्यं सङ्गृह्णाति । समवायित्वरूपमित्यादिना । शेषस्सुगमः ॥ २१ ॥

अ० ॥ पयसः सर्वजगदाधारत्वस्य श्रुतिस्मृतिवादव्यवस्थितत्वं यद्भाष्यकारैरुपादिष्टं तन् सदृष्टान्तमाह **अध्यात्मेति**—

मू ॥ अध्यात्मसाङ्ख्यशास्त्राणां चित्प्रधानं क्रमाद्यथा ।
तथा कर्मश्रुतिस्मृत्योः कर्मास्य प्रकृतिर्मतम् ॥ २२ ॥

व्या ॥ द्रव्यापूर्वरूपं कर्मैवास्य जगतः प्रकृतिरिति मतमित्यर्थः ॥ २२ ॥

अ० ॥ इदानीं शारीरकमीमांसायां तृतीयाध्यायस्य प्रथमपादे 'अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीते' रिति सूत्रं तदीयं तेषाञ्चाग्निहोत्रदर्शपूर्णमासादिकर्मसाधनभूताः दधिपयःप्रभृतयो द्रवद्रव्यभूयस्त्वात् प्रत्यक्षमेवापः सम्भवन्ति ता आहवनीये हुतास्सूक्ष्मा आहुत्यः अपूर्वरूपाः सत्यः तानिष्टादिकारिण आश्रयन्ति तेषां च शरीरं नैधनेन विधानेनान्त्येऽग्नौ ऋत्विजो जुह्वति असौ स्वर्गाय लोकाय स्वाहेति । ततस्ताः श्रद्धापूर्वककर्मसमवायिन्य आहुतिमय्य आपः अपूर्वरूपास्सत्यः तानिष्टादिकारिणो जीवान्परिवेष्यामुं लोकं फलदानाय नयन्तीति भाष्यञ्च तदीयं तेषां सूक्ष्माभिः द्रव्यापूर्वरूपाभिः पञ्चीकृताभिरद्भिस्सम्बन्धं वदन् सहगतिं विवृणोति । तेषां चाग्निहोत्रेतीति रामानन्दमुनिकृतमवतरणञ्चान्यान्यप्यपूर्वसद्भावपराणि सूत्रतद्भाष्याणि चापूर्वस्य द्रव्यत्वप्रकृतित्वज्ञापनाय सङ्गृह्णाति **व्यासाद्या इति**—

मू ॥ व्यासाद्यास्साधनाध्याये पादे प्राथमिके विधेः ।
द्रव्यापूर्वाणि जायन्ते सोमाद्यास्तन्मया यथा ॥ २३ ॥

निषिद्धात्कर्मणोऽप्येवं द्रव्यापूर्वं प्रजायते ।
तदेव हेयगात्राणां प्रकृतिश्चेति ते जगुः ॥ २४ ॥

व्या ॥ विधेरिति । विधीयत इति विधिः कर्म तस्मात् विहितादित्यर्थः । सोमाद्या इति सोमाख्यं देवशरीरमादिर्येषां वृष्ण्यन्नरेतोगर्भपुरुषाणां ते सोमाद्याः । तन्मया इति द्रव्यापूर्वविकाराः स्पष्टमन्यत् ॥ २४ ॥

अ० ॥ अधुना अपूर्वस्य द्रव्यत्वप्रकृतित्वपरं प्रमाणनिरूपणमुपसंहरति **बहुनेति**—

मू ॥ बहुना किमुपास्तेर्वा कर्मणो वा फलन्तु यत् ।
द्रव्यापूर्वविकारस्तद्विस्तरादुपरम्यते ॥ २५ ॥

व्या ॥ कस्य चिदहंग्रहोपासनस्य ब्रह्मपरिणाममूतोपासकात्ममात्रद्रव्यकत्वात् । तदात्मपरिणाममूतस्य द्रव्यापूर्वस्य विकार एव सत्यकामत्वादिविशिष्टात्मस्वरूपम् । तथाचोक्तं आरम्भणसूत्रभाष्यावसाने 'भोक्तापत्तेरविभागश्चेत्स्याल्लोकवत्' इति सूत्रतात्पर्यं । सूत्रकारोऽपि परमार्थाभिप्रायेण तदनन्यत्वमित्याह व्यवहाराभिप्रायेण तु—टि—**उपासनादिकर्मजमेव समस्तं फलात्मकं जगदिति व्यवहाराभिप्रायेणैव** स्याल्लोकवदिति महासमुद्रस्थानीयतां ब्रह्मणः कथयति अप्रत्याख्यायैव कार्यप्रपञ्चं परिणामप्रक्रियां चाश्रयति—सगुणोपासनेषूपयोक्ष्यत इति। तथैव ॥ श्लो० ॥ कृपणधीः परिणाममुदीक्षते क्षपितकल्मषधीस्तु विवर्ततामिति रामानन्दस्वामिभिरपि तत्र वृद्धसम्मतिश्च दर्शिता—अतः फलस्य कर्मजत्वपक्षे यत्किञ्चद्द्रव्यप्रकृतिकापूर्वपरिणामत्वमेव भवेत्—न मायिकत्वं ब्रह्मविवर्तत्वं वेत्यास्थेयम् ॥ २५ ॥

अ० ॥ प्राक् तृतीयादिश्लोके द्रव्यापूर्वात्मकस्य धर्मस्य यत्सत्यत्वमनुमितं तत्र पुनरप्यागमसद्भावं प्रतिजानीते **फलेति**—

मू ॥ फलारम्भकधर्मस्य सत्यत्वे श्रुतिरुच्यते ॥ २६ ॥ ॥

व्या ॥ स्पष्टोऽर्थः ॥ २६ ॥ ॥

अ० ॥ 'यो वै स धर्मः सत्यं वै तत् तस्मात् सत्यं वदन्तमाहुर्धर्मं वदतीति धर्मं वा वदन्तं सत्यं वदतीत्येतद्वैतदुभयं भवतीति,' इमां श्रुतिं धर्मस्य सत्यत्ववेदनायार्थतः [illegible]ति **यो धर्म इति**—

मू ॥ यो धर्मस्य तु सत्यं स्याच्छब्दतश्चार्थतस्ततः ॥ २६ ॥

सत्यं वदन्तमाहुस्ते धर्मं हि वदतीत्ययम् ।
धर्मं वदन्तमाहुस्ते सत्यं हि वदतीति च ॥ २७ ॥
इति श्रीबृहदारण्ये तृतीयस्य चतुर्थके ।
खण्डे चतुर्दशेऽप्युक्तं पर्यायत्वं तयोर्यतः ॥ २८ ॥

व्या ॥ **यो धर्मस्य तु सत्यं स्यादिति** धर्मस्य सत्यत्वं प्रतिज्ञाय तत्र लोकप्रसिद्धिप्रदर्शनपरां तस्मादित्यादिकां श्रुतिं सङ्गृह्णाति **तत इत्यादिना** एवं कुत्रोक्तमित्याकाङ्क्ष्य बृहदारण्ये तृतीयाध्यायस्य चतुर्थब्राह्मणे चतुर्दशखण्डे अपिशब्दात् तद्ब्राह्मणेऽप्युक्तमित्याह **इति श्रीबृहदारण्य इत्यादिना तयोरिति** सत्यधर्मशब्दयोः यस्मात् पर्यायत्वमेकार्थपरत्वमुक्तम्-तस्मात् धर्मस्य सत्यत्वं सिद्धमित्यर्थः ॥ २८ ॥

अ० ॥ पापस्यापि सत्यत्वं लोकानुभवानुमानाभ्यां दर्शयति **साक्षीति**——

मू ॥ साक्षिवादाय निर्दिष्टः परपापमुवाच चेत् ।
पार्श्वस्थास्सत्यमेवायं वदतीति ब्रुवन्त्यतः ॥ २९ ॥
पापञ्च सत्यसञ्ज्ञं नृहेतुत्वात्पुण्यकर्मवत् ॥ २९॥ ॥

व्या ॥ **अत इति** द्वैतिभिः पुण्यतत्फलेष्विव पापतत्फलेष्वपि सत्यशब्दस्य प्रयुक्तत्वात् पापमपि सत्यशब्दवाच्यमित्युक्त्वा तत्रानुमानप्रदर्शनार्थं हेतुमाह **नृहेतुत्वादिति** तत्र दृष्टान्तमाह **पुण्यकर्मवदिति** उभाभ्यामेव मनुष्यलोकमिति श्रुतेः—पुण्यपापाभ्यामेव मनुष्यशरीरमारभ्यत इत्यर्थः ॥ २९॥ ॥

अ० ॥ अधुना कर्मकार्यस्य सत्यत्वे प्रतिज्ञापूर्वकं ब्राह्मं वाक्यं प्रमाणयति **द्रव्येति**—

मू ॥ द्रव्यापूर्वमयस्यास्य सत्यत्वे मानमुच्यते ॥ ३० ॥
यथाभातस्वरूपेण सत्यत्वेन जगच्छ्रुतिः ।
अङ्गीकृत्य हितं नृणां कदाचिद्वक्ति सादरम् ॥ ३१ ॥
सत्यत्वेन जगज्ज्ञानं संसारस्य प्रवर्तकम् ।
इति श्रीब्रह्मगीतायामध्याये द्वादशे स्मृतम् ॥ ३२ ॥

व्या ॥ अस्त्येति जगत इत्यर्थः । पूर्वं तावत् 'जगद्रूपतयाप्येतद्ब्रह्मैव प्रतिभासत' इत्यादिश्लोकेन जगतो ब्रह्ममात्रप्रकृतिकत्वेन ब्रह्मातिरेकेण स्वरूपतोऽसत्वमेव 'ब्रह्मैवेदं सर्वं' मित्यादिश्रुत्याभिप्रेतामिति श्रीचतुराननेनोपदिष्टे सति कथं तर्हि 'तदेतत्सत्यं मन्त्रेषु कर्माणि कवयो यान्यपश्यंस्तानि त्रेतायां बहुधा सन्ततानि तान्याचरथ नियतं सत्यकामा एष वः पन्थाः सुकृतस्य लोक' इति प्रथममुण्डकादिवाक्यैश्च श्रुतिरेव कर्मप्रकृतिकत्वेन जगतः सत्यत्वं ब्रवीतीति प्राप्ते इदमाह ब्रह्मा **यथाभातस्वरूपेणेति** कर्मजत्वमेव सत्यत्वमिति भातं ज्ञातं स्वरूपं यस्य सत्यत्वस्य तद्भातस्वरूपं भातस्वरूपमनतिक्रम्य यथाभातस्वरूपं तेन यथाभातस्वरूपेण रागिणः तत्त्वाजिज्ञासाभावात्तदनिराकरणेन सहेति यावत् सत्यत्वेन यज्जगतः कर्मायत्तं लोकप्रसिद्धं सत्यत्वं तेन तदेतत्सत्यं मन्त्रेषु कर्माणि कवयो यान्यपश्यंस्तानि त्रेतायां बहुधा सन्ततानि तान्याचरथ नियतं सत्यकामा इत्यत्र सत्यकामा इति पदेन पयसि हींदं सर्वं प्रतिष्ठितमित्यत्र लोकसिद्धार्थानुवादकेन हिशब्देन कर्मप्रकृतिकत्वेनैव जगदनूद्य तस्माज्जुगुप्सेतेति श्रुतिर्विरतिमेव सादरं विदधातीति समाधानेन द्वैतिभिः प्रतिकर्मव्यवस्थावादिभिश्च गृहीतं जगत्सत्यत्वं कर्मजत्वमेवेत्यादिश्य स्वयमपि ब्रह्मा जगतः कर्मजत्वज्ञानफलप्रदर्शनेनापि कर्मजत्वमेव जगत्सत्यत्वमिति दर्शयति **सत्यत्वेनेत्यादिना** कर्मजत्वेन जगद्विषयकज्ञानमेव संसारस्य संसरतीति संसारो जीवः तस्य प्रवर्तकम् कर्मणीति शेषः इदं वाक्यं कुत्रत्यमित्यत आह **इति श्रीब्रह्मगीतायामिति ॥ ३२ ॥**

अ ॥ अस्मिन्नेवार्थे छान्दोग्यद्वितीयाध्याये त्रयोविंशस्य खण्डस्य इदं न चासत्यमित्युपमर्दिते भेदप्रत्यये सत्यमिदमनेन कर्तव्यं मयेति प्रमाणप्रमेयबुद्धिरुत्पद्यत इति भाष्यमर्थतः सङ्गृह्य प्रमाणयति **ब्रह्मेति**--

मू ॥ ब्रह्मज्ञस्य तु भोग्येऽस्मिन्सत्यत्वाभिनिवेशने ।
संस्काराज्जायमानेऽथ कर्माचरणसंभवात् ॥ ३३ ॥
नैव स्याद्ब्रह्मसंस्थेति स्वयमाशङ्क्य च वै पुनः ।
न चासत्यमिति ज्ञानान्नष्टे सत्यत्ववेदने ॥ ३४ ॥
इदं सत्यमनेनैव कर्तव्यमधुना मया ।
इति धीर्जायते चेति समाधानेन भाष्यकृत् ॥ ३५ ॥

त्रयोविंशस्य खण्डस्य छान्दोग्ये तु द्वितीयके ।
अध्याये कर्मजत्वं हि सत्यत्वमिति चाब्रवीत् ॥ ३६ ॥

व्या ॥ जगतो याथात्म्याविचारदशायां कर्मजत्वेन सत्यत्वेन च गृहीतत्वात् तद्गृहणसंस्कारवशात् जगद्याथात्म्यविचारानन्तरमप्यद्वितीयं ब्रह्मैवाहमस्मीति ब्रह्मापरोक्ष्यवतः फले सत्यत्वाभिमाने जायमाने सति तत्फलकारणकर्मानुष्ठाने प्रवृत्तौ सत्यां कथं ब्रह्मसंस्था सिद्ध्यतीति प्राप्ते 'सर्वं विकारजातं मायामात्रं ब्रह्मैवेदं सर्वं' मित्यादिश्रुत्यनुभवादिभिस्सर्वं भोग्यमसत्यमकर्मजन्यत्वश्रवणादिति ज्ञानेन सत्यत्वग्रहणे नष्टे सति इदं सत्यं फलमनेन कर्मणैव संपादनीयमिति बुद्धिर्नैव जायत इति समाधानपरेण छान्दोग्यस्य द्वितीयाध्याये त्रयोविंशस्य खण्डस्य भाष्येणाचार्यः कर्मजत्वमेव सत्यत्वमित्यब्रवीदित्यर्थः ॥ अन्यथा कर्मजस्यापि मिथ्यात्वे द्वैतमिथ्यात्वाभिनिवेशादेव-कर्मप्रवृत्तौ न ब्रह्मसंस्थेत्याशंकेतेत्यर्थः ॥ ३६ ॥

अ० ॥ उक्तभाष्यार्थविवरणमाक्षिपति **नन्विति**—

मू ॥ नन्वयं भाष्यतोऽमुष्मान्न स्पष्टं भासते ह्यतः ।
व्यावहारिकतैवास्य सत्यत्वं नेतरद्भवेत् ॥ ३७ ॥

व्या ॥ यस्मात्कारणात् प्रागुदाहृतभाष्यात् कर्मप्रवृत्तिकारणं फलगतकर्मजत्वरूपसत्यत्वज्ञानमेवेत्ययमर्थः न विस्पष्टं भात्यतः कर्मजत्वातिरिक्तव्यावहारिकसत्यत्वज्ञानमेव कर्मणि प्रवृत्तिकारणमित्याक्षेपार्थः ॥ ३७ ॥

अ० ॥ सिद्धान्ती तं चोदकं पृच्छति **कर्मेति**—

मू ॥ कर्मजत्वातिरिक्ता चेत्फलस्था सत्यता यदि ॥ ३८ ॥
तदन्यसत्यताज्ञानात् कर्मणोऽयं निवर्तताम् ।
कथं प्रवर्ततां विद्वान् कर्मणीत्यार्यदर्शितम् ॥ ३८ ॥ ॥

व्या ॥ **कर्मजत्वातिरिक्ता चेदिति** चोद्यमनूद्य परमते दोषमापादयति **तदन्यसत्यताज्ञानादित्यादिना** तस्मात् कर्मजत्वादन्यव्यावहारिकसत्यत्वरूपधर्मज्ञानात् **कर्मणः** सकाशात् परहस्तगतकाचाश्मनि कल्पितमणिगतप्रातिभासिकसत्ताज्ञाने सति तन्मणिप्राप्तिसाधनात् याचनाकर्मण इव **निवर्त्ततां-नाम** व्यावहारिकप्रातिभासिकसत्ताज्ञानयोः कर्मजत्वज्ञानातिरिक्तत्वस्य तुल्यत्वादित्यर्थः । इष्टापत्तिं वारयति **कथमित्यादिना** भवद्भिमतसत्यत्वज्ञानात् ब्रह्मविदपि कर्मणि प्रवर्ततामिति चोद्यं तत्समाधानं च कथमार्यैर्भाष्यकारैः प्रदर्शितं प्रागिति प्रश्नार्थः ॥

अ० ॥ चोदकस्समाधत्ते **कर्मप्रवृत्ताविति**—

मू ॥ कर्मप्रवृत्तौ हेतुस्सा व्यावहारिकता ह्यतः ॥ ३९ ॥

व्या ॥ यस्मात्सा व्यावहारिकसत्तैव कर्मप्रवृत्तिहेतुरतो भाष्यकारैस्तथा चोद्यादिकं दर्शितमित्यर्थः ॥ ३९ ॥

अ० ॥ सिद्धांती तदीयं समाधानं भाष्येणासंबद्धमिति दोषान्तरेण दर्शयति **तर्हीति**—

मू ॥ तर्हि भोग्ये पदार्थत्वद्रव्यत्वादिधिया विधौ ।
प्रवृत्तिस्स्यान्निषिद्धाच्च निवृत्तिस्स्याद्ब्रवीषि किम् ॥ ४० ॥

व्या ॥'पुण्येन पुण्यं लोकं नयति पापेन पाप'मित्यादि श्रुत्या पुण्यजमेव सुखावहं पापजमेव दुःखावहमिति बोधिते सति पुण्ये प्रवृत्तिः—पापाच्च निवृत्तिश्च भवति तां श्रौतप्रक्रियां विहाय कर्मजे यत्कर्मजत्वातिरिक्तं व्यावहारिकसत्यत्वं नाम कश्चिद्धर्मोऽस्ति तज्ज्ञानमेव पुण्ये प्रवर्तकं पापाच्च निवर्तकमिति चेत्—तर्हि भोग्यत्वादीनामपि व्यावहारिकसत्यत्वस्येव कर्मजन्याश्रितत्वे सति कर्मजत्वातिरिक्तत्वात् तज्ज्ञानेनापि पुंसः पुण्ये प्रवृत्तिः पापाच्च निवृत्तिश्च स्यादतो व्यावहारिकमिति परिभाषाभाषितं कर्मजमेवेत्यर्थः ॥ ४० ॥

अ० ॥ सिद्धान्तिनाऽऽपादितदोषपरवशीकृतस्संश्चोदक उत्तरमाह **सत्यत्वमिति**—

मू ॥ सत्यत्वं यत्कर्मजत्वमेव चेत्त्वं सुखी भव ॥ ४०॥ ॥

व्या ॥ यथाशास्त्रं वदन्तमनुगृह्णाति सुखीभवेति ॥ ४०॥ ॥

अ० ॥ कर्मणो जगत्कारणत्वनिराकरणपरे पञ्चमनिरूपणे प्रतिपादनीयमेव श्रीभगवत्पादकृतविवेकचूडामणिवाक्यजातमिह जगतः कर्मजत्वमेव सत्यत्वमिति प्रदर्शनार्थमुदाहरति **चूडामणीति**—

मू ॥ चूडामणिस्थवाक्यार्थालोचनात्सिद्धचतीरितम् ॥ ४१ ॥

व्या ॥ यत्प्राक्कर्मजत्वमेव जगतः सत्यत्वमितीरितम् तत्सिद्धयतीत्यर्थः ॥

अ० ॥ तत्र प्रथमतस्तावत् कञ्चिन्मन्दाधिकारिणं प्रति 'तस्या आहुतेस्सोमो राजा संभवति। पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति पयसि हीदं सर्वं प्रतिष्ठित'मित्यादि श्रुत्यवष्टंभेन कर्मप्रकृतिकत्वं देहस्य दर्शयति भगवत्पादः **कर्मणेति**—

मू ॥ कर्मणा निर्मितो देहः प्रारब्धं तस्य कल्प्यताम् ॥ ४१॥ ॥

नानादेरात्मनो युक्तं नैवात्मा कर्मनिर्मितः ॥ ४२ ॥

व्या ॥ देह इति जगतः उपलक्षणं तस्य देहस्यैव प्रारब्धाख्यं कर्म कारणमिति प्रतिकर्मव्यवस्थावादप्रक्रियया कल्प्यतां नानाद्यात्मन इत्यर्थः ॥ ४२ ॥

अ० ॥ इदानीं मध्यमाधिकारिणं प्रति ज्ञानोत्पत्तिक्षण एव जगन्निवृत्तिपरां, यत्र त्वस्य सर्वमात्मैवाभूत तत्केन कं पश्येत् तत्र को मोहः कश्शोक एकत्वमनुपश्यत' इत्यादि श्रुतिमवलम्ब्य दृष्टिसृष्टिप्रक्रियया शरीरादेः कर्मजत्वनिरासकं कर्मजत्वमेव द्वैतवाद्यभिमतं जगत्सत्यत्वमित्यावेदकञ्च विवेकचूडामणिवाक्यमुदाहरति शरीरस्येति--

मू ॥ शरीरस्यापि प्रारब्धकल्पना भ्रान्तिरेव हि ।
अध्यस्तस्य कुतस्सत्वमसत्यस्य कुतो जनिः ॥ ४३ ॥
अजातस्य कुतो नाशः प्रारब्धमसतः कुतः ॥ ४३ ॥ ॥

व्या ॥ हि यस्मात् 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्ये' दित्यादिश्रुत्या अध्यस्तस्य शरीरस्य प्रथमज्ञानसमय एव बाधो दर्शितः ततस्तस्य शरीरस्य प्रारब्धाख्यं कर्म कारणमिति कल्पना भ्रान्तिरेव अन्यथा ज्ञानसमकाले प्रारब्धतत्कार्ययोः भोगमन्तरेण निवृत्त्यनुपपत्तेः । एवं प्रारब्धकर्मणि कारणत्वग्रहस्य भ्रान्तित्वे सति नाध्यस्तस्य कर्माधीनं जन्मादिकं भवतीत्याह अध्यस्तस्य कुतस्सत्वमसत्यस्य कुतो जनिरिति शुक्तिरजतवदध्यस्तस्य अत एवासत्यस्य कुतः सत्वं सत्यत्वं कस्मात्प्रमाणात्सिद्ध्यति--यद्यनध्यस्तं शरीरं तदा कर्माधीनं सत्यत्वं संभवेत्--नान्यथा । कुतो वा व्यापारसाध्यघटस्येव आविद्यकस्य शरीरादेर्जन्म भवेत् । अजातस्य शुक्तिरजतवत् कर्मणा जन्मरहितस्य शरीरादेः बन्धनरूपकर्मक्षयात कन्तुकमृतादेरिव प्रारब्धकर्मक्षयादेव नाशः न कल्पनाधिष्ठानज्ञानमात्रादिति कुतः कल्पनीयम्। एवं कर्माधीनजन्मरहितस्य असत्यस्येति अध्यस्तस्येति च असत इति च विशेषितस्य शरीरस्य प्रारब्धकर्म कारणमिति कुतः कल्पनीयमित्यनेनोपदेशेन सत्यस्यैव प्रारब्धं कारणमिति कल्पनीयमिति च कर्मजत्वमेव सत्यत्वमिति च आवेदितमिति विस्पष्टं भातीत्यर्थः॥ ४३॥ ॥

अ० ॥ ननु आचार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति विद्वद्दृष्टिपरयाऽनया श्रुत्या तत्त्वज्ञानानन्तरमपि सत्संपत्तिरूपमोक्षस्य कुमारब्धशरीरपातावधिकसमयविलंबाकाङ्क्षावाचकेन यावदिति पदेन च शरीरस्य कर्मजत्वरूपसत्यत्वरयोर्वादतत्वे सति तद्विरुद्धोऽर्थः कथमत्र भगवत्पादैर्वर्ण्यत इति

चेत् बाढमेवं भवदुक्तप्रकारेणैव 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्' तत्र को मोहः कश्शोक एकत्वमनुपश्यतः । तथा विद्वान्नामरूपाद्विमुक्त' इत्यादि-श्रुतिबाधितमपि कर्मजत्वं विद्वच्छरीरस्य 'भोगेन त्वितरे क्षपयित्वा सम्पद्यते' इति सूत्रतद्भाष्याभ्यामभ्युपगम्य जगद्याथात्म्यानभिज्ञान् प्रति विद्वद्दृष्टिपरैवेयं श्रुति-र्व्याख्याता ॥

तथापि नेयं विद्वद्दृष्टिपरा 'यथा सोम्य पुरुषं गन्धारेभ्योऽभिनद्धाक्षमानीय तं ततोऽतिजने विसृजेत् स यथा तत्र प्राङ्वोदङ्वाधराङ्वा प्रध्मायीत अभिनद्धाक्ष आनीतोऽभिनद्धाक्षो विसृष्टः तस्य यथाभिनहनं प्रमुच्य प्रब्रूयादेतां दिशं गन्धारा एतां दिशं व्रजेति स ग्रामाद्ग्रामं पृच्छन् पण्डितो मेधावी गन्धारानेवोपसंपद्येत एवमेवेहाचार्यवान् पुरुषो वेदेत्यन्ता' श्रुतिः—नासि त्वं संसार्यमुष्य पुत्रत्वादिधर्म-वान् किं तर्हि सद्यत्तत्वमसीति अविद्यामोहपटाभिनहनान्मोक्षितो गन्धारपुरुषवच्च स्वं सदात्मानमुपसंपद्यत इत्येतमेवार्थमाहेति छान्दोग्योपनिषद्भाष्येण—आचार्या-ल्लब्धविद्यस्य तत्क्षण एव सत्संपत्तिपरतया प्रदर्शितत्वात् ।

तथैव 'तस्य तावदेव चिरमित्यारभ्य यावन्न विमोक्ष्येऽथ संपत्स्ये' इत्यन्ता-पि न तत्वविद्दृष्टिपरा—न विमोक्ष्ये इत्येतदुत्तमपुरुषवचनं न विमोक्ष्यत इति पुरुष-व्यत्ययेन गृह्णीयात् सामर्थ्यात् ॥ टी० ॥ **'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्ये' इत्यादि श्रुतिबोधितदेहस्थित्यनुपपत्तिरूपात्**—तथैव 'अथ संपत्स्ये' इत्यत्रापीति छान्दोग्योपनिषद्भाष्येण—यथा भस्मीभूतायामपि स्वमातरि तत्पुत्रैरज्ञैः स्वप्ने प्राचीनसशरीरत्वसंस्कारादिभिः मातुः तच्छरीरोपेतत्वं परिकल्प्यते तथा 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत' इति श्रुत्युक्तप्रकारेण अशरीरे च विदुषि जडैः स्वप्राचीनैः सशरीरत्वसंस्कारादिभिः तच्छरीरोपेतत्वं परिकल्प्य कथं पुन-र्विद्वच्छरीरस्य ज्ञाननिवर्त्यत्वं संभवति अद्यापि तदीयस्यास्य शरीरस्य तेन विदुषा परैरपि दृश्यमानत्वादित्याशङ्क्यते सति—नायमेतेषां तत्वोपदेशसमय इति जानाना सती तेषां ग्रहणमनुसृत्योत्तरं वक्ष्यीति श्रुतीनामिमथो विरोधपरिहारार्थमभिप्रेत-त्वाच्च ।

अतः सर्वश्रुत्यविरोधेन ॥ श्लो० ॥ शरीरस्यापि प्रारब्धकल्पना भ्रान्तिरेव हि इत्यादिश्लोकैः शरीरस्य प्रारब्धकर्मजन्यत्वरूपसत्यत्वनिराकरणे न कश्चिदपि दोषः सम्भवतीत्यमुमेवार्थं प्रकटीकुर्वन् कर्मजत्वमेव सत्यत्वमित्यर्थात् दर्शयति **ज्ञानेनेत्यादिना**—

मू ॥ ज्ञानेनाज्ञानकार्यस्य समूलस्य लयो यदि ॥ ४४ ॥
तिष्ठत्ययं कथं देह इति शङ्कावतो जडान् ।
समाधातुं बाह्यदृष्ट्या प्रारब्धं वदति श्रुतिः ॥ ४५ ॥
न तु देहादिसत्यत्वबोधनाय विपश्चिताम् ।
इत्याचार्यः कर्मजत्वं सत्यत्वमिति चाब्रवीत् ॥ ४६ ॥

व्या ॥ शङ्कावतो जडान् समाधातुं आचार्यवान् पुरुषो वेदेत्यादिका श्रुतिः 'यावन्न विमोक्ष्ये अथ संपत्स्ये' इत्युत्तमपुरुषप्रयोगेण विद्वद्दृष्टिपरेव भूत्वा स्वस्मात् बाह्यस्य शङ्कावतः पुरुषस्य निश्चयानुसारेण प्रारब्धकर्म तत्कार्यञ्च भोगैकनाश्यत्वात् ज्ञानेनानिवृत्तं सत् तिष्ठतीति ब्रूत इत्याह **बाह्यदृष्ट्या प्रारब्धं वदति श्रुतिरिति** प्रारभ्यते इति प्रारब्धं शरीरमित्यर्थः ॥ न स्वाभिप्रायेण विद्वच्छरीरादेः सत्यत्वावेदनाय कर्मणा प्रारब्धं शरीरमिति ब्रूत इत्याह **न तु देहादिसत्यत्वबोधनाय विपश्चितामिति** विवेकचूडामणिवाक्यमुपसंहरति **इत्याचार्य इत्यादिना** ॥ ४६ ॥

अ० ॥ इदानीमुदीरितार्थे समन्वयसूत्रभाष्यस्य व्याख्यातृसम्मतिमाह-- **रामनन्दोऽपीत्यादिना**—

मू ॥ रामानन्दोऽप्येवमेव समन्वयनयेऽब्रवीत् ।
देहात्मनोस्तु संबन्धस्सत्य एवेति शङ्कते ॥ ४७ ॥
इत्युक्त्वाथ प्रतीकस्तु भाष्यस्यायं प्रदर्शितः ।
धर्माधर्मनिमित्तं हि सशरीरत्वमात्मनः ॥ ४८ ॥
इत्यतः कर्मजन्योऽयं संबन्धस्सत्य ईरितः ॥ ४८॥ ॥

व्या ॥ अत इति व्याख्यानोक्तसत्यशब्दस्य च भाष्योक्तस्य धर्माधर्मनिमित्तं सशरीरत्वमिति वाक्यस्य च एकार्थपरत्वादित्यर्थः । शेषस्सुगमः ॥ ४८॥ ॥

अ० ॥ द्रव्यापूर्वमयस्य क्रियाजन्यगुणापूर्वनिमित्तकत्वेऽपि सत्यत्वं सदृष्टान्तमाह **द्रव्येति**—

मू ॥ द्रव्यापूर्वमयं यत्तद्गुणापूर्वनिमित्तकम् ॥ ४९ ॥
अपि सत्यं वेगतो हि जन्यगन्त्रिषु वद्भवेत् ।

व्या ॥ गवि व्याघ्र इति विभ्रमात् बाणप्रयोक्तुः पश्चाद्गोसाक्षात्कारानन्तरं तद्गोरक्षणार्थं तद्बाणविनाशार्थं च अयं बाणोऽस्मीत्र एव तत्परिणामत्वात् न तदतिरिक्तो बाणो नाम कश्चित्पदार्थोऽस्तीति स्वार्जितबाणाधिष्ठानायस्साक्षात्कारप्रचयेनापि अनिवर्त्यत्वात् स केवलाविद्यकतद्व्याघ्रवत् न मिथ्या किन्तु सत्य एव तद्वत् तदुभयविधकर्मजं जगदपीत्यर्थः ।

ननु बाणस्य मौर्व्याघातजन्यवेगगुणात्प्राक्तनत्वे सति गमनक्रियावतो बाणस्य वेगगुणकबाणजन्यत्वं कथमिति चेत् यथा व्रीहेरवघातात्पूर्वभाविन्येऽपि 'व्रीहीनवहन्ती'ति विधिप्रामाण्यान्यथानुपपत्त्या वितुषस्य व्रीहेः विधेयावघातजन्यत्वं तद्वत्संभवेदतो न कश्चिद्दोषः ॥ ४९॥ ॥

॥ अथ प्रतिकर्मव्यवस्थाशब्दार्थारम्भः ॥

अ० ॥ यदेतत् कर्मप्रकृतिकं शारीरादि जगदेकमेव सत् प्रतिजीवं युगपद्विषयो भवतीति व्यवस्थैव प्रतिकर्मव्यवस्थेत्याह **लक्ष्येति**—

मू ॥ लक्ष्यैक्याज्ञानतोऽध्यासः कर्तृत्वस्याथ कर्म यत् ॥ ९० ॥
ततो द्रव्यमपूर्वं स्यात्तन्मयं निखिलं जगत् ।
परमेश्वरसृष्टं यदात्मानात्माविवेकतः ॥ ९१ ॥
सज्जीवाभ्याञ्च तादात्म्यापन्नं तच्चक्षुरादितः ।
जीवान् प्रत्येकदैकं सत्स्यात्कर्मेति व्यवस्थितिः ॥ ९२ ॥
प्रतिकर्मव्यवस्थेति मन्दान्प्रत्युपदिश्यते ॥ ९२॥ ॥

व्या ॥ आत्मानात्मभेदस्य आत्मगतासङ्गत्वादेश्च आचारकं परमेश्वरप्रेरितं यत्तस्मिन् अज्ञाने कर्तृत्वापादके सति कर्त्रानुष्ठीयमानात् कर्मणः अपूर्वद्वारा जायमानं स्वकीयं परकीयं वा द्रव्यापूर्वमयं वपुर्ब्रह्मजीवाभ्यां सहाविवेकतः सन्घटः अहं मनुष्य इति च तादात्म्यापन्नमेकमेव सत् एकदा जीवान् प्रति कर्मविषयो भवेदिति या व्यवस्थितिः सा प्रतिकर्मव्यवस्थेति मन्दान् प्रत्युपदिश्यते । आचार्यैरिति शेषः ॥ ५२॥ ॥

अ० ॥ वक्ष्यमाणादृष्टिसृष्टिवादात् प्रतिकर्मव्यवस्थायाः वैलक्षण्यप्रदर्शनाय तत्पक्षावलम्बिनां सिद्धान्तं दर्शयति **अस्मिन्नित्यादिना**—

मू ॥ अस्मिन्वादे तु सिद्धान्तस्संगृह्य प्रोच्यतेऽधुना ॥ ९३ ॥
लक्ष्यैक्यावारकाज्ञानं कर्तृत्वादौ निमित्तकम् ।
न जगत्प्रकृतिस्तस्मिन्विचारेण विनाशिते ॥ ९४ ॥
लक्ष्योपहितयोरैक्यज्ञानादेव मृतेः परम् ।
विमुक्तस्स्यात्तदाप्यन्त्यज्ञानेन न विनाश्यता ॥ ९५ ॥
मृतदेहस्य पुत्राद्यैस्संस्कार्यत्वाच्च सत्यता ॥ ९६ ॥

व्या ॥ **अस्मिन्वाद इति** प्रागुक्तप्रतिकर्मव्यवस्थावाद इति यावत् **लक्ष्यैक्यावारकाज्ञानं** लक्ष्यपदं उपलक्षितोपहितवस्तुपरं तथा च तयोः यस्स्वकीयशरीरत्रयोपलक्षितः यस्तु महेश्वरः तदीयशरीरत्रयोपहितः तयोरैक्यावारकमज्ञानमिति यावत् लक्ष्योपहितयोरैक्यज्ञानादेव विमुक्तस्स्यादित्यन्वयः ननु अस्मिन्वादे तत्त्वंपदोपलक्षितयोरैक्यज्ञानस्य मोक्षसाधनत्वं कुतो नाङ्गीक्रियते यदि जीवस्य विदेहकैवल्यसमये आधिदैविकस्य महेश्वरस्य स्वकीयसमष्टिशरीरत्रयात् विवेकसंपन्नत्वेऽपि तदीयशरीरत्रयस्य 'मायिनन्तु महेश्वरं विद्या'दिति श्रुत्या 'कार्यानन्वितत्वे सति विद्यमानत्वे सति व्यावर्तकमुपाधिरिति उपाधिलक्षणेन च दर्शितप्रकारेण विद्यमानत्वात् तदुपहितेनैक्यं विदेहमुक्तस्य सम्भवति ।

अन्यथा एकस्योपलक्षितत्वसाक्षात्कारेणैव आधिदैविकेश्वरस्याप्युपलक्षितत्वसम्भवे तद्वत् स्वान्येषामपि जीवानां विनष्टोपाधिकत्वेन तत्तच्छरीरायुपलक्षितत्वेन तद्वादाभिमतस्य पुम्भेदेन बन्धमुक्तिव्यवस्था उपरुध्येत ।

तत्परिहारार्थं जीवस्य प्रतिबिम्बत्वं उपाधिपरिवेष्टितत्वञ्चावलम्बितम् ।

तयोः—जीवस्तावत् न प्रतिबिम्बो नाप्यवच्छिन्नः किन्तु ब्रह्मैव अविद्यया संसरत् विद्यया विमुक्तञ्चेति वार्तिकाचार्यसिद्धान्तेन सोऽकामयत बहु स्यां प्रजायेयेत्युपक्रम्य तदेवानुप्राविशदित्यादिश्रुत्यनुसारिणा प्रतिषेधेऽपि ।

तन्निषेधमुल्लङ्घ्य जीवस्य प्रतिबिम्बत्वावलम्बिनः तत्त्वज्ञानात् बिम्बभावापत्तिरेव मोक्ष इति दीक्षितैः स्वकीयसिद्धान्तलेशसङ्ग्रहे यथा दर्शितः ।

तथैव प्रागुक्तवार्तिकाचार्यकृतनिषेधान्तरमुल्लङ्घ्य स्वात्मनः उपाधिपरिवेष्टितत्ववादिनः तत्त्वज्ञानात् विनष्टोपाधिकत्वेन उपलक्षितत्वेऽपि तस्य मायायुपहितब्रह्मभावापत्तिरेव मोक्ष इति प्रतिकर्मव्यवस्थानिष्ठानां दर्शितं अलं विस्तरेण शेषस्य

वृत्तिः क्रियते **अन्त्यज्ञानेनेति** चरमसाक्षात्कारेणापि न विनाश्यत्वं मृतस्य विद्वच्छरीरस्येत्यर्थः तत्र हेतुमाह **पुत्राद्यैस्संस्कार्यत्वादिति** ज्ञाननाश्यत्वाभावादेव सत्यत्वमपि कार्यस्य सिद्धयतीत्याह **सत्यतेति** ॥ ५५॥ ॥

अ० ॥ एवं प्रतिकर्मव्यवस्थायाः दृष्टिसृष्टिवादाद्वैलक्षण्यं दर्शयित्वाऽधुना तु द्वैतवादाद्वैलक्षण्यं दर्शयति **वाच्ययोरित्यादिना**—

मू ॥ वाच्ययोरुभयोर्यद्वज्जीवात्मपरमात्मनोः ॥ ५६ ॥
द्वैतिनां हि भिदा तद्वज्जीवानां च परस्परम् ।
जडेशयोर्जडानां च जडजीवभिदा तथा ॥ ५७ ॥
सत्यैव न तु मिथ्याऽत्र विज्ञानेनाविनाशतः ।
अनित्यतैव वादेऽस्मिन् मिथ्यात्वं न तु तद्वयम् ॥ ५८ ॥
त्रैकालिकनिषेधस्य प्रतियोगित्वरूपकम् ।
चिन्मयत्वे-तामसत्वे-नाश्यत्वं ज्ञानतश्च यत् ॥ ५९ ॥
सिद्धेऽपि लक्ष्ययोरैक्ये नान्यदैक्यं मतं भवेत् ॥ ५९॥ ॥

व्या ॥ वादेऽस्मिन्निति प्रतिकर्मव्यवस्थावाद इत्यर्थः तत्र जगतः मिथ्यात्वं नाम भोगौकनाश्यत्वरूपमनित्यत्वमेव भवेत् न तु सत्तैक्यवादाभिमतं त्रैकालिकनिषेधप्रतियोगित्वरूपमनृतशब्दलक्ष्यात्मकत्वं नापि दृष्टिसृष्टिवादाभिमतं ज्ञानकृतध्वंसप्रतियोगित्वं वा संभवतीत्युक्त्वा प्रतिकर्मव्यवस्थायां फलितमाह सिद्धेऽपीति॥

अ० ॥ अधुना ज्ञाननाश्यत्वरूपमिथ्यात्वावलम्बिनां चोद्यमनूद्य प्रकृतं प्रतिकर्मव्यवस्थावदि समर्थयति **मुक्तस्येति**—

मू ॥ मुक्तस्य मृतदेहादिः पुत्राद्यज्ञानकल्पितः ॥ ६० ॥
इति चेद्दृष्टिसृष्ट्याख्यवाद एवापतेत्तदा ॥ ६०॥ ॥

व्या ॥ स्पष्टोऽर्थः ॥ ६०॥ ॥

अ० ॥ प्रतिज्ञातामेवापत्तिं विशदयति **प्रतिकर्मव्यवस्थायामिति**—

मू ॥ प्रतिकर्मव्यवस्थायां भोगार्थं गतिसिद्धये ॥ ६१ ॥

अंशोऽवच्छिन्न आभासो ब्रह्मणो जीव उच्यते ।
न कर्मजफलाभावाद्दृष्टिसृष्टौ तथोच्यते ॥ ६२ ॥
किन्त्वधिष्ठानभूतोऽत्ति स्वाध्यस्तं स्वाप्नवत्स्वयम् ॥ ६२॥ ॥

व्या ॥ स्पष्टोऽर्थः ॥ ६२॥ ॥

अ० ॥ अधुना स्वात्मजगतोः एकसत्तादिवादत्रयवैलक्षण्यानभिज्ञानां तद्वादत्रयवैलक्षण्यं दर्शयति **स्वात्मन इत्यादिना**—

मू ॥ स्वात्मनो जगतोऽप्येकसत्वे स्वस्य विभुत्वतः ॥ ६३ ॥
पृथग्व्यक्तेरभावाच्च गत्यनावश्यता किल ।
प्रतिकर्मव्यवस्थायां दृष्टिसृष्टौ तथैव च ॥ ६४ ॥
स्वात्मनो जगतोऽप्येकसत्तावादे क्रमाद्भवेत् ।
कर्माऽज्ञानं स्वात्मवस्तु जगत्सत्ताप्रदं जडे ॥ ६५ ॥
प्रमाताऽथ विभुस्साक्षी स्फूर्त्तिदोऽन्तेऽयथा स्फुरेत् ॥ ६५॥ ॥

व्या ॥ आद्यपक्षद्वये स्वात्मातिरिक्तदृश्यवस्तुसम्भवादणुर्विभुश्चात्मा क्रमाद्विषयस्य स्फूर्त्तिप्रदो भवेत् **अन्ते** तृतीयपक्षे तु स्वातिरिक्तविषयाभावात् स्वात्मैव स्वस्याद्वितीयत्वमविहाय प्रतिबन्धकज्ञानाभाववशात् अयथा स्फुरेदित्यर्थः॥ ६५॥ ॥

अ० ॥ अयं प्रतिकर्मव्यवस्थावादः मन्दाधिकारिणं प्रतिप्रवृत्त इति केन प्रमाणेन अवगम्यत इति पृच्छति **केनेति**—

मू ॥ केनायमुपदेशस्तु मन्देऽभ्यश्चेति गम्यते ॥ ६६ ॥

व्या ॥ स्पष्टोऽर्थः ॥ ६६ ॥

अ० ॥ उत्तरमाह **निरूपण इति**—

मू ॥ निरूपणे द्वितीये प्रागुक्तं तुर्यप्रदर्शके ।
श्रोतुश्चित्तविपाकेन विषण्णेत्यादिकं वचः ॥ ६७ ॥
मानमद्वैतसिद्धौ तु दृष्टिसृष्टावपीरितम् ।
तथा तर्ह्युपदेशस्तु मध्यमादेः कथं यदि ॥ ६८ ॥

सोऽपि तत्र क्रमेणोक्तः पुरा तुर्यप्रदर्शके ।
तथापि पञ्चमाद्येषु विस्तरेणावगम्यताम् ॥ ६९ ॥

व्या ॥ तत्रेति द्वितीयनिरूपण इत्यर्थः । शेषस्सुगमः ॥ ६९ ॥

अ० ॥ इदानीं लोकवत्तु लीलाकैवल्यमिति सूत्रभाष्यावसाने न चेयं परमार्थविषया सृष्टिश्रुतिः इति भाष्यञ्च वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथाहि दर्शयतीति सूत्रार्थपरं अभ्युपेत्य च सृष्टेस्तात्विकत्वमिदमुक्तमिति वाचस्पत्यञ्चावलम्ब्य कर्मजन्यस्य पारमार्थिकत्वतात्विकत्वसंज्ञकसत्यत्वसम्भवात् न मिथ्यात्वसिद्धिरित्याक्षिपति **परार्थमिति**--

मू ॥ परार्थं कर्मकार्यस्य सृष्टिर्या सूत्रतो मता ।
पारमार्थिकतां तस्या ज्ञात्वा वै कर्मजत्वतः ॥ ७० ॥
परमार्थपरा नेयं सृष्टिश्रुतिरितीरणात् ।
तात्त्विकत्वमिदं सृष्टेरभ्युपेत्य समीरितम् ॥ ७१ ॥
इति वैषम्यनैर्घृण्ये नेति सूत्रीयके पुनः ।
वाचस्पत्ये कर्मजत्वं तात्त्विकत्वमितीरणात् ॥ ७२ ॥
कर्मजन्यस्य सत्यत्वे मिथ्यात्वन्तु कथं यदि ।
वक्ष्यमाणप्रकारेण मिथ्यात्वमवगम्यताम् ॥ ७३ ॥

व्या ॥ एवञ्चैतान्निरूपणे दर्शितैरनुवादकशास्त्रैर्जगतो ब्रह्मविषयकवृत्तिज्ञानकृतध्वंसप्रतियोगित्वं विना भोगैकनाश्यत्वस्य द्वैतवादे--प्रतिकर्मव्यवस्थावादे चाङ्गीकृतत्वादत्र पूर्वपक्षत्वेनोदाहृततद्वादद्वयेऽपि पारमार्थिकमिति च--तात्त्विकमिति च सत्यमिति च कर्मणा निर्मितमिति व्यवहारे विषयो भवतीति व्यावहारिकमिति च नामभेदवति अनित्यत्वरूपमिथ्यात्वं विना--न कश्चिद्विशेषोऽस्ति--ततो विशेषस्त्वद्वैतवादे प्रागुक्तप्रथमादिनिरूपणत्रयेणोत्तरत्र पञ्चमादिनिरूपणषट्केन च विस्तरेणावगम्यतामित्यर्थः ॥ ७३ ॥

इति श्रीपरमहंसपरिव्राजकाचार्यरामब्रह्मश्रीकृष्णानन्देन्द्रभगवत्पादशिष्य-
श्रीमच्चन्द्रिकाचार्याख्ययतीश्वरविरचितायाममृतरसझरीनाम-
व्याख्यानोपेतायामद्वैतसिद्धान्तगुरुचान्द्रिकायां चतुर्थं
लक्ष्यैमात्राविरोधि जगत्सत्यत्वपरं प्रतिकर्म-
व्यवस्थावादनिरूपणं संपूर्णम् ॥

ब्रह्मैवाहमस्मि ।
ओं तत्सत् ॥

॥ हरिः ओम् ॥

॥ श्रीमदद्वैतसिद्धान्तगुरुचन्द्रिकायां ॥

पञ्चमं वाच्यार्थैक्यानुकूलं जगन्मिथ्यात्वनिरूपणम् ।

अ० ॥ प्राक्प्रथमनिरूपणारम्भे शिष्याः धर्मे प्रकृतिता भातीति चतुर्थाभिप्रायमावेद्यानन्तरम् यतस्सुषुप्तावविद्योपाधिके जीवे जगतो लयप्रतिपादिकां श्रुतिमवलम्ब्य तत्र न किञ्चिदिति पञ्चमाभिप्रायावेदनेन फलं प्रति कर्मणः उपादानत्वं निमित्तत्वं वा न संभवतीति भातीत्युक्त्वा तद्विशेषाञ्छाधि नो गुरविति वाक्येन च धर्माधर्मगतविशेषान् सुषुप्तौ विलयिमानजगद्गतविशेषानप्यपृच्छन् अतः तत्प्रतिवचनानुकूलेन अनेन न चाविद्यासहकृतजीवस्य कारणत्वे जगद्वैचित्र्यानुपपत्तिः— जगदुपादानस्याज्ञानस्य विचित्रशक्तिमत्त्वादिति अद्वैतसिद्धौ दृष्टिसृष्टिव्यवस्थापकवचनेन ।

तथैव 'शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपसन्नः पप्रच्छ । कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति । तस्मै सहोवाच । द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापारा चेति ' श्रुत्यर्थप्रकाशकेन ।

अनेन परा च परमात्मविद्या अपरा च धर्माधर्मसाधनतत्फलविषया । ननु कस्मिन्नु विदिते सर्वविद्भवतीति शौनकेन पृष्टं तस्मिन् वक्तव्ये अपृष्टमाह अङ्गिराः द्वे विद्ये इत्यादि नैष दोषः क्रमापेक्षत्वात् प्रतिवचनस्य अपरा हि विद्या अविद्या सा निराकर्तव्या तद्विषयो धर्माधर्मसाधनतत्फले हि विदिते न किञ्चित्त्वं नो विदितं स्यादिति निराकृत्य हि पूर्वपक्षं पश्चात् सिद्धान्तो वक्तव्यो भवतीति । न्यायादिति भाष्येण च एतदुक्तं भवति तत्त्वजिज्ञासुस्तावत् स्वात्मनो जगदुपादानत्ववेदनेन हि सर्वविद्भवेत् धर्माधर्मयोरुपादानत्वेऽपि तयोः नित्यपरोक्षत्वेन तद्विज्ञानेनैव सर्वस्यापरोक्षीकर्तुमशक्यत्वात् नास्य सर्वावित्त्वं संभवति य आधिदैविकः परमेश्वरो जीवानां कर्मापेक्षस्सन्नुच्चावचफलात्मकं जगत् सृजति तस्य पाशुपतादिमतोक्तरीत्या निमित्तकारणमात्रत्वेन कार्यभूतात्फलात् जीवेभ्यश्च वास्तवभेदस्य संभाव्यमानत्वात् तदभिन्नोऽस्मीति भाक्तेन विज्ञानेनापि नायं मुमुक्षुस्सर्ववित् स्यात् स्वात्मनश्चाङ्गत्वात् न कर्मापेक्षं स्रष्टृत्वं च संभवति कर्मजत्वे च चतुर्थनिरूपणे प्रद-

र्शितश्रुतिस्मृत्याद्युक्तप्रकारेण सत्यत्वञ्चापतेत् अतः कर्मजत्वं जगतो निराकृत्य अविद्यामात्रेण स्वस्मिन्विवर्त्तत्वेऽध्यस्तत्वे वा विज्ञापिते सति सर्वविदयं भवेदिति ॥

एतत्सिद्धिवचन–भाष्यादिप्रामाण्यानुगुण्येन सर्वेषां लिङादीनां परिसंख्यात्व-प्रक्रियया कर्मणो निवृत्तिरूपत्वमवगम्यते । निवृत्तिर्नाम पुरुषस्यौदासीन्यमेव ततो भावरूपकर्माभावाज्जगतः कर्मजत्वाभावे सति केवलाविद्यकत्वं ततो ज्ञाननिवर्त्यत्व-रूपं मिथ्यात्वं चेति विशेषद्वयमस्मिन् पञ्चमनिरूपणे निवेदयति **निवृत्तीति**––

मू ॥ निवृत्तिबोधकत्वेन विधेः कर्म यतो न हि ।
कर्मजत्वनिरासेन मिथ्येति जगदुच्यते ॥ १ ॥

व्या ॥ यतस्सर्वविधिश्रुतेर्निवृत्तिबोधकत्वेन फलारम्भकं कर्मस्वरूपं न सि-द्धयति अतः कर्मजत्वनिरासेन मिथ्येति जगदुच्यत इत्यर्थः॥ विधीनां निवृत्तिबो-धकत्वं तावदष्टाशीतितमादिश्लोकैर्वक्ष्यति तत्र तद्विस्तरेणोपपादयिष्यामः ॥ १ ॥

अ० ॥ सदृष्टान्तमस्मिन्पञ्चमनिरूपणे सिद्धान्तपूर्वपक्षयोः फलं विभज्य दर्शयति **अज्ञानादिति**––

मू ॥ अज्ञानादुत कर्मतो मृदि घटो जातः कदाचित्तयो-
र्मृज्ज्ञाने भ्रमहेतुजो न निवसेज्जातो घटः कर्मतः ।
ज्ञानानां निचयान्न नश्यति तथाऽज्ञानात् क्रियातो जगत्
जातं चेद्भवतीति पक्षयुगळे ज्ञेयं फलं भेदतः ॥ २ ॥

व्या ॥ कदाचित् भ्रमस्थले मृत्पिण्डे अयं घटः इत्यज्ञानादारोप्यते–कदा-चित् प्रमास्थले कुलालव्यापारात् घट उत्पन्नो भवेत्–तयोर्मध्ये भ्रान्तिकारणा-ज्ञानजस्तावत् नायं घटः–किंत्वियं मृदिति ज्ञाने सति तत्क्षणादेव नश्यति । कर्म-जस्तु घटो न ज्ञानशतेनापि नश्यति–पृथुबुध्नोदराद्याकारतां न त्यजति । यथायं दृष्टान्तस्तथा जगदपीति सिद्धान्तपूर्वपक्षयोः फलं विविच्य जानीयादित्यर्थः ॥ २ ॥

अ० ॥ चतुर्थनिरूपणोक्तप्रकारेण जगतस्सत्यत्वं स्वीकृत्याक्षिपति **कर्म-जन्यस्येति**––

मू ॥ कर्मजन्यस्य सत्यत्वे मिथ्यात्वं जगतः कथम् ॥ २॥ ॥

व्या ॥ स्पष्टोऽर्थः ॥ २॥ ॥

अ० ॥ सर्वं विकारजातं मायामात्रं । मायामात्रमिदं द्वैतमद्वैतं परमार्थत इत्यादि श्रुतिमवलम्ब्य समाधत्ते **यत इति**—

मू ॥ **यतोऽस्य कर्मजन्यत्वं मायामात्रमिति श्रुतेः** ॥ ३ ॥
बाध्यतेऽतोऽस्य मिथ्यात्वं सिद्ध्यत्यद्वैतवादिनां ॥ ३॥ ॥

व्या ॥ यतः कारणात् मायामात्रमिदं द्वैतमिति श्रुत्या सामानाधिकरण्येनास्य जगतो मायापरिणामत्वमवबोध्य मात्रपदेन द्रव्यापूर्वपरिणामत्वं तावत् बाध्यते तस्मात् मिथ्यात्वसिद्धिरित्यर्थः ॥ ३॥ ॥

अ० ॥ पुनश्शङ्कान्तरमनूद्य तत्र दोषमाह–**मायिकत्वादिति**—

मू ॥ **मायिकत्वादपूर्वस्य तन्मयस्यास्तु सत्यता**॥ ४ ॥
इति चेन्न तदा ज्ञानात्समायं शून्यतां व्रजेत् ॥ ४॥ ॥

व्या ॥ **अपूर्वस्येति** सोमाज्यादिविकारस्य–'सर्वं विकारजातं मायामात्र' मिति श्रुत्युक्तप्रकारेण स्वकारणपरंपरया मायाविकारत्वात् **तन्मयस्य** द्रव्यापूर्वविकारस्यापि **जगतश्च**तुर्थनिरूपणोक्तप्रकारेण सत्यत्वं भवेदिति चेदपूर्वस्य निर्यत्न मायाजन्यत्वपक्षे न जगतस्सत्यता संभवति किं तु मायाधिष्ठानात्मसाक्षात्कारात् मायानाशे तत्परिणामात्मकमपूर्वादिकं जगदपि तदानीमेव नश्येदित्यर्थः ॥ ४॥ ॥

अ० ॥ पुनः प्रकारान्तरेण शङ्कते **द्रव्येति**—

मू ॥ **द्रव्यापूर्वमयत्वेन विना मायामयस्य हि** ॥
गुणापूर्वनिमित्तत्वे सत्यता किं न सिद्ध्यति ॥ ५॥ ॥

व्या ॥ मायामात्रपरिणामस्य जगतः यन्नजन्यगुणापूर्वनिमित्तकत्वपक्षे सत्यता कथं न सिद्ध्यतीत्यर्थः ॥ ५॥ ॥

अ० ॥ प्रागुक्तामाशङ्कामनूद्य दृष्टान्तप्रदर्शनेन निराकरोति **द्रव्यापूर्वमिति**

मू ॥ **द्रव्यापूर्वं विनाध्यस्तमाया चेत् प्रकृतिस्तदा** ॥ ६ ॥
न कर्मयोगतो माया विकाराकारतामियात् ।
शुक्तिरौप्यं यथा स्वर्णकारकर्मप्रयोगतः ॥ ७ ॥

व्या ॥ स्पष्टोऽर्थः ॥ ७ ॥

अ० ॥ शङ्कान्तरमनूद्य समाधत्ते **जगदिति**—

मू ॥ **जगत्प्रकृतिभूतेनासङ्गेन ब्रह्मणाथवा** ।

अध्यस्तमायया कर्मसंयोगो नास्ति चेत्तदा ॥ ८ ॥
तदुपादेयवैचित्र्यहेतुत्वं कर्मणः कथम् ।
दर्शितं यदि शास्त्रेण मूढानुसरणाय तत् ॥ ९ ॥

व्या ॥ घटपटाद्युपादानभूतेन मृत्तन्त्वादिना सह घटपटादिवैचित्र्यहेतुभूत-कुलालकुविन्दादिक्रियासंपर्कवत् जगतो विवर्तोपादानभूतेन प्रत्यगात्मना–परिणाम्यु-पादानेनाज्ञानेन वा जगद्वैचित्र्यहेतुभूततत्तत्प्राणिकर्मसंपर्काभावे कथं वैषम्यनैर्घृ-ण्ये न सापेक्षत्वात्तथाहि दर्शयति'—'कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैगुण्यार्था-दिभ्यः' इत्यादिसूत्रेण कर्मणो जगद्वैचित्र्यहेतुत्वं वर्णितमिति प्राप्ते समाधत्ते । **मूढानुसरणाय तदिति** तत् कर्मणो जगद्वैचित्र्यहेतुत्वकथनमित्यर्थः॥ एतादृश-शास्त्रस्य मूढानुसारित्वं तावदुत्तरत्र विस्तरेण प्रपञ्चयिष्यति ॥ ९ ॥

अ० ॥ शङ्कान्तरमनूद्य समाधत्ते **नन्विति**—

मू ॥ नन्वस्य सत्यता श्रुत्या मिथ्यात्वं किं न बाध्यते ।
यदि साधकवैकल्यात् सत्यश्रुत्या न बाध्यते ॥ १० ॥
किन्तु साधकवत्त्वेन मायामात्रत्ववादिनः ।
शास्त्रस्य तेन युक्तस्याद्वाधस्सत्यश्रुतेः किल ॥ ११ ॥

व्या ॥ **नन्वस्येति** अस्य फलात्मकस्य सर्वस्य जगतः **सत्यताश्रुत्या** 'तदेतत् सत्यं मन्त्रेषु कर्माणि कवयो यान्यपश्यंस्तानि त्रेतायां बहुधा सन्ततानि । तन्याचरथ नियतं सत्यकामा' इत्यादिकया चतुर्थनिरूपणेन व्याख्यातया **मिथ्यात्वं** मायामात्रमिदं द्वैतमद्वैतं परमार्थतः इत्यादिश्रुतिबोधितं केवलमायिकत्वमित्यर्थः । **तेनेति** साधकवता शास्त्रेण तदेतत्सत्यमित्यादिश्रुतेरेव बाधो युक्त इत्यर्थः ॥११॥

अ० ॥ सर्वस्य विकारस्य केवलमायिकत्वविधायकस्य 'सर्वं विकारजातं मायामात्र' मित्यादिशास्त्रस्य साधकशास्त्रसद्भावं प्रतिजानीते–**साधकानीति**—

मू ॥ साधकान्यविरुद्धार्थवादीनि विविधानि च ।
स्वार्थस्य मायामात्रत्वतात्पर्याणि क्रमाद्भुवे ॥ १२ ॥

व्या ॥ साधकान्याह **अविरुद्धार्थवादीनीति** सर्वं विकारजातं माया-मात्रमित्यादिश्रुत्यविरुद्धार्थपराणि शास्त्राणीति शेषः । तान्येव विशिनष्टि **स्वार्थस्य मायामात्रत्वतात्पर्याणीति** किं तान्येकार्थवाचकानि नेत्याह **विविधानीति** विविधार्थपराणीत्यर्थः ॥ प्रथमं सहायवच्छास्त्रं उपन्यस्यानन्तरं सहायशास्त्राणि वक्ष्य इत्याह **क्रमाद्ध्रुव इति** ॥ १२ ॥

अ० ॥ इदानीं महावाक्यरत्नावळ्यां जगन्मिथ्यावाक्ये समीरितशतोप-निषदन्तर्गतश्रुतिद्वयं दर्शयति **मायामात्रमिति—**

मू॥ मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ।
सर्वं विकारजातं यन्मायामात्रमिति श्रुतेः ॥ १३ ॥
वक्ष्यमाणानि शास्त्राणि सहायानीति गम्यताम् ॥ १३॥ ॥

व्या ॥ सर्वं विकारजातं मायामात्रं । मायामात्रमिदं द्वैतमद्वैतं परमार्थत इति श्रुतेरेवोत्तरत्र वक्ष्यमाणानि शास्त्राण्यनुचराणीत्यर्थः ॥ १३॥ ॥

अ० ॥ इदानीं 'येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके एतद्विद्यामनुशिष्टस्त्वयाह' मिति नचिकेतसा शिष्येण पृष्टस्सन् धर्मराजो देवः प्रश्नानुरूपं 'हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनं । यथा च मरणं प्राप्यात्मा भवति गौतमे' ति प्रतिज्ञाय तमेव प्रतिज्ञातमर्थं 'य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः । तदेव शुक्रं तद्ब्रह्म । तदेवामृतमुच्यते । तस्मिँल्लोकाः श्रितास्सर्वे तदु नात्येति कश्चन एतद्वै त' दिति काठके नचिकेतसं प्रत्युपादिदेश अस्यायमर्थः यो जीवो मरणानन्तरमस्ति न वेति नचिकेतसा विचिकित्सितः यश्च वक्ष्यमाणमुण्डक-प्रश्नोपनिषदुक्तप्रकारेण स्वप्नावस्थायां मनसि प्राणादिषु सर्वलोकेषु प्रलीनेषु सत्सु 'जीवापेतं वाव किलेदं म्रियते न जीवो म्रियत' इति श्रुत्युक्तप्रकारेण जीवः स्वय-ममृतस्सन् स्वस्याभिनवं विचित्रगात्रकळत्रपुत्रादिकं वासनावैचित्र्यात् विचित्रश-क्तिमदविद्यासाहचर्याच्च सृजन् सन् तत्सर्वं स्वयंप्रकाशमानतया जानाति स एव हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्मेति' प्राग्धर्मराजेन प्रतिज्ञातं ब्रह्म न ततो जीवा-दन्यद्ब्रह्म ब्रह्मास्ति यतः तस्मिन्नेव स्वप्नदृशि जीवे ये पृथिव्यादिलोकाः प्राति-भासिकत्वेनाध्यस्ताः तेषु न कश्चन लोकः तं रज्जुं तदारोपितसर्पवदतिक्रामतीति । एवमेव सौषुप्ते जीवे जगतो लयप्रतिपादकैः वक्ष्यमाणशास्त्रैः प्रातिभासिकत्वमे-वाभिप्रेतमित्यवगन्तव्यं । तदिदं 'मायामात्रमिदं द्वैतमित्यादिश्रुतेः सहायभूतं काठ-कादिवाक्यमर्थतः सङ्गृह्णाति **एष इति—**

मू ॥ एष सुप्तेषु जागर्ति यस्तं नात्येति कश्चन ॥ १४ ॥
इतीदं स्यान्मायिकत्वपरायास्तु सहायकं ॥ १४॥ ॥

व्या ॥ अवतरणादेवावगतार्थः ॥ १४॥ ॥

अ० ॥ मुण्डकोपनिषदि-हृदयं विश्वमस्येति श्रूयते । अस्यायमर्थो भाष्यकारैरभिप्रेतः यस्यामूर्त्तस्य प्रत्यगात्मनः उपाधिभूतं यदन्तःकरणं तदेव तदुपरितनं सर्वं जगत्-तद्विकारत्वादिति तद्विकारत्वन्तु एतद्वितीयमुण्डकमन्त्रार्थप्रकाशकेन 'यथा गार्ग्य मरीचयोऽर्कस्यास्तङ्गच्छतः सर्वा एतस्मिंस्तेजोमण्डल एकीभवन्ति-ताः पुनः पुनरुदयतः प्रचरन्ति एवं हवा एतत्सर्वं परे देवे मनस्येकीभवतीति प्रश्नोपनिषङ्गतब्राह्मणेन मनसि स्वप्नावस्थायां जाग्रत्कालिकस्य जगतः प्रळयोपदेशेन च तथैव 'यथा सुदीप्तात् पावकाद्विष्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः । तथाऽक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापि यन्ति' इत्येतस्माद्वितीयमुण्डकोपक्रमवाक्यात् सुषुप्तावज्ञाने प्रलीयमाने मनसि प्रळयोपदेशेन चावगम्यते ।

अतः इमास्ताश्रुतीः तद्भाष्याणि च मायिकत्वश्रुतेः सहायभूतानि अर्थतस्सङ्गृह्णाति **हृदयमिति**—

मू ॥ हृदयं विश्वमस्येति मनःप्रकृतिकं जगत् ॥ १५ ॥
इति भाष्यं सहायं स्यान्मायिकत्वश्रुतेरपि ॥ १५॥ ॥

व्या ॥ **अस्येति** यस्येत्यर्थः यस्य हृदयं विश्वमिति मुण्डकवाक्यञ्च विश्वं मनः प्रकृतिकमिति तद्भाष्यमपि जगतः केवलमायिकत्वपरश्रुतेः सहायकमित्यर्थः ॥

अ० ॥ प्रश्नोपनिषदि तावत् 'भगवन्नेतस्मिन्पुरुषे कानि स्वपन्ती'ति केषां चिदेव आध्यात्मिकानां तत्वानां निर्व्यापारत्वेन वर्तते गार्ग्येण पृष्टे सति पिप्पलादाख्यगुरुणा 'यथा गार्ग्य मरीचयोऽर्कस्यास्तङ्गच्छतस्सर्वा एतस्मिंस्तेजोमण्डल एकीभवन्ति ताः पुनः पुनरुदयतः प्रचरन्ति एवं हवा एतत् सर्वं परे देवे मनस्येकीभवती'ति चक्षुरादिगोचरं सर्वमुद्दिश्य मनस्येकीभवतीति मनस्येकीभावरूपलयञ्च विधानेन चक्षुरादीन्द्रियाणां स्वप्नकाले विषयाभावात् मनसि निर्व्यापारत्वेन वर्तनोपदेशात् स्थूलपञ्चभूततत्कार्याणां मनःप्रकृतिकत्वे सति तदुपाधिकाविद्रज्जीवकल्पितत्वोपदेशेन प्रातिभासिकत्वमुपदिष्टम् । एवमेव तद्भाष्यकारैरप्यभिप्रेतम् । तदिदं जगतः केवलमायिकत्वपरश्रुतेः सहायभूतं प्रश्नोपनिषद्वाक्यन्तद्भाष्यञ्चार्थतः सङ्गृह्णाति **पर इति**—

मू ॥ परे देवे मनस्येकीभवत्येतदिति श्रुतिः ॥ १६ ॥
सभाष्या स्यान्मायिकत्वश्रुतेरेव सहायिका ॥ १६ ॥ ॥

व्या ॥ अवतरणादेवावगतार्थः ॥ १६ ॥ ॥

अ० ॥ प्रश्नोपनिषदि 'अत्रैष देवस्स्वप्नान्न पश्यति अथैतस्मिञ्छरीरे सुखं भवति स यथा सोम्य वयांसि वासो वृक्षं संप्रतिष्ठन्ते एवं हवा एतत्सर्वं पर आत्मनि संप्रतिष्ठते पृथिवी च पृथिवीमात्रा चेत्यारभ्य-विज्ञानात्मा सह देवैश्च सर्वैः प्राणा भूतानि संप्रतिष्ठन्ति यत्र । तदक्षरं वेदयते यस्तु सोम्य स सर्वज्ञः सर्वमेवाविवेशे'ति श्रूयते अस्यायमर्थः विज्ञानमयः स्वस्योपाधिभूतान्तःकरणादौ तत्प्रकृतिभूताज्ञाने तद्भावापत्तिरूपलयं गते सति स्वयमेव सुषुप्त्यवस्थामापन्नः प्राज्ञस्सन् तदज्ञाने तादात्म्यवशात् तदज्ञानकार्याणां भूतभौतिकान्तःकरणादीनां लयाधिष्ठानं भवति-तदा एतास्मिन् स्वस्वरूपे-प्राङ्मनःकल्पितानां स्वप्नवस्तूनां विलीनत्वात् तानि न पश्यति किन्तु सच्चिद्रूपस्वरूपसुखात्मको भवति तदायमेव प्राज्ञः परमात्मेत्युच्यते-विज्ञानमयत्वादपि प्राज्ञत्वस्यान्तरत्वात्-तस्मिन् प्राज्ञे पञ्चीकृतानि भूतानि तत्कार्याणि चापञ्चीकृतानि भूताति तत्कार्याणि च ज्ञानेन्द्रियकर्मेन्द्रियान्तःकरणतद्वृत्तयश्च तदनुग्राहकदेवाश्च संप्रतिष्ठन्ते प्रलीयन्ते वृक्षे पक्षिण इव । ननु संप्रतिष्ठन्त इत्यनेन कथमभिधीयते प्रविलय इति चेदुच्यते-एतद्ब्राह्मणेन व्याचिख्यासितो यः-'यथा सुदीप्तात् पावकाद्विष्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः । तथाऽक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापि यन्तीति' द्वितीयमुण्डकोक्तो मन्त्रः । तेनाप्ययस्य श्रावितत्वात् मन्त्रब्राह्मणयोरेकार्थत्वत्वाय प्रविलयार्थो घटते-तथैव तत्र हृदयं विश्रमस्येति मुण्डकश्रुतेर्भाष्येणापि प्रदर्शितं-तमेव प्राज्ञं तदक्षरं वेदयते यस्त्विति श्रुत्युक्तप्रकारेण नित्य इति यो जानाति सः स्वारोपितसर्वजगज्ज्ञानवान् सर्वज्ञश्च कार्यजातमुपादानकारणतया व्याप्नोतीति जगतो मायामात्रत्वश्रुतेः सहायभूतं तद्वाक्यमर्थतः सङ्गृह्णाति **यस्मिन्निति**—

मू ॥ यस्मिन् स्वात्मन्येष देवस्सुप्तौ स्वप्नान्न पश्यति ॥ १७ ॥
तस्मिन्सर्वं पृथिव्यादि नितरां संप्रलीयते ।
इति श्रुतिर्मायिकत्वश्रुतेरेव सहायिका ॥ १८ ॥

व्या ॥ एष इति विज्ञानमय इत्यर्थः ॥ शेषः अवतरणादेवावगतार्थः ॥

अ० ॥ 'यदा सुप्तस्स्वप्नं न कञ्चन पश्यत्यथास्मिन् प्राण एवैकधा भवति तदैनं वाक् सर्वैर्नामभिस्सहाप्येति चक्षुस्सर्वै रूपैस्सहाप्येति श्रोत्रं सर्वैश्शब्दैस्सहाप्येति मनस्सर्वैर्ध्यानैस्सहाप्येती'ति कौषीतकिशाखायां श्रूयते । अस्यायमर्थः अन्तःकरणोपाधिको विज्ञानमयो यदा सुषुप्त्यवस्थामापन्नस्सन् प्राणशब्दितः प्राज्ञो भवति तदा अयमपि स्वप्नं न विजानाति स्वप्नस्य तदाकारतापरित्यागेन स्वस्मिन्विलीनत्वात् वागादयश्च स्वस्वविषयैस्सह एतस्मिन्नेव प्रलीयन्त इति । तदेतद्वाक्यं जगतः केवलमायिकत्वश्रुतेः सहायत्वेनार्थतस्संगृह्णाति **यदेति**—

मू ॥ यदायं कञ्चन स्वप्नं सुप्तः प्राज्ञो न पश्यति ॥ १८ ॥
तदा वागेनमप्येति नामभेषैरितीतरत् ।
सहायमन्यथा कर्मजत्वे च न लयो भवेत् ॥ १९ ॥

व्या ॥ **इतरदिति** । प्रागुक्तकाठकमुण्डकप्रश्नवाक्येभ्यो भिन्नमिदं कौषीतकीवाक्यं तानि काठकादिवाक्यानि च जगतः केवलप्रातिभासिकत्वावबोधकत्वेन प्रागुदाहृताया सर्वं विकारजातं मायामात्रमित्यादिश्रुतेरेव सहायानि भवन्ति विपक्षे बाधमाह **अन्यथा कर्मजत्वे चेति** जगतः केवलकर्मजत्वे चकारात् मायाकर्मोभयजन्यत्वे वा नैवोदाहृतश्रुत्युक्तलयः संभवति कर्मकारणत्ववादिभिश्चिरजीवित्वाभ्युपगमात् अतो न कर्मश्रुतेः सहायानि तानीत्यर्थः ॥ १९ ॥

अ० ॥ जीवे जगल्लयपरादप्यर्थान्तरपराणि शास्त्राणि च 'सर्वं विकारजातं मायामात्रमिति' श्रुतेरेव सहायानि—न कर्मणः कारणत्वपरश्रुतेरिति दर्शयितुं—'स यदा प्रतिबुध्यते यथाग्नेर्ज्वलतः सर्वा दिशो विष्फुलिङ्गा विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनः सर्वे प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवाः देवेभ्यो लोका' इति कौषीतक्यां श्रूयते । अस्यायमर्थः—सौषुप्तो जीवस्तावत् यदा जागरणावस्थावान् भवति—तस्मादेव जीवात् इन्द्रियाणि यथा गोळकं विप्रतिष्ठां गच्छन्ति—तदनन्तरं चक्षुराद्यनुग्राहकाः सूर्यादयः तदनन्तरं तन्निवासस्थानभूता द्युलोकादयश्च अग्नेस्सकाशाद्विष्फुलिङ्गवज्जायन्त इति तां श्रुतिं तत्समानार्थां च 'यथा सुदीप्तात् पावकाद्विष्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः । तथाक्षराद्विविधास्सोम्य भावाः प्रजायन्ते' इति मुण्डकश्रुतिञ्च सङ्गृह्णाति **कौषीतकीति**—

मू ॥ कौषीतकी मुण्डकं च सुप्तादस्य जनिं जगौ ।
यतस्तस्मान्मायिकत्वश्रुतेरेव सहायकम् ॥ २० ॥

व्या ॥ यतः कर्मनिरपेक्षात् सौषुप्तादानन्दमयात् निखिलजगदुत्पत्तिं श्रावयत्यतः केवलमायिकत्वश्रुतेरेव सहायकमित्यर्थः ॥ २० ॥

अ० ॥ 'स यथोर्णनाभिः तन्तुनोच्चरेद्यथाग्नेः क्षुद्रा विष्फुलिङ्गा व्युच्चरन्ति—एवमेवास्मादात्मनः सर्वे प्राणास्सर्वे लोकाः सर्वे देवाः सर्वाणि च भूतानि व्युच्चरन्तीति' बृहदारण्ये चतुर्थाध्याये प्रथमब्राह्मणावसाने सुषुप्त्यवस्थावन्तमधिकृत्य जगत्सृष्टिं श्रावयति अत्र प्राणा इति इन्द्रियाण्युक्तानि । शेषस्सुगमः । तां श्रुतिमर्थतस्सङ्गृह्य केवलमायिकत्वश्रुतेः सहायत्वेन योजयति **एवमिति**—

मू ॥ एवमेवात्मनो ह्यस्माल्लोकाद्या व्युच्चरन्ति च ।
इति श्रीबृहदारण्यश्रुतिस्सुप्ताज्जनिं जगौ ॥
यतस्तस्मान्मायिकत्वश्रुतेरेव सहायिका ॥ २१॥ ॥

व्या ॥ स्पष्टोऽर्थः ॥ २१॥ ॥

अ० ॥ प्रतिज्ञातार्थे कैवल्यश्रुतिमप्युदाहरति **पुरत्रय इति**—

मू ॥ पुरत्रये क्रीडति यस्तु जीवस्ततस्तु जातं सकलं विचित्रं ॥
एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च ।
खं वायुर्ज्योतिरापश्च पृथ्वी विश्वस्य धारिणी ॥ २३ ॥
इतीदं स्यान्मायिकत्वश्रुतेरेव सहायिका ॥ २३॥ ॥

व्या ॥ **पुरत्रय इति** पुराणां स्थूलसूक्ष्मकारणशरीराणां त्रये जाग्रत्स्वप्नसुषुप्त्यवस्थासु क्रमात् यो जीवः अहमित्युपलभ्यमानः सञ्चरति तस्मादेवाभिन्ननिमित्तोपादानकारणात् सकलं सेश्वरं जाग्रत्स्वप्नकालिकं नानाविधं जगत् विचित्रशक्त्यविद्यासहचर्याज्जायते अत्र वृद्धसम्मतिश्च ॥ श्लो० ॥ स्वस्मिन्नेव स्वप्नवदीशानत्वादिसर्वकल्पनया । जीवस्सर्वविकारोपादानमिति ब्रुवन्त्यन्ये इति सिद्धान्तकल्पवल्लीकारैरपि दर्शिता । शेषः सुगमः ॥ २३॥ ॥

अ० ॥ माण्डूक्ये सुषुप्त्यवस्थावन्तं जीवं प्रकृत्य श्रूयते 'प्राज्ञस्तृतीयः पादः एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानामिति' अस्यायमर्थः तत्तदवस्थायां कल्पितं द्वैतजातं प्रकर्षेण जानातीति प्राज्ञः सर्वस्य प्रातिभासिकस्य वियदादेरेष एवेश्वरः अवस्थात्रयेषु स्वेन स्वस्मिन् कल्पितानामज्ञातत्वाभावात् तत्सर्वं जानातीति सर्वज्ञः स्वप्नवत् स्वस्मिन् कल्पितान्यनु प्रविश्य यमयतीत्यन्तर्यामी च भवति सर्वं अस्मात्प्रसूयत इति सर्वयोनिः यत एव-

मतः स्वारोपितानां भूतानां प्रभवन्त्यस्मादिति प्रभव उत्पत्तिकारणं अपियन्त्यस्मिन्नित्यप्ययो लयकारणं च एष एवेति । तदेतद्वाक्यं जगतः केवलमायिकत्वश्रुतेः सहायत्वेन संगृह्णाति **प्राज्ञ इति**--

मू ॥ प्राज्ञस्तृतीयपादोऽयं सर्वज्ञो निखिलेश्वरः ॥ २४ ॥
प्रभवश्चाप्ययोऽध्यस्तभूतानामिति च श्रुतिः ।
तद्ग्राप्यं स्यान्मायिकत्वश्रुतेरेव सहायकम् ॥ २५ ॥

व्या ॥ तद्ग्राप्यमिति तस्याः प्राज्ञस्तृतीयः पाद इत्यादिमाण्डूक्यश्रुतेः सुप्तो हि भूतपूर्वगत्या प्राज्ञ इत्युच्यते । एष एव साधिदैविकस्य भेदजातस्य सर्वस्येशिता नैतस्माज्जात्यन्तरभूतोऽन्येषामिवेति भाष्यञ्च सहायकमित्यर्थः॥ अनेन भाष्येणैतदुक्तं भवति 'मायैषा तस्य देवस्य यया सम्मोहितस्त्वयमिति' शास्त्रोक्तप्रकारेण मायापरिमोहवशेन तस्यां तादात्म्यापन्नत्वेन मायिकस्य सर्वस्य अभिन्ननिमित्तोपादानभूतात् प्रकृतात् प्राज्ञादाध्यात्मिकात् नान्यो जात्यन्तरभूतोऽभिन्ननिमित्तोपादानात्मकः आधिदैविकः पुरुषः जगदीश्वरयोर्भेदवादिनामिव संभवतीति। तथा हि 'इन्द्रो मायाभिः पुरुरूपमीयते सोऽकामायत बहु स्यां प्रजायेयेति' 'कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा । श्रुतेस्तु शब्दमूलत्वात् । आत्मनि चैवं विचित्राश्च हि' ॥ श्लो० ॥ न युक्तो युज्यते वास्य परिणामो न युज्यते । कात्स्न्यार्द्ब्रह्म नित्यतासंरंशात् सावयवं भवेत् । मायाभिर्बहुरूपत्वं न कात्स्न्यान्नापि भागतः । युक्तोऽनवयवस्यापि परिणामोऽत्र मायिक इति श्रुतिसूत्रतदर्थप्रकाशकाधिकरणरत्नमालावचनैरुक्तस्य मायिकस्य बहुभवनस्य-स्रष्टुः स्वकीयोपाधौ अविवेकपूर्वकतादात्म्यमन्तरेणासंभाव्यमानत्वात् न तादृशतादात्म्यवतः सौषुप्तात् प्राज्ञादन्यो जगदुपादानं भवति । एवमेवोक्तं श्रीविद्यारण्याचार्यैरपि ॥ श्लो० ॥ सौषुप्तमानन्दमयं प्रक्रम्यैवं श्रुतिर्जगौ । एष सर्वेश्वर इति सोऽयं वेदोक्त ईश्वरः । एवमानन्दविज्ञानमयावीश्वरजीवकौ । आनन्दमय ईशोऽयं बहु स्यामित्यवेक्षतेति ॥ अन्यथा सौषुप्तात् प्राज्ञादन्यस्याधिदैविकस्य विवेकविज्ञानवत्वेन न स्वस्मिन्मायिकबहुभवनाध्यासः स्यात् । कथं तर्हि यत्सौषुप्तस्यास्य प्राज्ञस्य सर्वेश्वरत्वादिवचनं तदौपचारिकमेव आधिदैविकेनान्तर्यामिणा सहास्य कारणशरीरोपाधिकत्वसाम्यादिति आनन्दगिरिस्वामिभिः दीक्षितप्रभृतिभिश्च प्रदर्शितमिति चेदुच्यते प्रतिकर्मव्यवस्थावाद इति दृष्टिसृष्टिवाद इति च सत्तैकवाद इति च त्रिविधः तत्वोपदेशप्रकारः—तत्र मन्दा-

धिकारिण प्रति प्रतिकर्मव्यवस्थावादः प्रवृत्तः तत्राधिदैविको महेश्वरः प्राणिनां विचित्रकर्मसापेक्षस्सन् जगत् सृजति–तत्सृष्टमज्ञातसत्ताकं भवति । तादृशस्य जगतः सुषुप्तिकाले आध्यात्मिके जीवे वा आधिदैविके महेश्वरे वा न मुख्यो लय-स्संभवति तदानीमपि पुरुषान्तरव्यवहारेण साकमज्ञातत्वेन विद्यमानत्वस्य तैरे-वाभ्युपगतत्वात् । तादृशस्य प्रतिकर्मव्यवस्थावादस्य प्रागुदाहृतमाण्डूक्यश्रुति-तद्भाष्यादिभिः बाध्यमानत्वमालक्ष्य प्रतिकर्मव्यवस्थावादनिरतैरानन्दगिरिस्वा-मिप्रभृतिभिः तद्वादरक्षणार्थम् ॥ श्लो ॥ रज्जुसर्पादिवद्विश्वं नाज्ञातं सदिति स्थितं । प्रबुद्धदृष्टिसृष्टत्वात् सुषुप्तौ च लयश्रुतेरिति अद्वैतसिद्धौ सिद्धिकारप्रदर्शितदृष्टिसृष्टि-वादस्य मूलभूतं माण्डूक्यादिश्रुतितद्भाष्यादिकमन्यथा स्वमतानुसारेण व्याख्या-तम् ।

ननु प्रतिकर्मव्यवस्थावादो मन्दाधिकारिविषय इति च आनन्दगिरिस्वामि-प्रभृतयः प्रतिकर्मव्यवस्थावादनिरता इति च कुतोऽवगम्यते इति चेदुच्यते । यद्येवं सर्वस्य प्रातिभासिकत्वे घटादेः स्वज्ञानात् पूर्वमसत्त्वेन प्रतिकर्मव्यवस्थानुपपत्तिः–, अधिष्ठानस्यापि शुक्त्याद्यंशस्य रूप्यवदिदं रूप्यमिति ज्ञानात् प्रागसत्त्वेन संप्रयोगादि-हेतुत्रयजन्यत्वस्य अध्यासतटस्थलक्षणस्य चायोगः इति चेन्न–प्रतिकर्मव्यव स्थायाः संप्रयोगादिहेतुत्रयजन्यत्वरूपाध्यासतटस्थलक्षणस्य च मन्दाधिकारिविषय-त्वादिति अद्वैतसिद्धिकारैः प्रतिकर्मव्यवस्थावादोपदेशप्रयुक्तन्यग्भावः तद्वादोपदे-ष्टॄणां माभूदिति तद्वादस्य मन्दाधिकारिविषयत्वेन प्रदर्शितत्वात् तद्विषयत्वमवगम्यते।

तथैव द्विविधेऽपि दृष्टिसृष्टिवादे मनःप्रत्ययमलभमानाः केचिदाचार्याः दृष्टि-सृष्टिवादं न रोचयन्ते–श्रुतिदर्शितेन क्रमेण परमेश्वरसृष्टमज्ञातसत्ताकमेव विश्वं तत्तद्विषयप्रमाणावतरणे तस्य दृष्टिरिति सिद्धान्तलेशसंग्रहस्य द्वितीयपरिच्छेदवचनैः दृष्टिसृष्टिवादस्य अद्वैतसिद्धयुक्तप्रकारेण अनेकश्रुतिस्मृतितद्भाष्यवासिष्ठवार्तिका-मृताद्याकरग्रन्थसिद्धत्वेऽपि तत्राविश्वासपूर्वकं केषाञ्चिदाचार्याणां प्रतिकर्म-व्यवस्थावादनिष्ठत्वस्य प्रशंसनाच्च तदुभयमवगम्यते सत्तैकवाद उत्तमाधिकारिणं प्रति प्रवृत्त इति द्वितीयनिरूपणे प्रागेव दर्शितम् ।

ननु सुषुप्तिकाले जीवे ब्रह्मणि वा तत्तत्प्राणिकर्मप्रसूतानां शरीरादिजगतां प्रतिकर्मव्यवस्थाप्रकारेण मुख्यलयाभावस्याभ्युपगमे को बाध इति चेदुच्यते–सगुणो पास्त्या मुक्तस्य ब्रह्मलोकं गतस्य भोगार्थं द्वैतप्रतीत्यभ्युपगमे–'न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्ये' दित्यादि द्वैतप्रतीत्यभावपराणां शास्त्राणां का गतिरिति प्राप्ते–'यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति यदा सुप्त-

स्वप्नं न कञ्चन पश्यति । यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्ये' दिति बृहदारण्यादिश्रुतीनां द्वैतादर्शनपराणां विभागेन विषयप्रदर्शकेन 'खाप्ययसंपत्त्यो-रन्यतरापेक्षमाविष्कृतं हि'ति सूत्रेण स्वस्मिन्सौषुप्तिके जीवे दृश्यस्य सर्वस्य जगतोऽप्ययोपदेशस्य च-मुक्तिदशायामुच्छेदोपदेशस्य च असदर्थप्रलपिता स्यात् अतो यथाशास्त्रं यथाविद्वदनुभवं परमात्माक्षरब्रह्माकाशप्राणादिशब्दितः सौषुप्तः परिपूर्णः प्रतिबिम्बत्वांशत्वादिधर्मरहितः प्राज्ञ एव केवलाविद्यकनिखिलजगदुपादानमिति शास्त्रार्थपरिशुद्धये विद्वद्भिरास्थेयम् ॥ २५ ॥

अ० ॥ एवमस्मत्पदार्थस्य प्राज्ञस्य जगत्कारणत्वमावेद्य तत्राहमित्यपरोक्षविद्वदनुभवपरां कैवल्यश्रुतिं जगतः केवलाविद्यकत्वश्रुतेः सहायत्वेन दर्शयति **मय्येवेति**—

मू ॥ मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् ।
मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहम् ॥
इतियं स्यान्मायिकत्वश्रुतेरेव सहायिका २६॥ ॥

व्या ॥ मय्येव जागरणादिसमये सकलं जगत् जायते जातं च तत्पुनस्सुषुप्त्यवस्थागमनपर्यन्तं मय्येव प्रतितिष्ठति सुषुप्त्यवस्थागमने सति मय्येव सौषुप्ते प्राज्ञे विलीयते—न ततोऽतिरिक्ते आधिदैविके यत एवं तस्मादहमेव कार्यकारणयोरनन्यत्वन्यायेन द्वैतविवर्जितं ब्रह्मास्मीत्यर्थः ॥ २६॥ ॥

अ० ॥ इदानीमुदाहृतानां सौषुप्ताज्जगत्सृष्टिपराणां श्रुतीनां जगतः केवलमायिकत्वे तात्पर्याभावे बाधमाह **एतानीति**—

मू ॥ एतानि तत्सहायानि नान्यथाऽस्त्वाद्वितीयता ॥ २७ ॥

व्या ॥ **तत्सहायानीति** तस्याः सर्वं विकारजातं मायामात्रमित्यादिश्रुतेरेवोदाहृतानि कौषीतक्यादिवाक्यानि सहायानि अन्यथा जगतः केवलकर्मापरिणामत्वे वा कर्मोपेतमायापरिणामित्वे वा सुषुप्तेः पौर्वोत्तरकालिकस्य शरीरादिजगतः एकत्वात् सुषुप्तौ प्राज्ञे आधिदैविके वा लयासंभवात् मय्येव सकलं जातमिति प्रागुदाहृतश्रुत्युक्तं यत्स्वकार्येणाद्वितीयत्वमस्मत्पदार्थचैतन्यस्य तत्पीड्यतेऽर्थः ॥ २७ ॥

अ० ॥ इदानीं जगतः ज्ञाननाश्यत्वपराण्यपि शास्त्राणि प्रागुदाहृतकेवलमायिकत्वश्रुतेरेव सहायानीत्याह **यदेति**—

मू ॥ यत्र सर्वमभूत्स्वात्मा कं पश्येदिति च श्रुतिः ।
को मोहस्तत्र कश्शोक एकत्वमनुपश्यतः ॥ २८ ॥
इति श्रुतिस्तथा शोकमात्मवित्तरतीति च ।
एतान्यपि सहायानि नान्यथाऽज्ञाननाश्यता ॥ २९ ॥

व्या ॥ 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्' 'तरति शोकमात्मवित्' इत्यादीनि शास्त्राणि सहायानीत्युक्ताऽन्यथा बाधमाह **नान्यथेति** शरीरादेः कर्मजन्यत्वे भोगैकनाश्यत्वात् न ज्ञाननाश्यत्वसिद्धिरित्यर्थः ॥ २९ ॥

अ० ॥ एकविज्ञानेन सर्वविज्ञानप्रतिज्ञापराणि शास्त्राण्यपि प्रागुक्तायाः दृश्यस्य मायिकत्वश्रुतेरेव सहायानीति दिदर्शयिषुरादौ यत् छान्दोग्ये "उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञात' मित्यारुणिना श्वेतकेत्वाख्यपुत्रे पृष्टे सति 'कथन्नु भगवस्स आदेशो भवती'ति श्वेतकेतोः प्रार्थनानन्तरं 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्या'दिति मृदादिदृष्टान्तपूर्वकं येन विचारितेन निश्चितेन अन्यदप्यविचारितमतर्कितमनिश्चितं विचारितं तर्कितं निश्चितं भवति तत् जगदुपादानं सदाख्यमज्ञानोपेतं विशेषात्मकसर्वकार्यवर्जितं प्राज्ञतत्वं 'सदेव सोम्येदमग्र आसी'दिति आम्नातं तत् संगृह्णाति **केनेति**—

मू ॥ केन ज्ञातेन तत्वेनाश्रुतं चापि श्रुतं भवेत् ।
इति चेद्वै सदाख्येन प्राज्ञेन विदितेन हि ॥ ३० ॥
सर्वं विज्ञायते सोम्य मृत्पिण्डेन घटादिवत् ।
प्रतिज्ञेयं मायिकत्वश्रुतेरेव सहायिका ॥ ३१ ॥

व्या ॥ सुषुप्त्यवस्थावतः प्राज्ञस्यैव सच्छब्दवाच्यत्वं दर्शयन्नि । **सदाख्येनेत्यादिना** कुत एतदवगम्यत इति चेदुच्यते—प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तर'मिति श्रुत्युक्तं यत्–विज्ञानमयस्य तृतीयावस्थं तत्वं प्राज्ञशब्दितं प्रागस्वाप्समिति प्रत्यभिज्ञायमानं तस्यैव हि—'सता सोम्य तदा संपन्नो भवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतो भव'तीति श्रुत्या च–'राहुग्रस्तदिवाकरेन्दुसदृशो मायासमाच्छादनात् सन्मात्रः करणोपसंहरणतो योऽभूत् सुषुप्तः पुमान् । प्रागस्वाप्समिति प्रबोधसमये यः प्रत्यभिज्ञायते तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये' इत्याचार्यवाक्यगतेन सन्मात्र इति पदेन च एकमेवाद्वितीयमिति श्रुत्युक्तत्रिविधपरिच्छेदराहित्येन सह सच्छब्दवा-

स्यास्य च दर्शितत्वात् । दक्षिणामूर्तये इति जगतः सृष्टिस्थितिसंहारेषु दक्षिणः समर्थश्चासावमूर्तिः शरीररहितश्च दक्षिणामूर्तिः तस्मै श्रीगुरुमूर्तये अस्वाप्समिति प्रत्यभिज्ञाताय पूज्यस्वरूपायेत्यनेनापि विशेषणेन प्राज्ञस्य जगदुपादानत्वं दर्शितम् । शेषः अवतरणादेव गतार्थः ॥ ३१ ॥

अ० ॥ इदानीं–'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवती'ति मुण्डकोपनिषदि शौनकाख्यशिष्यप्रश्नस्य–'यया तदक्षरमधिगम्यते यत्तददेश्यमग्राह्यमगोत्रमवर्णमचक्षुः श्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः' इत्यारभ्य–यथा सुदीप्तात्पावकाद्विष्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः तथाऽक्षराद्विविधाः सोम्यभावाः प्रजायन्ते तत्र चैवापियन्ती'ति प्रतिवचनं श्रूयते । अस्यायमर्थः यदज्ञानोपाधिकत्वेन सर्वभूतभौतिकानामुत्पत्त्यादिकारणं तस्मिन् जगदुपादानभूते विज्ञाते सर्वं विज्ञातं भवतीति तदिदं प्रतिज्ञावाक्यं जगतः केवलाविद्यकत्वश्रुतेरेव सहायत्वेन संगृह्णाति । **कस्मिन्निवति—**

मू ॥ कस्मिन्नु भगवो ज्ञाते सर्वं विज्ञायते गुरो ।
इति शौनकवाक्यस्थ भूतयोन्यादिवाक्यतः ॥ ३२ ॥
एष योनिश्च भूतानामिति माण्डूक्यतो यथा ।
भूतानां प्रभवो यस्मादप्ययो यत्र बोधितः ॥ ३३ ॥
तद्वेत्तुस्सर्ववित्त्वोक्तिः प्रागुक्तायास्सहायिका ॥ ३३॥ ॥

ठ्या ॥ उदाहृतभूतयोन्यादिवाक्यस्य सौषुप्तिकप्राज्ञपरत्वे एष योनिः सर्वस्य प्रभावाप्ययौ हि भूतानामिति माण्डूक्यश्रुतिं संवादयति **एष योनिरित्यादिना** । शेषः अवतरणादेव गतार्थः ॥ ३३॥ ॥

अ० ॥ संप्रति 'न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति आत्मनस्तु कामाय सर्वं प्रियं भवति आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेन इदं सर्वं विदित'मिति बृहदारण्ये चतुर्थाध्याये श्रूयते । अस्यायमर्थः स्वप्नवस्तुवत् निखिलस्य स्वस्मिन्नेव कल्पितत्वेन प्रातिभासिकत्वमभिप्रेत्यैव तदुपादानभूतस्वात्मज्ञानेन स्वारोपितं सर्वं विज्ञातं भवतीति तदेतत् प्रतिज्ञावाक्यमपि जगतः केवलमायिकत्वश्रुतेः सहायमिति संगृह्णाति **आत्मकामायेति—**

मू ॥ आत्मकामाय भवति प्रियं सर्वमतस्स्वयम् ॥ ३४ ॥
परमानन्दरूपोऽयं द्रष्टव्यः प्रकृतित्वतः ।
मैत्रेय्यात्मविबोधेन सर्वं दृष्टमिति श्रुतेः ॥ ३५ ॥
स्वप्नवज्जगतः प्रातिभासिकत्वे प्रसिद्ध्यति ।
स्वार्थोऽतस्साधिका चेयं नो चेत्स्वार्थो न संभवेत् ॥ ३६ ॥

व्या ॥ श्रुतेः स्वार्थः प्रसिद्ध्यतीत्यन्वयः । **अत इति** प्रातिभासिकस्यास्य जगतः प्राज्ञोपाध्यज्ञानपरिणामत्वात् इयं प्रतिज्ञा श्रुतिः सर्वस्य मायिकत्वश्रुतेरेव साधिका भवतीति शेषः अन्यथा बाधमाह **नो चेत् स्वार्थो न संभवेदिति** बृहदारण्ये चतुर्थाध्याये पञ्चमब्राह्मणे 'स वायमात्मा सर्वेषां भूतानामधिपति' रित्यस्मिन्खण्डे' 'स एष विद्वान् ब्रह्मवित सर्वोपाधिः सर्वात्मा भव'तीति भाष्योक्तप्रकारेण सर्वेषां विचित्रशक्त्यविद्योपाधिकसौषुप्तानन्दमयप्रकृतिकत्वेन प्रातिभासिकसत्तां विना अज्ञातसत्ताभ्युपगमे विदुषः सर्वोपाधित्वसर्वात्मत्वाभावात् न प्रतिज्ञाश्रुतेर्मुख्यार्थसिद्धिः । तथैव स्वात्मजगतोरेकसत्ताभ्युपगमेऽपि न प्रतिज्ञाश्रुतेर्मुख्यार्थसिद्धिः तत्पक्षे स्वात्मनि विज्ञाते न तद्व्यतिरिक्तमपरं किञ्चिज्ज्ञातव्यमस्ति आत्मव्यक्त्यतिरेकेण कार्यस्य व्यक्त्यन्तरामावादिति वक्तव्यत्वात् मृन्मात्रप्रकृतिकानां मृन्मात्रत्ववदात्ममात्रप्रकृतिकानामात्ममात्रत्वात् प्रागुदाहृतभाष्योक्तं सर्वोपाधिरिति विदुषो विशेषणञ्च न संगच्छेत घटादिप्रकृतिभूताया मृदः घटाद्युपाधिकत्वादर्शनाच्चेति विवेकः ॥ ३६ ॥

अ० ॥ इदानीं वक्ष्यमाणैश्शास्त्रैरीश्वर एव स्वाज्ञानवशात् साक्षात् संसरतीति प्रतिपाद्यमानत्वात् स आधिदैविकस्सर्वज्ञः परमेश्वरश्चेत् कर्मफलं जीवस्य ददातीति वक्तुं न शक्यते जीवेश्वरयोर्भेदाभावात् अतस्सौषुप्तिकः प्राज्ञः स्वयमीश्वरस्सन्नपि स्वस्मिन्नज्ञानवशात् कर्तृत्वभोक्तृत्ववत् भोग्यजातमपि स्वरूपतोऽध्यस्यन् स्वयमेव भुङ्क्ते इति प्रदर्शयितुकामः आदौ तथाविधं—'स एव मायापरिमोहितात्मा शरीरमास्थाय करोति सर्वम् । स्वप्नान्नपानादिविचित्रभोगैस्स एव जाग्रत्परितृप्तिमेतीति, कैवल्योपनिषद्वाक्यमपि जगतः केवलाविद्यकत्वश्रुतेरेव सहायत्वेन संगृह्णाति **शिवो हीति**—

मू ॥ शिवो हि मायापरिमोहितात्मा
शरीरमास्थाय करोति कृत्स्नम् ।

वधूदकान्नादिविचित्रभोगैः
स एव जाग्रत्परितृप्तिमेति ॥ ३७ ॥
इतीदं स्यान्मायिकत्वश्रुतेरेव सहायकम् ॥ ३७॥ ॥

व्या ॥ अवतरणादेव गतार्थः ॥ ३७॥ ॥

अ० ॥ इदानीन्नामरूपव्याकरणादिपरं 'सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन्यदास्त' इति मन्त्रवर्णमपि जगतः मायिकत्वश्रुतिसहायत्वेन संगृह्णाति **एक इति**—

मू ॥ एको विचित्य रूपाणि कृत्वा नामानि तानि यः ॥ ३८ ॥
वर्ततेऽभिवदन्नेवेत्येतदाविद्यकं जगौ ।
यतस्तस्मान्मायिकत्वश्रुतेरेव सहायकः ॥ ३९ ॥

व्या ॥ यस्मादनेन मन्त्रेण एककर्तृकत्वेन श्रावितानां नामरूपरचनतदभिवदनानाम्मध्ये प्रत्यक्षतो विज्ञानमयस्यैव जीवस्याभिवदनकर्तृत्वदर्शनात् तस्यैव तदभिवदनात्प्राग्विचित्रशक्त्युपेतया स्वाविद्यया सर्वस्मिन् नामरूपकल्पकत्वावगमात् जगतः केवलाविद्यकत्वेन मिथ्यात्वश्रुतेरेव एष मन्त्रवर्णः सहाय इत्यर्थः ॥

अ० ॥ इदानीं प्रागुदाहृतश्रुतिसमानार्थकं 'सोऽकामयत । बहु स्यां प्रजायेये' त्यारभ्य 'तत्सृष्ट्वा तदेवानुप्राविश' दित्यादितैत्तिरीयकवाक्यञ्च 'सेयं देवतैक्षत इन्ताहमिमास्तिस्रो देवताः अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणी'ति छान्दोग्यवाक्यञ्च जगतः केवलाविद्यकत्वेन मिथ्यात्वश्रुतेरेव सहायत्वेन संगृह्णाति **बहु स्यामिति**—

मू ॥ बहु स्यामिति यस्स्रष्टा सोऽनुप्राविशदेव तत् ।
सूक्ष्माणि जीवरूपेण प्रविश्य व्याकरोम्यहम् ॥ ४० ॥
इत्यैक्षत परा देवतेति चाविद्यकं जगौ ।
यतस्तस्मान्मायिकत्वश्रुतेरेव सहायकम् ॥ ४१ ॥

व्या ॥ **सूक्ष्माणीति** अत्रिवृत्कृतानि तेजोबन्नानीत्यर्थः ॥ शेषः पूर्ववत्॥

अ० ॥ अधुना 'यः पृथिव्यां तिष्ठन् यः पृथिव्या अन्तरः यं पृथिवी न

वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति एष त आत्मा अन्तर्याम्यमृत' इत्येतत्समानबहुपर्यायादेशानन्तरं 'अदृष्टो द्रष्टाऽश्रुतः श्रोताऽमतो मन्ताऽविज्ञातो विज्ञाते'ति अन्तर्यामित्वेन प्रागुपदिष्टस्य स्वात्मन एव प्रत्यक्षाद्यविषयत्वपूर्वकं द्रष्टृत्वादिकमुपदिश्य नान्योऽस्ति द्रष्टेत्यादिना सुप्ताद्विज्ञानमयस्य भेदनिषेधः अन्तर्यामिब्राह्मणे श्रूयते तदिदं ब्राह्मणम् जगतः केवलाविद्यकत्वेन मिथ्यात्वश्रुतेरेव सहायमित्याह **जीवस्येति**--

मू ॥ जीवस्य प्रतिविम्बत्वब्रह्मांशत्वाद्यसंभवात् ।
ईशस्य मोहराहित्यात्कार्येऽहंबुद्ध्यभावतः ॥ ४२ ॥
सुप्तस्यैव स्वकार्यानुप्रवेशाद्द्रष्टृता ततः ।
सोऽन्तर्यामी ततो नान्यो द्रष्टेत्यन्यनिषेधकम् ॥ ४३ ॥
अन्तर्यामिब्राह्मणं च मायिकत्वश्रुतेस्सुहृत् ॥ ४३॥ ॥

व्या ॥ जीवस्य प्रतिबिंबत्वाद्यभावस्तावत् प्राक् तृतीयनिरूपणे विस्तरेण निरूपितः **ईशस्येति** आधिदैविकस्येत्यर्थः । **सुप्तस्येति** कारणोपाधिकस्येत्यर्थः **स इति** कारणोपाधिक इत्यर्थः ॥ ४३॥ ॥

अ० ॥ इदानीं प्रागुदाहृतकैवल्यादिश्रुतीनां वर्णितार्थप्रतिपत्तये तच्छ्रुतिमूलकं 'अवस्थितेरिति काशकृत्स्न' इति सूत्रं तत्रत्यभाष्यमपि संवादयति **आचार्य इति**--

मू ॥ आचार्यः काशकृत्स्नोऽयं मन्यतेऽवस्थितेरिति ॥ ४४ ॥
इति सूत्रं तदीयञ्च काशकृत्स्नमतं पुनः ।
परमेश्वर एव स्याज्जीवस्त्वाविद्ययेत्यतः ॥ ४५ ॥
इदमेवाश्मरथ्यादिमताद्ग्राह्यतमं भवेत् ।
तत्त्वमस्यादिशास्त्रानुसारित्वात्तद्धियाऽमृतः ॥ ४६ ॥
ब्रह्मणोऽन्यो गुहायां न निहितोऽस्ति कुतो यदि ।
तत्सृष्ट्वा तत्स्वरूपेण प्राविशत्स इति श्रुतेः ॥ ४७ ॥
इति भाष्यं प्रसुप्तस्य स्वसृष्टेष्वभिमानतः ।
जीवताबोधकं चास्याविद्यकत्वश्रुतेस्सुहृत् ॥ ४८ ॥

व्या ॥ 'अवस्थितेरिति काशकृत्स्न' इति सूत्रं संगृह्णाति **आचार्य इत्यादिना** प्रागुक्तकैवल्यादिश्रुतिभिः परमात्मनः प्राज्ञस्यैव विज्ञानमयभावेन अवस्थित्यवगमादात्मनस्तु कामाय सर्वं प्रियं भवति–आत्मा वा अरे द्रष्टव्य इत्युपपन्नभेदेनोपक्रमणमिति काशकृत्स्नाचार्यो मन्यत इति सूत्रतः शरीरादावहमभिमानाध्यासवशात् ब्रह्मैव जीव इति दर्शयित्वा अस्मिन्नर्थे तल्लक्षं–काशकृत्स्नस्याचार्यस्य अविकृतः परमेश्वरो जीवः नान्य इति मतमिति भाष्यमप्युदाहरति–तदीयञ्चेत्यारभ्य स्वाविद्ययेतीत्यन्तेन । 'प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्य'इति सूत्रोक्ताचार्येण जीवेशयोः कार्यकारणभावोऽभिप्रेतः । 'उत्क्रमिष्यत एवं भावादित्यौडुलोमि'रिति सूत्रोक्ताचार्येण जीवेशयोरवस्थान्तरापेक्षौ भेदाभेदौ वास्तवावित्यभिप्रेतौ । तत्र काशकृत्स्नीयमतं श्रुत्यनुसारीति गम्यते प्रतिपिपादयिषितार्थानुसारित्वात् तत्त्वमस्यादिश्रुतिभ्यः–एवं च सति तज्ज्ञानादमृतत्वमवकल्पते इति तल्लक्षमपि काशकृत्स्नाचार्यमतप्रशंसापरं भाष्यं प्रकृतार्थोपयोगित्वेन सङ्गृह्णाति–इदमेवेत्यारभ्य तद्धियाऽमृत इत्यन्तेन–किं च तल्लक्षं–न च ब्रह्मणोऽन्यो गुहायां बुद्धौ निहितोऽस्ति–'तत्सृष्ट्वा तदेवानुप्राविश' दिति स्रष्टुरेव प्रवेशश्रवणादिति भाष्यमप्यत्रोदाहरति–**ब्रह्मण इत्यादिना** स्वसृष्टमेव केवलाविद्याकशरीरादिकं प्रतिबिंबादिभावमन्तरेण स्वरूपेणैव प्रविवेशेत्यर्थः ॥ शेषस्सुगमः ॥ ४८ ॥

अ० ॥ इदानीं उदाहृतस्य काशकृत्स्नाचार्यमतप्रदर्शनपरभाष्यस्य आधिदैविकेश्वरपरत्वं निराकरोति **तद्भाष्योक्त इति**––

मू ॥ तद्भाष्योक्तः परेशस्तु न सुप्तो हीश्वरो यदि ।
व्यामोहासंभवात्तस्य संसारित्वं कुतो भवेत् ॥ ४९ ॥
कर्मणश्चेत्तदेशस्य बन्धो ज्ञानान्न नश्यतु ॥ ४९॥ ॥

व्या ॥ आधिदैविकस्य सर्वज्ञत्वेन व्यामोहाभावात्तस्य शारीरत्वप्रयोजकं कर्मैवेति चेत् तत्कर्मणः प्रारब्धरूपत्वात् तत्कृतो बन्धो न ज्ञाननाश्यो भवेदित्यर्थः।

अ० ॥ नन्वव्यामोहितः परमेश्वरः स्वसृष्टान्तःकरणे प्रतिबिम्बवतीति यत् तस्यैवानेन जीवेनात्मनाऽनुप्रविश्येत्यादिश्रुत्याभिप्रेतत्वात् तद्बिम्बभूतस्यैवेश्वरस्य 'लोकवत्तु लीलाकैवल्य'मिति सिद्धान्तसूत्रेण लीलया जगत् सृष्टृत्वस्य राद्धान्तितत्वात् कथं स्वाज्ञानमोहितस्य प्राज्ञस्य स्वस्मिन्नविद्यया जगदारोपकत्वमिति शङ्कते **प्रतिबिम्बात्मनेति**––

मू ॥ प्रतिबिम्बात्मना चित्ते हीशावेशो यतस्ततः ॥ ९० ॥
अव्यामोहित ईशानो लीलया राजवत्सृजेत् ।
इति सूत्रकृता प्रोक्ते मोहितोऽन्यः कथं सृजेत् ॥ ९१ ॥

व्या ॥ **अन्य इति** आधिदैविकात् परमेश्वरादन्यः सौषुप्तिकः कथं जगत् सृजतीत्यर्थः ॥ ५१ ॥

अ० ॥ समाधत्ते **न निर्गुणमिति**--

मू ॥ न निर्गुणं विभु ब्रह्म स्वाध्यस्ते प्रतिबिम्बति ।
दृष्टान्ताभावतः किञ्च कृतहानादिदूषणम् ॥ ९२ ॥
अंशोऽवच्छिन्न आभासो जीवश्चेत्संभवेत्तथा ।
ब्रह्मणो विभ्वसङ्गत्वबाधश्चोक्तस्तृतीयके ॥ ९३ ॥

व्या॥ **निर्गुणमिति** नीरूपामिति यावत् । जीवस्य निर्गुणब्रह्मप्रतिबिम्बत्वादिपक्षे दृष्टान्ताभावादिदोषत्रयस्य प्राक् तृतीयनिरूपणे दर्शितत्वादस्मत्प्रतिज्ञातार्थसिद्धिरित्यर्थः ॥ ५३ ॥

अ० ॥ यत्तूक्तं प्रयोजनवत्त्वाधिकरणमवलंब्य वियदादिसर्जनं तत्तत्प्राणिकर्मसापेक्षकाधिदैविकपरमेश्वरकर्तृकमेवेति तस्य सूत्रकारैस्तत्रत्येन 'न प्रयोजनवत्त्वा' दिति प्रथमसूत्रेण निरीश्वरवादिनां मीमांसकानां मतानुसारेण पूर्वपक्षं संप्रदर्श्य-शस्य निमित्तकारणत्वमात्रमवलम्ब्य 'लोकवत्तु लीलाकैवल्य'मिति तदुत्तरसूत्रेण प्रतिवचनमुक्तमिति ।

तदीयेनैव न चेयं परमार्थविषया सृष्टिश्रुतिः अविद्याकल्पितनामरूपव्यवहारगोचरत्वात् ब्रह्मात्मभावप्रतिपादनपरत्वाच्चेत्येतदपि न प्रस्मर्तव्यमित्यनेन भाष्येण सृष्टिश्रुतेः परमार्थजगत्सर्जनपरत्वनिराकरणादवगम्यते--अतो नेदं जगत् कर्मजत्वेन परमार्थसत्यं किं तु प्राज्ञाज्ञानपरिकल्पितत्वात् मिथ्यैवेत्युत्तरमाह **परेति**-

मू ॥ परबुद्ध्यनुसारेण परिचोद्य समाहितम् ।
लीलाकैवल्यसूत्रेण सूत्रकारैर्विनाऽऽशयम् ॥ ९४ ॥
एवं ज्ञात्वा भाष्यकारो न चेयं सर्जनश्रुतिः ।
परमार्थपरा चेति प्राहातो नेशजं जगत् ॥ ९५॥ ॥

व्या ॥ **लीलाकैवल्यसूत्रेणेति** लोकवत्तु लीलाकैवल्यमिति सूत्रेणेत्यर्थः **एवं ज्ञात्वेति** उक्तप्रकारेण वक्ष्यमाणगौडपादाचार्यवचनात् प्रबुध्येत्यर्थः । एतत्तूत्तरत्र स्वतन्त्रकर्ममात्रस्येत्यादिना प्रपञ्चयिष्यति ॥ ५५ ॥

अ० ॥ प्रयोजनवत्त्वाधिकरणं तावत् परदृष्ट्यनुसारेणैव कृतमिति च जगत आधिदैविकप्रकृतित्वाभावश्च केन प्रमाणेन भाष्यकारैर्ज्ञातमित्यत आह **भोगार्थमिति**—

मू ॥ भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमिति चापरे ।
देवस्यैष स्वभावोऽयमिति सुप्तपरादवैत् ॥ ९६ ॥

व्या ॥ स्वभोगार्थं क्रीडार्थं वा जगत् सृजत्याधिदैविकः परमेश्वर इति ब्रुवतां **परवादित्वं** तावत् अन्ये–अपरे इति पदद्वयाभ्यामवगम्य देवस्यैष स्वभावोऽयमिति तृतीयपादात्–मायैषा तस्य देवस्य यया संमोहितः स्वयमिति तदीयकारिकान्तरसमानार्थकात् **देवस्य** स्वयंप्रकाशमानस्य अस्वाप्समिति परामृष्टस्य प्राज्ञस्य य **एष** अपरोक्षभूतः न किञ्चिदवेदिषमिति परामर्शगोचरश्च 'शरीरद्वयकारणमात्माज्ञानमव्याकृतमित्युच्यते–सर्वप्रकारकज्ञानोपसंहारे बुद्धेः कारणात्मनावस्थानं सुषुप्तिः तदुभयाभिमान्यात्मा प्राज्ञः' इति पञ्चीकरणोक्तप्रकारेण **स्वभावः** तादात्म्याध्यासवशात् स्वरूपभूतः मायाज्ञानाव्याकृताकाशादिशब्दितः पदार्थः स एव **अयं** प्रपञ्चः तत्परिणामत्वात् इति सुप्तपरात् श्रीगौडपादीयकारिकावचनात् समस्तस्य जगतः आध्यात्मिकप्राज्ञपरिकल्पितत्वावगमेन नाधिदैविककर्तृकं जगदिति च अवैदाचार्य इति शेषः ॥ ५६ ॥

अ० ॥ किमात्मकं पुनः पारमार्थिकत्वं प्रागुदाहृतेन—न चेयं सर्जनश्रुतिः परमार्थविषयेति भाष्येण निराकृतम् । किं वा तदुद्बोधितं सृष्टिश्रुतेरविद्याकल्पितनामरूपव्यवहारगोचरत्वात् न प्रस्मर्तव्यमेतदित्यत आह **सन्ध्येति**—

मू ॥ सन्ध्याधिकरणे यत्तु पूर्वपक्षे प्रकीर्तितम् ।
तदेवात्र प्रपञ्चस्य निराकृत्याथ तत्र यत् ॥
साधितं तत्परा सृष्टिश्रुतिरित्यत्र कीर्तितम् ॥ ९७॥ ॥

व्या ॥ सन्ध्याधिकरणे पूर्वपक्षे स्वप्नप्रपञ्चस्याधिदैविकेश्वरकर्तृकत्वेन यत्पारमार्थिकत्वमाशङ्कितं तदेवाऽत्र 'लोकवत्तु लीलाकैवल्य'मित्येतत्सूत्रभाष्यावसाने व्योमादेर्निराकृत्य अनन्तरं सन्ध्याधिकरणे 'मायामात्रं तु कात्स्न्र्येनानाभिव्यक्तस्वरूपत्वा'दिति सूत्रेण प्रातिभासिकत्वेन यन्मिथ्यात्वं साधितं तत्परा ह्यात्मन आकाशस्संभूतः इत्यादिसृष्टिश्रुतिरिति–अत्र प्रागुदाहृतसूत्रभाष्यावसाने न प्रस्मः

र्तव्यमिति कीर्तितमतस्तत्प्रातिभासिकसत्यत्वात् यत् बलवत्तरं भौगैकनाश्यत्वरूपं सत्वं तदपेक्षयापि बलवत्तमस्य सत्यत्वस्य केनापि वादिना जगत्यनङ्गीकृतत्वात् न तन्निराकरणपरतया क्वचिदपि भाष्यं नेतव्यं किं तु क्वचित् मन्दाधिकारिणे जगतो भोगैकनाश्यत्वं पारमार्थिकत्ववास्तवत्वसत्यत्वादिशब्दितं व्यावहारिकत्वमङ्गीक्रियते । क्वचिच्छास्त्रार्थपरिशुद्धये मुख्याधिकारिणं प्रति बहुतरं तन्निराक्रियत इति तत्र तत्र पर्यालोच्य शास्त्रार्थो ग्रहीतव्यः ॥

अ० ॥ श्लो ॥ सांसारिकगुहावाच्ये मायाज्ञानादिसंज्ञिते । निहितं ब्रह्म यो वेदेति ब्रह्मगीतानुसारेण पुच्छवाक्यतदीयसूत्रतद्भाष्योक्तस्य सौषुप्तस्यानन्दमयस्य 'सोऽकामयत बहु स्यां प्रजायेयेति' 'कामाच्च नानुमानापेक्षे'ति च श्रुतिसूत्रादिभिर्विवक्षितेक्षणत्वं प्रश्नपूर्वकमुपपादयति **यदीत्यादिना**--

मू ॥ यदि प्राज्ञो भवेदीशः सृष्टिकामोऽस्य चेत् कथम् ॥ ९८ ॥
श्रीकैवल्याद्यभिप्रेता सृष्टिर्दर्शनमस्य तु ।
स्वजिजागरिषां स्वप्नसुप्त्यन्ते वासनोद्भवाम् ॥ ९९ ॥
विनोत्पत्तेरभावेन सैवेक्षा वृद्धसम्मता ॥ ९९॥ ॥

व्या ॥ यदीत्यादिना प्रश्नमनूद्य प्रतिवचनमाह-**श्रीकैवल्यादीति** मुमुक्षोः स्वस्यासंकुचितादितीयत्वज्ञापनाय 'सुषुप्तिकाले सकले विलीने तमोऽभिभूतः सुखरूपमेति । पुनश्च जन्मान्तरकर्मयोगात् स एव जीवस्तपिति प्रबुद्ध' इति षष्ठनिरूपणे चतुर्थादिश्लोकैरुदाहरिष्यमाणाः श्रीकैवल्यश्रुतिरादिर्यस्याः 'समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च-अन्यार्थन्तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके' इति सूत्रद्वयभाष्यावसरे उदाहृतायाः 'यदा सुप्तस्स्वप्नं न कञ्चन पश्य' तीत्यादि कौषीतकीश्रुतेः सा श्रीकैवल्यादिः तया तथोक्ता तया स्वापप्रबोधयोः प्रळयप्रभवौ हि श्रूयेते । सुषुप्तिकाले च परेण ब्रह्मणा जीवः-टि-विज्ञानमय एकतां गच्छति परस्माच्च ब्रह्मणः-टि-प्राज्ञात् प्राणादिकं जगज्जायत इति वेदान्तमर्यादेति प्रागुदाहृतसूत्रद्वयभाष्याभ्यां च स्वप्नवत् कल्पितस्याज्ञातसत्वाभावात् दर्शनं सृष्टिरदर्शनं लय इति दृष्टिसृष्टिपक्षः श्रुत्याभिप्रेत इति तत्रत्यरामानन्दीयेन च ॥ श्लो ॥ ज्ञानस्वरूपमेवाहुर्जगदेतद्विचक्षणाः । अर्थस्वरूपं भ्राम्यन्तः पश्यन्त्यन्ये कुदृष्टय' इति स्मृत्या च-'रज्जुसर्पादिवद्विश्वं नाज्ञातं सदिति स्थितं । प्रबुद्धदृष्टिसृष्टत्वात् सुषुप्तौ च लयश्रुते'रिति सिद्धिवचनाच्च सृष्टिशब्दार्थभूतस्य सृज्यमानस्य जगतो जागरणरूपदृष्टिरूपत्वावगमात्-तदृष्टेः सुषुप्तिस्वप्नावसाने प्राज्ञतैजस-

योः–प्राचीनसंस्कारजन्यजिजागरिषामन्तरेण अजायमानत्वात् जिजागरिषाशब्दस्येव अकामयत–कामाच्चेति श्रुत्याद्युक्तकामशब्दस्यापीच्छापरत्वाच्च 'तदैक्षते' त्यादिश्रुतेरपि तत्समानार्थस्य वक्तव्यत्वाच्चेक्षणस्य जिजागरिषात्वं वृद्धसम्मतमित्युक्त्वा एवकारेण ईक्षणस्येश्वरज्ञानात्मकत्वं व्यावर्त्यते–अन्यथा 'स एव मायापरिमोहितात्मा शरीरमास्थाय करोति सर्वं । पुरत्रये क्रीडति यस्तु जीवस्ततस्तु जातं सकलं विचित्रं' । 'कल्पयत्यात्मनाऽऽत्मानमात्मा देवस्स्वमायया । स एव बुध्यते भेदानिति वेदान्तनिश्चयः । मायैषा तस्य देवस्य यया सम्मोहितः स्वयं' मित्यादिशास्त्रैरावोदितं जगतः केवलाविद्यकत्वेन मिथ्यात्वं प्रपीड्येतेत्यर्थः ॥ ५९॥ ॥

अ० ॥ प्रतिज्ञातार्थे भाष्यकारसम्मतिप्रदर्शनार्थं—'तस्मै स होवाच यथा गार्ग्य मरीचयोऽर्कस्यास्तङ्गच्छतस्सर्वा एतस्मिंस्तेजोमण्डल एकीभवन्ति । ताः पुनः पुनरुदयतः प्रचरन्ति एवं ह वै तत्सर्वं परे देवे मनस्येकीभव'तीति प्रश्नोपनिषद्वाक्यस्य यत् तस्मिन्मनसि स्वप्नकाले सर्वं जगत् एकीभवति रविमण्डले मरीचिवदविशेषतां गच्छति जिजागरिषोश्च मनस एव मण्डलाद्रश्मिवत्प्रचरन्तीति भाष्यं तदुदाहरति **लीना इति**—

मू ॥ लीना रवेरुदयतो जायन्ते रश्मयो यथा ॥
स्याज्जिजागरिषोर्जीवात् सचित्तान्निखिलं तथा ।
इति श्रीभाष्यकाराणां प्रश्नोपनिषदो मता ॥ ६१ ॥

व्या ॥ केवले मनसि जगल्लयोत्पत्तिजिजागरिषाद्यसंभवात् समनस्काज्जीवाज्जगज्जायत इति श्रुतितद्भाष्याभिप्रेतमित्याह **जीवात्सचित्तादिति** । शेषस्सुगमः ॥ ६१ ॥

अ० ॥ अन्यथा बाधमाह **नो चेदिति**—

मू ॥ नो चेद्विशेषणस्यास्य मनसो व्यर्थताऽऽपतेत् ॥ ६१॥ ॥

व्या ॥ **नो चेदिति** प्रागुदीरितप्रश्नश्रुत्युक्तमनश्शब्दार्थभूतस्य जीवस्य जिजागरिषायाः श्रुत्युक्तेक्षणत्वानभ्युपगमे मनसः श्रौतमपि जगत्कारणत्वं कथं घटेत सर्वत्रेक्षणवतश्चेतनस्यैव कारणत्वश्रवणादित्याशङ्क्य ईक्षणं नाम सर्वत्र चेतनस्य जिजागरिषैवेत्यभिप्रेत्य मनश्शब्दितस्य जीवस्य पूर्वश्लोके प्रदर्शितं यज्जिजागरिषोरिति विशेषणं तस्य वैय्यर्थ्यमापतेदित्यर्थः ॥ ६१॥ ॥

अ० ॥ इदानीं सौषुप्तप्राज्ञीयजिजागरिषैव 'बहु स्या' मिति श्रुत्युक्तमीक्षणं न तदतिरिक्तं पर्यालोचनरूपमिति विद्यारण्याचार्यैरभिप्रेतमित्याह—**या जिजागरिषेति**—

मू ॥ या जिजागरिषा सैव प्राज्ञस्य स्याच्चिदीक्षणम् ॥
इति जानद्भिराचार्यैरभिप्रेतं तथैव हि ।
आनन्दमय ईशोऽयं बहु स्यामित्यवैक्षत ॥
हिरण्यगर्भरूपोऽभूत्सुप्तिस्त्वप्नो यथेति च ।
अन्यथा तूपलभ्येत सुप्तानां न स्तदीक्षणम् ॥
किञ्च तैर्नेशता श्रौती प्राज्ञे सम्यक्समर्थिता ॥ ६४॥ ॥

व्या ॥ **चिदीक्षणमिति** बहु स्यामिति चेतनकर्तृकमीक्षणं तावत्प्राज्ञस्य जिजागरिषैवेति चित्रदीपाख्यग्रन्थे विद्यारण्याचार्यैरभिप्रेतमिति प्रतिज्ञाय तत्तत्स्थमेव वाक्यमुदाहरति **आनन्दमय इत्यादिना** 'सोऽकामयत' 'ब्रह्मपुच्छं प्रतिष्ठा एषः सर्वेश्वर' इत्यादिश्रुतिनिर्दिष्टस्सौषुप्तः आनन्दमयरूपोऽयमीश्वरः 'यदा बहु स्यामित्यवैक्षत जिजागरिषावान् अभवत्- तदा हिरण्यगर्भरूपः लिङ्गशरीरे तादात्म्यापन्नतैजसात्मकोऽभूत्--तथा चोक्तमाचार्यैस्तत्कृतपञ्चीकरणग्रन्थे--'अपञ्चीकृतपञ्चमहाभूतानि तत्कार्यं च सर्वं सप्तदशकं लिङ्गं भौतिकं हिरण्यगर्भ इत्युच्यते एतत् सूक्ष्मशरीरमात्मनः जागरितसंस्कारजप्रत्ययः स विषयः स्वप्नः तदुभयाभिमान्यात्मा तैजस' इति -तत्र दृष्टान्तमाह--**सुप्तिस्त्वप्नो यथेति** इतिशब्देन विद्यारण्याचार्यवाक्यसमाप्तिं दर्शयित्वा विपक्षे बाधमाह—**अन्यथेत्यादिना** सुषुप्त्यवस्थां गतानामस्माकमपि तद्बहु स्यामिति श्रुत्युक्तं पर्यालोचनारूपमीक्षणमुपलभ्येतेत्येकं बाधं दर्शयित्वा बाधान्तरमप्याह **किञ्चेत्यादिना** ॥ ६४॥ ॥

अ० ॥ श्लो ॥ 'प्रतिबिम्बात्मना चित्ते हीशावेशो यतस्ततः । अव्यामोहित ईशानो लीलया राजवत्सृजे' दिति श्लोकेनोपात्ताधिदैविकेश्वरत्ववादपरिहाराय कृतं प्रासङ्गिकविचारं परिसमाप्य यत्प्राक् प्रक्रान्तं सर्वस्य मायिकत्वश्रुतेः साधकपौष्कल्यं तदेव साधकान्तरोदाहरणेन प्रदर्शयन् कर्मणः कारणत्वश्रुतेः तया बाधितत्वं दर्शयति **खनैल्येति**—

मू ॥ खनैल्यसाम्यशास्त्रञ्चाप्यनुमानपरं तथा ।

सहायमन्यथामिथ्यात्वज्ञानं नोपजायताम् ॥ ६५॥ ॥

व्या ॥ गगने नीलिमा सत्ये जगत्सत्यं भविष्यतीत्याद्युपमानशास्त्रञ्च जगन्मिथ्या भवितुमर्हति अविद्वद्बोधरत्वात् स्वप्नवदित्याद्यनुमानवाक्यं च जगतो मायिकत्वेन मिथ्यात्वश्रुतेस्सहायमित्युक्ता विपक्षे बाधमाह अन्यथेति ॥ ६५॥ ॥

अ० ॥ मायामात्रमिदं द्वैतमद्वैतं परमार्थतः । सर्वं विकारजातं यन्मायामात्रमिति प्रागुदाहृतेन श्लोकेन प्रदर्शितायाः श्रुतेः–तदुपरितनैः–एष सुप्तेष्वित्यारभ्य–सहायमन्यथा मिथ्यात्वज्ञानं नोपजायतामित्यन्तैः श्लोकैरुदाहृतबहुश्रुतिसहायवत्वात् तच्छ्रुत्या जगतः कर्मजन्यत्वेन भोगैकनाश्यत्वात् ज्ञाननिवर्त्यत्वाभावरूपसत्यत्वपराया:–'तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये'–इत्यादिश्रुतेस्सुनिपुणं बाधितत्वे प्रदर्शितेऽपि जगत्सृष्टौ तत्तत्प्राणिकर्मसापेक्षः स्वस्मात् प्राज्ञादन्यः परमेश्वरो जगत्सृजतीति अनादिदृढवासनाक्रान्तानां विदुषामपि–'मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम्। मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहं' मित्यादि जीवन्मुक्तानुभवपरश्रुतिबोधितं स्वात्मनोऽद्वितीयत्वानुसन्धानानुकूलं जगन्मिथ्यात्वं न बुद्धौ झटित्यारोहति–अतस्तेषामत्र मनःप्रत्ययार्थं यथावज्जगद्याथात्म्यविदुषां भगवतां श्रीब्रह्म–राम–कृष्णव्यास गौडपाद–भगवत्पादादीनां सम्मतिं प्रतिजानीते **अत्रेति**—

मू ॥ अत्र श्रीब्रह्मणो रामचन्द्रादेस्सम्मतिं ब्रुवे ॥ ६६ ॥

व्या ॥ अत्रेति प्रागेष सुप्तेष्वित्यादिश्लोकैरुदाहृतकाठकादिवाक्यसहायवत्या सर्वं विकारजातं मायामात्रमित्यादिश्रुत्या कर्मश्रुतेर्बाधितत्वविषये त्वित्यर्थः ॥

अ० ॥ तत्र प्रथमतो ब्रह्मवाक्यं दर्शयितुं देवानामाशङ्कां दर्शयति **यदीति**–

मू ॥ यदि ब्रह्मन् जगन्मिथ्या कर्मकाण्डस्य का गतिः ।
इत्याशङ्कां सुराणां श्रीब्रह्मालक्ष्यैवमब्रवीत् ॥ ६७ ॥

व्या ॥ एवमिति वक्ष्यमाणप्रकारं ब्रह्मगीतायां सर्वशास्त्रार्थसंग्राहके द्वादशाध्याये जगादेत्यर्थः ॥ ६७ ॥

अ० ॥ कर्मकाण्डस्याज्ञदृष्ट्यनुवादकत्वात् न कर्मणो जगत्कारणत्वे तात्पर्यम्। किन्तु तन्निवृत्तावेवेति देवेभ्यः प्रतिवचनभूतानि ब्रह्मवाक्यान्युदाहरति **यथेति**–

मू ॥ यथाभातस्वरूपेण सत्यत्वेन जगच्छ्रुतिः ।

अङ्गीकृत्य हितं नृणां कदाचिद्वृत्ति सादरम् ॥ ६८ ॥

व्या ॥ तदेतत्सत्यम्मन्त्रेषु कर्माणि कवयो यान्यपश्यंस्तानि त्रेतायां बहुधा सन्ततानि । तान्याचरथ नियतं सत्यकामा एष वः पन्थाः सुकृतस्य लोक इति मुण्डकादिवाक्यं सङ्गृह्णाति **यथाभातस्वरूपेणेति** चतुर्थनिरूपणोक्तप्रकारेण कर्मजत्वमेव सत्यत्वमिति भातं ज्ञातं स्वरूपं यस्य सत्यत्वस्य तद्भातस्वरूपं भातस्वरूपमनतिक्रम्य यथाभातस्वरूपं तेन यथाभातस्वरूपेण **सत्यत्वेन जगत्** कर्मायत्तं यत् सत्यत्वं लोकसिद्धं तदुपेतं जगत् **अङ्गीकृत्य** 'सोमेन यजेत' 'पयसा जुहुयात्' 'पयसि हीदं सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च न–तस्या आहुतेः सोमो राजा संभवति सोमाद्वर्षं वर्षादन्नमन्नाद्रेतो रेतसो गर्भस्संभवतीत्यादिश्रुतिः कर्मणः कारणत्वपक्षे रेतोद्वारा अत्यन्तं जुगुप्सितमेद्द्वारा स्त्रीमूत्ररन्ध्रप्रवेशापत्तिं कर्मिणामावेद्य 'तस्माज्जुगुप्सेते'ति स्ववाक्यशेषेण **हितं** कर्मणस्तत्काशाद्विरमणमेव **नृणां** मुमुक्षूणां **कदाचिद्वृत्ति सादरं** यतः अतः कर्मकाण्डस्य कर्मविरतावेव तात्पर्यवत्वात् न कर्मजत्वेन–जगत्सत्यत्वे प्रामाण्यमित्यर्थः ॥ ६८ ॥

अ० ॥ अन्यथा बाधमाह–ब्रह्मा **सत्यत्वेनेति—**

मू ॥ सत्यत्वेन जगद्ज्ञानं संसारस्य प्रवर्तकम् ॥ ६८॥ ॥

व्या ॥ सत्यत्वेनेति कर्मजत्वेन यज्जगद्विषयकं ज्ञानं तत्–संसारस्य संसरतीति संसारो जीवस्तस्य प्रवर्तकं कर्मणीति शेषः ॥ ६८॥ ॥

अ० ॥ तर्हि किं ततो निवर्तकमित्यत आह ब्रह्मा **असत्यत्वेनेति—**

मू ॥ असत्यत्वेन भानन्तु संसारस्य निवर्तकम् ॥ ६९ ॥

व्या ॥ असत्यत्वेनेति अकर्मजत्वेन जगद्विषयकज्ञानमेव संसारस्य संसरतीति संसारो जीवस्तस्य कर्मणस्सकाशान्निवर्तकं भवेदित्यर्थः ॥ ६९ ॥

अ० ॥ यत एवमतः श्रुतिरपि जगतः केवलमायिकत्वमेव दर्शयतीत्याह ब्रह्मा **अत इति—**

मू ॥ अतस्संसारनाशाय कदाचित्परमा श्रुतिः ।
जगत्सर्वमिदं मायां वदत्यत्यन्तनिर्मला ॥ ७० ॥

व्या ॥ यतः फलात्मकशरीरादेर्जगतः कर्मजत्वज्ञानमेव तत्फलसाधनत्वेन गृहीते कर्मणि भोक्तारं प्रवर्तयेदतः अकर्मजत्वज्ञानमेव ततो निवर्तयेदित्याह–**अतस्संसारनाशायेति** संसारस्य फलकारणत्वेन अन्यथा गृहीतस्य कर्मणः

नाशाय कारणत्वनिवृत्तये **कदाचित्** तत्त्वजिज्ञासासमये जगतः ॥ श्लो० ॥ यथाभातस्वरूपेण सत्यत्वेन जगच्छ्रुतिः । अङ्गीकृत्ये'ति प्राग्ब्रह्मणा प्रदर्शितकर्मजत्वानुवादकश्रुत्यपेक्षया **परमा** सर्वं विकारजातं मायामात्रं । 'मायामात्रमिदं द्वैत' मित्यादिका **श्रुतिः** कार्यसामान्यस्य चिदध्यस्तमायामात्रप्रकृतिकत्वे आवेदिते सति न तज्ज्ञानं मायायां ।

फलकारणे कर्माणि कर्मज्ञानमिव भोक्तारं प्रवर्तयेत्–अनादित्वान्मायायाः । किन्तु मायिकत्वात् सर्वं भोग्यजातं मिथ्यैवेति कर्मणो निवर्तयेदेवेत्यभिप्रेत्याह– **जगत्सर्वमित्यादिना निर्मला** कपटरहितेत्यर्थः ॥ एवं मायिकस्य जगतः कर्मजत्वं निराकुर्वता श्रीब्रह्मणा सौपुत्रात् प्राज्ञादन्यः कर्मसापेक्ष आधिदैविको जगत्सृजतीत्ययं प्रतिकर्मव्यवस्थावादः श्रोतॄणां मान्दाधिकारकालिक इत्यभिप्रेत इति सिद्धम् ॥ ७० ॥

अ० ॥ इदानीं कमलासनावच्छ्रीरामोऽपि जगद्याथात्म्यं दर्शयतीत्याह **इतीत्यादिना**––

मू ॥ इति साधकवेदानां मायिकत्वश्रुतेरपि ।
अबाधायाद्यकाण्डेनास्यानुवादकतां ब्रुवन् ॥ ७१ ॥
ब्रह्मास्या कर्मजत्वञ्च मायिकत्वं यथाब्रवीत् ।
एवं रामोऽप्युवाचेदं नाधिदैविकनिर्मितम् ॥ ७२ ॥
अतश्चाकर्मजं जीवेऽविद्याध्यस्तमिति स्फुटम् ॥ ७२॥ ॥

व्या ॥ **इतीति** पूर्वोक्तप्रकारेण जगतो मायिकत्वपरश्रुतेः तत्सहायानां प्रागुदाहृतानां 'य एष सुप्तेषु जागर्ती'ति काठकादिश्रुतीनाञ्च कर्मशास्त्रेण बाधाभावाय तच्छास्त्रस्य अज्ञदृष्ट्यनुवादकत्वातिरेकेण स्वतः प्रामाण्याभावं प्रदर्शयन् जगदकर्मजत्वेन केवलाविद्यकत्वात् मिथ्येति कमलासनवद्रामोऽप्युवाचेत्यर्थः ॥ ७२॥ ॥

अ० ॥ कुत्रत्येन वाक्येनेत्यत आह **पाद्मे**ति––

मू ॥ पाद्मे तु शिवगीतायां सप्तमाद्ध्यायगैश्शुभैः ॥ ७३ ॥

व्या ॥ **शुभै**रिति तत्त्वजिज्ञासावतां शुभकरैरित्यर्थः ॥ ७३ ॥

अ० ॥ तेषु कानि चिद्वाक्यान्युदाहरति **उत्पन्नतत्त्वज्ञान इति**––

मू ॥ उत्पन्नतत्वज्ञानोऽथ बभूव नृपनन्दनः ।
अथोपनिषदां सारै रामस्तुष्टाव शङ्करम् ॥ ७४ ॥

व्या ॥ **अथेति** उत्तरत्र वक्ष्यमाणप्रकारेण विश्वरूपस्य निमित्तमात्रभूतेन श्रीशिवेन प्रदर्शितानां सुरासुरनरमृगादीनां सर्वेषां स्वाप्रिकदेवादिशरीराणामिव प्रेतभावमन्तरा शिवस्य विवृताननेभक्षणादिव्यापारवर्जिते सति विनाशदर्शनानन्तरं—तेषां तादृशविनाशदर्शनरूपान्निमित्तात्—'दिव्यं चक्षुः प्रदास्यामि तुभ्यं दशरथात्मज । तेन पश्यसी'ति तत्रत्येन शिवोपदेशेन 'मनोऽस्य दैवं चक्षु'रिति-श्रुत्या च दिव्यचक्षुष्ट्वेनावेदितेन मनसैव विश्वरूपस्य ग्राह्यत्वावगमाच्च—प्रकृते विश्वरूपे तन्निदर्शनेन वियदादि जगति च उत्पन्नप्रातिभासिकत्वज्ञानवान् सच्छ्रीरामः शङ्करमाधिदैविकं परमेश्वरं वक्ष्यमाणप्रकारेण तुष्टावेति सूतवाक्यम् ॥ ७४ ॥

अ० ॥ इदानीं भगवंस्तव स्वरूपव्यामोहाभावेन स्वस्मिञ्जगदारोपकत्वाभावे सति लोकः स्वस्वरूपव्यामोहकाज्ञानवशेन यत् द्वैतजातं स्वस्मिन्नध्यस्यति तद्भवति वृथा ह्यारोपयतीति तदीययाथात्म्यकथनेन स्तोतुं लोकदृष्टिं श्लोकचतुष्टयेनानूद्य निराकरोति श्रीरामो **देव प्रपन्नार्तिहरेत्यादिना**—

मू ॥ देव प्रपन्नार्तिहर प्रसीद प्रसीद विश्वेश्वर विश्ववन्द्य ।
प्रसीद गङ्गाधर चन्द्रमौळे मां त्राहि संसारभयादनाथम् ॥ ७५ ॥
त्वत्तो हि जातं जगदेतदीश त्वय्येव भूतानि च सन्ति नित्यम् ।
त्वय्येव शंभो विलयं प्रयान्ति भूमौ यथा वृक्षलतादयोऽपि ॥
ब्रह्मेन्द्ररुद्राश्च मरुद्गणाश्च गन्धर्वयक्षासुरसिद्धसङ्घाः ।
गङ्गादिनद्यो वरुणालयाश्च वसन्ति शूलिंस्तव वक्त्ररन्ध्रे ॥ ७७ ॥
त्वन्मायया कल्पितमिन्दुमौळे त्वय्येव दृश्यत्वमुपैति विश्वम् ।
भ्रान्त्या जनः पश्यति सर्वमेतच्छुक्तौ यथा रौप्यमहिं च रज्जौ ॥

व्या ॥ श्लो० ॥ त्वत्तो हि जातं जगदेतदीश त्वय्येव भूतानि च सन्ति नित्यं । त्वय्येव शंभो विलयं प्रयांति भूमौ यथा वृक्षलतादयोऽपि ॥ इति भ्रान्त्या जनः पश्यतीति वाक्येन वियदादेराधिदैविकपरमेश्वरेक्षापूर्वकं तदारोपितत्वतत्प्रकृतिकत्वादीनां 'मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् ॥ मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यह'मिति श्रुत्युक्तविद्वदनुभवेन बाधितत्वादिदं जगत् सर्वप्राणिदृष्टि-

गोचरं स्वभिन्नेशप्रकृतिकमिति प्रतिकर्मव्यवस्थावादिनो दृष्टि–तथा ब्रह्मेन्द्ररुद्राश्चेत्यारभ्य इति भ्रान्त्या जनः पश्यतीति वाक्यान्तरेण च श्रीरामः प्रकृतस्य विश्वरूपस्य श्रीशिवप्रसादलब्धदिव्यचक्षुर्मात्रग्राह्यत्वनिश्चयेपेतस्वदृष्टिमात्रगोचरस्य परदृष्ट्यविषयत्वात् शिवप्रसादलब्धविश्वरूपान्तरदर्शिनः तद्विश्वरूपयाथात्म्यानभिज्ञस्य दृष्टिं च संप्रदर्श्य भ्रान्तजनस्य तदुभयविधेऽपि जगति तादृशभ्रमसद्भावं दृष्टान्तद्वयेनोपपादयति–**सर्वमेतदित्यादिना**–प्रातिभासिकरौप्यादेरपि स्वाप्निकगजादेरिव जीवाश्रिताज्ञानपरिणामत्वेन जीवाश्रितत्वे सत्यपि शुक्त्याद्याश्रितत्वेन यथा चान्यथा गृह्णाति तथा जनः स्वप्नवत्स्वदृष्टिमात्रगोचरत्वेन स्वाज्ञानपरिणामभूतं विश्वरूपं–'मय्येव सकलं जात' मित्यादिश्रुत्युक्तं वियदादिकं च विभ्रमात् त्वत्प्रकृतिकत्वेनान्यथा गृह्णातीत्यर्थः–अहे रज्ज्वधिकरणकत्वाभावं स्वयमेव श्रीरामो रज्जौ भुजङ्ग इति श्लोकेन दर्शयिष्यति ॥ ७८ ॥

अ० ॥ ननु, मम जगदीश्वरस्य वियदादिप्रकृतित्वाभावे मदन्यस्य जगत्स्फूर्तिप्रदस्याभावात् कथं जीवस्य जगदापरोक्ष्यं संभवतीत्यत आह=**तेजोभिरिति**—

मू ॥ तेजोभिरापूर्य जगत्समग्रं प्रकाशमानः कुरुते प्रकाशम् ।
विना प्रकाशं तव देवदेव न दृश्यते विश्वमिदं क्षणेन ॥ ७९ ॥

व्या ॥ **प्रकाशमान इति** स्वप्नसुषुप्त्योरिव जाग्रदवस्थायामपि स्वयंप्रकाशमानः जीवः **तेजोभिरिति** प्रकाश्यगतबहुत्वं तत्प्रकाशकात्मतेजस्युपचर्यते=तथा च सति जीवः स्वतेजसा जगत्समग्रं पूर्णत्वेनापूर्य दीव्यत इति देवो जीवः तथा चोक्तं मायैषा तस्य देवस्य यया सम्मोहितस्स्वयं'मिति तस्य स्वप्नकल्पितदेवतावत् तत्त्वोपदेष्टृत्वादिना दीव्यत इति भवान् देवदेवः तस्य संबुद्धिर्हे देवदेव–स्वतःप्रकाशमानः सर्जावस्तवप्रकाशं विना प्रकाशं कुरुत इत्यन्वयः सर्वस्य प्रातिभासिकत्वेन स्वत एव जानातीत्यर्थः ॥ अन्यथा सर्वजगदधिष्ठानभूतेनाधिदैविकचैतन्येन सह जीवस्य चक्षुरादिद्वारा संबन्धे सति तदनुग्रहवशाद्वेदितृत्वाभ्युपगमे बाधमाह **न दृश्यते विश्वमिदं क्षणेनेति** तत्पक्षे क्रमशः केषां चित् पदार्थानां तत्तदिन्द्रियसंप्रयोगसमये त्वापरोक्ष्यसंभवेऽपि एकक्षणारूढत्वेन सर्वं न दृश्येत=जीवाऽविद्यापरिणतत्वेन जगतः प्रातिभासिकसत्वे तु एकक्षणारूढत्वेन जगदापरोक्ष्यं जीवस्योपपद्यते । तथा चोक्तं सूतसंहितायां ॥ श्लो० ॥ 'पूर्णोऽहं सर्वसाक्षित्वात् सर्वदा पर मार्थतः । अपूर्णो युगपत् सर्वं न विजानाति कश्चने'ति ॥ ७९ ॥

अ० ॥ इदानीं विश्वरूपस्य शिववक्त्रमात्राधिकरणत्वाभावञ्च अविद्योपहित-स्वात्मगतत्वञ्च उपपादयन् परमेश्वरं व्यामोहराहित्येन रामः स्तौति **अल्पाश्रय इति—**

मू ॥ अल्पाश्रयो नैव वृहन्तमर्थं
धत्तेऽणुरेको न हि विन्ध्यशैलम् ।
त्वद्वक्त्रमात्रे जगदेतदस्ति
त्वन्माययैवेति विनिश्चिनोमि ॥ ८० ॥

व्या ॥ पूर्वार्धं स्पष्टार्थं । तथा च सति **त्वद्वक्त्रमात्रे जगदेतदस्ति** कथमिति शेषः । वियदाद्यपेक्षयाल्पपरिमाणवति भवद्वक्त्रे कथं वियदादिकं स्थातुं शक्नोतीत्यर्थः ॥ अतः त्वद्वक्त्रगतत्वेनैव प्रतीयमानस्यास्य विश्वरूपस्य मन्मातृगोचरत्वेन त्वद्वक्त्राद्यवच्छिन्ने परिपूर्णे दृश्रूपे मयि **त्वन्माययैव** त्वयानुगृहीता माया—मदविद्या त्वन्माया तथाहि ॥ श्लो० ॥ 'तमोऽध्यात्ममिति प्रोक्तं विकारस्तत्र यो भवेत् । अधिभूतं तदित्युक्तमीश्वरोऽत्राधिदैवत'मिति तयैवेदं विश्वरूपं कृतमिति निश्चिनोमीत्यर्थः ॥ ८० ॥

अ० ॥ इदानीं त्वत्तो हि जातमित्यादिश्लोकैः विस्तरेणोक्तमेवार्थं सङ्गृह्य सदृष्टान्तमाह श्रीरामो **रज्जाविति—**

मू ॥ रज्जौ भुजङ्गो भयदो यथैव न जायते नास्ति न चैति नाशम् ।
त्वन्मायया केवलमात्तरूपस्तथैव विश्वं त्वयि नीलकण्ठ ॥

व्या ॥ यथा प्रातिभासिकभ्रमस्थले प्रतीयमानो भयदो भुजङ्गो रज्जौ न जायते नास्ति न चैति नाशमित्यन्वयः । तर्हि कुत्र तस्य भुजङ्गस्य जन्मादिलाभ इत्यत आह—**त्वन्माययेत्यादिना** त्वया आधिदैविकेन परमेश्वरेण आदित्यादिभिश्चक्षुरादय इव अनुगृहीता या माया मदविद्या न किञ्चिदवेदिषमिति प्रत्यभिज्ञायमाना सा त्वन्माया—तथा चोक्तं वार्तिके ॥ श्लो ॥ तमोऽध्यात्ममिति प्रोक्तं विकारस्तत्र यो भवेत् । अधिभूतं तदित्युक्तमीश्वरोऽत्राधिदैवतमिति—श्रीरामोऽप्येवमेवोत्तरत्र ॥ श्लो० ॥ विचार्यमाणे तव यच्छरीरमाधारतां वै जगतामुपैति । तदप्यवश्यं मदविद्ययैव कृतमिति वाक्येन विश्वरूपमिव तदधिकरणभूतं तव शरीरमपि मदविद्ययैव कृतमिति मुखत एव च वक्ष्यति—तया त्वन्मायया भुजङ्गः तथा विश्वं च मृद्द्रव्येण घटवदात्तरूपस्सन् तदुपादानभूतस्य त्वदनुगृहीतस्य मायाशब्दि-

तस्य तमसोऽधिष्ठानभूते मय्येव विद्यमानत्वात् न रज्जौ वा भुजङ्गः त्वयि वेदं विश्वं तिष्ठतीत्यावेद्य केवलमिति पदेन भुजङ्गविश्वयोः यागजन्यद्रव्यापूर्वादिप्रकृतिकत्वादिकं प्रतिषिध्यते ॥ ८१ ॥

अ० ॥ इदानीं प्रागुदाहृतविश्वरूपमिव तदधिकरणवद्भासमानस्य भवच्छरीरस्य मदज्ञानपरिणामत्वेन तदुपाधिको भवानप्यहमेव सुषुप्तस्थानः आनन्दमय इत्याह **विचार्यमाण इति**—

मू ॥ विचार्यमाणे तव यच्छरीरमाधारतां वै जगतामुपैति ।
तदप्यवश्यं मदविद्ययैव पूर्णश्चिदानन्दमयो यतस्त्वम् ॥८२॥

व्या ॥ **विचार्यमाण इति** स्वप्ने मत्कल्पितदेवतानामिव त्वत्कल्पितशरीरस्वरूपव्यामोहादिवर्जितस्य मदनुग्राह्यत्वेन प्रतीयमानस्य तव यद्विश्वरूपाधिकरणमिव प्रतीयमानमिदं शरीरं तस्य मया दृश्यमानत्वात् यद्दृश्यं तन्मिथ्या भवितुमर्हति स्वप्नवदिति न्यायपूर्वकं किमस्योपादानं को वास्य व्यामोही स्वरूपाध्यासकर्ता—किं एतदुपाधिमच्चैतन्यं मद्भिन्नं न वेति श्रुतिस्मृतियुक्त्यनुभूतिभ्यः पर्यालोच्यमाने तव येदिदं शरीरं विश्वरूपाधिकरणत्वेन प्रतीयते **तदपि** तच्छरीरं अपि शब्दाद्विश्वरूपञ्च **मदविद्ययैव** मम स्वरूपव्यामोहिनः प्राज्ञस्याविद्ययैव कृतमिति विज्ञाप्य एवकारेण एकात्मवादे कारणशरीरान्तराभावात् न त्वदीयाविद्याकृतमिदं भवच्छरीरामिति व्यावर्त्यते एवमेव श्रीरामोऽप्युत्तरत्र—सर्वं त्वविद्याकृतमेव मन्य इत्यनेन स्ववाक्येन वक्ष्यति । एवं विश्वरूपतदधिकरणशरीरयोः स्वाविद्यकत्वनिवेदनानन्तरमेतच्छरीरोपाधिकत्वापि तव न मद्भिन्नत्वमित्याह—**पूर्णश्चिदानन्दमयो यतस्त्वमिति** यतः यस्मात् प्राक् तृतीयनिरूपणोक्तप्रकारेण कारणशरीरभूतयाऽविद्यया चिदानन्दमयरूपः सौषुप्तोऽहमपरिवेष्टितोऽतः पूर्णः यतः पूर्णोऽस्यतः स्वप्नकल्पितदेवताशरीरावच्छिन्नचैतन्यरूपेणेव मदविद्याकृताधिदैवतशरीरोपाधिकभवद्रूपेणाप्यस्मि अतो नानन्दमयान्मत्तो भिन्नोऽसीत्यर्थः ॥ एतद्वाक्यार्थविवरणस्य—'यदा सुप्तस्स्वप्नं न कञ्चन पश्यतीत्यारभ्य एतस्मादात्मनः सर्वे प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोका' इति कौषीतकीश्रुत्या—तथा 'एवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि च भूतानि व्युच्चरन्तीति बृहदारण्यादिश्रुत्या च' तदीयेन विज्ञानमयस्य प्राक् प्रतिबोधाद्यत्स्वरूपं तस्माज्जगत्सृष्टिं श्रावयतीति बृहदारण्यभाष्यादिना च एष एवानन्दमयः साधि-

दैविकस्य भेदजातस्य सर्वस्येशिता नैतस्माज्जात्यन्तरभूतोऽन्येषामिवेति माण्डूक्य भाष्येण च अनुगृहीतत्वात् नैवात्र स्वस्य निरङ्कुशाद्वितीयत्वजिज्ञासावद्विर्विवादितव्यम् ॥ ८३ ॥

अ० ॥ इदानीमाधिदैविकस्य भगवतः स्वस्मिञ्जगदध्यासकृतत्वेऽपि न जगतः कर्मजन्यत्वमित्याह—श्रीरामः **पूजेति** —

मू॥ पूजेष्टपूर्तादिवरक्रियाणां भोक्ता फलं यच्छसि यत्त्वमेव ।
मृषैतदेवं वचनं पुरारे त्वत्तोऽस्ति भिन्नं न हि किञ्चिदेव ॥८३

व्या ॥ **पूजेष्टपूर्तादिवरक्रियाणामिति** पूजा अर्चनमिष्टं यागादिः पूर्तं तटाकादिनिर्माणमादिर्यासां वरक्रियाणां ध्यानक्रियाणां तास्तथोक्ताः तासां भोक्ता उपलब्धा फलानुभवी च सन् त्वमेव फलं यच्छसीति बोधकं यदन्नादो वसुदानः इत्येतच्छ्रुतिवचनं तन्मृषा अर्थशून्यमित्युक्त्वा तत्र नान्योऽतोऽस्ति द्रष्टा । सोऽकामयत बहु स्यामित्यारभ्य तदेवानुप्राविशदित्यन्तञ्च 'सर्वं खल्विदं ब्रह्मे'त्यादि शास्त्रंच प्रमाणयति **त्वत्तोऽस्ति भिन्नं न हि किञ्चिदेवेति** राज्ञस्सकाशाद्भृत्यफलयोरिव फलदातुः त्वत्तः भोक्तृभोग्ययोः भेदे सति त्वदन्यस्मै त्वदन्यफलं दातुमर्हसि नान्यथा न हि तैजसः स्वस्मिन् स्वारोपितं स्वाप्रियं वस्त्राभरणादिकं स्वानन्यविश्वाय दातुमर्हति—न परश्चापरेणाध्यस्तमादातुमर्हति च—अत एव धर्माधर्मावनपेक्ष्यैव सर्वं त्वयि त्वदविद्ययैव त्वया अध्यस्तमित्यावेद्य तत्र सर्वसम्मतिं दर्शयति **एवमिति** ओमेवं परमं मत इत्यमराभिधानात् ॥ ८३ ॥

अ० ॥ इदानीं जगतः स्वात्मविवर्तत्वमविदुषां सिद्धान्तं दूषयति श्री-**रामोऽज्ञानमूढा इति**—

मू ॥ अज्ञानमूढा मुनयो वदन्ति पूजोपहारादिबलिक्रियाभिः ।
तोषं गिरीशो भजतीति मिथ्या कुतस्त्वमूर्तस्य तु भोगलिप्सा॥

व्या ॥ ईश्वरः कर्मणा प्रसीदतीति वचनस्यार्थशून्यत्वे हेतुमाह—**कुतस्त्वमूर्तस्य तु भोगलिप्सेति**—न विद्यते मूर्तमहमित्यभिमन्यमानं शरीरं यस्य सर्वज्ञस्य तव स अमूर्तः । 'न तस्य कार्यं करणञ्च विद्यते इति श्रुतेः' तस्य—'अशरीरं वा वसन्तं न प्रियाप्रिये स्पृशत' इति श्रुतेः भोगलिप्सा कुतस्संभवतीत्यर्थः ॥ ८४ ॥

अ० ॥ एवं फलकारणभूतशिवप्रसादात्मकापूर्वसद्भाववचनस्य अर्थशून्यत्वमुपपाद्य-फलस्याप्यविद्यामात्रजन्यत्वविधानेन कर्माराधितेश्वरनिर्मितत्वं निराकरोति श्रीरामः **किञ्चिद्दत्तं वेति**—

मू॥ किञ्चिद्दत्तं वा चुलकोदकं वा यस्त्वं महेश प्रतिगृह्य धत्से ।
त्रैलोक्यलक्ष्मीमपि यज्जनेभ्यस्सर्वं त्वविद्याकृतमेव मन्ये ॥८५॥

व्या ॥ जनेभ्यस्त्रैलोक्यलक्ष्मीमपि धत्स इति यत् तत्सर्वं त्वविद्याकृतमेव मन्य इत्यन्वयः ॥ ८५ ॥

अ० ॥ ननु, सर्वस्याविद्यामात्रजन्यत्वे कथं जगद्वैचित्र्यहेतुभूतं तत्तत्प्राण्यदृष्टं विना सृजामीत्यत आह **संसर्जने वेति**—

मू॥ संसर्जने वाप्यवने विनाशे विश्वस्य किञ्चित्तव नास्ति कार्यम् ।
अनादिभिर्देहभृतामदृष्टैस्तथापि तत्स्वप्नवदातनोषि ॥ ८६ ॥

व्या ॥ हे स्वामिन् तवाध्यासिकजगत्सृष्टिस्थित्युपसंहारविषये न प्राण्यदृष्टैः किञ्चित्कर्तव्यमस्ति-प्राण्यदृष्टमनपेक्ष्यैव जगत्सर्जनादिकं क्रियत इत्युक्त्वा तत्र दृष्टान्तमाह-**तथापीत्यादिना**-जगद्वैचित्र्यार्थं प्राणिकर्मण्यपेक्षाभावेऽपि जीवो विचित्रस्वप्नवस्तूनीव त्वन्मात्रापरोक्षं **तत्** जगत्सृजसीत्यर्थः ॥ तथाचोक्तं-'स एव मायापरिमोहितात्मा शरीरमास्थाय करोति सर्वम् ॥ श्लो० ॥ नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः ॥ अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः-' इत्यादि श्रुतिस्मृतिभ्यः । नन्वेतच्छ्लोकस्य जगत्सर्जने स्वप्रयोजनाभावेऽपि तत्प्राणिकर्मानुसारेण विचित्रं जगत्सृजतीति तात्पर्यं किं न स्यादिति चेत्-तदा प्रागुदाहृतेन पूजेष्टपूर्तादिवर्क्रियाणामित्यादिना-तथा-फलकारणभूतप्रसादनिरासपरेण अज्ञानमूढा मुनयो वदन्तीत्यादिना च रामवाक्येनैव तदीयस्यास्य श्लोकस्य बाधापत्तेर्न तत्र तात्पर्यमित्यास्थेयम् ॥ ८६ ॥

अ० ॥ इदानीं श्रीरामवाक्यमुपसंहरति **इतीति**—

मू॥ इत्यस्याकर्मजन्यत्वं मायिकत्वं च दर्शितम् ॥ ८६॥ ॥

व्या ॥ **इतीति** पूर्वोक्तप्रकारेणास्य समस्तस्य जगतः **कर्मजन्यत्वाभावे** सत्यविद्यकत्वं प्रदर्शितं । श्रीरामेणेति शेषः ॥ ८६॥ ॥

अ० ॥ प्रतिज्ञातार्थे श्रीशिवस्यापि सम्मतिरर्थात् सिद्धेत्याह **शिवस्येति**-

मू ॥ शिवस्य राघवज्ञानमनुमोदयतोऽनया ।
संमतिश्चात्र सिद्धेति ज्ञेया तत्त्वोपदेशिनः ॥ ८७॥ ॥

व्या ॥ **अनयेति** प्रागुदाहृतरामकृतस्तुत्येत्यर्थः ॥ ८७॥ ॥

॥ विधीनां परिसंख्यात्वादेशारम्भः ॥

अ० ॥ ननु, श्लो० ॥ निवृत्तिबोधकत्वेन विधेः–कर्म यतो न हि । कर्मजत्व-निरासेन मिथ्येति जगदुच्यत इति यत् प्राक् प्रतिज्ञातं तत्र जगतः एतावता ग्रन्थ-नोदाहृतशास्त्रैः अकर्मजन्यत्वेन मिथ्यात्वावगमेऽपि कथं तेषां निवृत्तिपरत्वमिति प्रश्नमनूद्य तेषां तत्परत्वावगमाय सर्वशास्त्रतात्पर्यनिर्णायकं भगवद्गीताशास्त्रभाष्या-दिकं प्रमाणयति **निवृत्तीति**—

मू ॥ निवृत्तिबोधकत्वं तु विधीनां स्यात्कथं यदि ॥ ८८ ॥
सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ ८९ ॥
इत्यस्य गीतावाक्यस्य भाष्यस्यान्ते समीरितात् ।
बृहदारण्यभाष्यस्य व्याख्यानाच्च तथैव च ॥ ९० ॥
फलाधिकरणीयाच्च वाचस्पत्यात्तथैव च ।
दृष्टिसृष्टिपराद्वैतसिद्धिवाक्याद्विधिश्रुतेः ॥ ९१ ॥
परिसंख्यापरत्वं तु विस्पष्टं भासते किल ॥ ९१॥ ॥

व्या ॥ **परित्यज्येति** विधीनां निवृत्तिपरत्वेन न वेदविहिताः सर्वधर्माः इति संनिवृत्त्येत्यर्थः । **इत्यस्य गीतावाक्यस्येति** भगवद्गीतायामष्टादशाध्याय-गतस्य सर्वधर्मान्परित्यज्येति श्लोकस्य **भाष्यस्यान्ते समीरितात्** सर्वशास्त्रार्थ-तात्पर्यनिर्णायकादस्मात्–न च कर्मविधिश्रुतेरप्रामाण्यमस्ति–पूर्वपूर्वप्रवृत्तिनिरोधेनो-त्तरोत्तरापूर्वापूर्वप्रवृत्तिजननस्य प्रत्यगात्माभिमुख्यप्रवृत्त्युत्पादनार्थत्वात् मिथ्यात्वेऽ-प्युपायस्य–**टि**–लिङादिवचनस्य निवृत्तिपरत्वेन प्रवृत्तिकर्मफलात्मकविषयाभावादर्थ-शून्यत्वेऽपि ।

उपेयसत्यतया सत्यत्वमेव स्यात्–यथा अनुवादानां विधिशेषाणां–लोकेऽपि बालोन्मत्तादीनां पय आदौ पाययितव्ये सति चूडाविवर्धनादिवचनवदिति भाष्यात् ।

निषेधापरपर्याया अन्यनिवृत्तिः यच्छास्त्रतात्पर्यविषयीभूता स परिसंख्याविधिः–तत्र चान्यत्र च प्राप्तिरित्युत्सर्गः–न तु सा लक्षणघटिकेति ध्येयमिति कौस्तुभाद्युक्तप्रकारेण परिसंख्यालक्षणस्य लक्ष्येषु सर्वविधिषु समन्वयपरात् बृहदारण्यभाष्यव्याख्यानादस्मात्––

स्वर्गकामवाक्ये देहात्मत्वनिवृत्तिः–गोदोहनवाक्ये स्वतन्त्राधिकारनिवृत्तिः नित्यनैमित्तिकविधिषु अर्थान्तरोपदेशेन स्वाभाविकप्रवृत्तिनिरोधः निषेधेषु साक्षादेव स्वाभाविकनैसर्गिकप्रवृत्तयो निरुध्यन्ते–तदेवं सर्वमेव कर्मकाण्डं निवृत्तिद्वारेण मोक्षपरमिति बृहदारण्यभाष्यव्याख्यानाच्च ।

तथैव फलाधिकरणीयादप्यस्मात्––

'स्वर्गकामो यजेते' त्यादिश्रुतयः फलं प्रति न साधनतया यागं विदधति–तथाहीत्यारभ्य–'स्वर्गकामो यजेते'ति शरीरात्मभावप्रविलयः । 'गोदोहनेन पशुकामस्य प्रणयेदित्यत्राप्यापाततोऽधिकृताधिकारावगमादधिकारिभेदप्रविलयः । निषेधवाक्यानि च साक्षादेव प्रवृत्तिनिषेधेन फलं प्रति न साधनतया किञ्चित्कर्मविदधति । विधिवाक्यानि चान्यानि–'साङ्गहृण्या यजेत ग्रामकाम' इत्यादीनि न साङ्गहृण्यादिप्रवृत्तिपराणि–अपि तूपायान्तरोपदेशेन सेवादिदृष्टोपायप्रतिषेधार्थानि–यथा 'विषं भुङ्क्ष्व–मास्य गृहे भुङ्क्ष्वे'ति–तस्मात् कर्मफलसंबन्धस्य अप्रामाणिकत्वात् अनादिविचित्राविद्यासहकारिणः ईश्वरादेव कर्मानपेक्षाद्विचित्रफलोत्पत्तिरिति वाचस्पत्याच्च अत्रोक्तेश्वरपदात् सौषुप्तः प्राज्ञ एष सर्वेश्वर इति श्रुत्युक्तो ग्रहीतव्यः कर्मनिरपेक्षतयाऽविद्यया स्रष्टृत्वाभ्युपगमात् ।

तथा विधीनां परिसंख्यात्वाभिप्रायेणैव प्रवृत्ताद्दृष्टिसृष्टिपरादस्मात्–न चाविद्यासहकृतजीवकारणत्वे जगद्वैचित्र्यानुपपत्तिः–जगदुपादानभूतस्याज्ञानस्य विचित्रशक्तिमत्वात् । उपपत्त्यन्तरं च सिद्धान्तबिन्दु–कल्पलतिकादावस्माभिरभिहितम् वासिष्ठवार्तिकामृताद्याकरे स्पष्टमेवोक्तम् ॥ श्लो० ॥ अविद्यायोनयो भावास्सर्वेऽमी बुद्बुदा इव । क्षणमुद्भूय गच्छन्ति ज्ञानैकजलधौ लयमित्यादि–तस्मात् ब्रह्मातिरिक्तं सर्वं ज्ञानज्ञेयात्मकं जगदाविद्यकमेवेति प्रातीतिकसत्वं सर्वस्य सिद्धमित्यद्वैतसिद्धिवाक्याच्च ।

तथैव ज्योतिष्टोमादिश्रुतिबोधितानुष्ठानात्फलसिद्धिस्तु स्वप्नश्रुतिबोधितानुष्ठानप्रयुक्तफलसंवादतुल्येति सिद्धान्तलेशसङ्ग्रहे द्वितीयपरिच्छेदे दृष्टिसृष्टिवादसमर्थनपरात् श्रीमदप्पयदीक्षितवचनाच्च सर्वेषां विधिवाक्यानां परिसंख्याबोधकत्वेन मोक्षपरत्वं निर्विवादेनावगम्यते किलेत्यर्थः ॥

ननु,'धर्मं जैमिनिरत एवे'ति सूत्रेण स्वतन्त्रं कर्मैव फलकारणमिति यज्जैमिन्याचार्यमतं दर्शितं तन्निरासकेन तदुत्तरसूत्रीयेणानेन कर्मापेक्षादपूर्वापेक्षाद्वा यथास्तु तथास्तु । ईश्वरात् फलमिति सिद्धान्त इति कासाञ्चिद्विधिश्रुतीनामपूर्वविधित्वं कासाञ्चिन्नियमविधित्वं च सूचयता भाष्येण ।

'स्वर्गकामो यजेते' त्यादिश्रुतयः फलं प्रति न साधनतया यागं विदधतीत्यारभ्येश्वरादेव कर्मानपेक्षाद्विचित्रफलोत्पत्तिरित्यन्तस्य सर्वश्रुतीनां परिसंख्यात्वबोधकस्य वाचस्पत्यस्य बाध्यमानत्वात् कथं तत्प्रेक्षावदुपादेयं स्यादिति चेत्—भवांस्तावत् प्रष्टव्यः किं भवतोदाहृतेन भाष्येण विवक्षितमिति ।

कर्मापूर्वयोरन्यतरसापेक्षत्वमीश्वरस्य फलदानाय विवक्षितमिति चेत् न कर्मापेक्षादपूर्वापेक्षाद्वेश्वरात् फलमित्येतावतैव तदन्यतरस्य विवक्षितत्वे सिद्धे यथास्तु तथास्त्विति वाक्यवैय्यर्थ्यात् तर्हि यथास्तु तथास्त्विति वाक्येन तदुभयसापेक्षत्वं अस्वरसो दर्शित इति चेत् तदा कर्मणां कारणत्वाभावेन तद्बाध्यमूलकमेव तद्वाचस्पत्यं तावत् कर्मश्रुतीनां परिसङ्ख्यात्वपरतया प्रामाण्यं च प्रातिभासिकसत्ताकवियदादिकं प्रति सौषुप्तस्य प्राज्ञस्यैष एव सर्वेश्वर इति माण्डूक्यादिश्रुत्यनुसारेण अभिन्ननिमित्तोपादानत्वञ्च वैषम्याधिकरणीयवाचस्पत्यवदवबाधयति अतो न कश्चिद्दोषः ॥ ९१॥ ॥

अ० ॥ इदानीं प्रागुक्तप्रकारेण जगतोऽकर्मजन्यत्वे सति मायिकत्वेन मिथ्यात्वमेव सूत्रकारैरभिप्रेतमित्याह **गीतात्रयानुसारेणेति**—

मू ॥ गीतात्रयानुसारेण व्यासाचार्यैश्च वृद्धवत् ॥ ९२ ॥

समाननामरूपत्वादावृत्ताविति सूत्रतः ।
अन्यार्थं जैमिनिः प्रश्नव्याख्यानेति च सूत्रतः ॥ ९३ ॥
दृष्टिसृष्टिरभिप्रेता—यदा सुप्त इति श्रुतेः ।
तत्सूत्रद्वयमूलत्वात्—सुप्तात् सृष्टिपरत्वतः ॥ ९४ ॥
अकर्मजन्यतायां सा मायिकत्वेऽस्य युज्यते ॥ ९४॥ ॥

व्या ॥ गीतात्रयेति प्रागुक्तब्रह्मगीताशिवगीताभगवद्गीतानां त्रयमनुस्मृत्य सूत्रकारैरपि समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च । 'अन्यार्थन्तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेक' इत्यादिसूत्रेषु ॥ श्लो० ॥ ज्ञानस्वरूपमेवाहुर्जगदेतद्विचक्षणाः । अर्थस्वरूपं भ्राम्यन्तः पश्यन्त्यन्ये कुदृष्टयः । रज्जुसर्पादिवद्विश्वं नाज्ञातं सदिति स्थितं । प्रबुद्धदृष्टिसृष्टत्वात् सुषुप्तौ च लयश्रुते' रित्यादिशास्त्रोक्तप्रकारेण दर्शनसृष्टिरदर्शनं लय इति दृष्टिसृष्टिरभिप्रेतेत्युक्त्वा तत्र 'यदा सुप्तस्स्वप्नं न कञ्चन पश्यत्यथास्मिन् प्राण एवैकधा भवति तदैनं वाक् सर्वैर्नामभिस्सहाप्येति चक्षुस्सर्वै रूपैस्सहाप्येति श्रोत्रं सर्वैश्शब्दैस्सहाप्येति मनस्सर्वैर्ध्यानैस्सहाप्येति स यदा प्रतिबुध्यते यथाग्नेर्ज्वलतस्सर्वा दिशो विष्फुलिङ्गा विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनः सर्वे प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोकाः' इत्यादिकौषीतकीश्रुतिं प्रमाणयति **यदा सुप्त इति श्रुतेरित्यादिना** अस्तु नाम तावताऽनया श्रुत्या कथं दृष्टिसृष्टिपक्षसिद्धिरित्यत आह **सुप्तात् सृष्टिपरत्वत इत्यादिना** अस्य जगतोऽकर्मजन्यत्वेन मायिकत्वे सति सूत्रकारैरभिप्रेता सा दृष्टिसृष्टिः संगच्छत इत्यर्थः ॥

तत्र प्रथमसूत्रस्यायमर्थः ॥ प्रळये देवत्वजातेरप्यनित्यत्वादनित्यनित्ययोः देववेदयोः संबन्धस्याप्यनित्यत्वाविरोधः तदवस्थ एवेत्याशङ्क्याह सुषुप्तिप्रबोधयोरिव यदा सुप्तः स्वप्नं न कञ्चन पश्यतीत्यादिश्रुत्युक्तप्रळयोत्पत्त्योः आवृत्तादपि प्रळयेऽपि प्रपञ्चस्याविद्यायां संस्कारात्मना विद्यमानत्वेन पूर्वकल्पप्रपञ्चसमाननामरूपत्वादुत्तरकल्पप्रपञ्चस्य—तन्निष्ठजातेर्नित्यतया शब्दार्थयोस्संबन्धादनित्यत्वाविरोधो नास्ति 'धाता यथापूर्वमकल्पय'दित्यादिश्रुतौ दर्शनात् ॥ श्लो० ॥ 'यथर्त्तावृतुलिङ्गानि नानारूपाणि पर्यये। दृश्यन्ते तानि तान्येव तथा भावा युगादिषि' त्यादिस्मृतेश्चेति ॥

द्वितीयसूत्रार्थः उच्यते ॥ कौषीतकीब्राह्मणे **एव** बालाक्यजातशत्रुसंवादे सुप्तपुरुषप्रतिबोधनेन प्राणादिव्यतिरिक्ते जीवे--टि--**विज्ञानमयरूपे** प्रतिबोधिते सति पुनर्जीवव्यतिरिक्तविषयः 'क्वैष एतद्बालाके पुरुषोऽशयिष्ट क्व वा एतदभूत् कुत एतदागा'दिति विज्ञानमयस्य अधिकरणादिविषयकप्रश्नः तत्र 'यदा सुप्तस्स्वप्नं न कञ्चन पश्यत्यथास्मिन् प्राण एवैकधा भवति तदैनं वाक् सर्वैर्नामभिस्सहाप्येती'त्यादिनाऽधिकरणविषयकप्रश्नस्य प्रतिवचनमुक्त्वा 'एतस्मादात्मनः सर्वे प्राणा यथायतनं विप्रतिष्ठन्त' इत्यादिना 'कुत एतदागादिति' प्रश्नस्यापि प्रतिवचनमुक्तं ताभ्यां प्रश्नव्याख्यानाभ्यां जैमिनिराचार्योऽस्मिन् प्रकरणे **अन्यार्थं** ब्रह्म-

स्मीति प्रतिपत्त्यर्थं जीवपरामर्शं मन्यते । एवमन्यत्रापि च 'क्वैष तदाभूत् य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते' इति प्रश्नप्रत्युक्तिप्रकरणे एके वाजसनेयिनस्समामनन्तीति सूत्रकारैरुदाहृतश्रुत्या जगतः दृष्टिसमसमयोत्पन्नत्वेन प्रातिभासिकत्वाङ्गीकारादृष्टिसृष्टिरभिप्रेतेत्यर्थः ॥ ९४॥ ॥

अ० ॥ इदानीं प्रागुदाहृतसूत्रद्वयतन्मूलकौषीतक्यादिश्रुत्यनुसारि यत् अनादिविचित्रावियासहकारिणः ईश्वरादेव कर्मानपेक्षाद्विचित्रफलोत्पत्तिरिति फलाधिकरणीयं वाचस्पत्यं—तदनुरूपं कृत्स्नप्रसक्त्यधिकरणमर्थतः संगृह्य जगतोऽकर्मजत्वे सति केवलाविद्यकत्वे प्रमाणयति **कृत्स्नेति**—

मू ॥ कृत्स्नांशेनैवेश्वरस्य परिणामे त्वनित्यता ॥ ९५ ॥
एकदेशेन चेद्बाधो निष्कळत्वश्रुतेर्यदि ।
कूटस्थस्यात्मनो मोहात्स्वात्मत्वेन गृहीतया ॥ ९६ ॥
अविद्यया जगद्भावो यथा स्वप्नदृशस्तथा ॥ ९६॥ ॥

व्या ॥ 'कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वे'ति सूत्रमूलकः प्रथमश्लोकः स्पष्टोऽर्थः ॥ 'श्रुतेस्तु शब्दमूलत्वादिति' सिद्धान्तसूत्रार्थमाह—**कूटस्थेत्यादिना** कूटस्थस्य सौषुप्तस्य प्राज्ञस्य स्वाज्ञानवशाज्जगद्रूपेण प्रतीयमानस्य 'इन्द्रो मायाभिः पुरुरूप ईयते' 'स एव मायापरिमोहितात्मा शरीरमास्थाय करोति सर्वं' । 'पुरत्रये क्रीडति यस्तु जीवस्ततस्तु जातं सकलं विचित्र' मित्यादिवेदशब्दैकसमधिगम्यत्वात् तस्यैव प्राज्ञस्य—'सता सोम्य तदा संपन्नो भवति स्वमपीतो भवति'—प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरं—मयि सर्वं लयं यातीत्यादिश्रुत्या विज्ञानमयेन स्वरूपत्वेन प्राप्यस्य जगल्लयाधारस्य कूटस्थत्वेनावस्थानश्रवणात् नोक्तदोषापत्तिरिति प्राज्ञस्याविद्यकजगद्रूपेण वर्तमानत्वमादिश्य तत्र दृष्टान्तसमर्पकं 'आत्मनि चैवं विचित्राश्च ही'ति सूत्रमुदाहरति **यथा स्वप्नदृशस्तथेति** यथाऽसङ्गस्य स्वप्नदृशो मण्यौषधप्रतिबद्धचक्षुषः पुरुषस्य च स्वरूपानुपमर्देन तस्मिन्नाविद्यकाः विचित्राः गजाश्वादयो जायन्ते । एवं सौषुप्ते प्राज्ञेऽपीत्युक्तमतः प्राज्ञप्रकृतिकस्य जगतः केवलाविद्यकत्वान्न कर्मजन्यत्वामिति प्रागुदाहृतद्वैतसिद्धिगीताभाष्यबृहदारण्यभाष्यव्याख्यानवाचस्पत्यादिप्रमाणैरास्थेयम् ।

किञ्च 'श्रुतेस्तु शब्दमूलत्वा'दिति सूत्रस्य सौषुप्तप्राज्ञपरत्वमनने भाष्येण चावगम्यते यदि च कृत्स्नं ब्रह्म कार्यभावेनोपयुक्तं स्यात् 'सता सोम्य तदा संपन्नो भव'तीति सुषुप्तिगतं विशेषणमनुपपन्नं स्यात् विकृतेन ब्रह्मणा नित्यसंपन्न-

त्वात् अविकृतस्य च ब्रह्मणोऽभावादिति अन्यथा कृतप्रसक्त्यादिदोषपरिहारार्थं सता सोम्य तदा संपन्नो भवतीति सुषुप्तिगतं विशेषणमनुपपन्नं स्यादिति विज्ञानमयस्य स्वमपीतो भवतीति श्रुत्युक्तस्य सौषुप्तस्य जगत्कारणभूतस्य सद्रूपस्य स्वात्मन एव संपत्तिश्रुत्यनुपपत्तिपरं भाष्यमुपरुध्येत आधिदैविकेश्वरत्ववादिपक्षे सुषुप्तिकाले प्राज्ञस्य तदतिरिक्तस्य वा मुख्यजगल्लयाधारत्वासंभवेन कारणत्वेनावशिष्यमाणताऽनवगमात् सता सौम्य तदा संपन्नो भवति स्वमपीतो भवति—प्राज्ञो नात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमित्यादिश्रुतीनां स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हीति सूत्रदर्शितद्वैतादर्शनपरत्वं सुप्तपरत्वं समार्थत्वं च पीड्येत नास्माकमिति ध्येयम् ।

ॐ कर्मापेक्षस्येश्वरस्य केवलनिमित्तकारणत्वव्यवस्थारम्भः ॐ

अ० ॥ ननु कौषीतक्यादिश्रुत्युक्तप्रकारेण निखिलस्य जगतो विचित्रशक्त्यविद्यासहायकजीवप्रकृतिकत्वेन अकर्मजन्यत्वे सति केवलाविद्यकत्वमभिप्रेतं चेत् कथं 'वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथाहि दर्शयती'त्येवं जातीयकैः सूत्रैः कर्मसापेक्षेश्वरप्रकृतिकत्वं राद्धान्ततामिति चेत् न तत्र तथा राद्धान्तितं किं तु परमेश्वरनिमित्तकत्वमात्रमेव कुत इति चेदुच्यते—पूर्वमदेहस्यापि श्रुतिप्राबल्याच्छक्तत्वोक्त्या कर्तृत्वमुक्तं तदाक्षेपसंगत्या पूर्वपक्षसूत्रं व्याचष्टे **अन्यथा पुनश्चेतनकर्तृकत्वं जगत आक्षिपतीति** संप्रतीकस्य प्रयोजनवत्वाधिकरणीयस्य रामानन्दीयस्य—तथा क्षित्यादिक सकर्तृकं कार्यत्वादित्यनुमानेनेव केवलनिमित्तकारणत्वं श्रुत्यादिष्टमपि न संभवति कुत इति चेत् लोके पुरुषप्रवृत्तीनां तत्पुरुषप्रयोजनवत्वदर्शनात् तथा परमेश्वरप्रवृत्तेरपि प्रयोजनं यदि परिकल्प्येत नित्यतृप्तत्वं परमात्मनः श्रूयमाणं बाध्येतेति स्वतन्त्रस्य कर्मणः कारणत्ववादिना मीमांसकेनाक्षिप्ते सति 'लोकवत्तु लीलाकैवल्य'मिति सिद्धान्तसूत्रस्य तदीयस्य यथा लोके कस्य चिदाप्तेषणस्य राज्ञो राजामात्यस्य वा व्यतिरिक्तम्--टि- क्रीडाविहाराद्यतिरिक्तम्–किञ्चित्प्रयोजनमनभिसन्धाय केवलं लीलारूपाः प्रवृत्तयः क्रीडाविहारेषु भवन्तीति तद्वाष्यस्य च ॥ श्लो० ॥ भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमिति चापरे । देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहेति श्रीगौडपादकारिकोक्तप्रकारेण ये ब्रह्म-

णोऽभिन्ननिमित्तोपादानत्ववादिभ्योऽपरे निमित्तकारणत्वमात्रवादिनः । तदनुसारित्वमवगम्यते—आप्तकामप्रवृत्तीनां क्रीडाविहाररूपार्थवत्त्वाङ्गीकारात् । तथैव पुनश्चेश्वरनिमित्तकत्वं फलस्यासहिष्णुना मीमांसकेन उक्तदोषपरिहारार्थमीश्वरस्य आधिदैविकस्य केवलनिमित्तकारणत्वप्रक्रिययैव वैषम्याद्यधिकरणं कृतमित्याह **स्वतन्त्रेत्यादिना**—

मू ॥ स्वतन्त्रकर्ममात्रस्य प्रकृतित्वाभिमानिनम् ॥ ९७ ॥

ब्रह्मात्मनोर्भेददृष्टिमन्तं मीमांसकं पुनः ।
ईशताटस्थ्यवादे हि प्रवेशयितुमुद्यता ॥ ९८ ॥
वैषम्याख्याधिकरणं तज्जातीयं च तत्कृतम् ।
यतः पाशुपतेनेव प्राप्तदोषोऽत्र वारितः ॥ ९९ ॥
अन्यथा रामवाक्यानां वैय्यर्थ्यं चापतेत्किल ॥ ९९॥ ॥

व्या ॥ ब्राह्मणाय गां दद्यादित्यत्र ब्राह्मणस्येव ब्रह्मणोऽपि संप्रदानकारकत्वस्य मीमांसकेनाभिप्रेतत्वात् तं ब्रह्मात्मनोर्वास्तवभेददृष्टिमन्तं आप्तकामस्येश्वरस्य स्वप्रयोजनार्थं प्रवृत्त्यभावेऽपि कस्मै चित् सुखकरं देवादिशरीरं—कस्मै चिद्दुःखावहं नारकीयं च निर्मिमाणस्य वैषम्यादिदोषः प्रसज्येतेति च चोदयन्तं मीमांसकं प्रति तत्तत्कर्मानुरूपं विचित्रं शरीरं विदधतो न वैषम्यादिदोष इति तत्कृतचोद्यसमाधानेन परमेश्वरस्य केवलनिमित्तकारणत्ववादे प्रवेशयितुं सूत्रकारेण वैषम्याद्यधिकरणं कृतमित्युक्त्वा तत्रोपपत्तिमाह **यत इत्यादिना** यतो भगवता सूत्रकारेणापि प्रयोजनवत्त्वाधिकरणेन राद्धान्तिते परमेश्वरे प्राप्तवैषम्यादिदोषः तत्तत्प्राणिकृतविषमकर्मसापेक्षत्वाद्विषमफलदातुरीश्वरस्य न सभवतीति पाशुपताधिकरणे तन्मतस्थेनेव परिहृतः ॥ ततः वैषम्याद्यधिकरणम् आधिदैविकेश्वरात् फलानां भिन्नत्वेनेश्वरस्य केवलनिमित्तकारणत्वमेव बोधयतीत्युक्त्वा ।

अधुना—'लोकवत्तु लीलाकैवल्य'मिति प्रयोजनवत्त्वाधिकरणीयसिद्धान्तसूत्रेण ब्रह्मणोऽभिन्ननिमित्तोपादानत्वं जीवेशयोरभेदं चाभिप्रेत्य तत्र प्राप्तदोषपरिहारौ वैषम्याधिकरणेन दर्शितावित्यङ्गीकारे बाधमाह—**अन्यथेत्यादिना रामवाक्यानामिति** ॥ श्लो० ॥ 'पूजेष्टपूर्तादिवरक्रियाणां भोक्ता फलं यच्छसि यत्त्वमेव । मृषैतदेवं वचनं पुरारे त्वत्तोऽस्ति भिन्नं नहि किञ्चिदेव ॥ किञ्चिद्बलं वा चुलुकोदकं वा यत्त्वं महेश प्रतिगृह्य धत्से । त्रैलोक्यलक्ष्मीमपि यज्जनेभ्यः सर्वं त्ववैद्याकृत-

मेव मन्ये' इत्यादीनां आधिदैविकस्येश्वरस्याभिन्ननिमित्तोपादानत्वपक्षे कर्मसापेक्षत्वनिरासपराणां प्रागस्मिन्निरूपणे उदाहृत्य व्याख्यातानां वैय्यर्थ्यमापतेदित्युक्त्वा किलशब्देन जीवेभ्यो विषमफलदातुरीश्वरादेयानां भिन्नत्वेन केवलनिमित्तकारणभूतस्य वैषम्यादिदोषपरिहारार्थं कर्मसापेक्षत्वबोधकशास्त्राणामुपपन्नत्वेऽपि तेषां स्वार्थे तात्पर्याभावः श्रीरामवाक्यात् सिद्ध इति दर्शितम् ।

१. प्रश्नः ॥ एवं 'लोकवत्तु लीलाकैवल्य'मिति सिद्धान्तसूत्रस्य क्रीडार्थमिति चापर इति गौडपादकारिकया समानार्थकत्वेन चेतनकारणत्ववादैकदेशिमतानुसारित्वावगमेऽपि कुतस्तत्र वैषम्यादिदोषापादकस्य मीमांसकत्वं—तत्परिहाराय तत्तत्प्राणिकर्मसापेक्षतया विभागेन फलमुच्चावचं ददातीति प्रदर्शितस्येश्वरस्य कुतश्च प्रमाणान्तरात्केवलनिमित्तकारणत्वं चावगम्यत इति चेदुच्यते—

१. उत्तरं ॥ यतो वियत्पादे 'परात्तु तच्छ्रुतेरिति' सूत्रस्य भाष्यावसरे यदिदमविद्यावस्थायामुपाधिनिबन्धनं कर्तृत्वं जीवस्याभिहितं तत्किमनपेक्ष्येश्वरं भवत्याहोस्विदीश्वरापेक्षमिति भवति विचारणेति भाष्यस्य व्याख्यानानन्तरं कर्ममीमांसकमतेन पूर्वपक्षयति तत्रेत्यादिनेति पूर्वपक्षभाष्यमवतारयन्ति श्रीरामानन्दस्वामिनः ततः तदधिकरणे पूर्वपक्षी मीमांसक इति फलाधिकरणगताभ्यां—धर्मं जैमिनिरत एवेति पूर्वपक्षसूत्रतद्भाष्याभ्यामिवावगम्यते ।

२. प्रश्नः ॥ बाढमेवं । किं तत् रामानन्दप्रदर्शितप्रतीकपूर्वकं पूर्वपक्षभाष्यं येन तत्पूर्वपक्षिणो मीमांसकत्वाध्यवसायः फलाधिकरणेनेव भवेत्—कुतो वा तद्भाष्येण वैषम्याधिकरणीयपूर्वपक्षिणो मीमांसकत्वावगतिरिति चेत् ।

१. उ० ॥ उच्यते—तत्र प्राप्तं तावन्नेश्वरमपेक्षते जीवः कर्तृत्व इति—कस्मात्— अपेक्षाप्रयोजनाभावात् अयं हि जीवस्स्वयमेव रागद्वेषादिप्रयुक्तः कारकान्तरसामग्रीसंपन्नः कर्तृत्वमनुभवितुं शक्नोति तस्य किमीश्वरः करिष्यति न च लोके प्रसिद्धिरस्ति कृष्यादिकासु क्रियासु अनडुहादिवदीश्वरोऽपरोऽपेक्षितव्य इति क्लेशात्मकेन कर्तृत्वेन जन्तून् संसृजत ईश्वरस्य नैर्घृण्यं प्रसज्येत विषमफलञ्चैषां कर्तृत्वं विदधतो वैषम्यं चेति प्राप्ते ।

२. उ० ॥ ननु, वैषम्यनैर्घृण्ये न सापेक्षत्वादित्युक्तं ।

३. प्र० ॥ सत्यमुक्तम् ईश्वरस्य सापेक्षत्वसंभवे सापेक्षत्वञ्चेश्वरस्य संभवति सतोः जन्तूनां धर्माधर्मयोः—तयोश्च सद्भावस्सति जीवस्य कर्तृत्वे—तदेव चेत् कर्तृत्वमीश्वरापेक्षं स्यात्—किंविषयमीश्वरस्य सापेक्षत्वमुच्येतेति परायत्ताधि-

करणीयपूर्वपक्षभाष्येण तत्र पूर्वपक्षिणे मीमांसकत्वम् । ईश्वरस्तु फलं ददातीत्यनुपपन्नम् अविचित्रस्य कारणस्य विचित्रकार्यानुपपत्तेः वैषम्यनैर्घृण्यप्रसङ्गादिति फलाधिकरणगतेन धर्मं जैमिनिरत एवेति सूत्रभाष्येणेव निश्चीयते ।

३. उ० ॥ तथा च सति एतत्फलाधिकरणपरायत्ताधिकरणाभ्यां सह वैषम्याधिकरणस्य पूर्वपक्षांशतः साम्यात् तत्रापि पूर्वपक्षी मीमांसक इत्यवगम्यते ।

४. उ० ॥ यत्तावत्पृष्टं प्राणिकर्मसापेक्षतया विभागेन फलदातुः केवलनिमित्तकारणत्वं कुतो वा प्रमाणान्तरादवगम्यत इति अत्रोच्यते ।

५. उ० ॥ 'पूर्वन्तु बादरायणो हेतुव्यपदेशादिति' फलाधिकरणीयसिद्धान्तसूत्रार्थप्रकाशकेनानेन बादरायणस्त्वाचार्यः पूर्वोक्तमेवेश्वरं फलहेतुं मन्यते केवलात् कर्मणः अपूर्वाद्वा केवलात् फलमित्ययं पक्षः तुशब्देन व्यावर्त्यते कर्मापेक्षादपूर्वापेक्षाद्वा यथास्तु तथास्तु ईश्वरात् फलमिति सिद्धान्त इति भाष्येण यथा पाशुपतादिमते कर्मापेक्षात्–टि–क्षणककर्मापेक्षात्–अपूर्वापेक्षाद्वा केवलादीश्वरात्–टि–निमित्तकारणभूतात् फलं–टि–सत्यं भवेदिति सिद्धान्तः तथा भवेदेतदधिकरणसिद्धान्त इति तात्पर्यकेण इत्यभ्युपेत्य च स्रष्टेस्तात्विकत्वमिदमुक्तमिति वैषम्याधिकरणगतात्पर्यबोधकवाचस्पत्यस्यापि मूलभूतेन ।

६. उ० ॥ तथैव ईश्वरस्तु पर्जन्यवत् द्रष्टव्यः यथा हि पर्जन्यो व्रीहियवादिसृष्टौ साधारणं कारणं भवति व्रीहियवादिवैषम्ये तु तत्तद्बीजगतान्येवासाधारणानि सामर्थ्यानि कारणानि भवन्ति–एवमीश्वरो देवमनुष्यादिसृष्टौ साधारणं कारणं भवति देवमनुष्यादिवैषम्ये तत्तज्जीवगतान्येवासाधारणानि कर्माणि कारणानि भवन्ति एवमीश्वरः सापेक्षत्वात् न वैषम्यनैर्घृण्याभ्यां दुष्यतीति वैषम्याधिकरणीयभाष्येण च एतद्भाष्यद्वयसमानार्थकेन जीवकृतधर्माधर्मवैषम्यापेक्ष एव तत्फलानि विषमं विभजते पर्जन्यवदीश्वरो निमित्तत्वमात्रेण यथा लोके नानाविधानां गुच्छगुल्मादीनां व्रीहियवादीनां च असाधारणेभ्यः स्वस्वबीजेभ्यो जायमानानां साधारणं निमित्तं भवति पर्जन्यः इत्यनेन 'कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैय्यर्थ्यादिभ्य'इति परायत्ताधिकरणीयसिद्धान्तसूत्रस्य भाष्येण च तत्रत्येन परिणाम्युपादानत्वविवर्तोपादानत्वव्यावर्तकपर्जन्यदृष्टान्तेन चेश्वरो निमित्तत्वमात्रेण विषमं फलं विभजत इति वाक्येन च कर्मसापेक्षस्येश्वरस्य केवलनिमित्तकारणत्वमवगम्यते ।

७. उ० ॥ व्रीह्यादीनां तत्तद्बीजानीव देवादिशरीराणां तत्तत्प्राणिकृतानि द्रव्यरूपाण्यपूर्वाणि कर्मशब्दितानि प्रकृतिरिति चावगम्यते ततः प्राग्यत् प्रतिज्ञातं

स्वतन्त्रकर्ममात्रस्येत्यादिना मूलग्रन्थेन मीमांसकं प्रति ईशतादस्थ्यवाद एव वैषम्याद्यधिकरणेन दर्शित इति तत्सिद्धम् ।

८. उ० ॥ किञ्च 'लोकवत्तु लीलाकैवल्य'मिति सूत्रावयवानुसारिणा भाष्यभागेन परमेश्वरकर्तृकत्वं जगत आक्षिपन्तं मीमांसकं प्रति केवलनिमित्तकारणत्वमीश्वरस्य प्रसाध्य अनन्तरं तदधिकरणेन प्राप्तस्य तत्प्राक्तनैरनेकाधिकरणैः प्रत्यगात्मनो विवर्तोपादानब्रह्मात्मत्वबोधकैः आवेदिताद्वैतसिद्धान्तविरोधस्य परिहाराय ।

न चेयं परमार्थविषया सृष्टिश्रुतिः अविद्याकल्पितनामरूपव्यवहारगोचरत्वात् ब्रह्मात्मभावप्रतिपादनपरत्वाच्चेत्येतदपि नैव प्रस्मर्तव्यमिति परमात्मनो जीवभावजगद्भावाध्यासबोधकेन अद्वैतसिद्धान्तपरेण भाष्येण च तथैवाभ्युपेत्य च सृष्टेस्तात्विकत्वमिदमुक्तम् अन्यर्वाच्या तु सृष्टिरिति न प्रस्मर्तव्यमत्रापीति वैषम्याधिकरणीयवाचस्पत्येन च जीवेशफलानां पाशुपताद्यभिमतवास्तवभेदबोधकयोः प्रयोजनत्वाधिकरणवैषम्याधिकरणयोः केवलनिमित्तकारणपरत्वञ्च - तदनुसारिणां परायत्ताधिकरणफलाधिकरणादीनां जीवेभ्यो विषमफलदातुरीश्वरात् देयानां फलानां भिन्नत्वेन केवलनिमित्तकारणपरत्वञ्चावगमयन्ति भाष्यकारादयः ॥

९. प्र० ॥ ननु प्रयोजनवत्वाद्यधिकरणैः परवाद्यभिमतजीवेशादिभेदोऽभिप्रेत इति कुतश्चावगम्यत इति चेदुच्यते ।

१. उ० ॥ 'अवस्थितेरिति काशकृत्स्न' इति सूत्रेण तदीयेन चानेन अस्यैव परमात्मनोऽनेनापि विज्ञानात्मभावेन अवस्थानात् उपपन्नमिदमभेदेनोपक्रमणमिति काशकृत्स्नाचार्यो मन्यते–तथा च ब्राह्मणं - अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीत्येवं जातीयकं परस्यैवात्मनो जीवभावेनावस्थानं दर्शयति मन्त्रवर्णश्च 'सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाऽभिवदन्यदास्ते' इत्येवं जातीयक इत्यारभ्य क्षेत्रज्ञोऽयं परमात्मनः भिन्नः परमात्मायं क्षेत्रज्ञात् भिन्न इत्येवं जातीयक आत्मभेदविषयोऽयं निर्बन्धो निरर्थकः - एको ह्ययमात्मा नाममात्रभेदेन बहुधाभिधीयत इति न हि सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायामिति काञ्चिदेवैकां गुहामधिकृत्यैतदुक्तं ।

न च ब्रह्मणोऽन्यो गुहायां निहितोऽस्ति तत् सृष्ट्वा तदेवानुप्राविशदिति स्रष्टुरेव प्रवेशश्रवणात् ये तु निर्बन्धं कुर्वन्ति ते वेदान्तार्थं बाधमानाश्श्रेयोद्वार सम्यग्दर्शनमेव बाधन्ते कृतकमनित्यं च मोक्षं कल्पयन्ति न्यायेन च न संगच्छन्ते इत्यन्तेन स्वमतस्थापकेन पाशुपतादिमतदूषकेण च भाष्येण ।

तथैव प्रकृत्यधिकरणेन तद्भाष्येण च ब्रह्मण एव जगद्भावाध्यासपूर्वकं जीवत्वाध्यासाश्रयत्वप्रकाशकेन सृष्ट्यारंभादिसमये ब्रह्मव्यतिरेकेण जीवानामनादित्वेन स्वरूपाभावमादिश्यानन्तरं ।

यतस्तद्विरुद्धं ब्रह्मव्यतिरेकेण जीवानां पृथक् स्वरूपमनादित्वं च 'उपपद्यते चाप्युपलभ्यते चेति' वैषम्याधिकरणीयेन सूत्रेण तदीयेन उपलभ्यते संसारस्यानादित्वं श्रुतिस्मृत्योः श्रुतौ तावदनेन जीवेनात्मनेति सर्गप्रमुखे शारीरमात्मानं जीवशब्देन प्राणधारणनिमित्तेन अभिलपन्ननादिस्संसार इति दर्शयति - आदिमत्वे तु प्रागधारितप्राणस्सन् कथं प्राणधारणनिमित्तेन जीवशब्देन सर्गप्रमुखेऽभिलप्येत - अनागताद्धि संबन्धादतीतसंबन्धो बलीयान्भवति अभिनिष्पन्नत्वादित्यादिकेन च पाशुपतादय इव हि उदाहृतश्रुतितात्पर्यगोचरमविदिदिशुः ततोऽप्यवगम्यते ।

२. उ० ॥ किं च तृतीयाध्यायस्य द्वितीयपादे स एव तु कर्मानुस्मृतिशब्दविधिभ्य इति सूत्रस्यानेन - किं य एव सत्संपन्नः स एव प्रतिबुध्यते - उत स वाऽन्यो वेति भाष्येण - सुषुप्तौ यस्मिञ्छरीरे य एव सत्संपन्नः स किमुताधिदैविकः परमेश्वरोऽथवा जीवान्तर प्रतिबुध्यत इति त्रेधा संशय्य तदुत्तरेणानेन स एव जीवस्सुप्तः स्वास्थ्यं गतः पुनरुत्तिष्ठति नान्य इत्युपक्रम्य अन्योत्थानपक्षेऽन्यस्मिन् शरीरे सुप्तोऽन्यस्मिन् शरीरे उत्तिष्ठतीति कोऽस्यां कल्पनायां लाभस्स्यात् । अथ मुक्त उत्तिष्ठेदन्तवान्मोक्ष आपद्येत—निवृताविद्यस्य च पुनरुत्थानमनुपपन्नं - एतेन ईश्वरस्योत्थानं प्रत्युक्तं नित्यनिवृत्ताविद्यत्वादिति भाष्येण आधिदैविकस्य तत्तत्प्राणिकर्मसापेक्षतया तेभ्यो विषमफलदातुरीश्वरस्य विज्ञानमयात्सौषुप्तानन्दमयाच्च वास्तवभेदः पाशुपताद्यभिमतकेवलनिमित्तकारणत्वं चाभिप्रेत इति ।

तदुत्तरेणानेन - अपि च न जीवो नाम कश्चित् परस्मादात्मनोऽन्यो विद्यते - यो जलबिन्दुरिव जलराशेः सतो विविच्येत। सदेव तूपाधिसंपर्काज्जीव इत्युपचर्यते इत्यसकृत् प्रपञ्चितमिति भाष्येण - 'तदैक्षत बहु स्यां प्रजायेयेती'ति श्रुत्युक्तं यत् सदाख्यं जगतोऽभिन्ननिमित्तोपादानं सौषुप्तानन्दमयरूपम् - अनिवृत्ताविद्यं स्वात्मतत्वं तस्य प्रतिबिम्बादिभावं विना साक्षात् स्वारोपितकार्यकारणोपाधौ अहमित्यात्माध्यासकाले सुषुप्तस्थानात् - उत्थानोपदेशात् तथावगम्यते ।

३. उ० ॥ अन्यथा - एतेनेश्वरस्योत्थानं प्रत्युक्तं नित्यनिवृत्ताविद्यत्वादिति भाष्येण निर्दिष्टस्यैव 'सदेव सोम्येदमग्र आसी'दित्युपक्रम्य 'तदैक्षत बहु स्यां प्रजायेयेती'त्यादि श्रुतिगम्यत्वे ।

सदेव तूपाधिसंपर्कात् जीव इत्युपचर्यते इत्यसकृत्प्रपञ्चितमिति भाष्यगतेनै-वकारेण सदाख्यब्रह्मणः प्रतिबिम्बादिभावमन्तःकरणादावपोह्य साक्षादेव जीव-भावबोधकेन भाष्येणेव जीवात्मनोत्थानमुपदिश्येत - न तथोपदिश्यते - किं तु नित्यनिवृत्ताविद्यत्वादिति हेतुनोत्थानं प्रत्युक्तमेव–अत एष ह्येव साधु कर्म कारयति एष ह्येवासाधु कर्म कारयति अन्नादो वसुदान इत्यादिशास्त्रमाधिदैविकस्य परमेश्वरस्य पाशुपतादिमतासिद्धमेव केवलनिमित्तकारणत्वं तदीश्वरजीवानां वास्तवभेदं च अनु-वदतीत्यास्थेयम् ।

४. उ० ॥ किंचान्यत् यत्र कुल चिदाधिदैविकस्य परमेश्वरस्य प्रकृतित्व-मपि वर्णितं चेत् तद्वाक्यं तत्स्तावकमेवेति ध्येयं तथा हि कारणानां मध्ये यदुपादानं तत्तेषु प्रधानत्वेन स्वकार्यादद्वितीयत्वेन च प्रशस्तं लोके - तादृशप्राशस्त्यवचनेन आधिदैविक ईश्वरस्स्तूयत एव निरविद्यत्वात् नित्यत्वाच्च न मुख्यं विवर्त्तोपादा-नत्वं परिणाम्युपादानत्वं वा संभवेदिति ध्येयम् ।

५. उ० ॥ तथा हि उपादानादिवाप्युपादानभूतदिश इव च नित्यनिवृ-त्ताविद्यात् निमित्तकारणादीश्वरादप्यपृथग्देशकत्वेनेदं मायाख्याविद्यया सन्घटः अह-म्मनुष्य इति सदात्मतादात्म्यापन्नं कर्मप्रकृतिकं जगदीश्वरप्रकृतिकमिति - साङ्ख्या-भिमतप्रधानवत् सर्वव्यापित्वादीश्वरो जगत्प्रकृतिरिति च सिंहो देवदत्त इतीव गौ-ण्यवृत्त्योपास्यः स्तूयत एवेति ज्ञेयम् ।

६. उ० ॥ किञ्च सिद्धान्तमुक्तावलीकृतस्तु मायाशक्तिरेवोपादानं न ब्रह्म अपूर्वमनपरं - न तस्य कार्यं करणञ्च विद्यत इति श्रुतेः जगदुपादानमायाधि-ष्ठानत्वेन तु उपचारादुपादानं तादृशमेवोपादानत्वं लक्षणे विवक्षितमित्याहुरिति तत्प्राक् तत्वनिर्णयकृदाद्यभिमतत्वेन दर्शितविवर्तोपादानत्वव्यावर्तकशास्त्रस्य सिद्धा-न्तलेशसंग्रहे दीक्षितैरुत्थापितत्वात् निमित्तकारणत्वमेव नित्यनिवृत्ताविद्यस्य कर्मा-पेक्षस्येश्वरस्य सिध्यति ।

४. प्र० ॥ ननु, प्रयोजनवत्वाधिकरणाद्यैः केवलनिमित्तकारणत्वमाधिदै-विकस्येश्वरस्योपदिष्टं चेत् कथं तेषामविरोधाध्याये संगतिरिति चेदुच्यते ।

१. उ० ॥ यथा उपास्यब्रह्मपराणां ज्ञेयब्रह्मपराणां अधिकरणानां क्रमात् जीवब्रह्मभेदाभेदपरत्वेऽपि ब्रह्मणि समन्वयः तद्वदाधिदैविकेश्वरस्याभ्यामोहितत्वेन केवलनिमित्तकारणत्वपराणामपि तत्रोद्भावितविरोधपरिहारपूर्वकं चेतनसमन्वयपर-त्वेन अविरोधाध्यायसंगतिर्भवितुमर्हति ।

५. प्र० ॥ ननु, प्रकृत्यधिकरणारम्भणाधिकरणाद्यैः अभिन्ननिमित्तोपादानत्वं प्रत्यगात्मनो व्यवस्थाप्य अनन्तरं प्रयोजनवत्त्वाधिकरणाद्यैः कर्मसापेक्षत्वपरैः किमर्थं तद्विरुद्धं निमित्तकारणत्वमात्रम् आधिदैविकस्य परमेश्वरस्यादिशन्ति सूत्रकारादय इति चेत् मन्दाधिकारिणे मीमांसकस्यानुग्रहार्थमेव ।

१. उ० ॥ यथा च वियत्पादे उत्क्रान्तिगत्यागत्यधिकरणे स्थूलदेहातिरिक्तात्मास्तित्ववादिने मीमांसकाय–'तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवदिति' सूत्रेण च तदीयेन च परस्यैव तु ब्रह्मणः प्रवेशश्रवणात्–तादात्म्योपदेशाच्च परमेव ब्रह्म जीव इत्युक्तं तस्माद्यावत् परं ब्रह्म तावानेव जीवो भवितुमर्हति परस्य च ब्रह्मणो विभुत्वमाम्नातं तस्माद्विभुर्जीवस्तथा च 'स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणे' ष्विखेवं जातीयका जीवविषया विभुत्ववादाः श्रौतास्मार्ताश्च समर्थिता भवन्तीत्यादिभाष्येणोपाधिविशिष्टस्यापि "जीवस्य घटसंवृतमाकाशं नीयमाने घटे यथा । घटो नीयेत नाकाशस्तद्वज्जीवो नभोपम" इति श्रुत्युक्तप्रकारेण तृतीयनिरूपणोक्तप्रकारेण च विभुत्वं संस्थाप्य गुणोपसंहारपादे शरीरे भावाधिकरणे 'व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवदिति' सिद्धान्तसूत्रेण तदीयेन भाष्येण च मीमांसकापेक्षया मन्दाधिकारिणे देहमात्रात्मत्वदर्शिने लोकायतिकाय देहव्यतिरिक्तो यः परलोकभाक् स एव परिच्छिन्नो जीव इति उत्क्रान्तिगत्यागत्यधिकरणीयपूर्वपक्षेणैवोपदिश्यते तद्वत्प्रतीचः आध्यात्मिकस्य अभिन्ननिमित्तोपादानत्वव्यवस्थापनानन्तरमप्याधिदैविकस्य परमेश्वरस्य केवलनिमित्तकारणत्वं मीमांसकायादिश्यतेऽतो न कश्चिद्दोषः ।

२. उ० ॥ किञ्च वैषम्याधिकरणेन सह तदुत्तराधिकरणस्य भवत्वीश्वरस्य विषमसृष्टिनिमित्तत्वं तत्प्रयोजकस्य कर्मणस्सत्वात् न तूपादानत्वं तद्व्यापकस्य सगुणत्वस्य अभावादिति प्रत्युदाहरणसंगतिरिति रामानन्दीयेनापि व्याख्यानेन वैषम्याधिकरणं केवलनिमित्तकारणत्वपरामिति निश्चीयते ।

६. प्र० ॥ तर्हि स्वतः कूटस्थत्वादाधिदैविकस्य परमेश्वरस्य तत्तत्प्राणिकर्मायत्तं जगत्कर्तृत्वं वैषम्याधिकरणेनोपदिश्यानन्तरं सर्वधर्मोपपत्त्यधिकरणेन मायासाहचर्यादुपादानत्वस्य विज्ञापितत्वात् न पराभिमतं केवलनिमित्तकारणत्वं वैषम्याधिकरणेनादिष्टमित्यत्र को दोष इति चेत् ।

१. उ० ॥ न चमसाधिकरणभाष्योक्तरीत्या साक्षी चेता केवलो निर्गुणश्चेति श्रुतेरध्यात्मपरत्वात् तदन्यत्वाधिदैविकस्य परमेश्वरत्वाविरोधाभावाच्च 'तदैक्षत बहु स्यां प्रजायेय इन्द्रो मायाभिः पुरुरूप ईयत' इत्यादिश्रुत्युक्तमायिकबहुभवनस्य

स्वधर्मत्वेनानुसन्धानाद्यसम्भवाच्च प्रथमनिरूपणे द्विषष्टितमश्लोकादारभ्य पञ्चसप्तति-तमावसानकश्लोकतद्व्याख्यानोक्तशास्त्राच्च अन्तत्यतृतीयप्रश्नस्य प्रत्युत्तरचतुर्थ-वचनोक्तार्थवादाच्च उपचारेण प्रकृतित्वोपपादनेऽपि केवलनिमित्तकारणत्वमेव सि-द्ध्येत ।

२. उ० ॥ तथाहि न चाविद्यासहकृतजीवकारणत्वे जगद्वैचित्र्यानुपपत्तिः जगदुपादानभूतस्याज्ञानस्य विचित्रशक्तिमत्त्वादित्याद्यद्वैतसिद्ध्याद्युक्तप्रकारेण ॥ श्लो० ॥ न संभवेत् संभवेद्वा सृष्टिरेषाऽद्वितीयतः । नानाजातीयकार्याणां क्रमा-ज्जन्म न संभवि ॥ अद्वैतं तत्वतो ब्रह्म तच्चाविद्यासहायवत् । नानाकार्यकरं कार्य-क्रमोऽविद्यास्थशक्तिभिरित्युपसंहाराधिकरणेन जीवस्य जगदुपादानत्वादिकं व्यव-स्थाप्य अनन्तरं कृत्स्नप्रसक्त्यधिकरणेन तस्यैवाध्यात्मिकस्य प्राज्ञस्य पारिणामिक-बहुभवनव्यावृत्तिपूर्वकमविद्यातादात्म्याध्यासवशात् तदीयबहुभवनधर्माध्यासवत्व-ञ्चादिश्य पश्चात् सर्वोपेताधिकरणेन तस्यैव प्राज्ञस्य सुषुप्तिकालेऽशरीरत्वेऽप्यविद्या-सद्भावं संप्रदर्श्यानन्तरं प्रागुपपादितप्रकारेण प्रयोजनवत्वाधिकरणवैषम्याधिकरणा-भ्यां मीमांसकं प्रति तत्कृतचोद्यपरिहाराय केवलनिमित्तकारणत्वमाधिदैविकस्ये-श्वरस्यादिश्य अनन्तरं सर्वधर्मोपपत्त्यधिकरणेन प्रागुक्तसर्वोपेताधिकरणविपन्नस्या-शरीरस्य सौषुप्तस्य प्राज्ञस्य 'साक्षी चेता केवलो निर्गुणश्चे'ति श्रुत्युक्तप्रकारेण निर्गुणस्य विवर्तोपादानत्वं व्यवस्थापितं—एवमेव कर्तृत्वोपादानत्वविषये सर्वशङ्का-पङ्कप्रक्षाळनाय महामायमित्युक्तमिति रामानन्दीयेन भाष्यावतरणेन तथा वाचस्प-त्येनापि निश्चीयते ततो राज्ञ इवाधिदैविकस्य परमेश्वरस्य स्वातिरिक्तप्राणिभ्यः स्वभिन्नफलदातृत्वरूपं पाशुपताद्यभिमतं निमित्तकारणत्वमेव वैषम्याधिकरणेन दर्शितमिति सिद्धम् ।

३. उ० ॥ एवमेव भाष्यकारैरप्यारम्भणाधिकरणभाष्येण—प्रतिज्ञाश्रुत्या-रम्भणश्रुतीक्षणश्रुतिप्रवेशश्रुत्यनुसारेण 'जगदीशयोः जीवेशयोर्विज्ञानमयप्राज्ञात्मक-योश्च अभेदमुपदिश्य अनन्तरं जीवेशयोर्जगदीशयोर्वास्तवभेदवादिभिः ईश्वरे आ-पादितहिताकरणादिदोषनिरासाय 'अधिकं तु भेदनिर्देशा'दिति सूत्रभाष्यावसरे 'कमभेदज्ञानादूर्ध्वं दोषा आपद्यन्ते पूर्वं वेति विकल्पद्वयमाशङ्क्य तत्राद्यं तु अनेन—अपि च यदा तत्वमसीत्येवं जातीयकेन अभेदनिर्देशेनाभेदः प्रतिबोधितो भवत्यप-गतं भवति तदा जीवस्य संसारित्वं ब्रह्मणश्च स्रष्टृत्वं समस्तस्य मिथ्याऽज्ञानविजृ-म्भितस्य भेदव्यवहारस्य सम्यग्ज्ञानेन बाधितत्वात् तत्र कुत एव सृष्टिः कुतो वा हिताकरणादयो दोषा इति भाष्येण निराकृत्य-द्वितीयं तावद्विकल्पमनेन च अविद्या-

प्रत्युपस्थापितनामरूपकृतकार्यकारणसङ्घातोपाध्यविवेककृता हि - भ्रान्तिः हिताकरणादिलक्षणः संसारो न तु परमार्थतोऽस्तीत्यसकृदवोचाम - जननमरणच्छेदनभेदनाद्यभिमानवदेवेति भाष्येण च ॥ श्लो० ॥ कल्पयत्यात्मनात्मानमात्मा देवस्स्वमायया । स एव बुध्यते भेदानिति वेदान्तनिश्चय इत्यादिशास्त्रेण च जीवस्यैव स्वाविद्यया स्वस्मिन्जगदारोपकत्वं हिताकरणादिदोषागमोऽपि दर्शितः ।

४. उ० ॥ अन्यथाऽहं ब्रह्मास्मीति जीवज्ञानेन आधिदैविकस्यापि स्रष्टृत्वं यद्यपगच्छेत् तदा जीवान्तराणामपि संसार उच्छिद्येत ।

५. उ० ॥ किञ्चात्र पञ्चमप्रश्नतदीयप्रथमोत्तराभ्यामुक्तप्रकार एव विद्यारण्याचार्यैरपि श्रोतृबुद्ध्यनुसारेण कस्यचिच्छास्त्रस्य जीवेशयोर्जगदीशयोश्चाभेदपरत्वं - कस्यचिच्छास्त्रस्य तयोश्चोदकदृष्ट्यनुसारेण भेदपरत्वं च दर्शितम्- तथाहि - ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया इति भगवद्वचनस्य अन्तर्यामिब्राह्मणमूलकस्य तात्पर्यं - व्यवहारदशायां बहुभवनप्रवेशश्रुत्यनुसारेण च - अदृष्टो द्रष्टेत्यारभ्य - नान्योऽतोऽस्ति द्रष्टेत्यादयन्तर्यामिब्राह्मणशेषानुगुण्येन च ॥ श्लो ॥ विज्ञानमयरूपेण तत्प्रवृत्तिस्वरूपतः । स्वशक्त्येशो विक्रियते मायया भ्रामणं हि तदिति पञ्चदशप्रकरणे यैरेव दर्शितं तैरेव विद्यारण्याचार्यैः ॥ श्लो० ॥ प्रवर्तकोऽस्य रागादिरीशो वा रागतः कृषौ । दृष्टा प्रवृत्तिवैषम्यमीशस्य प्रेरणे भवेत् ॥ सस्येषु वृष्टिवज्जीवेष्वीशस्याविषमत्वतः । रागोऽन्तर्याम्यधीनोऽत ईश्वरोऽस्य प्रवर्तकः ॥ इति कर्मसापेक्षस्सन्नाधिदैविकः स्वभिन्नान् जीवान् प्रवर्तयतीति केवलनिमित्तकारणत्वमतानुगुण्येनैव परायत्ताधिकरणं व्याख्यातम् ।

६. उ० ॥ अन्यथा - 'यो विज्ञाने तिष्ठन् य आत्मनि तिष्ठन् - यस्सर्वेषु भूतेषु तिष्ठन्नित्यन्तर्यामि ब्राह्मणमूलकयोर्भगवद्गीता–परायत्ताधिकरणयोर्मध्ये भगवद्गीतायाः ॥ श्लो० ॥ एवमानन्दविज्ञानमयावीश्वरजीवकौ । सौषुप्तमानन्दमयं प्रकम्यैवं श्रुतिर्जगौ ॥ एष सर्वेश्वर इति सोऽयं वेदोक्त ईश्वर इति माण्डूक्यश्रुतिमूलकखवाक्यानुसारेण च प्रवेशश्रुत्यनुसारेण च स्रष्टुरेव साक्षाज्जीवभावेन व्यवहारावस्थायामप्येकस्यैव प्राज्ञस्येशजीवभावयोः पौर्वोत्तरकालिकत्वादेकदा नियन्तृनियम्ययोर्भेदाभावे च सर्वोपादानत्वेनाद्वितीयत्वे च तात्पर्यमुपदिश्य–तद्भिन्नप्रक्रियया यत् परायत्ताधिकरणस्य तात्पर्यं दर्शितं तन्निरर्थकं स्यात् ।

अतः परमेश्वरस्याधिदैविकस्य कर्मसापेक्षत्वपरशास्त्रस्य आध्यात्मिकानामात्मेशैतदात्म्यानामभेदबोधकशास्त्रैर्बाधितत्वात् केवलनिमित्तकारणत्वमतानुवादित्वाच्च न स्वार्थे प्रामाण्यमस्तीति भावः ॥ ९९ ॥ ॥

अ० ॥ ननु, केषाञ्चिदेवाधिकरणानां मुख्यसिद्धान्तपरत्वेन प्रामाण्यं - केषांचित् परमतानुवादकत्वेनाप्रामाण्यं च कथमुच्यत इति प्राप्ते एवं सूत्रकारैरेव उभयलिङ्गाधिकरणे दर्शितत्वात्तथा तदास्थेयमित्याह **निष्कलमिति**—

मू ॥ निष्कलं निष्क्रियं शान्तमस्थूलमिति च श्रुतेः ॥ १०० ॥

धर्मं कारयतीशानो यमितश्चोन्निनीषते ।
सर्वकर्मा सर्वकाम इत्यादेश्च विरोधतः ॥ १०१ ॥
कस्याः प्रामाण्यमादेयं कस्या एवानुवादता ।
स्वीकार्येति च संप्राप्ते साधनाध्यायके पुनः ॥ १०२ ॥
न स्थानतोऽपि सर्वत्रोभयलिङ्गं परात्मतः ।
इत्यादिसूत्रतः प्रोक्तं सविशेषश्रुतेः किल ॥ १०३ ॥
अनुवादत्वमेष्टव्यमित्यन्यैश्च तथेरितम् ।
ब्रह्म किं रूपि वाऽरूपि भवेन्नीरूपमेव वा ॥ १०४ ॥
द्विविधश्रुतिसद्भावाद्ब्रह्म स्यादुभयात्मकम् ।
नीरूपमेव वेदान्तैः प्रतिपाद्यमपूर्वतः ॥ १०५ ॥
रूपि त्वनूद्यते भ्रान्तमुभयत्वं विरुध्यते ।
इत्यतः फलदातृत्वपराणामनुवादता ॥ १०६ ॥

व्या ॥ साधनाध्यायक इति तृतीयाध्याय इत्यर्थः ॥ तत्र द्वितीयपादे 'न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र ही'ति सूत्रं सङ्गृह्णाति **न स्थानतोऽपीति** अन्यैरिति विद्यारण्याचार्यैरपीत्यर्थः ॥ तदीयमधिकरणरत्नमालामुभयलिङ्गाधिकरणार्थावगत्यर्थमाह ब्रह्म किमित्यादि श्लोकद्वयेन । फलितमाह **इत्यादिना** अत इति एतदुभयलिङ्गाधिकरणगतेन अपि चैवमेक इति सूत्रेण मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन । मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यतीत्यादि भेददर्शननिन्दाश्रुत्यर्थस्य दर्शितत्वात् भेदभ्रमोपजीविनां ईश्वरस्य कर्मफलदातृत्वपराणां अधिकरणानामनुवादकत्वेनाप्रामाण्यं सिद्धमित्यर्थः ॥ १०६ ॥

अ० ॥ तर्हि किमर्थं तान्यप्रमाणान्यधिकरणानि कृतानीत्यत आह **न बुद्धि-भेदमिति**—

मू ॥ न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ।
जोषयेत् सर्वकर्माणि विद्वान्युक्तस्समाचरन् ॥ १०७ ॥
इति श्रीभगवद्वाक्यादज्ञानुसरणाय तत् ॥ १०७॥ ॥

व्या ॥ अविदुषां तत्त्वज्ञानमेवोपदेष्टव्यमित्यत आह—भगवान् ॥ श्लो० ॥ **न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनामिति** नित्यानित्यवस्तुविवेकरहितानां 'अक्षय्यं ह वै चातुर्मास्ययाजिनस्सुकृतं भवतीति' श्रुतिमवलम्ब्य न कदाचिदनीदृशं जगदित्यभ्युपगच्छतां मीमांसकानां फलसाधनत्वभ्रान्त्या कर्मणि श्रद्धातिशयवतां मयेदं कर्म कर्तव्यमस्य फलञ्च भोक्तव्यमिति-निश्चयरूपायाः बुद्धेः 'सर्वं विकारजातं मायामात्रं । मायामात्रमिदं द्वैतमद्वैतं परमार्थत' इत्यादिश्रुत्या स्वप्नादिदृष्टान्तेन च स्वर्गादेर्मायामात्रजन्यत्वस्वात्मविवर्तत्वयोरुपदेशाच्चालनं बुद्धिभेदस्तं नोत्पादयेत् तर्हि किं कुर्यादत आह—**विद्वान्** जगतः स्वात्मविवर्त्तत्वं विजानन्नपि अज्ञान् कर्मसङ्गिनः जोषयेत् सेवयेत् कारयेदित्यर्थः ॥ कानीत्यत आह—**सर्वकर्माणीति** कथं कारयेदत आह—**युक्तस्समाचरन्निति** अज्ञैः प्रेर्यैरुपेतस्सन् तत्समक्षं स्वयं चाचरन्निति श्रीभगवदाज्ञानुसारेण अज्ञजनानुसरणाय तदधिकरणजातं कृतमिति शेषः ॥ १०७॥ ॥

अ० ॥ इदानीं जीवेनैव स्वस्मिन् जगतः स्वाज्ञानकल्पितत्वे गौडपादाचार्यसम्मतिं प्रतिजानीते **श्रीमत इति**—

मू ॥ श्रीमतो गौडपादस्य सम्मतिश्चात्र विद्यते ॥ १०८ ॥

व्या ॥ स्पष्टोऽर्थः ॥ १०८ ॥

अ० ॥ तदीयवैतथ्यप्रकरणोक्तं शिष्यप्रश्नं दर्शयति **उभयोरिति**—

मू ॥ उभयोरपि वैतथ्यं भेदानां स्थानयोर्यदि ।
क एतान् बुध्यते भेदान् को वै तेषां विकल्पकः ॥ १०९ ॥

व्या ॥ **उभयोरपि स्थानयोरिति** जाग्रत्स्वप्नयोः भिद्यन्त इति भेदाः दृश्यपदार्थाः तेषामनात्मनां वैतथ्यं मिथ्यात्वमेवेष्टव्यं चेत् कस्ताञ्जानाति तेषां विकल्पकः अध्यासकर्ता च क इति प्रश्नार्थः ॥ १०९ ॥

अ० ॥ तदुत्तरवाक्यमुदाहरति **कल्पयतीति**—

मू ॥ कल्पयत्यात्मनाऽऽत्मानमात्मा देवस्स्वमायया ।
स एव बुध्यते भेदानिति वेदान्तनिश्चयः ॥ ११० ॥

व्या ॥ स्वयं प्रकाशमानो जीव एव कूटस्थं स्वात्मानं स्वाज्ञानजन्यविभ्रान्त्या अनेकधा परिकल्प्य जानातीत्युत्तरमुक्त्वा तस्य स्वकपोलकल्पितत्वभ्रमं–'स एव मायापरिमोहितात्मा शरीरमास्थाय करोति सर्वं । पुरत्रये क्रीडति यस्तु जीवस्ततस्तु जातं सकलं विचित्रमित्यादि' श्रुतिमवलम्ब्य वारयति **इति वेदान्तनिश्चय इति** सर्वोपनिषद्विचारजन्याध्यवसाय इति जानीयादित्यर्थः ॥ ११० ॥

अ० ॥ उक्तार्थसमर्थनपरं तदीयं दृष्टान्तवाक्यादिकमुदाहरति **अनिश्चितेति**—

मू ॥ अनिश्चिता यथा रज्जुरन्धकारे विकल्पिता ।
सर्पधारादिभिर्भावैस्तद्वदात्मा विकल्पितः ॥
प्राणादिभिरनन्तैश्च भावैरेतैर्विकल्पितः ॥ १११॥ ॥

व्या ॥ भावैरेतैरिति वियदादिपदार्थैरित्यर्थः ॥ शेषस्सुगमः ॥ १११॥ ॥

अ० ॥ श्लो० ॥ कल्पयत्यात्मनात्मानमात्मा देवस्स्वमाययेति प्रागुदाहृतवाक्येन आध्यात्मिकाधिदैविकयोर्जीवेशयोर्मध्ये कोऽसौ देवात्मशब्दाभ्यामभिप्रेतः सा माया च कस्येति प्राप्ते आधिदैविकस्य मोहासंभवाज्जीव एवेत्यादिप्रदर्शनपरं गौडपादीयमेव वाक्यमुदाहरति **मायेति**—

मू ॥ मायैषा तस्य देवस्य यया सम्मोहितस्स्वयम् ॥ ११२ ॥

व्या ॥ जीवेशयोर्मध्ये यः स्वयं सम्मोहितः तस्यैव जीवस्य स्वयं प्रकाशमानस्य सैषा मायेत्यर्थः ॥ ११२ ॥

अ० ॥ एवं वैतथ्यप्रकरणेन जगतो जीवाविद्याकार्यत्वेन प्रातिभासिकत्वमादिश्य तस्यालातशान्तिप्रकरणेनाऽपि अकर्मजन्यत्वमुपदिशति श्रीगौडपादाचार्य इति प्रतिजानीते **इत्यादिभिरिति**—

मू ॥ इत्यादिभिरशेषस्य प्रातिभासिकतापरैः ।
वैतथ्याख्यप्रकरणे मायिकत्वं प्रबोध्य च ॥ ११३ ॥

ब्रह्मरामादयो यद्वद्वाचस्पत्यादयो यथा ।
तथैवालातशान्त्याख्ये कर्मजत्वं निषेधति ॥ ११४ ॥

व्या ॥ स्पष्टोऽर्थः ॥ ११४ ॥

अ० ॥ इदानीं रज्जुज्ञानसमये तत्र परिकल्पितसर्पादेरिव सर्वकल्पनाधिष्ठानभूतस्वात्मज्ञानसमय एव सर्वस्य जगतो निवृत्तिपरां 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्' । तत्र को मोहः कश्शोक एकत्वमनुपश्यतः । इत्यादिश्रुतिमवलम्ब्य कर्मणः फलकारणत्वनिषेधपरं गौडपादीयमेव वचनमुदाहरति **हेतोरिति**—

मू ॥ हेतोरादिः फलं येषामादिर्हेतुः फलस्य च ।
हेतोः फलस्य चानादिः कथं तैरुपवर्ण्यते ॥ ११५ ॥

व्या ॥ **हेतोरादिः फलं येषामिति** येषां वादिनां मीमांसकानां **हेतोः** धर्मादेः **फलं** शरीरादिकं **आदिः** कारणं भवति । तथा **फलस्य** शरीरादेः **हेतुः** कर्मैव **आदिः** कारणं भवति । एवं कर्मफलयोरितरेतरकार्यत्वेन जनिमत्वं ब्रुवद्भिरेव **हेतोः फलस्य च** धर्मादेश्शरीरादेश्च **अनादिः** उत्पत्त्यभावः विप्रतिषिद्धः कथं तैरुपवर्ण्यत इत्यर्थः । एवमेव तत्र भाष्यकारैरपि दर्शितम् ॥ ११५ ॥

अ० ॥ ननु, तत्र विरोधपरिहाराय किं कर्तव्यमिति प्राप्ते तत्प्रतिवचनभूतं गौडपादीयं वाक्यमुदाहरति **संभव इति**—

मू ॥ संभवे हेतुफलयोरेषितव्यः क्रमस्त्वया ॥११६॥ ॥

व्या ॥ **हेतुफलयोरिति** कर्मशरीरयोः संभवे उत्पत्तौ क्रमो वक्तव्य इत्यर्थः ॥ ११६॥ ॥

अ० ॥ जनिमतोः कर्मशरीरयोः परंपरया कार्यकारणभावो बीजाङ्कुरवद्वक्तव्यः इति प्राप्ते तत्र गौडपादीयवाक्यमुदाहरति **बीजाङ्कुरेति**—

मू ॥ बीजाङ्कुराख्यो दृष्टान्तस्सदा साध्यसमो हि सः ।
न हि साध्यसमो हेतुस्सिद्धौ साध्यस्य युज्यते ॥ ११७॥॥

व्या ॥ **हि** यतः श्लो ॥ कल्पयत्यात्मनात्मानमात्मा देवस्स्वमायया । स एव बुध्यते भेदानिति वेदान्तनिश्चयः इति बीजाङ्कुरादीनां सर्वेषां आत्ममायामात्रादुत्पत्तिमभ्युपगच्छतो मम भवदुक्तः **सः बीजाङ्कुराख्यो दृष्टान्तः सदा साध्यसमः** त्वया साधनीयेन कर्मफलव्यक्तीनामिदं प्रथममित्यज्ञायमानत्वरूपेण

प्रवाहानादित्वेन सह साधनीयसाध्यसमानः स दृष्टान्तो भवेदतः त्वत्प्रतिपक्षभूतं मां प्रति **साध्यसमो हेतुः** साध्यसमानोऽयं दृष्टान्तस्तावत् साध्यस्य सिद्धौ न युज्यते हीत्यन्वयः ॥ ११६॥ ॥

अ० ॥ इदानीमिदं प्रथममिदमनन्तरमित्यजानतो दोषप्रदर्शनपरं गौडपादीयवचनमुदाहरति **पूर्वापरेति**—

मू ॥ पूर्वापरापरिज्ञानमजातेः परिदीपकं ॥ ११७ ॥
जायमानाद्धि वै धर्मात्कथं पूर्वं न गृह्यते ।

व्या ॥ यदेतत्कर्मतत्फलयोः पूर्वापरापरिज्ञानं तत्कर्मशरीरयोरनुत्पत्तिबोधकमित्युक्त्वा तदेव विशदयति **जायमानाद्धि वै धर्मादिति** गृह्यमाणाज्जनिमत्पदार्थादेव **कथं पूर्वं न गृह्यते** कथं तत्कारणवस्तु न गृह्यत इति वक्तुं शक्यते अवश्यं हि जायमानस्य ग्रहीत्रा तज्जनकमपि ग्रहीतव्यं जन्यजनकयोः संबन्धस्यानपेतत्वात् तस्मादजातिपरिदीपकं तत्पूर्वापरापरिज्ञानमित्यर्थः ॥ ११७॥ ॥

अ० ॥ ननु प्रागुदाहृतवैतथ्यप्रकरणालातशान्तिप्रकरणवाक्योक्तप्रकारेण सर्वस्य स्वात्मविवर्तत्वसंभवे कथं सूत्रकारैः वैषम्याद्यधिकरणेन आधिदैविकात् परमेश्वरात् कर्माधीनैर्विचित्रफलोत्पत्तिः श्रावितेति प्राप्ते तत्समाधानपरं गौडपादीयमुदाहरति **उपलम्भादिति**—

मू ॥ उपलम्भात्समाचारादस्ति वस्तुत्ववादिनाम् ॥ ११८ ॥
जातिस्तु देशितावुद्धैरजातेस्त्रसतां सदा ११८॥ ॥

व्या ॥ **उपलम्भादिति** द्वैतोपलम्भात् तथा **समाचारात्** वर्णाश्रमधर्मानुष्ठानाच्च हेतुद्वयाभ्यां **अस्ति वस्तुत्ववादिनां** वस्तुनः सत्यत्ववादिनामित्यर्थः ॥ तानेव विशिनष्टि **अजातेस्त्रसतां सदेति** सदा सर्वे विकारजातं मायामात्रमित्यादिश्रुतिभ्यः रज्जुसर्पादिदृष्टान्तैश्च स्वात्मनि जगतः कर्मनिरपेक्षतया स्वरूपाध्यासश्रवणानन्तरमपि तत्र निश्चयज्ञानाभावेन पूर्ववद्विहितप्रतिषिद्धयोः क्रमादनुष्ठानपरित्यागाभावे स ह्यनादिः परमेश्वरोऽस्माञ्छिक्षयत्येवेति जीवेशभेदवासनादार्ढ्यात् **अजातेः** ईश्वरात् **त्रसतां** भीतानां मन्दाधिकारिणां कर्मसु श्रद्धानानां अनिवार्यकर्मकारणत्ववासनानां अत एव जगत्सत्यत्वाधियां तस्मादनादेरीश्वरात् विचित्राणां कर्मफलानां **जातिस्तु** उत्पत्तिस्तु वैषम्याद्यधिकरणैः **देशितावुद्धैः** श्रोतॄणां चित्तकालुष्याभिज्ञैः सूत्रकारैरुपदिष्टेत्यर्थः उक्तप्रकारमेवात्र भा-

ध्यकारैरपि दर्शितं एतत्तु प्राक् विस्तरेणास्मिन्निरूपणे षष्ठादिश्लोकचतुष्टयेनोपपादितम् । तदप्यवश्यमत्र विशेषार्थग्रहणाय वीक्षणीयम् ॥ ११८॥ ॥

अ० ॥ प्रागष्टाशीतितमादिश्लोकैः उदाहृतप्रकारेण सर्वविधिश्रुतीनां परिसङ्ख्यात्वमनभ्युपगम्य नियमविधित्वादिप्रक्रियया तत्तत्प्राणिकृतधर्माधर्मफलत्वेन परमेश्वरसृष्टमेवेदं जगदित्यभ्युपगच्छतां द्वैतिनां प्रतिकर्मव्यवस्थावादिनां च बाधप्रदर्शनपरां गौडपादीयमेव कारिकामुदाहरति **यावदिति**—

मू ॥ यावद्धेतुफलावेशस्तावद्धेतुफलोद्भवः ।
क्षीणे हेतुफलावेशे नास्ति हेतुफलोद्भवः ॥ ११९॥ ॥

व्या ॥ आत्मैवेदं सर्वं अहमेवेदं सर्वं सर्वं विकारजातं मायामात्रमित्यादिश्रुतिविरोधेन यावत् कर्मशरीरयोः कार्यकारणभावः अनपोह्य इति हुरभिनिवेशः तावत्तदभिनिवेशवतां कर्माधीनं जन्म च कर्मजेन सत्येन जगता स्वस्य सद्वितीयत्वञ्च स्यात् तदनभिनिवेशे तु जगतः आविद्यकत्वज्ञानेन चिद्विवर्त्तत्वविज्ञानेन वा नाशे सति न पुनर्जन्मेत्यर्थः ॥ ११९॥ ॥

अ० ॥ इदानीं श्रीगौडपादाचार्यसंमतिमुपसंहरति **एवमिति**—

मू ॥ एवं ह्यलातशान्त्याख्ये कर्मजत्वं निराकृतम् ॥ १२० ॥

व्या ॥ स्पष्टोऽर्थः ॥ १२० ॥

अ० ॥ इदानीमुपपादितार्थे श्रीशङ्करभगवत्पादसंमतिं प्रतिजानीते **उक्तेति**

मू ॥ उक्तमानानुसारेण ह्याचार्यश्शङ्करात्मकः ।
अपरोक्षानुभूत्याख्येऽप्युवाचेदमकर्मजम् ॥ १२१ ॥

व्या ॥ **उक्तमानानुसारेणेति** अस्मिन्निरूपणे त्रयोदशश्लोकादारभ्य उदाहृतश्रुत्यादिप्रमाणानुगुण्येनेत्यर्थः ॥ १२१ ॥

अ० ॥ तत्रत्यानि प्रतिकर्मव्यवस्थानिरासकत्वेन दृष्टिसृष्टिविधायकानि वाक्यान्युदाहरति **उत्पन्नेति**—

मू ॥ उत्पन्नेऽप्यात्मविज्ञाने प्रारब्धं नैव मुञ्चति ।
इति यच्छास्त्रनिर्णीतं तन्निराक्रियतेऽधुना ॥ १२२ ॥
तत्त्वज्ञानोदयादूर्ध्वं प्रारब्धं नैव विद्यते ।
देहादीनामसत्त्वात्तु यथा स्वप्ननिबोधतः ॥ १२३ ॥

व्या ॥ प्रथमश्लोकः स्पष्टोऽर्थः ॥ तत्वज्ञानानन्तरं प्रारब्धाख्यकर्मासत्वं प्रतिज्ञाय तत्रोपपत्तिमाह **देहादीनामसत्वात्त्विति** ज्ञानेनाज्ञाननिवृत्त्यनन्तरमपि तत्कार्यं शरीरादिकं यद्यनुवर्तेत तदा तत्स्थितिप्रयोजकत्वेन कर्मणः कारणत्वमुपेत्य तस्य प्रारब्धकर्मणः सत्वमुपेयं स्यात् न तु तथास्ति ज्ञानेन शरीराद्युपादानभूताज्ञाननाशादेव तत्कार्यमपि शरीरादिकं निवृत्तं भवेत् तत एव तत्कारणत्वेन न प्रारब्धमभ्युपेयमित्युक्त्वा तत्र दृष्टान्तमाह **यथा स्वप्ननिबोधत इति** ॥ १२३ ॥

अ० ॥ एवं तत्वज्ञानादूर्ध्वं प्रारब्धासत्वमुक्त्वाऽधुना यत् कर्म प्रारब्धमित्युच्यते - तन्निर्वर्तनक्षमस्य शरीरस्याभावात् कालत्रयेऽपि तस्य व्यवहारिकस्वरूपासिद्धिपरं तत्रत्यमेव वाक्यमुदाहरति **कर्मेति**—

मू ॥ कर्म जन्मान्तरीयं यत् प्रारब्धमिति कीर्तितम् ।
तत्तु जन्मान्तराभावात् पुंसो नैवास्ति कर्हिचित् ॥ १२४ ॥

व्या ॥ **कर्मजन्मान्तरीयमिति** जाग्रत्कालिकात् वार्तमानिकात् मनुष्यादिजन्मनो यदन्यत् प्राक्तनजाग्रत्कालिकं देवादिशरीरं तत् जन्मान्तरं तत्साध्यं कर्म जन्मान्तरीयं यत् प्रारब्धमिति कीर्तितं तत्तु पुंसो नैवास्ति कर्हिचिदित्यन्वयः कर्हिचित्कदाचिदपीत्यर्थः ॥ तत्रोपपत्तिमाह—**जन्मान्तराभावादिति** वर्तमानाज्जन्मनो यदन्यत् प्राक्तनजाग्रत्कालिकं देवमनुष्यादिशरीरं तज्जन्मान्तरं तस्य प्रारब्धकर्मनिर्वर्तनक्षमस्याभावात् कुतः प्रारब्धकर्मणः स्वरूपसिद्धिरित्यर्थः ॥१२४॥

अ० ॥ इदानीं प्रतिज्ञातार्थसिद्धये जाग्रत्कालिकशरीरसामान्यस्य फलारम्भककर्मनिर्वर्तनाक्षमत्वानुमापकं तत्रत्यं भगवत्पादीयवचनमुदाहरति **स्वप्नेति**-

मू ॥ स्वप्नदेहो यथाऽध्यस्तस्तथैवायं हि देहकः ॥ १२४॥ ॥

व्या ॥ अत्रेदमनुमानमुक्तं 'यत्र त्वस्य सर्वमात्मैवाभूत्तत् केन कं पश्ये' दित्यादिश्रुत्या ज्ञाननिवर्त्यत्वेनावेदितो यावत् जाग्रत्कालिको देहः क्रियाश्रयत्वविभ्रममन्तरेण न फलारम्भककर्मक्षमो भवितुमर्हति अध्यस्तत्वात् स्वप्नदेहवदिति । अथवा ज्ञानानाश्यत्वादिति हेतोः न कर्मक्षम इत्यर्थः ॥ १२४॥ ॥

अ० ॥ श्लो ॥ उत्पन्ने तत्वविज्ञाने प्रारब्धं नैव मुञ्चति इति यच्छास्त्रनिर्णीतं तन्निराक्रियतेऽधुनेति प्राक् प्रतिज्ञातार्थसिद्धिबोधकं तदीयं वचनमुदाहरति **अध्यस्तस्येति**—

मू ॥ अध्यस्तस्य कुतो जन्म जन्माभावे स्थितिः कुतः ॥ १२५ ॥

व्या॥ **अध्यस्तत्वेति** इह जन्मनि जन्मान्तरे वा जाग्रत्कालिकस्य देहसामान्यस्य अध्यस्तत्वेन कर्मनिर्वाहकत्वाभावे सिद्धे कुतः ब्रह्मविदः शरीरस्य कर्माधीनं जन्म भवेत् केवलाविद्यकत्वेन जन्माङ्गीकारात् एवं कर्माधीनजन्यभावे सति मूलाविद्यानिवर्तकाद्वितीयप्रत्यक्साक्षात्कारानन्तरमाविद्यकस्य देहस्य कुतः स्थितिः तद्वार्तापि नास्तीत्यर्थः ॥ १२५ ॥

अ० ॥ एतावता अपरोक्षानुभूतिवाक्येन गुणापूर्वस्यैव स्वरूपनिष्पत्त्यभावेन निमित्तकारणत्वं निराकृतं न द्रव्यापूर्वस्योपादानत्वमिति शिष्याशङ्कामालक्ष्य द्रव्यापूर्वस्यापि प्रागुक्तन्यायेन स्वरूपासंभवात् तस्योपादानत्वनिषेधपरं तत्रत्यमेव श्लोकमुदाहरति **उपादानमिति**—

मू॥ उपादानं प्रपञ्चस्य मृद्भाण्डस्येव पठ्यते ।
अज्ञानं चैव वेदान्तैस्तस्मिन्नष्टे क्व विश्वता॥ १२६॥

व्या॥ **उपादानमिति** घटस्य मृदिव जगत उपादानत्वेन मूलाज्ञानं चकारात् तदुपाधिस्त्वात्मा च-'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वर'मित्यादिश्रुतिभिः पठ्यत इत्युक्त्वा एवकारेण द्रव्यापूर्वस्यैव जगदुपादानत्वं वार्यते तस्यैव चतुर्थनिरूपणोक्तप्रकारेण जगत्सत्यत्वसम्पादकस्य निरसनीयत्वात्। एवकारेण व्यावर्त्य स्वयमेव दर्शयति भगवत्पादः **तस्मिन्नष्टे क्व विश्वतेति** परिणाम्युपादानविवर्तोपादानभूतयोरज्ञानस्वात्मनोर्मध्ये तस्मिन्नज्ञाने नष्टे सति कस्मिन्नन्यस्मिन् परिणाम्युपादाने तदभिन्नोपादेयप्रपञ्चताऽनुवर्तेतेति जगतोऽज्ञानेतरद्रव्यापूर्वप्रकृतिकतैव प्रतिषिध्यते - प्रारब्धावस्थितिः कुत इति तदीयादेव वक्ष्यमाणवाक्यात् द्रव्यापूर्वस्य निषेधावगमात्॥ १२६ ॥

अ० ॥ एवं द्रव्यापूर्वस्य कालत्रयेऽपि स्वरूपाभावेन तत्र जगदनुवृत्तिं प्रतिषिध्य सम्प्रति विद्यादशायां जगदधिकरणभूते प्रत्यगात्मन्यपि जगदनुवृत्तिनिषेधपरं तदीयं वाक्यमुदाहरति **यथेति**—

मू॥ यथा रज्जुं परित्यज्य सर्पं गृह्णाति विभ्रमात् ।
तद्वत्सत्यमविज्ञाय जगत्पश्यति मूढधीः ॥ १२७ ॥

रज्जुरूपे परिज्ञाते सर्पभानं न तिष्ठति ।
अधिष्ठाने तथा ज्ञाते प्रपञ्चश्शून्यतां व्रजेत् ॥ १२८ ॥

व्या ॥ **रज्जुं परित्यज्येति** इयं रज्जुरित्यज्ञात्वेत्यर्थः सर्पभानं न तिष्ठतीत्यनेन दृष्टिरेव सृष्टिरिति पक्षो दर्शितः शेषस्सुगमः ॥ १२८ ॥

अ० ॥ यत् पुनरुक्तं प्राक् उपादानं प्रपञ्चस्येत्यादिना विदध्यस्तस्याविद्यकस्य देहादेर्द्रव्यापूर्वप्रकृतिकत्वं नास्तीति तदुपसंहारपरं तदीयं वाक्यमुदाहरति **देहस्यापीति**—

मू ॥ देहस्यापि प्रपञ्चत्वात् प्रारब्धावस्थितिः कुतः ॥ १२८॥ ॥

व्या ॥ **देहस्यापीति** प्रागाविद्यको यः प्रपञ्चोऽकर्मजन्यत्वेनाधिष्ठानज्ञानमात्रेण शून्यतां गत इत्युपपादितः तदात्मकत्वात् तस्य देहस्य द्रव्यापूर्वप्रकृतिकत्वं तावत् ॥ श्लो ॥ उपादानं प्रपञ्चस्य मृद्भाण्डस्येव पठ्यते । अज्ञानं चैव वेदान्तैरिति प्रागुक्तश्लोकगतेन एवकारेण यस्मान्निराकृतमतः **प्रारब्धावस्थितिः कुतः** न प्रारब्धावस्थानमित्यर्थः ॥ अत्रोपपादिता जगतः कर्मनिमित्तकत्वतत्प्रकृतिकत्वयोरभावोपपत्तिः ॥ उपपत्त्यन्तरमपि प्राग्यत् मायिकत्वादपूर्वस्येति चतुर्थश्लोकादारभ्य सार्धेन श्लोकत्रयेणोपपादितं तदप्यत्र विशेषग्रहणार्थिभिरवलोकनीयम् ॥ १२८॥ ॥

अ० ॥ तर्हि किमर्थं रमणीयचरणा रमणीयां योनिमापद्यन्ते इत्यादि श्रुतिर्देवादिशरीरप्राप्तिं कर्मायत्तां दर्शयतीत्याशङ्क्य तत्तात्पर्यपरं भगवत्पादवाक्यं तत्रत्यमेवोदाहरति **अज्ञानजनेति**—

मू ॥ अज्ञानजनबोधाय प्रारब्धं वक्ति वै श्रुतिः ॥ १२९ ॥

व्या ॥ अविद्वज्जनानां स्वनिश्चितार्थे विद्यमानदुरभिनिवेशस्य अनिवार्यत्वात् तेषां मीमांसकानां प्रागुदाहृतपरायत्ताधिकरणभाष्योक्तप्रकारेण आधिदैविकस्य परमेश्वरस्य केवलनिमित्तकारणत्वबोधनाय तद्देयशरीरकारणत्वेन प्रारब्धं कर्मवदति सा श्रुतिरित्यर्थः ॥ १२९ ॥

अ० ॥ इदानीं तच्छ्रुतितात्पर्योपपत्तिप्रदर्शनपरं भगवत्पादीयं वाक्यमुदाहरति **क्षीयन्त इति**—

मू ॥ क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ।
बहुत्वं तन्निषेधार्थं श्रुत्या गीतं च वै स्फुटम् ॥ १३० ॥

व्या ॥ तस्मिन्निति आविद्यकसर्वजगदधिकरणत्वेन श्रूयमाणे **परावरे** परो हिरण्यगर्भोऽवरो यस्मात् प्रत्यग्ब्रह्मणः तत्परावरं तस्मिन् **दृष्टे** स्वात्मरूपेणाहमस्मीति साक्षात्कृते सति **अस्य** तत्वविदः कर्माणि सञ्चितागामिप्रारब्धशब्दितानि पुण्यापुण्यानि क्षीयन्ते कालत्रयेऽप्यलब्धात्मकानीति ज्ञायन्ते—न ध्वंसप्रतियोगीनीति—तत्स्वरूपनिष्पादकत्वेनाभिमतयोः कर्तृत्वशरीरयोः ज्ञानैकनिवर्त्यत्वेन वास्तवत्वाभावात्—स्वप्ने चाध्यासिककर्तृत्वशरीरादिकरणवता क्रियमाणस्य कर्मणः स्वरूपलाभाभावाच्च। अयमेवार्थोऽनया श्रुत्याभिप्रेत इति क्षीयन्ते कर्माणीति पदद्वयार्थविवरणपरेणोत्तरार्धेन दर्शयति 'बहुत्वं तन्निषेधार्थं श्रुत्या गीतं च वै स्फुटमिति तन्निषेधार्थमिति निषेधशब्दं प्रयुञ्जानस्य भगवत्पादस्य तेषां कर्मणां स्वरूपलाभाभाव एवाभिप्रेतः अन्यथा तन्निवृत्त्यर्थमित्येव प्रयुञ्जीत-पूर्वार्धगतेन चकारेण-तदेतदच्छायमशरीरं-तुच्छमिदं रूपमस्येति द्वितीयानिरूपणे प्रदर्शितश्रुत्युक्तप्रकारेण विचार्यमाणे तमोरूपाज्ञानस्याप्यसत्वमभिप्रेतम् उत्तरार्धगतेन चकारेण त्रिविधान्यपि कर्माणि तत्त्वज्ञानात् प्रागप्यलब्धात्मकानि भवितुमर्हन्ति आध्यासिककर्तृकत्वात् स्वाप्नकालिककर्मवदित्यनुमानं सङ्गृह्यते वैशब्देन विद्वदनुभवो दर्शितः स्फुटमिति पदेनोदीरितार्थे तूक्तप्रकारेण श्रुतियुक्त्यनुभवानां सत्वात् संशयाभावो दर्शितः ॥ १३० ॥

अ० ॥ इदानीं चतुर्थनिरूपणोक्तप्रकारेण सोमाज्यपयःप्रभृतीनां परिणामस्य द्रव्यापूर्वस्य जगदुपादानत्ववादिनां मीमांसकमतानुसारेण तत्वज्ञानानन्तरमपि प्रारब्धानुवृत्तौ दोषद्वयप्रतिज्ञापरं तत्रत्यं वाक्यमुदाहरति **उच्यत इति—**

मू ॥ उच्यतेऽज्ञैर्बलाच्चैतत्तदानर्थद्वयागमः ॥ १३० ॥

व्या ॥ अज्ञैरिति कालत्रयेऽपि प्रागुक्तप्रकारेण कर्मणां स्वरूपलाभाभावानभिज्ञैः **बलाच्च** हठात्काराच्चकारेण प्रागुक्तश्रुत्यनुमानादिभिर्बाधितप्रमाणाच्च **एतत्** द्रव्यापूर्वमेवास्य जगत उपादानकारणमिति उच्यते तत्र को दोष इत्यत आह—**तदानर्थद्वयागम इति** तस्मिन्पक्षे प्रमाणद्वयस्य निरर्थकत्वमापतेदित्यर्थः ॥

अ० ॥ तद्दोषद्वयापत्तिप्रदर्शनपरं तत्रत्यं वाक्यमुदाहरति **वेदान्तपदहानमिति—**

मू ॥ वेदान्तपदहानं च यतो ज्ञानमिति श्रुतिः ॥ १३१ ॥

व्या ॥ श्रुतिरिति एवमेवेहाचार्यवान् पुरुषो वेदेतीदृशी श्रुतिः **यतः** यस्मात् तत्वमस्यादिवाक्यात् सर्वजगदुपादानभूतब्रह्मणा साकमकर्तुरात्मन ऐक्य-

ज्ञानं भवतीत्याह. तस्य वेदान्तमहावाक्यस्य तदन्तर्गतपदद्वयस्य च हानं भवतीत्यर्थः॥ तथाहि - यदि द्रव्यापूर्वमेव जगदुपादानं स्यात् तदा तत्त्वमसीत्यादिवाक्यान्तर्गततत्पदेन प्रकृतं 'सदेव सोम्येदमग्र आसी' दिति श्रुत्युक्तं सच्छब्दवाच्यमचेतनं द्रव्यापूर्वमेव परामृष्टं स्यान्न चेतनं ब्रह्म तथैव त्वंशब्दार्थोऽपि तद्द्रव्यापूर्वहेतुभूतो वास्तवकर्तृत्वधर्मवानेव स्यान्नाकर्तृसाक्षिचैतन्यं तथा वाक्यार्थोऽपि कर्तुः स्वसाध्यद्रव्यापूर्वेण सह अभेद एव सामानाधिकरण्येनावगतस्स्यात् नाकर्तुस्साक्षिणो ब्रह्माभेदः विप्रतिषिद्धं हि चेतनस्याचेतनेनाभेदशास्त्रेणोपदिश्यत इति एवं दोषद्वयापत्तिं संप्रदर्श्य चकारेण जीवेशैक्यपरस्मृत्यनुमानयोर्बाधश्च दर्शितः ॥१३१॥

अ० ॥ इदानीमाचार्यकृतापरोक्षानुभूतिप्रकरणवाक्यमुपसंहरन् तत्कृतविवेकचूडामणिमवगतिसामान्यायावतारयति **इत्यस्येति**--

मू ॥ इत्यस्याकर्मजन्यत्वमुक्तं चूडामणावपि ।
शरीरादिप्रपञ्चस्याकर्मजत्वमुवाच सः ॥ १३२ ॥

व्या ॥ इत्यस्येति पूर्वोक्तप्रकारेणास्य प्रपञ्चस्येत्यर्थः ॥ शेषस्सुगमः ॥

अ० ॥ सम्प्रति जाग्रत्काले कर्तृत्वाद्व्यासदशायां क्रियमाणं कर्म लब्धात्मकं सदनन्तरं ब्रह्मापरोक्षज्ञानात् ध्वंसप्रतियोगित्वं भजत इति भ्रान्तिनिरासाय प्रवृत्तं विवेकचूडामणौ पञ्चाशदुत्तरचतुश्शततमश्लोकमुदाहरति **अहं ब्रह्मेति**—

मू ॥ अहं ब्रह्मेति विज्ञानात् कल्पकोटिशतार्जितम् ।
सञ्चितं विलयं याति प्रबोधात्स्वप्नकर्मवत् ॥ १३३ ॥

व्या ॥ स्वप्नकर्मवदिति स्वप्नकालेऽपि वस्तुतो जीवस्यासङ्गोदासीनस्वभावत्वात् तत्कालेऽनुष्ठीयमानत्वेन प्रतीयमानं कर्म तावत् क्रियमाणत्वभ्रान्तिव्यतिरेकेण स्वाप्निकगमनागमनवदलब्धात्मकं सत् **विलयं** प्रविलापनं कालत्रयेऽपि शून्यतां यातीति प्रबोधात् जाग्रत्कालिकज्ञानात् पुंसा यथा निश्चीयते एवं कल्पकोटिष्वार्जितत्वेन प्रतीयमानं सञ्चिताख्यं कर्मार्जितत्वविभ्रमव्यतिरेकेण अलब्धात्मकमेव सच्छून्यतां यातीति विचारवताऽहं ब्रह्मास्मीत्यसङ्गात्मविज्ञानान्निश्चीयत इत्यर्थः ॥ १३३ ॥

अ० ॥ **स्वप्नकर्मवदिति** दृष्टान्तेन विवक्षितार्थपरं तत्रत्यमेकपञ्चाशदुत्तरचतुश्शततमश्लोकमुदाहरति **यत्कृतमिति**—

मू ॥ यत्कृतं स्वप्नवेलायां पुण्यं वा पापमुल्बणम् ।
स्वप्नोत्थितस्य किं तत्स्यात् स्वर्गाय नरकाय वा ॥ १३४ ॥

व्या ॥ स्वप्नकाले कृतत्वेन प्रतीयमानं पुण्यादिकमलब्धात्मकत्वाद्देशान्तरप्राप्तये स्वाग्निकगमनक्रियेव स्वप्नादवस्थान्तरं गतस्य स्वर्गादिफलाय यथा न भवति तथा जाग्रत्कालिकं सञ्चिताख्यं कर्मापि न फलाय भवेत् - द्वयोरप्यध्यासिककर्तृकत्वाविशेषादित्यर्थः ॥ १३४ ॥

अ० ॥ इदानीमाध्यासिकशरीरं प्रति प्रारब्धकर्मणः कारणत्वपरप्रतिकर्मव्यवस्थावादजन्यज्ञानदूषणेन प्रारब्धाख्यमपि कर्म अलब्धात्मकमेव अतो न कर्माधीनं शरीरस्य जन्मादिकमिति दृष्टिसृष्टिबोधकं तत्रत्यं चतुष्षष्ट्युत्तरचतुश्शततमश्लोकमुदाहरति **शरीरस्यापीति**—

मू ॥ शरीरस्यापि प्रारब्धकल्पना भ्रान्तिरेव हि ।
अध्यस्तस्य कुतस्सत्वमसत्यस्य कुतो जनिः ॥
अजातस्य कुतो नाशः प्रारब्धमसतः कुतः ॥ १३५॥ ॥

व्या ॥ शरीरस्यापि प्रारब्धकल्पना भ्रान्तिरित्यपिशब्देन सञ्चितकर्मसद्भावकल्पनस्यापि भ्रमत्वमुक्तं एवकारेण तदुभयकर्मणोः कारणत्वकल्पनज्ञानस्य प्रमात्वं वार्यते हिशब्देनात्र जगन्मिथ्यात्वदर्शिनामनुभवो दर्शितः हिशब्दार्थं तु स्वयमेव विवृणोति **अध्यस्तस्य कुतस्सत्वमिति** कुत इत्याक्षेपे रज्जुसर्पवदारोपितस्य केवलाविद्यकस्य शरीरस्य **सत्वं** कर्मप्रयुक्तसत्यत्वं न कस्मादपि अबाधितप्रमाणात्सिध्यतीत्युक्त्वा एवमध्यस्तस्य कर्मप्रयुक्तसत्यत्वाभावात् कर्मजत्वमाक्षिपति **असत्यस्य कुतो जनिरिति** कुत इति पूर्ववत् एवमध्यस्तशरीरस्य सर्वे विकारजातं मायामात्रमित्यादिश्रुत्या कर्मणा निर्मितत्वाभावावगमात् तदुपादानाविद्यानाशादेव विनाशसम्भवाच्च कर्मक्षयाधीनं नाशमाक्षिपति **अजातस्य कुतो नाश इति** कुत इति पूर्ववदेव एवमध्यस्तस्य शरीरादेः कर्मक्षयाधीनविनाशस्य अनावश्यकत्वात् 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येदित्यादि' शास्त्रविरोधेन शरीरादिस्थितिप्रयोजकं तदारम्भकं प्रारब्धसंज्ञकं कर्मेति कल्पनमपि भ्रान्तिरेवेति तदाक्षिपति **प्रारब्धमसतः कुत इति** असत इति अकर्मजत्वात् असत्यस्य ज्ञाननाश्यत्वेन मिथ्याभूतस्येत्यर्थः ॥ १३५॥ ॥

व्या ॥ यथा हि लोके भक्षितं कलञ्जद्रव्यं इतरनिरपेक्षमेव सत् स्वशक्त्यैव विचित्रान् भ्रमानुत्पादयति–क्षीरं वा जलं स्वयमेव दध्याभासहिमकरकाद्याकारेण परिणमते हि अनपेक्ष्य बाह्यं साधनं एवं अविद्या च कर्मनिरपेक्षा सती स्वशक्ति-वैचित्र्यादेव विचित्रकार्यरूपेण परिणमतेत्यर्थः ॥ १५२॥ ॥

अ० ॥ पुनश्शङ्कान्तरमनूद्य निराकरोति **आचारस्येति–**.

मू ॥ आचारस्य प्रमाणत्वान्मायिकोऽप्यत्र कर्मजः ।
इति चेत्स्वाप्नपुत्रार्थं कर्मात्रापि करोतु सः ॥ १५३॥ ॥

व्या ॥ सर्वं विकारजातं मायामात्रमित्यादिशास्त्रेण जाग्रत्कालिकपुत्रादि-रपि मायिकत्वावगमेऽपि पुत्रकामेष्टिनागप्रतिष्ठासेतुयात्रादिशिष्टाचारस्यापि प्र-माणत्वेन कर्मजन्यत्वं स्यादिति प्राप्ते दोषमाह **स्वाप्नपुत्रार्थमित्यादिना** सः पुत्रकामेष्ट्याद्यनुष्ठाताऽत्र जाग्रदवस्थायां स्वाप्निकपुत्रादिलाभार्थमपि कर्म पुत्रकामे-ष्ट्यादिकं कुर्यादुभयोरपि मायिकत्वाविशेषादित्यर्थः ॥ १५३॥ ॥

अ० ॥ पूर्वपक्षमनूद्य चोदयति **अध्यस्तेति**––

मू ॥ अध्यस्तसाधनैरत्र कृतं कर्म फलप्रदम् ॥
यदि स्वप्ने कुतो न स्यात् कृतं कर्म फलप्रदम् ॥ १५४॥ ॥

व्या ॥ जाग्रदवस्थायामिव स्वप्नेऽप्यध्यस्तसाधनैः कृतमाध्यासिकं कर्मापि फलदानाय कुतो न भवतीत्यर्थः ॥ १५४॥ ॥

अ० ॥ परसमाधानमनूद्य स्वमतेऽपि तत्साम्यं दर्शयति **करोमीति**––

मू ॥ करोमीति विनाध्यासं न हि कर्म कृतं तदा ।
यदि जाग्रति कर्मापि ध्यायतीवेति वार्यते ॥ १५५॥ ॥

व्या ॥ **तदेति** स्वप्ने करोमीति भ्रमातिरेकेणाध्यासिकमपि कर्म न कृत-मिति प्राप्ते 'ध्यायतीव लेलायतीवे'ति श्रुत्या जाग्रदवस्थायामपि कर्म निवार्यत इत्याह––**जाग्रतीत्यादिना** ॥ १५५॥ ॥

अ० ॥ पुनश्शङ्कान्तरमनूद्य प्रातिभव्येन समाधत्ते **श्रुत्येति**–

मू ॥ श्रुत्यानया तु ध्यातृत्वमध्यस्तं न निवार्यते ॥

तत्कर्तृत्वविशिष्टेन कृतं कर्म फलाय चेत् ।
स्वयं निर्माय संस्कारात् स्वपितीति श्रुतेस्तथा ॥
स्वप्ने कामं निर्मिमाणो यो जागर्तीति च श्रुतेः ।
आध्यासिकरथादींश्च सृजतेऽयमिति श्रुतेः ॥
अध्यस्तकर्तृताज्ञादि साध्यं कर्म तदास्ति हि ।
कुतस्तत्कर्मणा पश्चान्न स्वर्गादिस्त्वयेष्यते ॥ १५९ ॥

व्या ॥ 'असङ्गो ह्ययं पुरुषः । ध्यायतीव लेलायतीव' त्यादि श्रुत्या न कर्तृत्वमाध्यासिकं बाध्यते किन्तु पारमार्थिकमेव कर्तृत्वं अतः आध्यासिककर्तृत्ववता क्रियमाणं कर्म फलाय भवतीति प्राप्ते प्रातिभव्येन समाधत्ते **स्वयं निर्मायेत्यादिना** 'स्वयं विहृत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपितीति च य एष सुप्तेषु जागर्ति कामंकामं पुरुषो निर्मिमाण इति च ।

अथ रथान् रथयोगान् पथस्सृजते इत्यादिशास्त्रादवगतं यदाध्यासिकं स्वप्नकाले बाह्यसाधनविकलस्यात्मनो निर्मातृत्वं च तात्कालिकपुत्रपश्वाद्यङ्गसाध्यं कर्मवत् तदास्तीत्युक्त्वा - तदस्तित्वे च स्वप्ने पुत्रपश्वादिकमद्राक्षं तेन यागसाधनेन ज्योतिष्टोमादिकमकरवमिति प्रत्यभिज्ञयापि तन्मूलं लोकानुभवं च स्मारयति हिशब्देन **तत्कर्मणा** अकरवमिति प्रत्यभिज्ञातेन **पश्चात्** देहपातानन्तरं कुतस्त्वया स्वर्गादिफलं नाङ्गीक्रियत इत्यर्थः ॥ १५९ ॥

अ० ॥ सिद्धान्ती निजाक्षेपफलं दर्शयति **शास्त्रेति**—

मू ॥ शास्त्रे कर्मपरे पुरोक्तनिगमस्मृत्यादिभिर्बोधिते
स्वप्नानुष्ठितकर्मणा सुरतनुप्राप्त्यादिबाधाच्च नः ।
दृष्टान्तेऽप्यसतीतरैश्च न विधेर्हेतुत्वसंस्थापनम्
कर्तुं शक्यमतो जगच्च सकलं स्वाज्ञानमात्रोद्भवम् ॥ १६० ॥

व्या ॥ कर्मशास्त्रे तावत् पूर्वोक्तत्रयोदशादिश्लोकावगतश्रुतिस्मृत्यादिभिर्बाधिते सति स्वप्नकाले सुरत्वमगमं नरभावमत्यजञ्चेति परामर्शगम्यस्य स्वप्नानुभवस्य तद्विषयस्य च मनुष्योऽहमिति जाग्रत्कालिकानुभवेन बाधदर्शनात् फलस्य कर्मजत्वसाधनार्थं दृष्टान्ताभावे सत्यनुमानासंभवाच्च प्रागुक्तागमादिबाधितैः प्रत्यक्षार्थापत्त्यादिप्रमाणैः कर्मणः फलकारणत्वं निर्णेतुमशक्यत्वात् जगत्सर्वं स्वाविद्यामात्रजन्यमित्यध्यवसेयमिति भावः ॥ १६० ॥

॥ इन्द्रजालोत्पत्तिप्रकारादेशारम्भः । ॥

अ० ॥ इदानीमिन्द्रजालोत्पत्तिप्रकारानभिज्ञानां तत्प्रकारमादिश्य इन्द्रजालस्येव जगतोऽपि कर्मजत्वं निराकर्तुं तच्चोद्यमनुवदति **इन्द्रजालमिति**—

मू ॥ इन्द्रजालं यथा मायाकर्मभ्यां निर्मितं तथा ।
भवेज्जाग्रच्छरीरादिरिति चेदत्र संशृणु ॥ १६१ ॥

व्या ॥ **अत्रेति** इन्द्रजालविषये संशृणु ज्ञातव्यांशमिति शेषः ॥ १६१ ॥

अ० ॥ इन्द्रजालं प्रति सभ्यजनानामेवाभिन्ननिमित्तोपादानत्वं सदृष्टान्तमाह-**इन्द्रजालं त्विति**—

मू ॥ इन्द्रजालन्तु सभ्यैर्हि कल्पितं स्वप्नवस्तुवत् ॥ १६१॥ ॥

अ० ॥ इन्द्रजालस्य सभ्यजनपरिकल्पितत्वे कथं मायाविकर्तृकत्वप्रसिद्धेरुपपत्तिरिति प्राप्ते सदृष्टान्तं तदुपपत्तिं दर्शयति **शब्दस्येति**—

मू ॥ शब्दस्य श्रवणादूर्ध्वमुद्भवत्प्रत्ययस्य हि ॥
श्रोत्रुपादानकस्यार्थे तदाऽभावात्पृथक्त्वतः ।
दाताचार्य इति ख्यातिर्यद्वच्छब्दप्रयोगतः ॥
मणिबद्धे तथा नेत्रे तत्पुंसारोपितस्य हि ।
कर्ता मायीति विख्यातिर्मण्यादेस्संप्रयोगतः ॥ १६४ ॥

व्या ॥ उक्तविशेषणविशिष्टस्य शिष्यविज्ञानस्य **आर्ये** आचार्ये **तदा** शिष्यज्ञानार्थं वाक्यप्रयोगसमये अभावादाचार्यगतज्ञानाच्छिष्यगतज्ञानस्य पृथक्त्वाच्च शब्दमात्रप्रयोक्तरि यथा ॥ श्लो ॥ वटविटपिसमीपे भूमिभागे निषण्णं सकलमुनिजनानां ज्ञानदातारमिति ज्ञानदातृत्वमौपचारिकं - तथा मणिना प्रतिबद्धचक्षुषा सभ्यजनेन प्रत्येकं प्रत्येकं **स्वप्नवत्** स्वस्मिन्नारोपितस्य गजाश्वादेः सहकारिभूतमण्यादिमात्रप्रयोक्तरि मायाविन्यौपचारिकी तत्कर्तृत्वप्रसिद्धिरुपपद्यत इत्यर्थः॥१६४

अ० ॥ इदानीमैन्द्रजालिकस्य तज्जालं प्रत्यनुपादानत्वे भाष्यकारादिसम्मतिमाह **सभ्यानामिति**—

मू ॥ सभ्यानां चक्षुषश्शक्तेः प्रतिबन्धकमौषधम् ।
मणिमन्त्रौ विना तस्मिन्नाविद्या जालकारिणी ॥
इति श्रीभाष्यकाराद्यैस्तत्र तत्र निरूपितम् ॥ १६५॥ ॥

व्या ॥ ऐन्द्रजालिके सभ्यजनदृश्यस्य गजाश्वादेः परिणामिकारणभूतमायाया असंभवात् न तदाश्रयत्वरूपं तस्येन्द्रजालोपादानत्वामिति तत्र तत्र भाष्यादावुपदिश्यते ॥

तथा हि द्वितीयाध्यायस्य प्रथमपादे विलक्षणत्वाधिकरणे - 'न तु दृष्टान्तभावा'दिति सूत्रीयेण यत्तावदभिहितं कारणमपिगच्छत् कार्यं कारणमात्मीयेन धर्मेण दूषयेदिति तत्तु न संभवति - कुतः दृष्टान्तानां भावात् - यथा घटरुचकचतुर्विधभूतग्रामा मृत्सुवर्णपृथिवीविकाराः स्वस्वप्रकृतौ विलीनास्सन्तः तत्तत्प्रकृतिं स्वात्मीयेनाकारपरिमाणादिधर्मेण न दूषयन्तीत्युक्त्वा अस्ति चायमपरो दृष्टान्तः यथा स्वयं प्रसारितया मायया मायावी त्रिष्विपि कालेषु न संस्पृश्यतेऽवस्तुत्वात् - यथा च स्वप्नदृगेकः स्वप्नदर्शनमायया न संस्पृश्यते प्रबोधसंप्रसादयोरनन्वागतत्वादिति भाष्येण च ॥

तदीयेन - मृद्घटादिवाक्येन परिणामदृष्टान्तमुक्त्वा विवर्तदृष्टान्तमाह अस्ति चायमपरो दृष्टान्तः यथा स्वयंप्रसारितया मायया मायावी त्रिष्विपि कालेषु न संस्पृश्यतेऽवस्तुत्वादिति इन्द्रजालस्य मायाव्यनुपादानमित्यरुच्या दृष्टान्तान्तरमाह यथा च स्वप्नदृगेकः स्वप्नदर्शनमायया न संस्पृश्यते प्रबोधसंप्रसादयोरनन्वागतत्वादितीति रामानन्दीयेन च विवर्तस्येन्द्रजालस्य नाधिष्ठानं मायावीति शासनात् सभ्यजनप्रकृतिकत्वं सिद्धम् ।

एवमेव गौडपादकृते चागमप्रकरणे ॥ श्लो० ॥ प्रपञ्चो यदि विद्येतेति कारिकायाश्च-अद्वैतप्रकरणे-सङ्घातास्स्वप्नवत्सर्व इति कारिकायाश्च भाष्यानन्दगिरीयाभ्यां चावगम्यत इति ज्ञेयम् ॥ १६५॥ ॥

अ० ॥ पुनश्चेन्द्रजालस्य कर्मजत्वं शङ्कते **नन्विति**—

मू ॥ ननु मन्त्रस्य कर्मत्वात्कर्मजं तद्धि चेन्न तत् ॥
वादा इत्यादिवाक्येन वैतथ्याख्यनिरूपणे ।
मन्त्रस्य हेतुता यस्माद्गौडपादैर्निवारिता ॥ १६७ ॥

व्या ॥ यस्माद्गौडपादाचार्यैः ॥ श्लो० ॥ वादा इति वादविद इत्यनेन वाक्येन न मन्त्रशास्त्रे प्रामाण्यमस्तीत्युक्तमतो न मन्त्रजन्यमिन्द्रजालमित्यर्थः ॥१६७॥

अ० ॥ ननु न तदीयप्रतिज्ञामात्रेणार्थसिद्धिरित्यत आह **स्वप्नेति**—

मू ॥ स्वप्ने जघ्नस्य मन्त्रस्य कारणत्वं यथा न हि ।
तथा जाग्रति मन्त्रस्य कारणत्वं न विद्यते ॥ १६८ ॥

व्या ॥ एवमेव प्रागुपपादितेन भगवत्पादीयेन ॥ श्लो० ॥ यत्कृतं स्वप्नवेलायां पुण्यं वा पापमुल्बणम् । स्वप्नोत्थितस्य किं तत्स्यात् स्वर्गाय नरकाय वेति विवेकचूडामणिवचनेन वाचिककर्मत्वान्मन्त्रस्यापि कारणत्वं निराकृतम् ॥ १६८ ॥

अ० ॥ इदानीं सभ्यजनगोचरस्येन्द्रजालस्य ऐन्द्रजालिकेन स्वात्मनि कल्पितत्वे बाधमाह **मायिनेति**—

मू ॥ मायिनारोपितं चेत्-तद्वस्त्रादि-व्यावहारिकम् ।
प्रातिभासिकसत्ताकमपि न स्यात्कुतो यदि ॥
आद्ये तस्य न युक्तं स्याज्जीर्णवस्त्रादियाचनम् ।
नान्त्येस्तत्कल्पितं तत्स्यादस्मद्दृष्टेरगोचरः ॥
स्वप्ने यथा मयाध्यस्तस्तव दृष्टेरगोचरः ।
तस्मात्तज्जगतोऽज्ञातमुपमातुं न शक्यते ॥ १७१ ॥

व्या ॥ सभ्यजनदृश्यस्य वस्त्राभरणादेरैन्द्रजालिकेन अध्यस्तत्वाभ्युपगमे व्यावहारिकप्रातिभासिकसत्वयोरन्यतरदपि सत्वं न संभवतीति प्रतिज्ञाय तत्र क्रमादोषमाह **आद्य इत्यादिना** ऐन्द्रजालिकेनाध्यस्तस्य परदृष्ट्यगोचरत्वे दृष्टान्तमाह **स्वप्न इति** तेनाध्यस्तस्यास्मद्दृष्ट्यगोचरत्वमिष्टमेवेत्यत्र बाधमाह–**तस्मादित्यादिना** तस्मादस्मद्दृष्ट्यगोचरत्वात्तदज्ञातमैन्द्रजालिकं वस्तु वियदादिजगतो मिथ्यात्वावगमाय अस्मान्प्रत्युपमातुं न शक्यते तथा च सति तदिन्द्रजालोपमानेन न कस्यापि जगन्मिथ्यात्वज्ञानं संभवेदिति भावः ॥ १७१ ॥

अ० ॥ एवं परपक्षे दोषमुद्भाव्य स्वपक्षे तदभावे सत्यानुकूल्यं दर्शयति **प्रतिबद्धेति**—

मू ॥ प्रतिबद्धदृशाऽस्माभिरध्यस्तं चेन्निजात्मनि ।
प्रातिभासिकसत्ताकमुपमातुं तदर्हति ॥ १७२ ॥

व्या ॥ प्रतिबद्धदृशेति औषधेन मणिना वा प्रतिबद्धनयनरूपसाधनेनास्माभिस्त्वात्मनीन्द्रजालमध्यस्तं चेत्तदा तत्प्रातिभासिकं—जगन्मिथ्यात्वावगमायोपमातुं योग्यं भवेदित्यर्थः ॥ १७२ ॥

अ० ॥ शङ्कान्तरमनूद्य दृष्टान्तेन परिहरति **नन्विति**—

मू ॥ नन्वेवं नो विजातीयः प्रत्येकं स्याद्भ्रमो यदि ।
दूरत्वमात्रतोऽस्माकं पूर्णेन्दौ - नभसि - क्रमात् ॥
प्रादेशमात्रता—नैल्यमेकरूपं यथा तथा ।
अस्माकं **नेत्रबन्धस्याप्येकत्वात्तुल्यविभ्रमः** ॥ १७४ ॥

व्या ॥ इन्द्रजालस्य सभ्यजनैरध्यस्तत्वे पुरुषभेदेनास्माकं विजातीयो विभ्रमस्यादित्याशङ्कानिरासार्थं दृष्टान्तद्वयमाह **दूरत्वमात्रत इत्यादिना** दार्ष्टान्तिकमाह **अस्माकमित्यादिना** सभ्यजनानामस्माकं नेत्रप्रतिबन्धस्य तत्कारणमण्यादुपाधेश्चैकस्यैव दूरत्ववत् तत्तत्सर्वजनविभ्रमकारणत्वात् समानभ्रमो भवतीत्यर्थः ॥ १७४ ॥

अ० ॥ शब्दस्य श्रवणादूर्ध्वमित्यादिना सार्धेन श्लोकद्वयेन मायाकारस्य मण्यादिप्रयोक्तृत्वमात्रादिन्द्रजालस्य तन्निर्मितत्वप्रसिद्धिरित्युक्तं इदानीमविवेकादपि तथात्वप्रसिद्धिरित्याह **लोकोऽयमिति**—

मू ॥ लोकोऽयं जपकर्मासिद्धिजमिति स्वाज्ञानजं जालकं
संवीक्ष्यैव वृथा ब्रवीति हि यथा स्वप्ने स्वमायोद्भवम् ।
अर्थं भूमिजरायुकोशज इति भ्रान्त्या गृहीत्वा पुन-
र्बालो वासनया च जाग्रति तया ब्रूते परेभ्यश्च नः ॥

व्या ॥ लोक इति अयं जनः स्वाज्ञानजमेवेन्द्रजालं तदुत्पत्तिप्रकारमजानन् सामान्यतो ज्ञात्वा ह्यविवेकादिदमैन्द्रजालिककर्तृकजपसिद्धिजन्यामिति वृथा ब्रवीतीत्युक्त्वा तत्र दृष्टान्तमाह—**यथेत्यादिना बालः** अविवेकी **वासनया तया** स्वाप्नकालिकभ्रमजन्यसंस्कारेण जाग्रदवस्थायामस्मभ्यं यथा च ब्रवीति तद्वदित्यर्थः ॥ १७५ ॥

अ० ॥ इदानीं कर्मापेक्षादपूर्वापेक्षाद्वा यथास्तु तथास्त्वीश्वरात् फलमिति सिद्धान्त इति फलाधिकरणीयभाष्योक्तविकल्पयोर्मध्ये द्वितीयविकल्पस्य तदधि-

करणारम्भसूत्रीयेण अनेन–तदपूर्वास्तित्वे प्रमाणाभावात्–अर्थापत्तिः प्रमाणमिति चेत्। न। ईश्वरसिद्धेरर्थापत्तिक्षयादिति भाष्येण बाधितत्वेन प्रथमविकल्पानुसारेण जगतः कर्मजत्वं परिचोद्य समाधत्ते **ईश इति**—

मू॥ ईशो नष्टविधिं स्मरन् सृजति यद्वात्रादिकं मायिकं
ज्ञानात्तस्य लये कुतोऽस्य जगतो धर्मं विना वर्ण्यते।
सृष्टिश्चेत्–प्रतिसुप्तिनाशनिगमप्रामाण्यतोऽपूर्वतो
यागाच्च क्षणिकात्पुरोक्तगुरुभिः प्राज्ञैर्जनिर्वार्यते॥ १७६॥

व्या॥ राजवत् क्षणिकसेवाभिज्ञेन परमेश्वरेण मायिकमेव शरीरादिकं सृष्टमित्यङ्गीकारे फलस्य जन्मादिकाले तत्कारणभूतकर्मस्थित्यभावेन ज्ञानसमकाल एव शरीरादीनां तत्कारणाज्ञानेन सह आत्यन्तिकनिवृत्तिसंभवात् किमर्थं ब्रह्मादिभिः कर्माधीनं जन्म जगतो निवारितमिति प्राप्ते समाधत्ते **प्रतिसुप्तीत्यादिना** परमेश्वरेण क्षणिकक्रियामपेक्ष्य सृष्टमपि शरीरादिकमपूर्वजन्यशरीरादिवच्छतं तदर्धान्वा संवत्सराञ्जीवितुमर्हति तथा च सति प्रतिदिनं शरीरादिप्रपञ्चस्य सुषुप्तौ लयप्रतिपादकश्रुतेरप्रामाण्यापत्तिभयात् कर्मसामान्यतः शरीराद्युत्पत्तिर्वारितेत्यर्थः।१७६

अ०॥ अधुना निरीश्वरवादिनां मीमांसकानां फलावाप्तये क्षणिकक्रियातिरेकेण अपूर्वकल्पनस्यावश्यकत्वेऽपि सेश्वरवादिनां शैवादीनामपूर्वकल्पनमन्तरेणैव वैषम्यादिदोषपरिहाराय क्षणिकयागादिक्रियामात्रमपेक्ष्य अनादिर्नित्यः परमेश्वरः फलं ददातीत्ययं पक्षः फलाधिकरणेऽपूर्वास्तित्वनिराकरणार्थमवलम्बितोऽपि तत्पक्षस्य वक्ष्यमाणाधिकरणभाष्याभ्यां प्रत्यगात्मनो वेदोक्तजगत्कारणत्वमभिप्रेत्य परित्यक्तत्वात् न ग्राह्य इत्याह **पूर्वोक्तं त्विति**—

मू॥ पुर्वोक्तन्तु समन्वयाधिकरणे पत्युर्नये योगिनां
शैवानां कणभुक्सुतौ निवसतां माहेश्वराणां मतम्।
यद्वै नष्टविधिप्रवाहधिषणादीशात्फलं नो भवे
दित्येषाऽन्धपरंपरेति वचनादग्राह्यमेवाभवत्॥ १७७॥

व्या ॥ पूर्वश्लोकेनोक्तं यच्छैवादीनां क्षणिकयागाभिज्ञः परमेश्वरः फलं ददातीति मतं तत् समन्वयाधिकरणीयादस्मात्–न ह्यात्मनः शरीरात्माभिमानलक्षणं मिथ्याज्ञानं मुक्त्वाऽन्यतस्सशरीरत्वं शक्यं कल्पयितुं–नित्यमशरीरत्वं अकर्मनिमित्तत्वादित्यवोचाम–तत्कृतधर्माधर्मनिमित्तं सशरीरत्वमिति चेत् न शरीरसंबन्धस्यासिद्धत्वात् धर्माधर्मयोरात्मकृतत्वासिद्धेः शरीरसंबन्धस्य धर्माधर्मयोस्तत्कृतत्वस्य च इतरेतराश्रयत्वप्रसङ्गादन्धपरंपरैवैषाऽनादित्वकल्पनेति भाष्यात् ।

तथैव पत्युरसामञ्जस्यादिति सूत्रे प्रदर्शितासामञ्जस्यपरादप्यस्मात् किं पुनरसामञ्जस्यं हीनमध्यमोत्तमभावेन हि प्राणिभेदान्विदधत ईश्वरस्य रागद्वेषादि दोषप्रसक्तेरस्मदादिवदनीश्वरत्वं प्रसज्येत प्राणिकर्मापेक्षत्वाददोष इति चेन्न–कर्मेश्वरयोः प्रवर्त्यप्रवर्तयितृत्वे इतरेतराश्रयदोषप्रसङ्गात्। न अनादित्वादिति चेन्न–वर्तमानकालवदतीतेष्वपि कालेष्वितरेतराश्रयदोषाविशेषात् अन्धपरंपरान्यायापत्तेरिति भाष्यवचनाच्चाप्राह्यमेवाभवदित्यन्वयः **कणभुक्स्मृतौ** कणादमहर्षिमार्गे **नः** अस्माकमित्यर्थः ॥

न चात्राप्युदाहृतभाष्याभ्यामपूर्वसापेक्षत्वमेवेश्वरस्य निराकृतमिति वाच्यं—सेश्वरवादिनामपूर्वकल्पनस्य अनावश्यकत्वात्क्षणिककर्मापेक्षादीश्वरात् फलमिति फलाधिकरणीयभाष्यसमानार्थस्यैव कर्मापेक्ष ईश्वरः फलं ददातीति वाक्यस्य अत्रोदाहृतसमन्वयाधिकरणादिभाष्यद्वयावसरेऽप्यसकृत्प्रयोगदर्शनेन तस्यैव क्षणिककर्मसापेक्षत्वस्य चोद्यपूर्वकं निराकृतत्वावगमान्नेतरस्येति सिद्धम् ॥ १७७ ॥

अ० ॥ इदानीं जीवेश्वरभेदस्य वास्तवत्वपक्षेऽपूर्वमथवा क्षणिकं धर्मादिकमपेक्ष्येश्वरः फलं ददातीति वक्तुं शक्यते नान्यथेत्याह **जीवेशयोरिति—**

मू ॥ जीवेशयोर्विभेदस्तु वास्तवश्चेत्तदेश्वरः ।
ददाति फलमन्येभ्य इति वक्तुं हि शक्यते ॥
भृत्येभ्यो राजवद्येषां कल्पितस्तत्र नास्ति तत् ।
प्रवेशागमसंप्रोक्तप्रकारेणेश्वरस्य हि ॥
जीवत्वे च कथं स्वस्मै स्वयं दातेति युज्यते ॥ १७९॥ ॥

व्या ॥ ईश्वरस्य फलदातृत्वपक्षे जीवेशयोर्वास्तवभेदस्य आवश्यकत्वे दृष्टान्तमाह—**भृत्येभ्यो राजवदिति** भेदस्याध्यासिकत्ववादिनां तावद्भेदाभावात्तयोर्दातृत्वादिकं नास्तीत्याह–**येषामित्यादिना** अन्यथाऽनुपपत्तिमाह–**प्रवेशा-**

गमेत्यादिना सोऽकामयतेत्युपक्रम्य तदेवानुप्राविशदित्यादिश्रुत्युक्तप्रकारेण प्रागुदाहृतचतुस्त्रिंशादिश्लोकोक्तप्रकारेण च ब्रह्मण एव साक्षात् स्वसृष्टशरीरतादात्म्याध्यासवशाज्जीवत्वे सिद्धे राजभृत्ययोरिव भेदाभावाद्दातृत्वादिकं नोपपद्यत इत्यर्थः ॥ १७९॥ ॥

अ० ॥ अधुना । जीवस्य प्रतिबिम्बत्वांशत्वोपाध्यवच्छिन्नत्वान्यतमप्रयुक्तभेदमात्रमवलम्ब्य ब्रह्मजीवयोर्दातृत्वादिकं कुतो न स्यादित्यत आह **आभासत्वादीति**--

मू ॥ आभासत्वादिपक्षेऽस्य दृष्टान्ताभावतो न तत् ॥
निजस्य प्रतिबिम्बस्यांशस्यावच्छिन्नकस्य वा ।
कुत्र बिम्बोऽनवच्छिन्नो वांशी दातेति दृश्यते ॥ १८१ ॥

व्या ॥ जीवस्य ब्रह्मप्रतिबिम्बत्वादिपक्षे तयोः फलदातृत्वादिकं दृष्टान्ताभावान्नोपपद्यत इत्युक्त्वा तदेव विवृणोति **निजस्येत्यादिना** लोके आदित्यमहाकाशशरीराणां तदीयप्रतिबिम्बावच्छिन्नावयवानां च क्रमादुपास्योपासकत्वंदातृत्वप्रतिगृहीतृत्वादर्शने सति कथमीशात्मनोर्दातृत्वादिकं शास्त्रानुमानाभ्यां प्रत्याययितुं शक्यत इत्यर्थः ॥ १८१ ॥

अ० ॥ इदानीं प्रागुदाहृताभिः 'सर्वं विकारजातं मायामात्र' मित्यादिश्रुतिभिः जाग्रत्कालिकानां 'मायामात्रन्तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वा'दित्यादिसूत्रैश्च स्वाप्नकालिकानां च केवलमायिकत्वावगमे सति पुनः कर्मवासनावेशवशेन वितण्डापरमन्यथा गृहीतं च भाष्यमवलम्ब्य प्रत्यवतिष्ठमानं निराकरोति **भोगानामिति**--

मू ॥ भोगानां विधिजन्यताभ्युपगमाद्भोग्यश्च विध्युद्भव-
श्चेत्स्वाप्नं भवतु प्रबोधसमये विद्योदये देहवत् ।
अन्यावस्थतया लयो भवति चेद्रज्जावहिर्वर्ततां
ज्ञानेनैव विनाशितो यदि ततो भोग्यं न विध्युद्भवम् ॥

व्या ॥ **भोगानामिति** स्वाप्निकानां सुखादीनां 'सूचकश्च हि श्रुतेराचक्षते च तद्विद' इति सूत्रस्थानेन मन्त्रदेवताद्यवशेषनिमित्ताश्च केचित् स्वप्ना इत्यारभ्य यदुक्तं 'सन्ध्ये सृष्टिराह ही'ति तदेवं सति भाक्तं व्याख्यातव्यं यथा लाङ्गल

गवादीनुद्वहतीति निमित्तमात्रत्वादेवमुच्यते—न तु प्रत्यक्षमेव लाङ्गलं गवादीनुद्वहति एवं निमित्तमात्रत्वात् सुप्तो रथादीन् सृजते स हि कर्तेति चोच्यते ।

न च प्रत्यक्षमेव सुप्तो रथादीन् सृजति—निमित्तत्वं तस्य रथादिप्रतिभाननिमित्तमोदत्रासादिदर्शनात् तन्निमित्तभूतयोः सुकृतदुष्कृतयोः कर्तृत्वेनेति वक्तव्यमिति सन्ध्याधिकरणीयभाष्येण तथैव ॥ श्लो० ॥ जीवोपाधिमनस्तद्वद्धर्माधर्मफलाश्रये । स्वप्ने जाग्रति वा भ्रान्त्वा क्षीणे कर्मणि लीयत इति विद्यारण्यकृतयोगानन्दवचनेन च तदीयेन ॥ श्लो० ॥ काचिदन्तर्मुखा वृत्तिरानन्दप्रतिबिम्बभाक् । पुण्यभोगे भोगशान्तौ निद्रारूपेण लीयत इति पञ्चकोशविवेकवचनेन च **विधिजन्यताभ्युपगमात्** तदनुगुणमेव बृहदारण्ये षष्ठाध्याये तृतीयब्राह्मणस्य यः 'न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान्रथयोगान् पथस्सृजत' इत्यारभ्य सा हि कर्तेति दशमपर्यायः तदीयेनानेन ।

तद्वासनाश्रयचित्तवृत्त्युद्भवनिमित्तकर्महेतुत्वेनेत्यवोचाम तस्य कर्तृत्वमित्यारभ्य तत्र जाग्रत्यात्मज्योतिरवभासितैः कार्यकरणैः रथादिवासनाश्रयान्तःकरणवृत्त्युद्भवनिमित्तं कर्म निर्वर्त्यते तेनोच्यते सा हि कर्तेति तदुक्तमात्मनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुत इत्यत्रेति भाष्येण **च स्वाप्निकं भोग्यञ्च विध्युद्भवं** इत्यङ्गीकरणीयमिति वदन्तं प्रत्याह—स्वाप्नं भवतु प्रबोधसमय इति **स्वाप्नकालिकं** गजादिकमपि भोग्यत्वेन पुनर्जाग्रदवस्थायामनुवर्तेतेत्युक्त्वा तत्र पराभिमतं दृष्टान्तमाह—**विद्योदये देहवदिति** परकीयं समाधानमनुवदति अन्यावस्थतया लयो भवति **चेदिति** जाग्रदवस्थातोऽन्यावस्थाकत्त्वेन स्वाप्निकगजादिः पुनर्जाग्रदवस्थायां विनष्टत्वान्नानुवर्तत इति परोक्तं समाधानमाक्षिपति सिद्धान्ती **रज्जावहिर्वर्ततामिति** प्रातिभासिकस्थले दुःखादेस्तत्कारणभूतसर्पस्य च तदधिष्ठानज्ञानस्य चैकजाग्रदवस्थाकत्वात् ज्ञानकालेऽपि स भोग्यस्सर्पो जीवेदिति परिचोदिते सति परकीयं तत्समाधानमनुवदति **ज्ञानेनैव विनाशितो यदीति** प्रातिभासिकस्थले दुःखतद्धेतुभूतसर्पतदधिष्ठानज्ञानानां एकजाग्रदवस्थाकत्वेऽपि भ्रान्तिप्रमाविशिष्टेन जाग्रदवस्थायाः भेदवत्त्वेन प्रमाकालिकजाग्रदवस्थायां तत्प्राक्तनः प्रातिभासिकस्सर्पः स्वाप्निकगजादिवद्विनष्ट इति परोक्तमेव न्यायं दार्ष्टान्तिकेऽप्यतिदिशन् परपक्षं निराकरोति **ततो भोग्यं न विध्युद्भवमिति** यदा त्वद्वितीयतया स्वात्मानं जानाति तदा भवदुक्तप्रकारेण अविद्यावस्थातो भिन्नावस्थाकत्त्वादाविद्यकभोग्यशरीरादेः ज्ञानमात्रेण विनष्टत्वान्न कर्मजन्यत्वं सिध्यतीत्यर्थः ॥

तर्हि स्वाप्निकभोगादेः मन्त्रसुकृतादिकर्मजन्यत्वबोधकयोः प्रागुदाहृतसन्ध्याधिकरणीयबृहदारण्यीयभाष्ययोः का गतिरिति चेदुच्यते—तत्र सन्ध्याधिकरणे 'निर्मातारं चैके पुत्रादय'श्चेति पूर्वपक्षसूत्रेण सन्ध्याश्रयस्य सर्गस्य परमेश्वरकर्तृकत्वेन सत्यत्वं यदाशङ्कितं तस्मिन्—स्वयं विहृत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपितीति जीवव्यापारपरेण श्रुत्यन्तरेण समानार्थकाम् - य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाण इति सन्ध्याश्रयसर्गस्य अविद्योपाधिकजीवारोपितत्वपरां श्रुतिमाश्रित्य मायामात्रं तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वा'दिति सूत्रतद्भाष्याभ्यां निराकृते सति ।

तर्हि स्वाप्निकरथादेर्जीवकर्तृकत्वात् रथकारकर्तृकरथादेरिव सत्यत्वमेव स्यादित्यनुमानस्य प्रागुदाहृतेन स्वयं विहृत्येत्यागमेन बाध्यमानत्वमजानतां स्थूलमतीनां चोद्यपरिहारायैव तत्सन्ध्याधिकरणीयभाष्येण ॥ श्लो ॥ प्रधानं जीव ईशो वा कोऽन्तर्यामी जगत्प्रति । कारणत्वात् प्रधानं स्याज्जीवो वा कर्मणो मुख्यादित्यन्तर्याम्यधिकरणीयपूर्वपक्षेणेव स्वाप्निकरथादिकं प्रति निमित्तभूतमन्त्रदेवतानुग्रहसुकृतादिकर्ममात्रकर्तृत्वेन जीवस्य यत्किञ्चिन्निमित्तान्तरत्वं केवलवितण्डावादेन दर्शितमित्यवगम्यते ।

किञ्चाभिन्ननिमित्तोपादानत्वपरैः ॥ श्लो ॥ कल्पयत्यात्मनात्मानमात्मा देवस्त्वमायया । स एव बुध्यते भेदानिति वेदान्तनिश्चयः ॥ आत्मनि चैवं विचित्राश्च हीति गौडपादीयवचनसूत्रतद्भाष्यैर्बाधितत्वात् - न तु तेषां सुकृतदुष्कृतजन्यत्वावगमायेति चान्यथागृहीतेन भवदुदाहृतबृहदारण्यभाष्येणैवावगम्यते ।

तत्कथमिति चेदुच्यते भवदुदाहृतभाष्यमूलभूते बृहदारण्यीयषष्ठाध्यायगततृतीयब्राह्मणे 'अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शान्तेऽग्नौ शान्तायां वाचि किं ज्योतिरेवायं पुरुष इति आत्मैवास्य ज्योतिर्भवत्यात्मनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुत इति' षष्ठपर्यायगतकर्मशब्दार्थप्रकाशकेनानेन—तस्माद्यदपायि देहे दर्शनं न भवति — यद्भावे च भवति तद्दर्शनादिक्रियाकर्तृ - न देह इत्यवगम्यते चक्षुरादीन्येव दर्शनादिक्रियाकर्तृणीति चेन्न यदहमद्राक्षं तत्स्पृशामीति भिन्नकर्तृकत्वे प्रतिसन्धानानुपपत्तेः—मनस्तर्हीति चेन्न मनसोऽपि विषयत्वाद्रूपादिवद् दृष्टानुपपत्तिः - तस्मादन्तस्थं शरीरादिव्यतिरिक्तं आदित्यादिवदिति सिद्धमित्यादिभाष्येण ।

भूवादयो धातवः क्रियावाचिन इति कौमुदीकाशिकावृत्तिच्छायापन्नेन–तस्मान्न संपदादिरूपं ब्रह्मात्मैकत्वविज्ञानमतो न पुरुषव्यापारतन्त्रा ब्रह्मविद्या किं तर्हि प्रत्यक्षादिप्रमाणविषयवस्तुज्ञानवद्वस्तुतन्त्रैव ।

एवंभूतस्य ब्रह्मणस्तज्ज्ञानस्य वा न कथा चिदपि युक्त्या शक्यः कार्यानुप्रवेशः कल्पयितुं–न च धातुविदिक्रियाकर्मत्वेन कार्यानुप्रवेशो ब्रह्मणः–'अन्यदेव तद्विदितादथोऽविदितादधी'ति विदिक्रियाकर्मत्वप्रतिषेधात्–'येनेदं सर्वं विजानाति तं केन विजानीयादि'ति चेत्यादिसमन्वयसूत्रभाष्येणैव ।

आत्मज्योतिस्संवलितप्रत्यक्षादिप्रमाणजन्यं यदेव ज्ञानमभिहितं–तदेव ज्ञानं भवतोदाहृतेन 'अथ रथान्रथयोगान् पथः सृजत इत्यारभ्य स हि कर्तेति' सन्ध्याधिकरणविषयभूतस्याख्य दशमपर्यायस्य भाष्यगतकर्मशब्देनाप्यभिहितं न सुकृतादिकं कुत इति चेत्–स्वप्रदर्शितदशमपर्यायभाष्यार्थप्रतिपत्तये तत्समानार्थकत्वेन–तदुक्तं 'आत्मनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुत इति' प्राक् प्रदर्शितार्थकस्य षष्ठपर्यायवाक्यस्य प्रमाणत्वेनोदाहृतत्वात् ।

अतो न दशमपर्यायभाष्येण स्वाप्निकरथादीनां सुकृतदुष्कृतरूपकर्मजन्यत्वसिद्धिः ॥

तर्हि तद्वासनाश्रयचित्तवृत्त्युद्भवनिमित्तकर्महेतुत्वेनेत्यवोचाम तस्य कर्तृत्वमिति तस्य दशमपर्यायभाष्यस्य कोऽर्थ इति चेत् उच्यते ।

जाग्रत्प्रज्ञाऽनेकसाधना बहिर्विषयेवावभासमाना मनस्स्पन्दनमात्रा सती तथाभूतं संस्कारं मनस्याधत्ते तन्मनस्तथा संस्कृतं चित्रित इव पटो बाह्यसाधनानपेक्षमविद्याकामकर्मभिः प्रेर्यमाणं जाग्रद्वदवभासत इत्यादिना–'स्वप्नस्थानोऽन्तःप्रज्ञ' इति माण्डूक्यश्रुतिभाष्येण स्वप्नपदार्थोत्पत्तिप्रकारबोधकेन मनस एव वासनाश्रयस्वावगमादेतद्भाष्योक्तकर्मशब्दस्यापि प्रागुक्तषष्ठपर्यायभाष्यवद्दर्शनक्रियापरत्वाच्च ।

तेषां स्वाप्निकरथादीनां कारणभूतवासनाश्रयं यत् चित्तं ततः स्वाप्निकादिवृत्तेरुत्पत्तौ निमित्तमिति कर्मशब्देन विवक्षितस्य दर्शनादेः विशेषणं तद्दर्शनादिक्रियाकर्तृत्वमेवावोचामेत्युक्तम् ॥

एवमेव प्राग्भवदुदाहृतस्य रथादिवासनाश्रयान्तःकरणवृत्त्युद्भवनिमित्तं कर्म निर्वर्त्यत इत्यस्यापि भाष्यस्यार्थ इति ज्ञातव्यम् ॥

किञ्च यत् पुनरुक्तं ॥ श्लो० ॥ जीवोपाधिमनस्तद्वद्धर्माधर्मफलाश्रये । स्वप्ने जाग्रति वा भ्रान्त्वा क्षीणे कर्मणि लीयत इत्यादिविद्यारण्यवचनस्य स्वाप्निकानां कर्मजन्यत्वपरत्वं तन्न तद्वचनस्य फलानां भ्रमसिद्धकर्मजन्यत्वानुवादेन-अन्तः-

करणस्य सुप्तिकाले तदुपादानभूताज्ञाने लयविधायकत्वात् न कर्मजत्वसिद्धिः एवमेव येन येन वाक्येन कर्मजमुद्दिश्य सुषुप्तौ लयः सौषुप्तादुत्पत्तिर्वा विधेयते तस्य तस्य वाक्यस्य कर्मजत्वांशेऽनुवादकत्वमेवैष्टव्यं अन्यथा तद्वाक्यविहितलयोत्पत्त्योरनुपपत्तेः ॥

ननु, चक्षुरादिद्वारा विनिर्गतमनोवृत्तेः विषयप्रकाशकत्वाज्ज्ञानत्वं मनःप्रवृत्तिरूपत्वात् सुकृतादिरूपक्रियात्वञ्चेत्युभयात्मकत्वस्य भाष्यकारैरभिप्रेतत्वात् स्वाप्निकरथादीनां वासनाऽपूर्वोभयजन्यत्वं किन्न स्यादिति चेदुच्यते ॥

न तावदस्मदाचार्यैर्ज्ञानस्य धर्माधर्मरूपक्रियात्मकत्वमभिप्रेतमिति वक्तुं शक्यते ज्ञानकर्मणोर्वैलक्षण्यस्थानेन ॥

ननु, ज्ञान नाम मानसी क्रिया न वैलक्षण्यात् क्रिया हि नाम सा यत्र वस्तुस्वरूपनिरपेक्षैव चोद्यते पुरुषचित्तव्यापाराधीना च यथा यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट्करिष्यन्निति सन्ध्यां मनसा ध्यायेदिति चैवमादिषु ध्यानं चिन्तनं यद्यपि मानसं तथापि पुरुषेण कर्तुमकर्तुमन्यथा वाकर्तुं शक्यं पुरुषतन्त्रत्वात् ॥ ज्ञानन्तु प्रमाणजन्यं प्रमाणञ्च यथाभूतवस्तुविषयमतो न ज्ञानं कर्तुमकर्तुमन्यथा वा कर्तुं शक्यं केवलवस्तुतन्त्रमेव तत् न चोदनातन्त्रं नापि पुरुषतन्त्रं तस्माद्यद्यपि मानसत्वेऽपि ज्ञानस्य महद्वैलक्षण्यं यथा च पुरुषो वाव गौतमाग्निः योषा वाव गौतमाग्निरित्यत्र योषित्पुरुषयोरग्निबुद्धिर्मानसी भवति केवलचोदनाजन्यत्वात्तु क्रियैव सा पुरुषतन्त्रा च । या तु प्रसिद्धेऽग्नावग्निबुद्धिर्न सा चोदनातन्त्रा नापि पुरुषतन्त्रा किं तर्हि प्रत्यक्षविषयवस्तुतन्त्रेति विज्ञानमेव तन्न क्रिया एवं सर्वप्रमाणविषयवस्तुषु वेदितव्यमिति समन्वयसूत्रभाष्येण प्रदर्शितत्वात् ।

अतो न ज्ञानस्य धर्माधर्मरूपक्रियात्मकत्वं वा स्वाप्निकरथादेः कर्मजत्वं वाभिप्रेतं ।

किञ्च प्राग्विधिश्रुतीनां परिसंख्यात्वविचारावसरे स्वाप्नजाग्रत्कालिकपदार्थानामकर्मजन्यत्वे भाष्यकारादीनां बहूनामाचार्याणां सम्मतिश्च तत्प्राक्तनग्रन्थेन ब्रह्मरामादिसंमतिश्च प्रदर्शिता ॥

तथैव सिद्धान्तलेशसङ्ग्रहे द्वितीयपरिच्छेदे दृष्टिसृष्टिप्रस्तावसमये—ज्योतिष्टोमादिश्रुतिबोधितानुष्ठानात् फलसिद्धिस्तु स्वप्नश्रुतिबोधितानुष्ठानप्रयुक्तफलसंवादतुल्येति वाक्येन स्वाप्नजाग्रत्कालिकफलजातस्य अकर्मजन्यत्वं दर्शितम् ।

ननु, ज्योतिष्टोमादिश्रुतीनां च सत्त्वशुद्धिद्वारा ब्रह्मणि तात्पर्यमतो नाप्रामाण्यमिति तत्रैव दीक्षितैः कर्मणः सत्त्वशुद्धिरूपफलारम्भकत्वमभ्युपेत्यैव प्रामाण्ये सम्पादितमिति चेत् ।

सत्यमेवमुक्तं तत्तु दृष्टिसृष्टिवादश्रवणानधिकारिणां कर्मानुष्ठातृणामनुवृत्त्यर्थमिति ध्येयं अन्यथा ज्योतिष्टोमादीनां सत्त्वशुद्धिजनकत्वमेव-न सुखदुःखादिशरीरजनकत्वमित्यत्र नियामकाभावात् ज्योतिष्टोमादिश्रुतिबोधितानुष्ठानात् फलसिद्धिस्तु स्वप्नश्रुतिबोधितानुष्ठानप्रयुक्तफलसंवादतुल्येति वदद्भिर्दीक्षितैः न तदुक्तदृष्टिसृष्टिवादसिद्धान्तप्रक्रिया समर्थिता स्यात् ॥

सत्त्वशुद्धिस्तु 'सर्वं खल्विदं ब्रह्मे'त्यादिश्रुत्युक्तप्रकारेण विषयासत्त्वादिदोषदर्शनेनैव भविष्यति किं कर्मणा ।

तर्हि कथं विधिश्रुतीनामप्रामाण्यपरिहार इति चेत् प्रागुदाहृतभाष्यवाचस्पत्यायुक्तप्रकारेण परिसङ्ख्यात्वमादाय परिहरणीयम् ।

किञ्च नन्वेवं प्रतीतिमात्रशरीरत्वेन नियतकारणाजन्यत्वे-श्रुतिषु स्वर्गार्थं ज्योतिष्टोमादिविधेः-ब्रह्मसाक्षात्काराद्यर्थं श्रवणादिविधेः आकाशादेर्वाय्वादिहेतुत्वस्य चोक्तिरयुक्तेति चेन्न स्वाप्नयोः कार्यकारणभाववोधकवाक्यवदुपपत्तेरित्यद्वैतसिद्धौ दृष्टिसृष्टिप्रकरणवाक्येनापि जाग्रत्स्वप्नप्रकालिकभोग्यानामकर्मजन्यत्वं सिद्धम् ।

किञ्च जाग्रत्स्वप्नप्रकालिकस्य सुखादेरशरीरादेश्च कर्मजन्यत्वेऽपि ब्रह्मविवर्तत्वं वदन् वादी प्रष्टव्यः किं तत्सुखादिकं तदारम्भकप्रारब्धकर्मक्षयादेव नश्यत्युत तदधिष्ठानज्ञानात् आद्ये तस्यानित्यत्वातिरेकेण ज्ञाननिवर्त्यत्वरूपमिथ्यात्वासंभवेन वेदान्तोक्तमिथ्याशब्दस्यानित्यशब्दपर्यायतैव स्यान्नानिर्वचनीयवाचकत्वं ॥

द्वितीये तु स्वपक्षहानिः परपक्षसिद्धिश्चापतेत् अत एव च स्वाप्निकगजादीनां कर्मजत्वं विना केवलाविद्यावासनामात्रजन्यत्वेन प्रबोधमात्रनाश्यत्वे तन्निदर्शनेन कर्मनिरपेक्षविचित्रशक्तिमदविद्याकार्यत्वेन जगतो ज्ञानैकनिवर्त्यत्वान्नोक्तदोषापत्तिरिति दृष्टिसृष्टिवादं प्रशंसद्भिरद्वैतसिद्धिकारैः ॥

प्राणिकर्मानुगुण्येनाधिदैविकपरमेश्वरनिर्मितवियदूषरशुक्त्यादेः प्रातिभासिकनैल्याद्यधिष्ठानभूतस्य अज्ञातसत्ताकत्वोपजीविनः प्रतिकर्मव्यवस्थापरशास्त्रस्य मन्दाधिकारिपरत्वं च यतोऽनेन ।

घटादेः स्वज्ञानात्पूर्वमसत्त्वेन प्रतिकर्मव्यवस्थानुपपत्तिः अधिष्ठानस्यापि शुक्त्याद्यंशस्य रूप्यवदिदं रूप्यमिति ज्ञानात् प्रागसत्त्वेन संप्रयोगादिहेतुत्रयजन्यत्व-

स्य अध्यासतटस्थलक्षणस्य सत्यस्य वस्तुनो मिथ्यावस्तुसंभेदावभास इति स्वरूपलक्षणस्य चायोग इति चेन्न–प्रतिकर्मव्यवस्थायाः संप्रयोगादिहेतुत्रयजन्यत्वरूपाध्यासतटस्थलक्षणस्य च मन्दाधिकारिविषयत्वात् **सत्यस्य** स्वात्मवस्तुनो मिथ्यावस्तुसम्भेदावभास इति स्वरूपलक्षणन्तु दृष्टिसृष्टिपक्षेऽप्याविरुद्धमिति अद्वैतसिद्धौ दृष्टिसृष्टिप्रकरणवाक्येन संप्रदर्शितमतोऽपि न स्वाप्रजाग्रत्कालिकस्य द्वैतजातस्य कर्मजत्वसिद्धिः ।

किञ्च । श्लो० ॥ रविसोमाग्निपूर्वेषु विनष्टेष्वयमास्तिकाः । चित्तसाक्षितया भाति स्वप्रकाशेन केवलः । चित्तव्यापारनाशे तु तदभावं सुरर्षभाः । स्वप्रकाशेन जानाति सुषुप्तौ वेद तामपीत्यादिना ब्रह्मगीताया दशमाध्यायवचनेन प्रागुदाहृतस्य अस्तमित आदित्ये याज्ञवल्क्येत्यारभ्य आत्मनैवायं ज्योतिषास्ते पल्ययते कर्मकुरुत इति बृहदारण्यश्रुतिगतस्य कर्मशब्दस्य ज्ञानपरत्वेन भाति जानाति वेदेति पदैः दर्शितत्वात् तज्ज्ञानकर्तृत्वमेव तदुत्तरस्मिन् अथ रथान्रथयोगान्पथस्सृजते स हि कर्तेत्यस्मिन्नपि वाक्ये विवक्षितमिति वक्तुं न्याय्यं पूर्वोत्तरयोरविरोधात् ।

अतस्तज्ज्ञानोत्पन्नवासनामयत्वातिरेकेण न स्वाप्निकानां रथादीनां कर्मजत्वं सिद्ध्यतीत्यास्थेयम् ॥ १८२ ॥

अ० ॥ इदानीं सुरनरशरीरादेः कर्मजन्यत्वाङ्गीकारे तत्पारमेश्वरस्यैव आपतेदित्याह **गात्रादेश्चेति**—

मू ॥ गात्रादेश्च विधेर्जनिर्यदि भवेत्सात्वैश्वरस्यापतेत्
सार्वात्म्याद्बहुधा स एव भवतीत्येवं प्रमाणश्रुतेः ।
मोहाच्चेन्न तथा चिदात्मवशगा मायेति शास्त्रस्य को
भावश्चेतिसन्निधौ स्फुरति यत् तस्मादधीना स्मृता ॥

व्या० ॥ गात्रादेरित्यादिना परपक्षे परमेश्वरशरीरस्यैव कर्मजत्वमापतेदित्युक्त्वा तत्रोपपत्तिमाह **सार्वात्म्यादिति** । तत्र सोऽकामयत बहुस्यां प्रजायेयेति स एव बहुधा भवतीत्यादिश्रुतिं' प्रमाणयति **बहुधेत्यादिना** ; तत्र परसमाधानमेनूय निराकरोति **मोहाच्चेन्न तथेति** त्वत्पक्षे जीवादन्यस्याधिदैविकस्य सर्वज्ञस्य मोहासंभवात् यथा च सौषुप्तस्य प्राज्ञस्य सार्वात्म्यसिद्ध्यर्थं मायया मुह्यमानत्वमङ्गीक्रियते तथा त्वयाङ्गीकर्तुमशक्त्यत्वात् जगतः कर्मजत्वसत्यत्वाभिनि-

वेशं परित्यजेत्यर्थः ॥ व्यामोहितत्वमन्तरेणेशस्य कारणत्वं वक्तुकामस्सन् वशीकृतमाय ईश इति शास्त्रस्य क्रोऽभिप्राय इति पृच्छति चिदात्मवशगेति तदुत्तरमाह **चितिसन्निधौ स्फुरति यदिति** यस्मान्माया स्वतो जडत्वात् सुप्तात्मसन्निधौ तत्तादात्म्याध्यासबलादेव अग्नितादात्म्यापन्नायःपिण्डवत् स्फुरति न स्वतोऽतश्चिदधीनेति दर्शितम् । तथाचोक्तं विद्यारण्यार्यैः ॥ श्लो० ॥ अस्वतन्त्रा हि माया स्यादप्रतीतेर्विना चितिं । स्वतन्त्रापि तथैव स्यादसङ्गस्यान्यथाकृतेरिति ॥ १८३ ॥

अ० ॥ न फलवैचित्र्यार्थमपि कर्मापेक्षेत्याह **वैचित्र्यमिति—**

मू ॥ वैचित्र्यं जगतो विधेर्भवति चेत् किं कर्मणा वासना
वैचित्र्याद्विषयेषु सिद्ध्यति—यथा स्वाप्ने च नानास्मृतौ ।
भोगार्थं विधिरस्तु चेन्न च—ततो भोगो हि साक्ष्यात्मना
प्रत्यक्षीकरणं सुखस्य—तदिदं गानादिबोधात्किल ॥

व्या ॥ वैचित्र्यं जगतो विधेर्भवति चेदिति पूर्वपक्षमनूद्य निराकरोति **किं कर्मणेति** तर्हि कुतस्तद्वैचित्र्यं भवतीत्यत आह—**वासनावैचित्र्याद्विषयेषु सिध्यतीति** तत्र दृष्टान्तद्वयमाह—**यथा स्वप्ने च नानास्मृताविति** सर्वविकारजातं मायामात्रमिति श्रुत्युक्तप्रकारेण सर्वेषां मायिकत्वाविशेषेऽपि स्वाप्निकजाग्रादौ जाग्रत्कालिकनानाविधस्मरणे च वैचित्र्यं तावद्यथा तत्तदनुभवजन्यसंस्कारवैचित्र्यादेव भवति—तथा जाग्रत्कालिकफलवैचित्र्यमपि तत्कारणवासनावैचित्र्यादेव भवेदित्युक्त्वा—फलवैचित्र्यस्य वासनावैचित्र्याधीनत्वेऽपि तत्फलस्योपभोगार्थं कर्मास्त्वित्याशङ्क्य तन्निराकरोति **भोगार्थं विधिरस्तु चेन्न चेति** भोगार्थं च नापेक्षणीयं कर्मेति शेषः—तत्र हेतुमाह—**ततो भोगो हि साक्ष्यात्मना प्रत्यक्षीकरणं सुखस्येति**—सुखपदं दुःखस्याप्युपलक्षणं हि यस्मात् साक्षिचैतन्येन सुखदुःखसाक्षात्कार एव भोगः ततस्तदर्थं च न कर्मेति पुनरन्वयः—भवतु नाम सुखाद्यपरोक्ष्यमेव भोगः सुखादिजन्मने कर्मास्त्वित्यत आह—**तदिदं गानादिबोधात् किलेति** तदिदं सुखादिकं शब्दादिविषयकबोधात्किल भवति—न कर्मेन्द्रियसाध्यक्रियाजन्यमिति किलशब्देन विवक्षितं जात्यन्धस्य वस्त्राभरणकृतालङ्कारकर्मणा सुखस्याजायमानत्वादित्यर्थः ॥ १८४ ॥

अ० ॥ इदानीमेवं जगद्याथात्म्यमुपदिशता भवता धर्माचरणस्योच्छेदः स्यादित्याक्षिप्य परिहरति **एवं चेदिति—**

मू ॥ एवं चेद्भवता ध्रुवं क्षितिसुरा धर्मादधर्मीकृता
नाहं धर्मपरान्प्रतीदमवदं - श्रोतॄन्मुमुक्षून्प्रति ।
मद्वाक्येऽप्यवशाच्छ्रुते न विरमेद्रागी सरागी यथा
दुष्कर्मी शतशो निवारितकृतिस्त्वाचारतस्त्वागमैः ॥

व्या ॥ प्रथमपादेन प्रदर्शितं चोद्यं परिहरति-**नाहमित्यादिना** न कर्मठान्प्रतीदं शास्त्रमवोचमतो न धर्माचरणोच्छेदप्रसङ्ग इत्यर्थः॥ तर्हि कं प्रत्यवद इत्यत आह—**श्रोतॄन्मुमुक्षून्प्रतीति**। तत्वयाथात्म्यविचारोत्सुकान्मुमुक्षून्प्रत्येवावदं ॥ ते विधीनां परिसंख्यात्वदर्शिनः स्वात्मस्वरूपविचाराभिमुखाः भवेयुरित्यभिप्रायः तथाप्येतच्छास्त्रविचारप्रदेशं गतस्य कामिनो धर्माचरणवैमुख्यं भवेदेवेत्यत आह— **मद्वाक्येऽप्यवशाच्छ्रुते न विरमेद्रागीति** - स्वर्गादिफलार्थी तावत् मद्वाक्यमिदमुपश्रृण्वन्नपि न विरमेत् तत्साधनत्वेन गृहीताद्धर्माचरणादिति शेषः तत्र दृष्टान्तमाह - **स रागी यथेत्यादिना** यः सुरापानपरदारादिरतो रागी स तु पुनः 'न सुरां पिबेत्' 'न परदारान्गच्छे' दित्यागमैः शतशो निवारितप्रयत्नोऽपि निषिद्धाचरणाद्यथा न विरमति तथा रम्भादिपरिरम्भणातिलम्पटश्च ज्योतिष्टोमादिकर्मभ्यः फलसाधनत्वविभ्रमान्न विरमेदुभयोर्भोगातिलम्पटत्वाविशेषादित्यर्थः॥

अ० ॥ इदानीं भवतः कुतस्सर्ववेदवाक्येषु साम्येन प्रामाण्यग्रहो नास्तीत्याक्षिप्य तत्रोपपत्तिं दर्शयति **आप्तत्व इति**—

मू ॥ आप्तत्वे वचसां श्रुतेस्तव कुतस्सर्वत्र साम्यग्रहो
नस्स्याच्चेद्वचसां हितादिकथनात्प्रामाण्यभेदात्तथा ।
ज्योतिष्टोमवचोहितं हिततरं मायामयं चिन्मयं
सर्वं चेति वचो यतो हिततमं तस्मान्न साम्यग्रहः ॥ १८३॥

व्या ॥ विधिवचसां प्रामाण्यभेदे हेतुमाह—**हितादिकथनादिति** प्राक्परिसङ्ख्याविधिविचारस्थले समीरितफलाधिकरणीयवाचस्पत्यायुक्तप्रकारेण ज्योतिष्टोमादिवाक्यावगतो देहात्मभावप्रविलयादिः मुमुक्षूणां जातोऽहं मृतोऽहमित्यादि विभ्रमनिवृत्तिसाधनत्वाद्धितः—आदिशब्देन तज्ज्योतिष्टोमादिवाक्यतात्पर्यानुसारेण परित्यक्तात्मभावस्य शरीरादेः 'सर्वं विकारजातं मायामात्रं' 'आत्मैवेदं सर्वं' मित्यादि श्रुतिविहितमायामयत्वचिन्मयत्वयोः हिततरहिततमत्वयोर्ग्रहणं तेषां कथनात् तद्वेदवाक्येषु आप्तत्वाप्ततरत्वाप्ततमत्वावगमेन क्रमात् प्रामाण्यभेदस्य सिद्धत्वात् तथा सर्वत्र साम्यग्रहो न सम्भवतीत्युक्त्वा तदेव स्वयं विवृणोति **ज्योतिष्टोमवच्च इत्यादिना** ॥ १८६ ॥

अ० ॥ एवं ज्योतिष्टोमादिवाक्यानां परिसङ्ख्यात्वपक्षे मुमुक्षूणामानुकूल्यं दर्शयित्वाऽधुना विध्यन्तरत्वपक्षे दोषं दर्शयति **स्वतन्त्रेति**—

मू ॥ स्वतन्त्रकर्मजन्यत्वशास्त्राद्धेोक्तुर्निरीशता ।
फलस्यानित्यता सातिशयत्वज्ञानिनोऽसुखम् ॥
अन्नाद ईश्वरश्चेति शास्त्राज्ज्ञातुर्भयादिकम् ।
भोक्तृत्वभोगभोग्यानां मायिकत्वपरात्पुनः ॥
उक्तदोषैर्विना स्वस्य ज्ञातुरेवेशता भवेत् ।
ज्ञानाभाववतस्स्वस्मात्सृष्टिज्ञस्याद्वितीयता ॥ १८९ ॥

व्या ॥ **स्वतन्त्रकर्मजन्यत्वशास्त्रादित्यादिना** ईश्वरपदरहिताज्ज्योतिष्टोमादिवचनादिदं फलं स्वतन्त्रकर्मजन्यमिति ज्ञानवतः तत्फलभोक्तुर्निरीश्वरत्वमसुखं चेति दोषद्वयं दर्शयित्वा तत्परिहाराय परमेश्वर एव कर्मफलं ददातीति वदन्तं प्रत्याह—**अन्नाद इति** 'अन्नादो वसुदान' इत्यादिशास्त्रात् स्वातिरिक्तेश्वरस्य कर्मफलदातृत्वज्ञानवतोऽपि स्वात्मेश्वरयोर्भेदबुद्धिसंभवेन—उदरमन्तरं कुरुतेऽथ तस्य भयं भवतीत्यादिश्रुत्युक्तप्रकारेण भयं स्यादिति तत्पक्षेऽपि दोषं दर्शयित्वा प्राग्यदुक्तं 'सर्वं विकारजातं मायामात्र'मिति श्रुतेर्हिततरत्वं तदुपपादयति **भोक्तृत्वेत्यादिना** प्राक् त्रयोदशादिश्लोकैरुदाहृते एष सर्वेश्वर इति माण्डूक्यादिशास्त्रजातस्य जीवे सर्वेश्वरत्वादिधर्मबोधकत्वेन सर्वभयनिवर्तकत्वाद्धिततरत्वं सिद्धमित्यावेद्य अधुना सर्वेषामाविद्यकत्वे—चतुर्थनिरूपणोक्तसत्यवस्तुभिरात्मनः सद्वितीयत्वाभावेऽपि प्राग्द्वितीयनिरूपणे चतुर्थप्रदर्शकान्ते व्याख्यातया ॥ श्लो० ॥ मायया

विद्यते सर्वमिति केचन मोहिताः ॥ शिवरूपातिरेकेण नास्ति माया च तत्त्वतः । मायया वा शिवादन्यद्विद्यते चेच्छिवस्य तु । महत्त्वं परमं साक्षाद्धीयेत सुरपुङ्गवाः । महत्त्वस्य च संकोचो नास्ति सम्यङ्निरूपणे । अस्ति चेदप्रमाणं स्याच्छ्रुतिस्सत्यार्थवादिनीति ब्रह्मगीतया चादिष्टप्रकारेण आविद्यकैर्जडवस्तुभिः सद्द्वितीयत्वसंभवात् तद्दोषपरिहारार्थं प्राग्द्वितीयनिरूपणे सप्तमादिश्लोकैरुदाहृतात् तत्रत्यनवप्रदर्शकेषु तत्तत्प्रथमपक्षानुकूलशास्त्रात् स्वात्मनोऽसंकुचितद्वितीयत्वावगमेन तदेव हिततममित्याह **ज्ञानाभावत इत्यादिना** ॥ १८९ ॥

अ० ॥ इदानीं फलस्य केवलकर्मजन्यत्वादिविधायकशास्त्राणां स्वार्थे प्रामाण्यग्रहणात् गुणदोषवत्त्वं स्यादिति यदुक्तं तत्सदृष्टान्तं निगमयति **ताळमिति**—

मू ॥ ताळं वा सुकृतौदमं मुनिहविर्भुक्त्वा सखे तृप्यता-
मित्यादिष्टफलादिसेवनवतः पुंसो यथा संभवेत् ।
पित्तं ताळफलाशनेऽप्यशुचिता सत्रान्नभोगेऽशुचि-
र्मुन्यन्नस्य निषेवणे त्वघकुलान्मुक्तिश्रुतिभ्यस्तथा ॥ १९० ॥

व्या० ॥ यथा कस्मैचित् पान्थाय क्षुधार्ताय ब्राह्मणाय केनचिद्दयालुना समीपदेशस्थं ताळफलमथवा किञ्चिद्दूरवर्तिदेशलभ्यं यागान्नं आहोस्वित् ततोऽपि किञ्चिद्दूरदेशस्थमुनिपर्णशालालभ्यं हविर्भुक्त्वा संतृप्यतामिति वाक्योक्तानां पदार्थानां मध्ये त्वैकैकस्य क्षुन्निवर्तकत्वेऽपि ताळफलाशने पित्तमशुचित्वं चेति दोषद्वयं भवति सत्रान्नभक्षणे तु तथा पित्तदोषाभावेऽप्यशुचित्वं भवति ऋष्याश्रमलभ्यहविर्ग्रहणे तूक्तदोषद्वयं च न स्यात् सर्वपापनिवृत्तिश्च भवेत्–तथा स्वार्थे तात्पर्यवत्त्वेन गृहीताभ्यः श्रुतिभ्यः स्वतन्त्रकर्मजन्यत्वेत्यादिश्लोकोक्तगुणदोषवत्त्वं भवेदित्यर्थः ॥ १९० ॥

अ० ॥ यस्तावत् दशमश्लोकादारभ्यैकस्मिन् विषये श्रुतीनां परस्परविरोधे सति परिहारोऽभिहितस्तमिदानीं संगृह्याह—**एवमिति**—

मू ॥ एवं ज्ञानेन गात्रादि नाश्यं वाऽनाश्यमेव किम् ।
द्विविधश्रुतिसद्भावाज्जगच्चेदुभयात्मकम् ॥
शास्त्रेण ज्ञाननाश्यत्वं प्रतिपाद्यमपूर्वतः ।
अनुद्यते ध्यनाश्यत्वं विरोधान्नोभयात्मता ॥ १९२ ॥

व्या ॥ एवमिति 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन पश्ये' दित्यादि-श्रुत्युक्तप्रकारेण किं शरीरादिकं जगदद्वितीयात्मविज्ञानान्नश्यति - अथवा 'याव-न्न विमोक्ष्येऽथ सम्पत्स्य' इत्यादिशास्त्रोक्तप्रकारेण कर्मजन्यत्वेन सत्यत्वात् ज्ञानेन न नश्यतीति संशये सति पूर्वपक्षमनुवदति **द्विविधेत्यादिना** सिद्धान्तमाह—**शास्त्रेणेत्यादिना** जगतो ज्ञाननाश्यत्वं तावच्छास्त्रैकसमधिगम्यं भवेदित्युक्त्वा तत्र हेतुमाह—**अपूर्वत इति** प्रमाणान्तरागोचरत्वादित्यर्थः । अविद्वत्प्रसिद्धमेव ज्ञाननाश्यत्वाभावं शास्त्रमनुवदतीत्याह **अनूद्यत इत्यादिना** विमोक्ष्यते सम्प-त्स्यत इति छान्दोग्योपनिषद्भाष्योक्तपुरुषव्यत्ययवत्या—'यावन्न विमोक्ष्येऽथ सम्प-त्स्ये' इति श्रुत्या धिया तत्त्वज्ञानेनाऽनाश्यत्वन्तावदनूद्यत एवेत्युक्त्वा पूर्वपक्षं निरा-करोति - **विरोधान्नो भयात्मतेति** - क्रियायामिव वस्तुनि विकल्पासंभवान्नो भयात्मकत्वमित्यर्थः ॥ १९२ ॥

अ० ॥ इदानीं श्रुतीनां परस्परविरोधे सति कासां चिदेव प्रामाण्यं कासां-चिदनुवादकत्वमिति यन्न्यायेन दर्शितं तत्र उभयलिंगाधिकरणतद्भाष्यार्थप्रकाशक-मधिकरणरत्नमालावाक्यं दृष्टान्तयति **ब्रह्म तदिति**—

मू ॥ ब्रह्म तद्रूपि वारूपि भवेन्नीरूपमेव वा ।
द्विविधश्रुतिसद्भावाद्ब्रह्म स्यादुभयात्मकम् ॥
नीरूपमेव वेदान्तैः प्रतिपाद्यमपूर्वतः ।
रूपि त्वनूद्यते भ्रान्तमुभयत्वं विरुध्यते ॥ १९४ ॥

व्या ॥ तदेतच्चतुष्पाद्ब्रह्मेत्यादिश्रुतयो रूपवद्ब्रह्म प्रतिपादयन्ति—'अस्थूल-मनण्वि' त्यादिश्रुतयो नीरूपं प्रतिपादयन्ति - तस्माद्वस्तुत उभयात्मकं ब्रह्मेति प्राप्ते ब्रूमः - नीरूपमेव शास्त्रप्रतिपाद्यं मानान्तरासिद्धत्वात् । जगत्कर्तृत्वादिरूप-युक्तं तु ब्रह्म—'क्षित्यादिकं कर्तृजन्यं कार्यत्वाद्घटव' दित्यनुमानेनावगम्यमानमुपा-सनार्थमनूद्यते - न तु तात्पर्येण प्रतिपाद्यते - नचैकस्मिन् वस्तुनि शास्त्रानुमाना-भ्यां सरूपत्वनीरूपत्वयोस्सिद्धिः विरुद्धत्वात् - तस्मादतात्पर्यविषयस्य सरूपस्य भ्रमविषयत्वं वस्तुतो नीरूपमेव ब्रह्म प्रमाणसिद्धमित्यर्थः ॥ १९४ ॥

अ० ॥ यः पुनरेतां विभागेन श्रुतिप्रामाण्यव्यवस्थामुल्लङ्घ्य श्रद्धाऽभास-वशात् जगतः कर्मजत्वं न मुञ्चति तस्य सदृष्टान्तं हानिं दर्शयति **यावज्जी-वेति**—

मू ॥ यावज्जीवविधिश्रुतौ परवशात् कर्मानुतिष्ठन्यति-
भ्रष्टो यद्वदपूर्वजं जगदिदं नाज्ञानमात्रोद्भवम् ।
एवं यो रमणीयकर्मनिगमे श्रद्धापरस्सोऽद्वयो-
ऽस्म्येवं ज्ञोऽप्यनुभूतितो विरहितो मोहस्य सीमा कुतः ॥१९५॥

व्या ॥ यथा कश्चित् सन्यासी श्रद्धाभासवशात् अग्निहोत्रादिकरणे स्वाश्रमात् भ्रष्टुतो भवेदेवमेव यस्तत्त्वजिज्ञासुः 'रमणीयचरणा रमणीयां योनिमापद्यन्त' इत्यादिश्रुतौ श्रद्दधानस्सन्निखिलं जगन्मायिना महेश्वरेणापेक्षितकर्मजन्यमेव भवितुमर्हतीति–न स्वात्माज्ञानमात्रजन्यमिति जानाति स तु यत्तत्वंपदलक्ष्यार्थभूतं निरुपाधिकचैतन्यं तद्ब्रह्मैवाहमस्मि उभयोश्चिद्रूपत्वाविशेषादिति स्वात्मानमद्वितीयतया जानन्नपि स्वप्नवत् सर्वस्य द्वैतजातस्य स्वस्मिन्नेव स्वेन स्वाज्ञानमात्रेणाध्यस्तत्वानवगमे सति चतुर्थनिरूपणोक्तप्रकारेण प्रयत्नज्ञानजन्यत्वेन सत्यत्वनिश्चये च सति स्वात्मनोऽद्वितीयत्वानुभवविकलो भवेत् ।

ननु, तत्त्वंपदलक्ष्यैक्यज्ञानानन्तरमपि कर्मजन्यत्वबुद्धिर्जगति कुतो भवेदित्याशङ्क्य 'मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् । मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहं' मित्यादिश्रुत्युक्तप्रकारेण स्वात्मनो जगत्कारणत्वतत्पदवाच्यत्वापरोक्षब्रह्मत्वज्ञानाभावेन तत्तद्विषयकावरणस्य विद्यमानत्वात् ततोऽप्यधिकभ्रमो भवेदित्याह— **मोहस्य सीमा कुत इति** ॥ १९५ ॥

अ० ॥ एवं निखिलस्य जगतः कर्मजन्याभावे सति केवलाविद्यकत्ववेदनफलमाह—**एवमिति** ॥

मू ॥ एवं श्रुत्या च सत्यस्य स्वगतादेर्निषेधतः ।
सजातीयविहीनत्वाच्चाद्वैतं प्रत्यगीरितम् ॥ १९६ ॥

व्या ॥ **एवमिति** पूर्वोक्तप्रकारेण **श्रुत्या** कौषीतक्याद्यागमेन चकारात् प्रागुक्तब्रह्मादिवचनदृष्टान्तानुमानैश्च जगतः केवलाविद्यकत्वाङ्गीकारे चतुर्थनिरूपणोक्तप्रकारेण प्रयत्नज्ञानजन्यत्वेन ज्ञानेनानिवर्तनीयस्य **सत्यस्य स्वगतादेः** । स्वगतं प्रत्यगात्मगतं शरीरादिकमादिर्यस्य शरीरारम्भकत्वेन लिङ्गादीनां अपूर्वं विधिनियमविधित्वमङ्गीकुर्वाद्भिः प्रतिकर्मव्यवस्थादिभिरभ्युपेतस्यापूर्वस्य तत्स्वगतादितस्य निषेधात् प्रागुक्तश्रुत्यनुमानादिभिर्बाधितत्वादात्मा तावद्द्वितीयो भवेत्॥

ननु केवलाविद्यकत्वेन मिथ्याभूतैः शरीरादिभिः स्वात्मनः पारमार्थिकपरिच्छेदाभावेऽपि परमार्थभूतैरात्मान्तरैः पारमार्थिकपरिच्छेदः किं न स्यादिति प्राप्ते—'एको देवस्सर्वभूतेषु गूढ' इत्यादिश्रुतिभिरात्मान्तराभावावगमाम्मैवमित्याह—**सजातीयविहीनत्वाच्चाद्वैतः प्रत्यगीरितमिति**॥

अ० ॥ एवं निखिलस्य जगतः केवलाविद्यकत्वमुपदिश्य शिष्याणां स्वोपदिष्टशास्त्रश्रवणादिजन्यनिश्चयजिज्ञासवे श्रीमच्चन्द्रिकाचार्याय कश्चिच्छिष्यस्स्वाभिप्रायं सदृष्टान्तमावेदयति—**श्रुतेनेति**—

मू॥ श्रुतेनानेन वो जातं निश्चयं ज्ञापयन्तु नः।
इति चेत्करुणासिन्धो वक्ष्ये भवदनुग्रहात् ॥ १९७ ॥
गौरीशस्य हरेर्यथा वपुरदो धर्मं विनाऽविद्यया-
ऽध्यस्तं चेति पुराणवेदवचनैः प्रोक्तं तथा मे वपुः ॥
स्थूलं सूक्ष्ममिदं जगच्च सकलं मेऽविद्ययैवाभव-
त्सुप्तावप्ययदर्शनादितरथा वेदो न मानं गुरो ॥ १९८ ॥

व्या० ॥ पूर्वश्लोकस्तु स्पष्टार्थः ॥ **गौरीशस्येति** श्लो० ॥ विचार्यमाणे तव यच्छरीरमाधारतां वै जगतामुपैति। तदप्यवश्यं मदविद्ययैव पूर्णश्चिदानन्दमयो यतस्त्वम्। किञ्चिद्दलं वा चुलकोदकं वा यत्त्वं महेश प्रतिगृह्य धत्से। त्रैलोक्यलक्ष्मीमपि तज्जनेभ्यस्सर्वन्त्वविधाकृतमेव मन्ये ॥ इत्यादिप्रागुक्तशिवगीतावचनैः 'इन्द्रो मायाभिः पुरुरूप ईयत' इत्यादिवेदवचनैश्च यथा न शिवकेशवयोश्शरीरं कर्मायत्तं किंत्वज्ञानमात्रेणारोपितमित्युक्तं तथैव मम स्थूलशरीरादिरूपं निखिलं जगद्भवितुमर्हतीत्युक्त्वा तत्र स्वानुभवमाह—**सुप्तावप्ययदर्शनादिति** अन्यथा सौषुप्तिकप्राज्ञाज्जगदुत्पत्त्यादिपरश्रुतेरप्राप्ताण्यं स्यादित्याह—**इतरथेत्यादिना** ॥

अ० ॥ ननु जगत अविद्योपाधिकप्राज्ञपरिकल्पितत्वे आधिदैविकस्य परमेश्वरस्य कर्मफलदातृत्वपराणामन्नादो वसुदान इत्यादिशास्त्राणां का गतिरिति परीक्षयन्तमाचार्यं प्रत्यपरे शिष्या आहुः **यो द्वैतीति**—

यो द्वैती तस्य दातृश्रुतिविधिवचसां स्वार्थवत्त्वं यदिष्टं
तच्छुद्धाद्वैतिनां नो न भवति जगतो ज्ञानमात्रेण नाशात्।
एवं स्वामिन्बुधानां प्रवचनबलतो दुर्लभं तत्वबोधं
सम्यग्लब्ध्वा वयं त्वन्निरवधिकृपया नष्टमोहाः कृतार्थाः ॥१९९॥

व्या ॥ दातृश्रुतिविधिवचसां फलदातृपरा अन्नादो वसुदान इति श्रुतिश्च यजेतेत्यादिवचांसि च दातृश्रुतिविधिवचांसि तेषां दातृश्रुतिविधिवचसां **त्वन्निरवधिकृपयेति** तव निरवधिकृपा त्वन्निरवधिकृपा तयेत्यर्थः ॥ १९९ ॥

अ० ॥ ननु द्वैतिनामद्वैत्येकदेशिभूतप्रातिकर्मव्यवस्थावादिनां च अभिमत-तत्तत्कर्मजन्यपरलोकानभ्युपगमे । श्रु० ॥ अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते म इति श्रुत्युक्तनास्तिकत्वमेव भवतामापतेदिति परीक्षयन्तं स्वाचार्यं प्रति—

द्वैतिनां प्रातिकर्मव्यवस्थावादिनां च मध्ये ये त्वैहिकमात्रस्यास्तित्ववादिनः तेषामेव तद्दोषापत्तिः नास्माकमद्वैतिनां नेह नानास्ति किञ्चनेत्यादि श्रुत्या स्वात्मनि सर्वेषामसत्वोपदेशात् ।

तथा हि यतः तत्कर्मफलस्य ऐहिकामुष्मिकमनुष्यदेवादिशरीरस्य संप्रदाता परमेश्वर एवेति निश्चयेनेश्वरोपासकं स्वात्मेश्वरफलानां भेददर्शिनं ॥ श्रु० ॥ अथ योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुः— उदरमन्तरं कुरुते अथ तस्य भयं भवतीत्यादिशास्त्रैः प्रदूष्य च ।

यतः कर्मापेक्षपरमेश्वरे जगत्प्रकृतित्वप्रयुक्तब्रह्मत्ववेदननिषेधपूर्वकं । श्रु० ॥ यन्मनसा न मनुते येनाहुर्मनो मतम् । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत इति श्रुत्या स्वस्यैव वेदितुर्जगदुपादानत्वेनाद्वितीयब्रह्मत्वं विधीयते अतः परलोकादेः कर्मापेक्षपरमेश्वरप्रकृतिकत्वं विना अस्मदुक्तप्रकारेण स्वाविद्यकत्वाभावे ज्ञाननिवर्त्यत्वरूपमिथ्यात्वासंभवात् कथं तच्छ्रुतिविहितं जगदुपादानत्वेन अद्वितीयब्रह्मत्वं स्वात्मनो घटेत अतोऽस्माकमद्वैतिनां तद्दूषणं दूरतोऽपास्तामिति निवेदयन्ति **कर्मेवेति**—

मू ॥ कर्मैव फलदं यद्वा कर्माराधित ईश्वरः ।
अपूर्वावान्तरद्वारा कर्मणः फलदातृता ॥
नाचेतनात्फलासूतेश्शास्त्रीयात्पूजितेश्वरात् ।
कालान्तरे फलोत्पत्तेर्नापूर्वपरिकल्पना ॥

इत्युक्तप्रातिकर्माख्यव्यवस्थायां च यो वसेत् ।
तथैव द्वैतवादे च यो रागी निवसेत्पुनः ॥
तं तं ह्यनेन वाक्येन न स वेद यथा पशुः ।
स्वभिन्नां देवतां यस्तूपास्ते चेति प्रदूष्य च ॥
ह्यन्मतं येन तद्विद्धि नेदं तद्यदुपासते ।
इति श्रुत्योपदिष्टत्वात्स्वाज्ञानेन विजृम्भितम् ॥
जगन्मिथ्येति निश्चिन्मस्त्यजामस्सत्यताभ्रमम् ॥ २०४॥ ॥

व्या ॥ केषाञ्चिदधिकरणसिद्धान्तानां परमतानुसारित्वप्रदर्शनाय धर्मे जैमिनिरत एव पूर्वन्तु बादरायणो हेतुव्यपदेशादित्यधिकरणार्थसंङ्गाहकाधिकरणरत्नमालां दर्शयति **कर्मेवेति** तदधिकरणसिद्धान्तं दर्शयति **इत्युक्तेति** तदूषकमथ योऽन्यामित्यादिशास्त्रं संगृह्णाति तं तमित्यादिना तच्छ्रुत्यदूषितेन मुख्येनाधिकारिणा कर्तव्यविधायकं यन्मनसा न मनुते येनाहुर्मनो मतमित्यादिशास्त्रं सङ्गृह्णाति **ह्यन्मतमित्यादिना** फलितमाह इतीत्यादिना ॥ २०४॥ ॥

इति श्रीपरमहंसपरिव्राजकाचार्यरामब्रह्मश्रीकृष्णानन्देन्द्रभगवत्पादशिष्य-
श्रीमच्चन्द्रिकाचार्याख्ययतीश्वरविरचितायामद्वैतरसझरीनामक-
व्याख्यानोपेतायामद्वैतसिद्धान्तगुरुचन्द्रिकायां पञ्चमं
वाच्यार्थैक्यानुकूलं जगन्मिथ्यात्वनिरूपणम् ।
संपूर्णम् ।

ब्रह्मैवाहमस्मि ।
॥ **ओं तत्सत्** ॥

॥ हरिः ओम् ॥

अद्वैतसिद्धान्तगुरुचन्द्रिकायां

षष्ठं दृष्टिसृष्टिनिरूपणमारभ्यते ।

व्या ॥ विषयं विना भ्रमरूपदृष्टिमात्रस्य सृष्टिरिति निरूपणमित्यर्थः ॥

अ० ॥ इदानीं प्राक्प्रथमनिरूपणारम्भे ध्यात्मकं जगदिति भातीति षष्ठाभिप्रायमावेद्य तद्विशेषाञ्छाधि नो गुरविति शिष्यैः परिपृष्टषष्ठाभिप्रायविशेषान्वक्तुकामः तद्विशेषबोधार्थं स्वाचार्यं नमस्करोति **आद्यमिति**—

मू ॥ आद्यं श्रीसद्गुरुं रामब्रह्माख्यं ब्रह्मनिष्ठकं ।
प्रणम्य तत्प्रसादेन दृष्टिभेदो निरूप्यते ॥ १ ॥

व्या ॥ एतदाचार्यमहिमा तावत्प्राक्प्रथमनिरूपणेऽष्टमश्लोकतद्व्याख्यानाभ्यां प्रदर्शितः ॥ १ ॥

अ० ॥ इदानीं प्राक् यत्षष्ठं तात्पर्यं शिष्यैरावेदितं तत् पञ्चमनिरूपणे निरूपितकौषीतक्यादिश्रुतिसम्मतमित्याह **पूर्वमिति**—

मू ॥ पूर्वं भवद्भिर्यत्प्रोक्तं निखिलं ध्यात्मकं जगत् ।
इति तत्तु सुषुप्त्यादौ जगन्नाशश्रुतेर्मतम् ॥ २ ॥

व्या ॥ स्पष्टोऽर्थः ॥ २ ॥

अ० ॥ जगतो वृत्तिव्यतिरेकेणासत्वेऽस्मदभिप्रेतदृष्टान्तानादानात् नास्मदाचार्येण तत्सम्यगभिप्रेतामिति संशयाच्छिष्याश्चोदयन्ति **सुप्त इति**—

मू ॥ सुप्ते लयस्य जगतः प्रबुद्धात्सर्जनस्य च ।
श्रौतत्वेऽपि कथं सिध्येत् सर्वस्य ध्यात्मता यदि ॥ ३ ॥

व्या ॥ सुप्त इति सौषुप्ते जीवे जगतः प्रविलयस्य च जाग्रदवस्थापन्नाज्जीवाज्जगत्सर्जनस्य च 'यदा सुप्तस्स्वप्नं न कञ्चन पश्यत्यथास्मिन् प्राण एवैकधा भवति तदैनं वाक् सर्वैर्नामभिस्सहाप्येति चक्षुस्सर्वै रूपैस्सहाप्येति श्रोत्रं सर्वै-

शब्दैस्सहाप्येति मनस्सवैर्ध्यानैस्सहाप्येति स यदा प्रतिबुध्यते–'यथाग्नेर्ज्वलतस्सर्वा दिशो विष्फुलिंगा विप्रतिष्ठेरन् एवमेवैतस्मादात्मनस्सर्वे प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोका'इति कौषीतक्यादिश्रुत्युक्तत्वेऽपि वृत्तिरूपता कथं सिद्धयेदिति चोद्यमनुवदति **यदीति** ॥ ३ ॥

अ० ॥ इदानीं जगतो दृष्टिमात्रत्वे-सुषुप्तिकाले सकले विलीने तमोऽभिभूतः सुखरूपमेति । पुनश्च जन्मान्तरकर्मयोगात्स एव जीवस्त्वपिति प्रबुद्ध इत्यादिश्रुतिं तदनुगुणदृष्टान्तञ्च प्रमाणयति **सुप्तीति**—

मू ॥ सुप्तिकाले विलीनस्य सर्वस्य प्रत्ययात्मता ।
सुप्तौ सुखात्मको जीवः पुनर्जन्मान्तरोद्भवात् ॥
दर्शनादिक्रियायोगात्प्रबुद्धश्चेति वेदतः ।
सिद्धाऽन्यथोत्थितस्यास्य विषयोपेततां वदेत् ॥
सुप्तौ स्वाप्नस्य लीनत्वाद्धत्यात्मकत्वं यथा तथा ।
अस्यापि तत्त्व लीनत्वाद्धत्यात्मकत्वं भवेत्किल ॥ ६ ॥

व्या ॥ सकले विलीन इति श्रुत्युक्तसकलशब्देन बाह्यविषयशून्यप्रत्ययातिरेकेण सेन्द्रियं सविषयं प्रत्ययजातं चेद्विवक्षितं तदा तच्छ्रुत्युत्तरार्धेन सुप्तौ विलीनस्य सर्वशब्दार्थस्य जीवात् पुनरुत्पन्नस्य प्रबोधत्वं पुनश्च जन्मान्तरकर्मयोगात् स एव जीवस्त्वपिति प्रबुद्ध इति नोच्येत किन्तु स एव जीवो विषयादिवद्ध इति वाचारम्भणश्रुतिविरुद्धमेवोच्येत न तथेत्युक्त्वा - दृष्टान्तञ्च दर्शयति–सुप्ताविति आदिना **अस्यापीति** जाग्रत्कालिकस्य जगतः - **तत्वेति** सुषुप्ताविति अर्थः॥ शेषस्सुगमः ॥ ६ ॥

अ० ॥ इदानीं किलशब्देन विवक्षितां प्रसिद्धिं दर्शयति **यत इति**—

मू ॥ यतः कोशे विनाशस्स्याददर्शनमितीरितम् ।
अतो दृष्ट्यात्मिका सृष्टिर्दृष्टिसृष्टिरितीर्यते ॥ ७ ॥

व्या ॥ यत इति यस्मादमरकोशे–विनाशस्स्याददर्शनमिति विनाशादर्शनशब्दयोः पर्यायत्वमुक्तमतस्तत्प्रतिद्वन्द्वित्वेन सृष्टिदर्शनशब्दयोरपि पर्यायवादगमात् दृष्टिरूपा सृष्टिः अथवादृष्टेस्सृष्टिर्दृष्टिसृष्टिरित्युच्यत इत्यर्थः ॥ ७ ॥

अ० ॥ इदानीं प्रतिज्ञातार्थे स्मृतिसम्मतिं दर्शयति **ज्ञानेनेति**—

मू ॥ ज्ञानस्वरूपमेवाहुर्जगदेतद्विचक्षणाः ।
अर्थस्वरूपं भ्राम्यन्तः पश्यन्त्यन्ये कुदृष्टयः ॥ ८ ॥

व्या ॥ **जगदेतदिति** स्वाप्निकवस्तुवत्स्वापरोक्षभूतमेतज्जगत्–ज्ञानस्वरूपमेव ज्ञानस्य भ्रमप्रत्ययस्य स्वरूपमेव स्वरूपं यस्य जगतस्तत् ज्ञानस्वरूपं तदित्येवाहुरित्येवकारेण आह—विचक्षणा इति वाचारम्भणादिश्रुत्यनुसारेण जगत्तत्वनिर्णयकुशला इत्युक्त्वा एवकारेण व्यावर्त्यं मतं दर्शयति–**अर्थस्वरूपमिति** प्रागुक्तभ्रमज्ञानातिरिक्तो व्यावहारिकसत्ताकः प्रातिभासिकसत्ताको वाऽर्थः वाच्यः स्वरूपं स्वभावो यस्य विज्ञेयस्य जगतः तत् अर्थस्वरूपमिति पश्यन्त्यन्य इत्युक्त्वा तान् सुषुप्तौ जगतो लयादिप्रतिपादकशास्त्राभिप्रेतस्वप्राख्यप्रत्ययनिदर्शनानभिज्ञात्वेन दूषयति भ्राम्यन्तः कुदृष्टय इति पदद्वयेन ॥ ८ ॥

अ० ॥ इदानीमाचार्यः प्राक् शिष्यैः परिपृष्टधीविशेषं विभजते **तद्विशेषानिति**—

मू ॥ तद्विशेषान्भवत्पृष्टान्सङ्ग्रहेण वदामि वः ।
पक्षभेदेन संप्रोक्ताऽज्ञानानामनुरूपतः ॥
भ्रमः प्रमा त्रिधा ज्ञेयः क्रमशश्च कथं यदि ॥ ९॥ ॥

व्या ॥ प्राक् द्वितीयनिरूपणे प्रथमप्रदर्शके मतभेदेन प्रदर्शितानामज्ञानानां स्वरूपानुगुण्येन तत्कार्यमपि भ्रमादिकं क्रमात्त्रिप्रकारं ज्ञेयमित्यर्थः ॥ कथं यदीत्युत्तरेण सम्बन्धः ॥ ९॥ ॥

अ० ॥ त्रिप्रकारेषूत्तमं प्रथमपक्षं दर्शयति **ज्ञानस्येति**—

मू ॥ ज्ञानस्य प्रागभावेनाज्ञानेनात्माऽन्यथा स्फुरन् ॥
भ्रमः—प्रमा विचारस्सन्यथावत्प्रस्फुरन् स्वतः ॥ १०॥ ॥

व्या ॥ प्रथमपक्षाभिमताज्ञानसाहचर्येण यः स्वयमन्यथा प्रकाशमानो भ्रमशब्दवाच्यो भवति । स एवात्मा 'नेह नानास्ति किञ्चने' त्यादिशास्त्रार्थविचारभावमापन्नस्सन् अद्वितीयतया प्रकाशमानप्रमाशब्दवाच्यश्च भवेदित्यर्थः ॥ १०॥ ॥

अ० ॥ उक्तमेवार्थं दृष्टान्तेन स्फुटयति **विचारादिति**—

मू ॥ विचाराद्विचाराच्च देहात्मप्रत्ययो यथा ॥

भ्रमत्वेन प्रमात्वेन तथा स्वात्मा विभासते ।
अविचाराद्विचाराच्च भ्रमत्वेन प्रमात्वतः ॥ १२ ॥

व्या ॥ यथा च देहात्मप्रत्ययः कदाचित्कर्मविधिश्रवणात् प्रमेति भाति स्वरूपविचाराद्भ्रमो भवतीत्युक्त्वा तद्वयुत्क्रमेण दार्ष्टान्तिकमाह **अविचारादित्यादिना** ॥ १२ ॥

अ० ॥ तत्र किञ्चिच्चोद्यमनूद्य परिहरति **भ्रमादेरिति**--

मू ॥ भ्रमादेरात्मरूपत्वे जातत्वाच्छ्रवणादितः ।
अनित्यत्वं स्वात्मनश्चेद्भ्रमत्वादेर्निवर्तने ॥
शिखित्वापगमे चैत्रो यथाऽऽत्मा शिष्यते तथा ॥ १३॥ ॥

व्या ॥ स्पष्टोऽर्थः ॥ १३ ॥

अ० ॥ इदानीं द्वितीयपक्षं दर्शयति ॥ **अज्ञानस्येति**--

मू ॥ अज्ञानस्यात्मशक्तित्वे गुणभूतो भ्रमादिकः ॥ १४ ॥

व्या ॥ भ्रमः आदिर्यस्य प्रमात्मकबोधस्य स भ्रमादिकः ॥ १४॥

अ० ॥ तृतीयपक्षं दर्शयति मायाया इति--

मू ॥ मायाया द्रव्यरूपत्वे द्रव्यरूपो भ्रमादिकः ॥ १४॥ ॥

व्या ॥ मायायाः परिणामिकारणद्रव्यत्वे तद्विकारो भ्रमादिप्रत्ययो द्रव्यरूप इत्यर्थः ॥ १४॥ ॥

अ० ॥ संप्रति पक्षत्रयेऽपि ज्ञानादेः किमेकैव सत्ता अथवा नानेत्यत आह **स्वात्मसत्तेति**--

मू ॥ स्वात्मसत्तैकसत्ताक आद्यपक्षे भ्रमादिकः ॥
प्रातिभासिकसत्ताकः पक्षयोरन्ययोर्भवेत् ॥ १५॥ ॥

व्या ॥ कार्यकारणयोरेकसत्तापक्षे कार्यस्य स्वतः सत्ताराहित्येन स्वात्मसत्तामात्रसत्ताको भ्रमादिः अन्यपक्षद्वयेऽपि आविद्यकत्वेन प्रातिभासिक इत्यर्थः ॥

अ० ॥ इदानीं यत्प्रतिपादितं जगतो दृष्ट्यात्मकत्वं तत्र विवदमानमद्वैतिनं प्रति श्रीगौडपादाचार्यसम्मतिं दर्शयति **स्वप्नदृगिति**--

मू ॥ स्वप्नदृक्चित्तदृश्यास्ते न विद्यन्ते ततः पृथक् ॥
जाग्रच्चित्तेक्षणीयास्ते न विद्यन्ते ततः पृथक् ।
इत्येवं दर्शनादन्यनिषेधाद्दर्शनं जगत् ॥ १७ ॥

व्या ॥ स्पष्टोऽर्थः ॥ १७ ॥

अ० ॥ यथा सुषुप्तौ सर्ववृत्तिविरतौ जगतो विलयः सर्ववृत्त्युत्पत्तौ जन्मचावगम्यते तामेव 'यदा सुप्तस्स्वप्नं न कञ्चन पश्यत्यथास्मिन्प्राण एवैकधा भवति तदैनं वाक् सर्वैर्नामभिस्सहाप्येति चक्षुस्सर्वै रूपैस्सहाप्येति श्रोत्रं सर्वैश्शब्दैस्सहाप्येति मनस्सर्वैर्ध्यानैस्सहाप्येति स यदा प्रतिबुद्ध्यते इत्यारभ्य—एतस्मादात्मनस्सर्वे प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोका इति कौषीतक्यादिश्रुतिं दृष्टान्तमनुमानञ्च जगतो दृष्टिरूपत्वे प्रमाणयति **नियमेनेति**—

मू ॥ नियमेन मृदस्सत्ता ज्ञानपूर्वं घटस्य तु ।
सत्वोपलब्धिमत्वेन मृदभिन्नो घटो यथा ॥
सुप्तिं दृष्ट्वा जगद्धानेः प्रबोधं च जगज्जनेः ।
यदा सुप्त इति श्रुत्या प्रोक्तत्वाद्दृष्टिमात्रकम् ॥ १९ ॥

व्या ॥ विमतो घटः—मृदभिन्नो भवितुमर्हति । मृत्सत्वोपलब्धिपूर्वकं नियतसत्वोपलब्धिमत्वात्—मृद्वदित्यनुमानेन यथा घटस्य मृदभिन्नत्वं तथा दृष्टिसत्वोपलब्धिपूर्वकं नियतसत्वोपलब्धिमत्वाज्जगतो दृष्ट्यभिन्नत्वं सिद्धम् ॥

एवमेव ह्येतच्छ्रुत्यर्थो वक्ष्यमाणाधिकरणतद्भाष्याभ्यामवगम्यते-तथाहि तृतीयाध्यायस्य तत्त्वंपदयोरेकार्थत्वपरे द्वितीयपादे सौषुप्तप्राज्ञबोधकस्य द्वितीयाधिकरणस्य 'तदभावो नाडीषु तच्छ्रुतेरात्मनि चेति सूत्रेण तदीयाभ्यां सर्वत्र च विशेषविज्ञानोपरमलक्षणं सुषुप्तं न विशिष्यते—तस्मादेकार्थत्वान्नाड्यादीनां विकल्पेन कदाचित् किञ्चित् स्थानं स्वापायोपसर्पतीत्येवं प्राप्ते प्रतिपद्यते—**तदभावो नाडीष्वात्मनि चेति** तदभाव इति तस्य प्रकृतस्य स्वप्नदर्शनस्याभावः सुषुप्तमित्यर्थः—नाडीष्वात्मनि चेति समुच्चयेन एतानि नाड्यादीनि स्वापायोपैति न विकल्पेनेत्यर्थः ॥ कुतः तच्छ्रुतेः तथाहि सर्वेषामेव नाड्यादीनां तत्र तत्र सुषुप्तिस्थानत्वं श्रूयते—तच्च समुच्चये सङ्गृहीतं भवति विकल्पे ह्येषां पक्षे बाधस्स्यादिति

पूर्वपक्षसिद्धान्तभाष्याभ्यां च सुषुप्तिशब्दवाच्यस्य जाग्रत्स्वप्नकालिकसर्वप्रत्ययप्रविलयत्वेनावगतत्वात् तदधिकरणं स्वात्मभूतः प्राज्ञ एवेत्यादिश्य ।

तत्रोपपत्तिपरेणाप्यनेन 'अतः प्रबोधोऽस्मादिति' सूत्रेण–तदीयेनानेन–यस्मादात्मैव सुषुप्तिस्थानमत एव कारणात् नित्यवदेवास्मादात्मनः प्रबोधः स्वाधिकारे शिष्यते कुत एतदागादिति प्रश्नस्य प्रतिवचनावसरे–'यथाग्नेः क्षुद्रा विष्फुलिङ्गा व्युच्चरन्त्येवमेवैतस्मादात्मनस्सर्वे प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोका' इत्यनेनेति भाष्येण च तद्वतप्रबोधपदेन च उदाहृतप्रतिवचनश्रुतिगतेन्द्रियं–देव–तल्लोकशब्दानां दृष्टिपरत्वमवगम्यते–तत्कुतः–कुत्रायं जीवो **विज्ञानमयो** द्वैतभ्रमाभावरूपं यथा स्यात्तथाऽशयिष्टेति बोधको यः–क्व वा एतद्बालाके पुरुषोऽशयिष्टेति प्रश्नः–यश्च कुत्र च स्वपरमात्मनोर्भेदभ्रमाभावरूपं यथा स्यात्तथाऽभूदिति बोधकः–क्व वा एतदभूदित्यपरः प्रश्नः–यश्च कस्मात् स्वपरमात्मनोरैक्यभ्रंशात्मकभेदभ्रमरूपं यथा स्यात्तथा आगादिति बोधकः–कुतः एतदागादिति प्रश्नः तत्प्रश्नत्रयानुसारिप्रतिवचनगतत्वात् । अन्यथा 'तदभावो नाडीषु तच्छ्रुतेरात्मनि चे' ति सूत्रेण प्राक् प्रतिज्ञातो य आत्मनि सर्ववृत्तिविलयस्तद्विषये–अतः प्रबोधोऽस्मादिति सूत्रतन्मूलश्रुत्योरुपपत्तिपरत्वं च–स्वमपीतो भवति–प्राग्स्वाप्समिति च श्रुतिप्रत्यभिज्ञागोचरस्य विज्ञानमयस्य सदाख्यसौषुप्तानन्दमयतत्वानन्यत्वात् विभुत्वादनादित्वाच्च स्वात्मनि जायमानद्वैतभ्रमलयोत्पत्त्यतिरेकेण क्वचिदपि लयात्मकशयनस्य कुतश्चिदुत्पत्त्यात्मकागमनस्य च अभावावेदनपूर्वकं ब्रह्मत्वविज्ञापकत्वञ्च तत्प्रतिवचनश्रुतेरुपरुध्येत अतस्तत्परिहाराय च ।

दर्शनं सृष्टिरदर्शनं लय इति दृष्टिसृष्टिपक्षः एतत्प्रतिवचनभूतकौषीतकीश्रुत्यभिप्रेत इति वक्ष्यमाणयोः देवताधिकरणजगद्वाचित्वाधिकरणभाष्यार्थप्रकाशकरामानन्दीययोः प्रामाण्याय च जगतो दृष्ट्यात्मकत्वमास्थेयम् ॥ १९ ॥

अ० ॥ एवं जगतो दृष्टिरूपत्वे श्रुतिसूत्रभाष्यैरनुगृहीतमनुमानमुक्त्वा तत्र तथाविधमेव अनुमानान्तरमाह–**जगदिति**—

मू ॥ जगद्दृष्ट्यात्मकं दृष्टिगम्यत्वादृष्टिवद्यथा ।
शब्दगम्यत्वतश्शब्दरूपं सर्वं च शब्दवत् ॥ २० ॥

व्या ॥ अनुव्यवसायग्राह्यदृष्टिनिदर्शनेन दृष्टिग्राह्यस्य जगतो दृष्ट्यात्मकत्वं प्रसाध्य तत्र 'वाचाऽऽरम्भणं विकारो नामधेय' मिति श्रुत्यादिष्टं जगतो ग्राह-

कान्तरात्मकत्वानुमानं निदर्शयति–**यथेत्यादिना** यथा सर्वं जगत् सर्वशब्दात्मकं भवितुमर्हति । सर्वशब्देन व्यवह्रियमाणत्वात्सर्वशब्दवत्–यथा सर्वमित्युवाचेत्यत्र सर्वशब्दस्य सर्वशब्देनैव व्यवह्रियमाणत्वात् तदभिन्नत्वं तद्वदित्यास्थेयम् ॥२०॥

अ॰ ॥ अधुना–'स्वापप्रबोधयोश्च प्रलयप्रभवौ हि श्रूयेते–' 'यदा सुप्तस्स्वप्नं न कञ्चन पश्यतीत्यादिनेति–देवताधिकरणभाष्यतन्मूलकौषीतक्यादिश्रुत्योः उपपादितार्थपरत्वे व्याख्यातृसम्मतिं दर्शयति–**श्रुतीति**—

मू॰ ॥ श्रुतितद्भाष्ययोरर्थो रामानन्दयतीश्वरैः ।
स्वप्नवत्कल्पितस्यास्याज्ञाततायाः अभावतः ॥
दर्शनादर्शने सृष्टिविलयाविति दर्शितौ ॥ २१॥ ॥

व्या॰ ॥ **अस्येति** जगत इत्यर्थः ॥ शेषस्सुगमः ॥ २१॥ ॥

ननु प्राक् सप्तमश्लोकोदाहृतेन–विनाशस्स्यादददर्शनमित्यमरवचनेन अधुनोदाहृतेन दर्शनं सृष्टिरदर्शनं लय इति रामानन्दीयेन सूत्रभाष्यव्याख्यानेन च दर्शितविनाशलयशब्दसमानेन अदर्शनमिति शब्देन दर्शनप्रध्वंसस्य दृष्टिरूपजगल्लयत्वस्वीकारात् तदानुगुण्येन दर्शनस्योत्पत्तिरेव सृष्टिरिति वक्तव्ये सति दर्शनं सृष्टिरिति कथमुक्तमिति चेदुच्यते ।

दर्शनतद्ध्वंसयोर्यथा कालतो व्यवधानमस्ति तथा दर्शनतदुत्पत्त्योः कालतो व्यवधानाभावात्तथोक्तम् ।

अन्यथा चैत्रो गच्छतीत्यत्र गतिक्रियायाः चैत्राश्रयत्ववत् दर्शनं जायत इति व्यवहाराद्दृष्टृधर्मस्य दर्शनस्य जनिक्रियाश्रयत्वसिद्ध्यर्थं जनिक्रियायाः प्रागेव दर्शनस्वरूपसिद्धौ पश्चात् तस्य जनिरेव न स्यात् ।

अतो दर्शनं नश्यतीत्यत्र दर्शनप्रध्वंसस्येव दर्शनोत्पत्तेरपि द्रष्टाश्रितत्वमङ्गीकर्तव्यम् ।

अन्यथा दर्शनजनिः दर्शननिष्ठा–दर्शननाशस्तु द्रष्टृनिष्ठ इति विप्रतिषिद्धम् ।

अतः सोऽकामयतेत्युपक्रम्य सच्च त्यच्चाभवत् अधिष्ठानावशेषो हि नाशः कल्पितवस्तुनः विकाराणां प्रकृतिभावापत्तिर्लयः तद्दर्शनोत्पत्तिः तद्दर्शनाभिन्ना तद्दर्शनकालमात्रकालिकत्वात् तद्दर्शनवदिति श्रुतिस्मृत्यनुमानाद्यविरोधेन दर्शनं जायते नश्यतीत्यत्र द्रष्टा दर्शनरूपेण तद्विनाशाधिकरणात्मना च भवतीति सम्यगिमर्थं दर्शनं सृष्टिरदर्शनं लय इति व्यवसितम् ॥

न च तद्दर्शनसमानकालिकपुरुषान्तरदर्शने व्यभिचारइति वाच्यं रामानन्दीयदृष्टिसृष्टिवादस्य एकजीववादानुसारित्वात् ।

न चैवमपि दृष्टिसमसमया सृष्टिरिति पक्षे दृश्ये कार्ये दर्शनसमकालिकत्वस्याभ्युपगतत्वात् तत्र व्यभिचार इति वाच्यं दृष्टिरेव सृष्टिरिति मतस्यैव प्रकृतत्वात् ।

तर्हि द्रष्टुरात्मनो नित्यत्वभङ्गापत्तिरिति चेत् सा तु आगेवाह त्रयोदशेन श्लोकेन द्वितीयनिरूपणे द्व्यशीत्युत्तरद्विशततमादिश्लोकतद्व्याख्यानाभ्यां च सम्यक्परिहृता ।

अ० ॥ तर्हि किमर्थं 'नाभाव उपलब्धे' रित्यादिसूत्रैः दृष्टिव्यतिरिक्तोऽर्थो व्यवस्थापित इत्यत आह । **वितण्डयेति**—

मू ॥ वितण्डयैव बाह्यार्थस्सूत्रकारैः प्रदर्शितः ।
बौद्धशास्त्रे त्वरुचये क्षणिकात्मभ्रमोऽन्यथा ॥ २२॥॥

व्या ॥ भवेदिति शेषः ॥ २२॥ ॥

अ० ॥ तदधिकरणस्य ब्रह्मसूत्रे द्वितीयाध्यायगतद्वितीयपादान्तर्गतत्वेन तत्र सूत्रकारादीनां वितण्डावादित्वं दर्शयति **सर्वथेति**—

मू ॥ सर्वथाऽनुपपत्तेश्चेत्यस्य सूत्रस्य वै पुनः ॥
वृत्तिकारैस्तथा भाष्यकारैरपि मुमुक्षुणा ।
बौद्धशास्त्रोक्तसिद्धान्तस्यार्थतोऽनुपपत्तितः ॥
पश्यन्नातिष्ठतेत्यादेरपशब्दस्य कीर्तनात् ।
ग्रन्थतोऽनुपपत्तेश्च न ग्राह्यं सौगतं मतम् ॥
इति तत्राप्रवेशार्थमपशब्दः प्रदर्शितः ।
इति निश्चीयते यस्मान्न बाह्यार्थस्य साधकः ॥
सुशब्दश्शशशृङ्गादिस्तस्मान्नास्य भवेदयम् ।
बाधकश्चापशब्दोऽतो वितण्डा तस्य खण्डनम् ॥ २७ ॥

व्या ॥ तत्रेति सुगताचार्यमतेऽप्रवेशार्थमेवातिष्ठदिति वक्तव्ये आतिष्ठतेत्यात्मनेपदि प्रयोगेण अपशब्दरूपो दोषो दर्शित इत्युक्त्वा तत्रोपपत्तिं दर्शयति **यस्मादित्यादिना** यस्मात् शशश्रृङ्गं गगनारविंदमित्येव रूपस्सुशब्दो न बाह्यार्थसाधको भवति–तस्मादस्य बाह्यार्थापलापस्य न तदुक्तोऽपशब्दोऽपि बाधको भवेदित्यवगमात् तन्मतखण्डनं केवलं वितण्डेति निश्चीयते ॥ २७ ॥

अ० ॥ इदानीं सौगतमतदूषणस्य वितण्डात्वज्ञापनाय उपपत्त्यन्तरमाह—अत एवेति—

मू ॥ अत एव च बौद्धैस्तु स्वप्नादिप्रत्ययो यथा ।
बाह्यार्थविकलस्तद्वत् जाग्रज्ज्ञानमितीरिते ॥
व्यासादिभिः परोक्तस्य दृष्टान्तो न निराकृतः ॥ २८॥ ॥

व्या ॥ जगतो दृष्टिमात्रत्वस्याभिप्रेतत्वादेव 'वैधर्म्याच्च न स्वप्नादिवदि'ति सूत्रतद्भाष्यकारैस्स्वप्नदृष्टान्तो न निराकृत इति ध्येयम्॥ २८॥ ॥

अ० ॥ इदानीं 'स्वप्नस्थानोऽन्तःप्रज्ञ' इत्यादिमाण्डूक्यश्रुतेः यद्येतत्—स्वप्नः स्थानमस्य तैजसस्येति स्वप्नस्थानः—जाग्रत्प्रज्ञाऽनेकसाधना बहिर्विषयेव अवभासमाना—मनस्स्पन्दनमात्रा सती तथाभूतं संस्कारं मनस्याधत्ते—तन्मनस्तथा संस्कृतं चित्तेन इव फ्लो बाह्यसाधनानपेक्षमविद्याकामकर्मभिः प्रेर्यमाणं जाग्रद्वदवभासते तथा चोक्तम् ॥ श्रु० ॥ अस्य लोकस्य सर्वावतो मात्रामपादायेति । तथा परे देवे मनस्येकीभवतीति प्रस्तुत्य - अत्रैष देवस्स्वप्ने महिमानमनुभवतीत्याथर्वणे। इन्द्रियापेक्षयाऽन्तस्थत्वान्मनसः तद्वासनारूपा च स्वप्ने प्रज्ञा यस्येति अन्तःप्रज्ञः विषयशून्यायां प्रज्ञायां केवलप्रकाशस्वरूपायां विषयित्वेन भवतीति तैजस इति विज्ञानवादवत् जाग्रत्स्वप्नप्रत्ययोरपि विषयविकलत्वपरं भाष्यमर्थतः संगृह्य जगतो दृष्टिमात्रत्वे संवादयति बाह्येति—

मू ॥ बाह्यार्थविकलाज्ञानाज्जातसंस्कारकाद्भृशम् ॥
स्वप्ने च प्रत्ययो बाह्यविकलो यः प्रजायते ।
तत्साक्षी तैजसश्चेति भाष्यादृष्टचात्मकं जगत् ॥ ३० ॥

व्या ॥ अवतरणादेव गतार्थः ॥ ३० ॥

अ० ॥ इदानीं अन्यस्तु दृष्टिरेव विश्वसृष्टिः दृश्यस्य दृष्टिभेदे प्रमाणाभावात् श्रौ० ॥ ज्ञानस्वरूपमेवाहुर्जगदेतद्विचक्षणाः । अर्थस्वरूपं भ्राम्यन्तः पश्यन्त्यन्ये कुदृष्टयः इति स्मृतेश्चेति सिद्धान्तमुक्तावल्यादिदर्शितो दृष्टिसृष्टिवाद इति-सिद्धान्तलेशसङ्ग्रहे द्वितीयपरिच्छेदवाक्यमपि सङ्गृह्य जगतो दृष्टिमात्ररूपत्वे प्रमाणयति मुक्तावलीति—

मू ॥ मुक्तावळीकृता तत्र दीक्षितैश्च स्वकीयके ।
एवमुक्तं हि सिद्धान्तलेशसंग्रहनामके ॥ ३१ ॥

व्या ॥ अवतरणादेवावगतार्थः ॥ ३१ ॥

अ० ॥ इदानीं विज्ञानवादिमतनिराकरणसमये किमर्थं-'वैधर्म्याच्च न स्वप्नादिव' दिति सूत्रेण तदीयेन ।

न च यो यस्य स्वतो धर्मो न भवति सः अन्यसाधर्म्यात्तस्य संभविष्यति-न ह्यग्निरुष्णोऽनुभूयमान उदकसाधर्म्याच्छीतो भविष्यतीति भाष्येण च स्वप्नादिदृष्टान्तोऽङ्गीकृत इत्यत आह-**विज्ञानवादिभिरिति**—

मू ॥ विज्ञानवादिभिर्ज्ञानाद्बाह्यार्थे त्वपलापिते ।
अपनीतश्चार्थभार इति मत्वाऽनुमोदितः ॥
दृष्टान्तोऽयं स्वकर्तव्ये बाह्यार्थस्यापलापने ॥ ३२ ॥ ॥

व्या ॥ नेह नानास्ति किञ्चन-न तु तद्वितीयमस्तीत्यादिश्रुत्यनुरोधेन अपलाप्ययोर्ज्ञानज्ञेययोर्मध्ये ज्ञेयापलापस्य स्वात्मातिरिक्तोभयापलापिनां अद्वैतिनां सहायभूतत्वात् स्वप्नादिदृष्टान्तः परोक्तोऽप्यङ्गीकृत इति भावः ॥ ३२ ॥ ॥

अ० ॥ तर्हि-स्वप्नस्थानोऽन्तःप्रज्ञ इति प्राक्प्रदर्शितमाण्डूक्यश्रुतितद्भाष्योक्तप्रकारेण च परोक्तस्वप्नादिप्रत्ययवच्च जाग्रत्प्रत्ययस्यापि बाह्यार्थविकलत्वं कुतो नाङ्गीक्रियत इति उपलब्ध्यधिकरणसिद्धान्तभाष्यावष्टम्भकृतामाशङ्कां सिद्धान्तान्तरभाष्यनिदर्शनेन परिहरति-**नन्विति**—

मू ॥ ननु माण्डूक्यभाष्येण प्रागुक्तेनानुशासिते ॥
बाह्याभावे कुतस्तस्य निरासमकरोद्यदि ।
कर्मापेक्षतयापीशे वैषम्यादौ निवारिते ॥
वैदिकैरिव शैवैश्च यथाचार्यैस्स दूषितः ।
तथैव वेदबाह्योक्तो बाह्याभावः प्रदूषितः ॥ ३३ ॥

व्या ॥ प्रथमश्लोककृतचोद्यस्योत्तरमाह—**कर्मापेक्षतयेत्यादिना** पाशुपताधिकरणे आधिदैविकस्य परमेश्वरस्य शैवागममवलम्ब्य केवलनिमित्तकारणत्ववादिनं प्रति ।

हीनमध्यमोत्तमभावेन हि प्राणिभेदान् विदधत ईश्वरस्य रागद्वेषादिदोष-प्रसक्तेरस्मदादिवदनीश्वरत्वं प्रसज्येतेत्यापादितस्य दोषस्य 'एष ह्येव साधुकर्म कारयति'त्यादि श्रुतिमवलम्ब्य–'वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथाहि दर्शयति' 'कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैय्यर्थ्यादिभ्य' इत्यादिसूत्रतद्भाष्याभ्यामिव प्राणिकर्मसापेक्षत्वाददोष इति कृतेऽपि परिहारे–इति चेन्न - कर्मेश्वरयोः प्रवर्त्य-प्रवर्तयितृत्वे इतरेतराश्रयत्वदोषप्रसङ्गात् ॥ न—अनादित्वादिति चेत् न–वर्तमान-कालवदतीतेष्वपि कालेष्वितरेतराश्रयत्वदोषाविशेषादन्धपरम्परान्यायापत्तेरिति शैवागममात्रमवलम्ब्य अयं वैषम्यादिदोषपरिहारोऽभिहित इति स यथा नाङ्गीकृतः तद्वत्सुगतागममात्रमवलम्ब्यायं जाग्रत्स्वप्नप्रत्ययातिरिक्तबाह्यार्थाभावोऽभिहितः नास्मद्वद्वेदमवलम्ब्याभिहित इति नाङ्गीकृतः इत्यास्थेयम् ॥ ३५ ॥

अ० ॥ ननु प्रागुक्तमाण्डूक्यादिश्रुतितद्भाष्यैस्सिद्धत्वेऽपि बाह्यार्थाभाव-स्य सुगतागमावलम्बेनाप्यवगम्यमानत्वात् तद्वाद उपेक्षणीय इति प्राप्ते दृष्टान्तेन परिहरति **वेदेनेति**—

मू ॥ वेदेन ह्यात्मनोऽभिन्ननिमित्तत्वं यदीरितम् ।
पाञ्चरात्रावलम्बेन तान्त्रिकैश्च तदेव हि ॥
संप्रोक्तमपि चास्माभिर्यद्वदङ्गीकृतं तथा ।
बाह्याभावस्तन्त्रतश्च सिद्धोऽपि ग्राह्य एव नः ॥ ३७ ॥

व्या ॥ **संप्रोक्तमपीति** पाञ्चरात्राधिकरण इत्यर्थः ॥ शेषस्सुगमः ॥३७॥

अ० ॥ ननु, सौषुप्तात् ज्ञानज्ञेययोरुभयोरप्युत्पत्तौ को बाध इत्यत आह–**सुप्तादिति**—

मू ॥ सुप्ताज्ज्ञानेन सार्कं च यदि ज्ञेयं प्रजायते ।
ज्ञेयस्यावरणाभावाज्ज्ञानवैयर्थ्यमापतेत् ॥ ३८ ॥

व्या ॥ स्पष्टोऽर्थः ॥ ३८ ॥

अ० ॥ पुनश्शङ्कान्तरमनूद्य निराकरोति–**तर्हीति**—

मू ॥ तर्हि चैतन्यमात्रेण विज्ञेयस्यानुभूतितः ।
अर्थस्यैव–विना दृष्टिं सृष्टिस्सुप्ताद्भवेद्यदि ॥
स्वप्नादानं च पीड्येत–वैधर्म्यादिति सूत्रके ॥ ३९ ॥ ॥

व्या ॥ 'वैधर्म्याच्च न स्वप्नादिव' दिति सूत्रे स्वप्नादिप्रत्ययवज्जाग्रत्प्रत्ययोऽपि बाह्यार्थविकलः प्रत्ययत्वाविशेषादिति विज्ञानवादिना अस्मदभिमतत्वेन प्रदर्शितस्य स्वप्नादिदृष्टान्तस्य सूत्रकारादिभिः अनुमोदनं चकारात्प्रागुक्तेन चतुर्थेन एकोनत्रिंशेन च श्लोकेनोदाहृतश्रुतिस्तद्ग्राह्यं च बाध्येतेत्यर्थः ॥ ३९॥ ॥

अ० ॥ ननु, सौषुप्तात् ज्ञानमात्रोत्पत्तिं वदतामपि पक्षः—वैधर्म्याच्च न स्वप्नादिवादिति सूत्रेण बाह्यार्थविकलात् स्वप्नप्रत्ययात् जाग्रत्प्रत्ययस्य बाह्यार्थरूपवैधर्म्ये सिद्धे कथं सिद्ध्यतीत्यत आह—**अस्मदिति**—

मू ॥ अस्मत्पक्षाविरोधाय—तद्वितण्डेति दर्शितम् ॥ ४० ॥

व्या ॥ तदिति तत्सूत्रं केवलं वितण्डावाद इति प्रागेवास्माभिर्दर्शितमित्यर्थः ॥ ४० ॥

अ० ॥ पुनरशङ्कान्तरमनूद्य समाधत्ते **नन्विति**—

मू ॥ ननु जाग्रत्प्रबोधस्य वैधर्म्यादिति सूत्रके ।
बोध्यवत्वप्रभाषाया वितण्डात्वे—कथं भ्रमः ॥
इदं रूप्यं नभो नीलमिति शुक्त्यादिके यदि ।
स्वप्नकाले त्विदं नीलमिदं रूप्यमिति भ्रमः ॥
व्यावहारिकसत्ताकं नभश्शुक्त्यादिकं विना ।
इदंशब्दार्थभूतेन स्वात्मनैवार्थवान्यथा ॥
तथैव स्यादिदं रूप्यमिति जाग्रद्भ्रमोऽपि च ॥ ४३॥ ॥

व्या ॥ नन्वित्यादिना बाह्यार्थपरशास्त्रस्य वितण्डात्वे इदं रजतं इदं नीलमिति रजतत्वादिप्रकारकशुक्तिनभोविशेष्यकभ्रमः कथं स्यादिति पूर्वपक्षमनूद्य समाधत्ते **स्वप्नकाल इत्यादिना** जाग्रत्कालिकस्य नभो नीलमित्यादिभ्रमस्यापि स्वप्नवत् प्रातिभासिकविषयकत्वेन तत्कारणभूतो यः स्वप्नप्रत्ययजन्यवासनातुल्यस्संस्कारः तद्विशिष्टात्मविशेष्यकत्वातिरेकेण आलोकाकारवृत्त्यभिव्यक्तसाक्षिचैतन्यगोचराकाशविशेष्यकत्वकल्पने गौरवापत्तेः अहमेवेदं सर्वमित्यादिश्रुत्यनुसारेण सर्वस्यैकात्माधिकरणत्ववादिनामस्माकं अनेकाधिकरणत्वकल्पनं न सङ्गच्छते ।

यत्त्वाभाच्छुक्त्यादेरज्ञातसत्तावत्त्वमङ्गीकृत्य तत्र प्रातिभासिकरजताद्यध्यासस्य संप्रयोगादिहेतुत्रयजन्यत्वपरं शास्त्रं तन्मन्दाधिकारिविषयमिति सिद्धिकारैरद्वैतसिद्धौ दृष्टिसृष्टिप्रस्तावसमये दर्शितत्वात् ॥ ४३॥ ॥

अ० ॥ पुनश्शङ्कान्तरमनूद्य समाधत्ते **एवं चेदिति**--

मू ॥ एवं चेत्पिहिते नेत्रे न कुतस्संभवेच्च सा ॥
इदं नीलमिति भ्रान्तिरिति चेदुच्यते तदा ।
तदीयवासनोन्मेषराहित्यात् स्वप्नवन्नहि ॥ ४५ ॥

व्या ॥ जाग्रदवस्थायां नेत्रपिधानसमये इदं नीलमिति भ्रमकारणभूतसंस्कारस्य विकासाभावात् स्वप्नवत् सा न जायत इत्यर्थः ॥ ४५ ॥

अ० ॥ नन्वेवं भ्रमस्य वासनाविकासजन्यत्वाभ्युपगमे बलादापतेद्बाह्यार्थसिद्धिरिति शङ्कामनूद्य परिहरति **एकेति**--

मू ॥ एकसंबन्धिबोधेन वासनाया विकासतः ।
बाह्यार्थस्य प्रसिद्धिस्स्यादिति चेत्स्वप्नवासना ॥
विना सम्बन्धि विज्ञानं यथोद्बुद्धा स्वशक्तितः ।
उन्मीलनेऽपि तद्वत् स्यादतो बाह्यो न सिध्यति ॥ ४७ ॥

व्या ॥ **एकसंबन्धिबोधेनेति** एकसंबन्धिज्ञानमपरसंबन्धिस्मारकमित्यत्र यतः प्रागनुभूतयोः हस्तितद्धस्तिपकयोर्मध्ये हस्तिपकविषयकप्रत्यक्षेणैव तद्धस्तिस्मृतिहेतुभूतवासना विकसति-ततः चाक्षुषज्ञानातिरेकेण हस्तिपकस्येव स्मरणातिरेकेण हस्तिन इव च वासनाविकासजन्यभ्रमातिरेकेण बाह्यार्थस्य सिद्धिरिति प्राप्ते, दृष्टान्तेन परिहरति-**स्वप्नवासनेत्यादिना** यथा स्वप्नप्रत्ययरूपस्य अयं गज इति स्मरणस्य हेतुभूतवासना तावत्-स्वविकासार्थं स्वप्नकालेऽपरसंबन्धिज्ञानं विना स्वशक्तिबलादेवोद्बुद्धा सती स्मरणरूपं स्वप्नप्रत्ययं जनयति-तद्वच्चक्षुष उन्मीलनसमयेऽपि तत्तद्वासना-स्वस्वशक्तिबलात् तत्तद्भ्रमं जनयत्यतो न बाह्यार्थसिद्धिरित्यर्थः ॥ ४७ ॥

अ० ॥ पुनः शङ्कान्तरमनूद्य परिहरति **भ्रमस्येति**--

मू ॥ भ्रमस्यावृतकूटस्थचैतन्यविषयत्वतः ।
बाह्यार्थेन विनैवात्र संस्कारश्चेत्प्रसिध्यति ॥
न भावोऽनुपलब्धेरित्येतत्सूत्रे कुतः पुनः ।
बाह्याभावान्न संस्कारो वैचित्र्यं च धियो भवेत् ॥

इत्युक्तञ्चेदिहाज्ञातसत्ताकत्वानुभाषणम् ।
विना जेतुमशक्यत्वात्तत्सूत्रेण तथेरितम् ॥ ९० ॥

व्या॥ इहाज्ञातसत्ताकत्वानुभाषणं विनेति इह जाग्रदवस्थायां दृश्यमानस्याधिदैविकपरमेश्वरनिर्मितत्वेन चक्षुरादीन्द्रियसंयोगात् पूर्वं अज्ञातसत्ताकत्वानुवादं विना—जाग्रत्कालिकदृष्टिव्यतिरेकेण तदृष्टयुत्पत्तिकालोत्पन्नत्वेन तद्बाह्यार्थावलम्बने—यथा स्वाप्निकविषयवैचित्र्यं विना वासनावैचित्र्यमात्रेण स्वप्नप्रत्यक्षाणां तद्विषयाणामिव वैचित्र्यं भवति तथा जाग्रत्कालिकदृष्टीनामपि तद्विषयाणामिव तत्कारणवासनावैचित्र्यादेव वैचित्र्यस्य सम्भाव्यमानत्वे—'न भावोऽनुपलब्धे'रिति सूत्रेण ॥ श्लो०॥ बाह्याभावान्न संस्कारो वैचित्र्यं च धियो भवेदिति दोषप्रदर्शकेन विज्ञानवादिनं जेतुमशक्यत्वात् तत्सूत्रेण तथेरितमित्यर्थः ॥९०॥

अ० ॥ ननु, विज्ञानवादिजयार्थमेव बाह्यार्थाङ्गीकारो न स्वमतस्थापनायेति कुतोऽवगम्यत इत्यत आह **वाचेति**—

मू॥ वाचारम्भणमित्यादिवेदवाक्यात्तथैव च ।
तदनन्यत्वसूत्राच्च घटशब्दान्मृदोऽपि च ॥
न तु कश्चिद्विकारोऽस्ति वृत्तेनेति च भाष्यतः ।
पाठभेदेन भावाच्चोपलब्धेरिति सूत्रतः ॥
तदीयभाष्यतो वाचस्पत्यादपि च तन्तवः ।
गोचराः पटबुद्धेस्युः न पटो गोचरो यथा ॥
जगद्बुद्धेस्तथा प्रत्यङ्गोचरोऽन्यो न गोचरः ।
इति शब्दाभिधेयस्य विज्ञेयस्य निषेधकात् ॥
दृष्टेर्ब्रह्मातिरिक्तं तु दृश्यं नास्तीति गम्यते ॥ ९४॥ ॥

व्या॥ वृत्तेनेति निस्तलाकारेणेत्यर्थः ॥ वृत्तं पद्ये चरित्रे त्रिष्वतीते दृढनिस्तले इत्यमरकोशाभिधानात् । शेषस्सुगमः ॥ ५४॥ ॥

अ० ॥ अन्यथा बाधमाह **इत्यादीति**—

मू॥ इत्यादिशासनं चापि बाह्यार्थे बाधितं भवेत् ॥ ९९ ॥

व्या॥ **इत्यादिशासनञ्चेति** पूर्वोक्तवाचारम्भणश्रुत्याद्युपदेशः चक्षुरादिगोचरत्वेन प्रत्यभिन्ने **बाह्यार्थेऽभ्युपगम्यमाने** तद्विषयकज्ञानेन बाधितस्स्यादित्यर्थः॥ ५५॥

अ०॥ पुनरपि विषयवैचित्र्यं विना तद्ग्राहकज्ञानवैचित्र्यस्य कथमुपपत्तिरिति परिचोद्य दृष्टान्तान्तरेण समाधत्ते **विनेत्यादिना**--

मू॥ विना विषयवैचित्र्यं कथं दृष्टिविचित्रता।
चेद्विना कर्मवैचित्र्यं विषयाणां विचित्रता॥
विचित्रशक्तिकाज्ञानविकारत्वाद्भवेदिति।
सिद्धिकारैस्तथा वाचस्पतिभिश्च यथेरिता॥
तदज्ञानविकारत्वात्तथा दृष्टिविचित्रता॥ ५७॥॥

व्या॥ **यथेरितेति** प्राक्पक्षमनिरूपणे विधीनां परिसङ्ख्यात्वविचारसमये प्रदर्शितैस्सिद्धिकारवाचस्पत्यादिवाक्यैः यथा विचित्रशक्तिमदविद्याविकारत्वात्कार्यवैचित्र्यमुक्तं तथैव ज्ञानानामपि तदविद्याकार्यत्वादेव वैचित्र्यं भवेदित्यर्थः॥५७॥॥

अ०॥ तर्ह्यद्वैतिभिः किं करणीयमित्यत आह **तस्मादिति**--

मू॥ तस्मादद्वैतिभिर्ज्ञानात्त्यज्यतां बाह्यविभ्रमः॥ ५८॥

व्या॥ ज्ञानाद्बाह्यो विज्ञेयकार्थवर्गोऽस्तीति भ्रान्तिः परित्याज्येत्यर्थः॥५८॥

अ०॥ ननु, विज्ञानवादवदद्वैतवादेऽपि बाह्यार्थाभावे सति तयोः को भेद इत्यत आह **तदुक्तेति**--

मू॥ तदुक्तालयविज्ञानप्रतीचोरुभयोः क्रमात्।
परिच्छिन्नापरिच्छिन्नसाकारत्वादितो भिदा॥ ५९॥

व्या॥ विज्ञानवाद्यभिमतस्य अहंपदार्थभूतस्यालयविज्ञानस्य अद्वैतवाद्यभिमतस्य प्रत्यगात्मनश्च क्रमात् **सद्वितीयत्वाद्वितीयत्वाभ्यां** च सविशेषत्वनिर्विशेषत्वादिभ्यां च महान् भेदस्सिद्ध इत्यर्थः॥ ५९॥

अ०॥ तर्हि कर्तृत्वपरिच्छिन्नत्वादिभ्रमस्य अस्माभिरिव तैरपि परित्यक्तत्वे सति तेषामप्येकात्मवादित्वसंभवे सति किमर्थं सुगतागमः सूत्रकारादिभिः प्रदूषित इत्यत आह **तथेति**--

मू॥ तथापि सूत्रकाराद्यैर्वेदवाक्याद्विचारयेत् ।
इति मत्वा च तच्छास्त्रं दूषितं स्यात्किलान्यथा ॥
ज्ञानातिरिक्तज्ञेयार्थवादिनां मन्दतापरम् ।
ज्ञानाद्ग्राह्यं तु नास्तीति वादिनां श्रेष्ठतापरम् ॥
नाभाव उपलब्धेश्चेत्यस्य भाष्यकृतां वचः ।
श्रुतिसूत्रार्थकं यत्तत् पीड्येतातो न तत्पराः ॥ ६२ ॥

व्या॥ **वेदवाक्यादिति** तन्त्वौपनिषदं पुरुषं पृच्छामीति श्रुतेः वेदवाक्यैरेवात्मानं विचारयेत्–न सुगतायागमैरिति **मत्वा** चकारेण तज्जयार्थं च तच्छास्त्रं दूषितमित्युक्त्वा अन्यथा बाधमाह–**ज्ञानातिरिक्तेत्यादिना** 'नाभाव उपलब्धे' रिति सूत्रस्य भाष्यं विशिनष्टि **श्रुतिसूत्रार्थकमिति** 'वाचाऽऽरम्भणं विकारो नामधेय' मिति श्रुतेस्तन्मूलयोः 'तदनन्यत्वमारम्भणशब्दादिभ्यः' 'भावाच्चोपलब्धे' रिति सूत्रयोश्चार्थः एवार्थः यस्य भाष्यकृद्वचनस्य तच्छ्रुतिसूत्रार्थकं पीड्येतेति बाधं संप्रदर्श्य फलितमाह–**अतो न तत्परा इति** तस्मात्सूत्रकारादयः न विज्ञानवादनिरासे तात्पर्यवन्त इत्यर्थः ॥ ६२ ॥

अ०॥ न तत्परा इति प्रतिज्ञातार्थानुग्राहकं यत्–सुगतागमस्यापि अद्वैतात्मावगतिपरत्वबोधकं ब्राह्मं वाक्यं तदुदाहरति **ब्रह्मणेति**––

मू॥ ब्रह्मणापि स्वगीतायां चतुर्थाध्यायके भृशम् ।
तस्मादस्ति महादेव एव साक्षात् स्वयं प्रभः ॥
आनन्दरूपस्संपूर्णो न ततोऽन्यत्तु किञ्चन ।
इयमेव तु तर्काणां निष्ठा काष्ठा सुरोत्तमाः ॥
प्रत्यक्षादिप्रमाणानां वेदान्तानामपीश्वराः ।
स्मृतीनां च पुराणानां भारतस्य तथैव च ॥
वेदानुसारि विद्यानामन्यासामास्तिकोत्तमाः ।
शैवागमानां सर्वेषां विष्णुप्रोक्तागमस्य च ॥
अस्मदुक्तागमस्यापि सुरास्सूक्ष्मनिरूपणे ।
बुद्धागमनामित्याद्यैः प्रत्यग्विषयतेरिता ॥ ६७ ॥

व्या ॥ यस्मात् कारणात् सत्तैकवादप्रक्रियया परा श्रुतिः ऐतदात्म्यमिदं सर्वमित्याह---तस्मात् स्वयंप्रकाशमानस्त्रिविधपरिच्छेदरहितः आनन्दरूपः प्रत्यगात्मैव सदास्ति यत एवं ततो निरावृताद्यानन्दाज्ज्ञानप्रागभावोपेतादन्यस्य जगदुपादानस्याभावेन तदानन्दादन्यज्ज्ञानं ज्ञेयं वा किञ्चिदपि कार्यं नास्तीत्युक्त्वा तत्रैव सर्वप्रमाणानां परिसमाप्तिं दर्शयति **इयमेव हि तर्काणामित्यादिना** तर्कादिशास्त्राणामपि प्रत्यगात्मन्येव तात्पर्यन्तु द्वितीयनिरूपणे पञ्चसप्ततितमादिश्लोके तद्व्याख्यानाभ्यां अवगन्तव्यम् ॥

यत एवं श्रीब्रह्मणा बुद्धागमस्यापि ज्ञेयकार्यनिरासकत्वेन प्रत्यक्परत्वं दर्शितमतः तच्छिष्यवर्गीयाणां सूत्रकारादीनामपि न बाह्यार्थाभाववादनिरसने तात्पर्यमित्यास्थेयं ॥ ६७॥ ॥

अ० ॥ इदानीं 'परे देवे मनस्येकीभवती'ति प्रश्नोपनिषद्वाक्यमनुसृत्य मूलाज्ञानतत्परिणामान्तःकरणप्रकृतिकत्वेऽपि जाग्रत्कालिकस्य जगतो दृष्टिमात्रत्वं साधयति **धीमायेति**---

मू ॥ धीमायाजनिमत्वतो जगदिदं वृत्त्यात्मकं साक्षिणा-
भास्यं स्वप्नगजादिवत् - तत इदं स्वप्नाख्यवृत्त्यन्तरे ।
जाते नैव च दृश्यते - सुखधियां सुप्तावदृश्यो यथा
नो चेज्जाग्रति कल्पितोऽर्थनिचयस्स्वप्ने दृशो दृश्यताम् ॥ ६८॥॥

व्या ॥ विवादविषयभूतं प्रातिभासिकत्वेन साक्षिमात्रभास्यं जाग्रत्कालिकं घटादिवस्तु वृत्त्यात्मकं भवितुमर्हति । अज्ञानतत्कार्यान्तःकरणपरिणामत्वात् स्वप्नगजादिवदित्यनुमानमुक्त्वा तत्रोपपत्तिमाह **तत इत्यादिना** वृत्तिरूपत्वादेव इदं जगत् न स्वप्नकाले परिदृश्यते तत्र दृष्टान्तमाह **सुखधियामित्यादिना** सुखमहमासमिति परामर्शहेतुभूतायां स्वरूपसुखविषयकाविद्यावृत्तौ सत्यां अदृश्यमानः स्वाप्निको गजादिर्यथा वृत्तिमात्रस्तथा स्वप्नेऽप्यदृश्यमानमिदं जाग्रत्कालिकं जगद्वृत्तिमात्रं स्यादित्युक्त्वा अन्यथा बाधमाह **नो चेदित्यादिना** जाग्रदवस्थायां जीवेन स्वस्मिन्परिकल्पितत्वेन साक्षिमात्रभास्योऽयं प्रातिभासिको वियदादिप्रपञ्चो जाग्रत्प्रत्ययनाशानन्तरं वासनामात्रतः स्वप्नप्रत्यये जाते साक्षिभास्यः स्यादित्यर्थः

अ० ॥ पुनर्बाह्यार्थसद्भावमाशङ्क्य दृष्टान्तेन परिहरति **नन्विति**---

मू ॥ नन्वज्ञानमनोगताच्च विविधात् संस्कारतस्स्वप्नवत्
तज्ज्ञेयं न कुतो भवेदिति यदि ज्ञानैकहेतुत्वतः ।

संस्काराद्विविधात् सुषुप्तिसमये स्वानन्दमायापरा
बोधा एव यथा विनान्यविषयैस्स्वप्ने तथा जाग्रति ॥ ६९ ॥ ॥

व्या ॥ अज्ञानमनोयुक्तात्संस्कारात्स्वप्नप्रत्ययवत् तज्ज्ञेयोऽप्यज्ञानादेर्विकारः कुतो न स्यादिति प्राप्ते–तत्र हेतुमाह–**ज्ञानैकहेतुत्वत इति** ! उक्तविधस्य संस्कारस्य भ्रमप्रमात्मकज्ञानमात्रं प्रत्येव कारणत्वात् ज्ञानातिरिक्तं ज्ञेयं न ततो जायत इत्यादिश्य तत्र दृष्टान्तमाह **संस्कारादित्यादिना** यथा हि सौषुप्तात् पूर्वस्मात्पूर्वस्मात् मूलाज्ञानस्वरूपानन्दविषयकभ्रमप्रमाद्वयजन्यात् अज्ञानतद्गतमनोगताद्विविधसंस्कारात् सुषुप्तिसमये स्वरूपानन्दमूलाज्ञानविषयकप्रत्यया एव अनादिस्वरूपानन्दमूलाज्ञानातिरिक्तविषयैर्विना जायन्ते–तद्वत् स्वप्नजाग्रदवस्थयोरप्यज्ञानमनोगतसंस्काराद्वृत्तय एव जायेरन्निति दृष्टिसृष्टिवादे दृष्टिव्यतिरेकेण सृज्यमात्रनिषेधः क्रियते–न तु तदुपादाननिषेध इत्यास्थेयम् ॥ ६९॥ ॥

अ० ॥ इदानीं दृष्टिसृष्टिशास्त्रज्ञानवन्तं पूजयन्नेतन्निरूपणमुपसंहरति **अस्मदिति**––

मू ॥ अस्मत्प्रत्ययगोचरस्त्वितरवद्भ्रान्त्यैव वादद्वये
भातीति ग्रहणाप्यमुक्तय - इदं कार्यं न दृष्टेः पृथक् ।
इत्याचार्यमुखाद्विचार्य सततं प्रत्यक्स्वरूपे विभौ
नित्ये यो रमते महान् कृतमतिस्तस्मै नमः कोटिशः॥७०॥ ॥

व्या ॥ निखिलं जगत् प्रत्यगात्ममात्रसत्ताकामेति यः कार्यकारणयोरेकसत्तावादो यश्च जगतश्चित्सत्तातिरिक्तप्रातिभासिकसत्ताकाविद्यकविषयशून्यदृष्टिमात्रवादः तद्वयेऽपि प्रत्यगात्मैव भ्रान्त्या जगद्रूपेण प्रत्यवभासते - न तदतिरिक्तं जगदिति निश्चयग्रहणं संप्राप्याद्वितीयात्मावशेषरूपमोक्षार्थं आचार्यमुखादखिलं जगन्न दृष्टेः पृथगस्तीति विचार्य त्रिविधपरिच्छेदरहिते स्वात्मन्येव सदा यो रमते तस्मै महात्मने कोटिशो नमस्करोमीत्युक्त्या प्रतिकर्मव्यवस्थाधिकारिभ्यो दृष्टिसृष्टिवादाधिकारिणः प्राशस्त्यं प्रदर्शितं भेदभ्रान्तिस्तु अद्वितीयशुद्धात्मवृत्त्या नश्यति - शुद्धात्मवृत्तिश्च कतकरजोवत् स्वयमेव निवर्तते ॥ ७०॥ ॥

इति श्रीपरमहंसपरिव्राजकाचार्यरामब्रह्मश्रीकृष्णानन्देन्द्रभगवत्पादशिष्य-
श्रीमच्चन्द्रिकाचार्याख्ययतीश्वरविरचितायाममृतरसझरी-
नामकव्याख्यानोपेतायामद्वैतसिद्धान्तगुरुचन्द्रिकायां
षष्ठं दृष्टिसृष्टिनिरूपणं संपूर्णम् ॥

ओं तत्सद्ब्रह्मैवाहमस्मि ॥

॥ हरिः ओम् ॥

अद्वैतसिद्धान्तगुरुचन्द्रिकायाम् ।

सप्तमम्

एकजीववादनिरूपणम् ।

अ० ॥ इदानीं वृत्तानुवादपूर्वकं प्रारिप्सितनिरूपणविषयं दर्शयति **जीव इति**—

मू॥ जीवस्स्वगतभेदेन हीनो हीति पुरेरितम् ।
सजातीयविभेदेन हीनश्चेत्यत्र बोध्यते ॥ १ ॥

व्या ॥ पुरा षष्ठे दृष्टिसृष्टिनिरूपणे जीवस्तावद्दृष्टीनां प्रातिभासिकसत्ताप्रक्रियया दृष्टिव्यतिरिक्तस्वगतवस्तुविष्ठभेदरहित इति च सत्तैक्यवादप्रक्रियया तद्दृष्टिनिष्ठभेदेनापि विहीन इति चोक्तम् ।

अत्र सप्तमनिरूपणे तावत् स एव जीवः सजातीयजीवेश्वरनिष्ठभेदरहितः इत्युपदिश्यत इत्यर्थः ॥ १ ॥

अ० ॥ संप्रति यस्तावत् प्राक् प्रथमनिरूपणारम्भे शिष्यैः—जगत्कारणमेकोऽहं पदार्थ इति भातीति सप्तमाभिप्रायेणोपवर्णितः तस्यैवैकजीववादाख्यशास्त्रगम्यत्वादिविशेषं प्रतिपिपादयिषुः तच्छिष्याणां स्वकल्पितत्वं दर्शयति **मयेति**—

मू ॥ मयैव कल्पितैश्शिष्यैः पुरा यस्तूपवर्णितः ।
जगत्कारणमेकोऽहं पदार्थ इति तत्परैः ॥ २ ॥
अहमन्यवदभामि ह्यहमेव शरीरवत् ।
अहं शिष्यवदाभामि ह्यहं लोकत्रयाश्रयः ॥ ३ ॥
स्वपूर्णात्मातिरेकेण जगज्जीवेश्वरादयः ।
न सन्ति नास्ति माया च तेभ्यश्चाहं विलक्षणः ॥ ४ ॥
क्रीडत्येको जीव एव यः पुरेषु ततो जगत् ।
जातमित्यादिभिर्ह्येकजीववादश्रुतेर्मतः ॥ ५ ॥

व्या ॥ अहमन्यवदाभामीत्यध्यारोपश्रुतिस्तावदतिरोहितार्था **स्वपूर्णात्मातिरेकेणेति** स्वात्मभूततुरीयात्मानं विना **जगज्जीवेश्वरादयः** तुरीयात्मन्यनादिसिद्धाज्ञानदुर्विलसितं जगत् जीवः अवस्थात्रयोपेतः तत्परिकल्पित ईश्वर आधिदैविक उपास्यः परमेश्वरश्चादिर्येषां स्वप्ने परिदृश्यमानजीवाभासतुल्यानां जीवान्तराणां ते **जगज्जीवेश्वरादयो न सन्ति** स्रष्टुरेवैकस्य प्रत्यगात्मनः सर्वत्रानुस्यूततया नानात्मवत् प्रतीतेः **नास्ति माया च** आत्मभेदवत् कल्पितत्वादित्यपवादपरेण शतोपनिषद्वाक्येन च एक एव जीव इति दर्शयित्वा पुनरपि स्वात्मनि जगदध्यारोपपराम् 'पुरत्रये क्रीडति यस्तु जीवस्तत्तु जातं सकलं विचित्र' मिति कैवल्यश्रुतिमर्थतः संगृह्य संवादयति **क्रीडत्येक इत्यादिना** हि शब्देन एकजीववाद एव सर्वश्रुतेस्तात्पर्यविषयभूत इति दर्शितः ॥ ५ ॥

अ० ॥ इदानीं 'इहैवान्तश्शरीरे सोम्य स पुरुषो यस्मिन्नेताष्षोडशकलाः प्रभवन्ती'ति षोडशकलाधारत्व एकवचनेन निर्देशादेकत्वं शरीरसम्बन्धोपदेशाच्छरीरत्वं च प्रतिज्ञाय 'स ईक्षांचक्रे कस्मिन्वहमुत्क्रान्ते उत्क्रान्तो भविष्यामि कस्मिन् वा प्रतिष्ठिते प्रतिष्ठास्यामी'ति 'सप्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनोऽन्नमन्नाद्वीर्यं तपो मन्त्राः कर्म लोका लोकेषु च नाम चेति प्रश्नोपनिषदि पिप्पलादभरद्वाजसंवादे प्राणादिषोडशकलास्रष्टुः स्वसृष्टप्राणतादात्म्यव्यासप्रयुक्तोत्क्रान्त्यादिभ्रमोपदेशेन तदेव शारीरत्वं च संप्रदर्श्य मनसश्च पुरुषाधेयत्वैकत्वव्यपदेशात् तेन परिवेष्टनाभावाच्च विभुत्वेनैकजीवत्वं सिद्धमित्याह **यस्मिन्निति**—

मू ॥ यस्मिन्नेताः प्रजायन्ते शरीरे तस्य वेद्यताम् ।
आवेद्य प्राणतादात्म्यादुत्क्रान्त्यादिभ्रमेरणात् ॥ ६ ॥
मनसोऽप्येकतादेशादाधेयत्वप्रशासनात् ।*
स्वाधेयावेष्टितत्वेन विभुत्वादेकजीवता ॥ ७ ॥

व्या ॥ अवतरणादेवावगतार्थः ॥ ७ ॥

अ० ॥ इदानीं नानाजीववादिकृतं चोद्यमनूद्य परिहरति **एकेति**—

मू ॥ एकान्तःकरणोपेतजीवस्य विभुता यदि ।
परेषां सुखदुःखादेरापरोक्ष्यं भवेद्यदि ॥
मनःकल्पितजीवानां दृष्टिमात्रात्मकत्वतः ।

निरन्तःकरणत्वेन सुखदुःखादिकं यतः ॥
नास्त्यतः परदुःखादेर्नापरोक्ष्यं विभोर्भवेत् ॥ ९॥ ॥

व्या ॥ षष्ठनिरूपणोक्तप्रकारेण स्वमनःकल्पितानां जीवानां दृष्टिमात्रस्वरूपत्वात्तत्परिकल्पकजीवान्तःकरणादतिरिक्तान्तःकरणसद्भावे प्रमाणाभावाच्च निरन्तःकरणत्वेन सुखाद्यभावे सति नैतच्चोद्यावकाश इत्यर्थः ॥ ९॥ ॥

अ० ॥ इदानीं वक्ष्यमाणश्रुतिभिः स्थूलजगत्कारणस्य अन्तःकरणोपाधिकस्य जीवस्य य इति अस्येति च मनसीति चैकवचनेन निर्देशादेकत्वं सिद्धमित्याह **एष इति**--

मू॥ एष सुप्तेषु जागर्ति यस्तं नात्येति कश्चन ॥
हृदयं विश्वमस्येति तैजसाख्यनिनात्मनः ।
परे देवे मनस्येकीभवतीदं सचेतने ॥
इति क्रमात्काठकाच्च मुण्डकात्प्रश्नवेदतः ।
स्थूलकारणतोपेतमनोयुक्तस्य चैकता ॥ १२ ॥

व्या ॥ इमाश्रुतयः प्राक् पञ्चमनिरूपणे त्रयोदशश्लोकानन्तरमुदाहृत्य व्याख्याताः ॥ १२ ॥

अ० ॥ जीवस्यैकत्वमेवाक्षिप्य दृढयति **नन्विति**—

मू॥ नन्ववस्थात्रयोपेताज्जीवादन्यो नहीति चेत् ।
चक्षुरध्यात्ममित्युक्तं द्रष्टव्यं तत्त्व यद्भवेत् ॥
अधिभूतं तदित्युक्तमादित्योऽत्राधिदैवतम् ।
सूर्य योऽन्तर्यमयतीत्यादिशास्त्रस्य का गतिः ॥
यदि स्वकल्पितैर्देवैस्स्वस्यानुग्राह्यता तथा ।
उपादानतया सर्वनियन्तृत्वं च संभवेत् ॥ १५ ॥

व्या ॥ स्पष्टोऽर्थः ॥ १५ ॥

अ० ॥ उक्तमेवार्थं दृष्टान्तेन प्रत्याययति **स्वप्नेति**--

मू॥ स्वप्ने स्वकल्पितैर्देवैरनुग्राह्यत्वमात्मनः ।
स्वस्यैव तन्नियन्तृत्वं प्रकृतित्वाद्यथा भवेत् ॥

तथैवात्र भवेदेकजीवस्यैवोभयं किल ॥ १६॥ ॥

व्या ॥ **तन्नियन्तृत्वमिति** तान् स्वप्नदृक्परिकल्पितादित्यादीन्प्रति-नियन्तृत्वं तन्नियन्तृत्वं । शेषस्सुगमः ॥ १६॥ ॥

अ० ॥ अधुना सदृष्टान्तं कल्पकाज्जीवादतिरिक्तानां कल्पितानां जीवा-नामाभासत्वं दर्शयति **स्वप्नादाविति**—

मू ॥ स्वप्नादौ कल्पकाज्जीवात्कल्पितानां चिदात्मनां ॥ १७ ॥
को भेद इति चेत् तन्तुवस्त्रवत्कल्पको भवेत् ।
वस्त्रालेख्यसुरादीनां वस्त्राभाससमाः परे ॥ १८ ॥

व्या ॥ **वस्त्रालेख्यसुरादीनामिति** चित्रकारेण वस्त्रे परिकल्पितचित्र-रूपसुरादीनामलङ्कारार्थं मद्यादिना लाञ्छितवस्त्राभाससमाः परे स्वप्नदृक्परिक-ल्पितजीवाभासा इत्यर्थः ॥ १८ ॥

अ० ॥ इदानीं कल्पकस्यैव जीवस्य स्वरूपतस्सत्यत्वाद्बन्धमोक्षाधिकारित्वं तत्परिकल्पितानां जीवाभासानां तु स्वरूपतो मिथ्यात्वात् तन्न संभवतीति सदृष्टा-न्तमाह **चित्रेति**—

मू ॥ चित्राधारपटस्येव न सङ्कोचः प्रसारणम् ।
कल्पिताभासवस्त्राणां यथा तद्वच्चिदात्मनाम् ॥
कल्पितानां न बन्धादिः कल्पकस्यैव संभवेत् ॥ १९॥ ॥

व्या ॥ **चिदात्मनामिति** जीवाभासानामित्यर्थः ॥ **संभवेत्** बन्धादि-रिति पुनरध्याहर्तव्यम् ॥ १९॥ ॥

अ० ॥ इदानीमुपपादितार्थस्यैव प्रश्नोपनिषदाद्यभिप्रेतत्वं दर्शयति **यस्मि-न्निति**—

मू ॥ यस्मिन्स्वात्मन्येष देवस्सुप्तौ स्वप्नान्न पश्यति ॥
तत्राक्षरे पृथिव्यादि चक्षुरादि प्रलीयते ।
यथा दीप्ताद्विष्फुलिङ्गाः प्रभवन्ति सहस्रशः ॥
तथा जीवाः प्रजायन्ते सौषुप्तादक्षरादिमे ।
यदाऽयं कञ्चन स्वप्नं सुप्तः प्राज्ञो न पश्यति ॥
एतस्मादात्मनो बुद्धात् प्रभवन्ति सुरादयः ।

एतस्मादात्मनस्सुप्तात्सुराद्या व्युच्चरन्ति च ॥
मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् ।
मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहम् ॥
योऽयं पुरत्रये जीवः क्रीडत्यज्ञस्ततो जगत् ॥
इति क्रमात्प्रश्नवेदात्तन्मूलान्मुण्डकादपि ।
तथा कौषीतकीवाक्याद्बृहदारण्यतोऽपि च ॥
कैवल्यश्रुतितस्तस्य सुरानुग्राह्यताश्रमः ।
उपादानत्वतस्स्वस्यैषोऽन्तर्यामीति च श्रुतेः ॥
सर्वान्प्रति नियन्तृत्वं कल्पकस्य यतो भवेत् ।
अत आध्यात्मिके सर्ववेदान्तानां समन्वयः ॥ २७॥ ॥

व्या ॥ स्वस्येति पदद्वयाभिधेयस्यावस्थात्रयवतो जीवस्य कल्पकस्येति विशेषणं–यस्मिन्नित्यादिश्लोकैः सङ्गृहीताः प्रश्नोपनिषदादिमाण्डूक्यान्ताः श्रुतयस्तावत् प्राक् पञ्चमनिरूपणे पञ्चदशाच्छ्लोकादारभ्योदाहृत्य विस्तरेण व्याख्याताः॥

किञ्च सर्वेषां ज्ञेयप्रकरणगतानामीशोपनिषदादिवाक्यानां आधिदैविके परमेश्वरे समन्वयं विनैव एकस्मिन्नाध्यात्मिके मूलाज्ञानोपाधिके परमात्मादिसंज्ञके प्राज्ञे तदीयशुद्धस्वरूपे च क्रमात् समन्वयोऽवगम्यते । तथाहि ।

'ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् । तेन त्यक्तेन भुञ्जीथा मागृधः कस्य स्विद्धन' मित्युपक्रम्य 'यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति । सर्वभूतेषु चात्मानं ततो न विजुगुप्सते । यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः । तत्र को मोहः कश्शोक एकत्वमनुपश्यत' इत्याध्यात्मिकस्य प्राज्ञस्याध्यासिकजगदुपादानत्वप्रतिपादनद्वारा तच्छुद्धस्वरूपे ईशोपनिषद्वाक्यानि तद्भाष्याणि च समन्वितानि ।

तथैव 'केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः । केनेषितां वाचमिमां वदन्ति चक्षुश्श्रोत्रं क उ देवो युनक्ती'ति केनोपनिषत्प्रदर्शितस्य प्रश्नस्य 'श्रोत्रस्य श्रोत्रं मनसो मन' इत्यादि प्रतिवचनवाक्यानि च आधिदैविके परमेश्वरे शिवविष्ण्वादौ तात्पर्यं विना श्रोत्रेन्द्रियादिप्रेरकत्वेन तद्विषये च अविद्यातत्कार्यातीते स्वात्मन्याध्यात्मिके हि समन्वितानि ।

एवमेव । 'यद्वाचानभ्युदितं येन वागभ्युद्यते । तदेव ब्रह्म - त्वं विद्धि नेदं यदिदमुपासते' इत्यादीनि तदुत्तरवाक्यानि च– तदीयानीमानि अन्यदेव तद्विदितादथोऽविदितादधीत्यनेन पूर्ववाक्येन आत्मा ब्रह्मेति प्रतिपादिते ।

श्रोतुराशङ्का जाता - तत्कथं त्वात्मा ब्रह्म आत्मा हि नाम अधिकृतः कर्मण्युपासने च संसारी कर्मोपासनं वा साधनमनुष्ठाय ब्रह्मादिदेवान् स्वर्गं वा प्राप्तुमिच्छति । तत् तस्मादन्यत् उपास्यो विष्णुरीश्वर इन्द्रश्च प्राणो वा ब्रह्म भवितुमर्हति– नत्वात्मा - लोकप्रत्ययविरोधात् यथाऽन्ये तार्किकाः ईश्वरादन्य आत्मेत्याचक्षते– तथा कर्मिणोऽमुं यजामुं यजेत्यन्या एव देवता उपासते - तस्मादयुक्तं यद्विदितमुपास्यं तद्ब्रह्म भवेत् । ततोऽन्य एवोपासक इति तामेतामाशङ्कां शिष्यस्याचार्यो लिङ्गेन उपलक्ष्य तद्वाक्याद्वाह ।

मैवं शङ्किष्ठाः **यत्** चैतन्यमात्रसत्ताकं **वाचा** पदरूपया **अनभ्युदितं** अप्रकाशितमनभ्युक्तं **येन** ब्रह्मणा **वाक्** सकरणा पदरूपा विवक्षितेऽर्थे **अभ्युद्यते** चैतन्यज्योतिषा प्रकाश्यते प्रयुज्यत इत्येतदित्यारभ्य **तदेव** आत्मरूपं **ब्रह्म** निरतिशयं भूमाख्यं बृहत्वात् ब्रह्मेति **विद्धि** विजानीहि **त्वं** यैर्वागायुपाधिभिः वाचो ह वाक् चक्षुषश्चक्षुरश्रोत्रस्य श्रोत्रं मनसो मनः कर्ता भोक्ता विज्ञाता नियन्ता प्रशासिता विज्ञानमानन्दं ब्रह्मेत्येवमादयः सव्यवहाराः असंव्यवहार्ये निर्विशेषे परे सौम्ये ब्रह्मणि प्रवर्तन्ते । तान् व्युदस्य आत्मानमेव निर्विशेषं ब्रह्म विद्धीत्येवशब्दार्थः ॥ **नेदं ब्रह्म**—श्रुतिरेव निषेधगोचरमिदं शब्दार्थं दर्शयति **यदिदमुपासत इति** यत् इदमित्युपाधिभेदविशिष्टं अनात्मेश्वरादिकमुपासते ध्यायन्ति **तदेव ब्रह्म त्वं विद्धीति** प्रथमत उक्तेऽपि नेदं ब्रह्मेत्यनात्मनो–टि-**हरिहरादेराधिदैविकस्य** अब्रह्मत्वं पुनरुच्यते - कदाचित् अनात्मन्यपि ब्रह्मबुद्धौ प्रवृत्तायामात्मैव ब्रह्मेति बुद्धिनियमार्थं अन्यस्मिन्नुपास्ये-टि-**हरिहरादौ** या ब्रह्मबुद्धिस्तत्परिसङ्ख्यानार्थं वेत्यादि भाष्याणि च आधिदैविकस्य शिवविष्ण्वादेः स्वस्वरूपविषये व्यामोहाभावेन आध्यासिकोपादानत्वासंभवात् आध्यात्मिकस्य व्यामोहितत्वेन तज्जगदुपादानत्वसंभवाद्द्वितीये तस्मिन्नेव विज्ञेये समन्वितानि ।

किञ्च प्रागुक्तप्रकारेण ईशकेनोपनिषद्वाक्यानीव आधिदैविके विवर्तोपादानत्वसमर्पकप्रतिबन्धकाभाववर्जिते परमेश्वरे समन्वयं विनैव आध्यात्मिके परमात्मादिसंज्ञके व्यापकाज्ञानोपाधिके प्राज्ञे तदीयशुद्धस्वरूपे च क्रमात्कठोपनिषत्तन्मूलकगुहाधिकरणादितद्भाष्याणि च समन्वितानि ।

तथाहि 'येयं प्रेते विचिकित्सा मनुष्ये अस्तीत्येके नायमस्तीति चैक इत्यारभ्य' 'तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम् । अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहातीति' वाक्यनिर्दिष्टे आध्यात्मिके एव–'सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति । यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण ब्रवीम्योमित्येतत्' इत्यादिवाक्येन सर्ववेदान्तानां समन्वयं प्रतिज्ञायानन्तरं तस्यैव–'एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परं एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तदिति' वाक्यं तद्गतं ह्येवेति विद्वत्प्रसिद्धचन्यविज्ञेयनिवृत्तिपरपदद्वयतदभ्यासैः अक्षरब्रह्मादिशब्दगम्यत्वमादिश्य अनन्तरं–यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः । मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः' इति वाक्यस्य च प्रकृत एवाध्यात्मिके समन्वयमादिश्य पश्चादपि 'ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टाविति' मन्त्रस्य च ॥ श्लो० ॥ अतोऽन्तःकरणाध्यस्तानध्यस्तत्वेन चात्मनः । भोक्तृत्वं साक्षिता चेति द्वयं तस्योपपद्यते इत्यादिशिवगीतोक्तप्रकारेण गुहायामहमिति तादात्म्याध्यासतदभावाभ्यां क्रमात् जीवभावपरमात्मभावोपेते आध्यात्मिके एव समन्वयं संप्रदर्श्य अनन्तरं 'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् । इन्द्रियेभ्यः परा ह्यर्थाः' इत्यादिवाक्यैः 'सता सोम्य तदा संपन्नो भवति स्वमपीतो भवतीति' श्रुत्यन्तरेणैव विज्ञानमयस्य प्राप्तृत्वादिकं परमात्मादिशब्दवाच्यस्य प्रत्यगात्मनः प्राप्यत्वादिकञ्चोपदिश्य पश्चात्तस्यैवाध्यात्मिकस्य प्रत्यगात्मनः 'कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्निति' वाक्येन चेक्षणविषयत्वं मुमुक्षोरादिश्य पश्चात्तस्मिन्नेव अद्वितीयत्वग्रहणार्थं 'अंगुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति । ईशानो भूतभव्यस्य स एवाद्य स उश्वः । एतद्वैतदिति' वाक्यस्य जगत्कारणत्वप्रतिपादकस्य च समन्वयमुपादिश्य अन्ते च 'ब्रह्म प्राप्तो विरजोऽभूद्विमृत्युरन्योऽप्येवं यो विदध्यात्ममेवेत्याध्यात्मिके एव स्वात्मनि यतस्समन्विता - कठोपनिषत् अतः तदीयतत्तद्वाक्यमूलकस्य—अत्ता चराचरग्रहणादित्यधिकरणस्य तद्भाष्यस्य च—गुहां प्रविष्टावात्मानौ हि तद्दर्शनादित्यधिकरणस्य तदीयस्यास्य तस्मादिह ऋतपानमन्त्रे जीवपरमात्मानावुच्येयातां एष एव न्यायो द्वासुपर्णासयुजा सखायेत्येवमादिष्वपि । तत्राप्यध्यात्माधिकारात् न प्राकृतौ सुपर्णावुच्येते इति भाष्यस्य च—आध्यानाय प्रयोजनाभावादित्यधिकरणस्य तद्भाष्यस्य च—शब्दादेव प्रमित इत्यधिकरणस्य तद्भाष्यस्य च आध्यात्मिके प्राज्ञे तदीयतुरीयस्वरूपे च क्रमात् समन्वयसिद्धः ।

किञ्चोदीरितेशकेनकठोपनिषद्वाक्यानीवेयं सभाष्या प्रश्नोपनिषदपि 'भगवन् कुत एष प्राणो जायत' इति प्रश्नस्य 'आत्मन एष प्राणो जायत' इति प्रतिवचनेन च ।

तथैव 'कस्मिन्नु सर्वे संप्रतिष्ठिता भवन्तीति' प्रश्नस्य 'स यथा सोम्य वयांसि वासो वृक्षं संप्रतिष्ठन्ते एवं हवै तत् सर्वं पर आत्मनि संप्रतिष्ठते पृथिवी च पृथिवीमात्रा चापश्चापोमात्रा च तेजश्च तेजोमात्रा च वायुश्च वायुमात्रा चाकाशश्चाकाशमात्रा च चक्षुश्च द्रष्टव्यञ्च श्रोत्रं च श्रोतव्यञ्च घ्राणञ्च घ्रातव्यञ्च रसश्च रसयितव्यं च त्वक् च स्पर्शयितव्यं च वाक् च वक्तव्यञ्च हस्तौ चादातव्यञ्च उपस्थश्चानन्दयितव्यञ्च पायुश्च विसर्जयितव्यञ्च पादौ च गन्तव्यं च मनश्च मन्तव्यञ्च बुद्धिश्च बोद्धव्यञ्चाहङ्कारश्चाहङ्कर्तव्यञ्च चित्तञ्च चेतयितव्यञ्च तेजश्च विद्योतयितव्यं च प्राणश्च विधारयितव्यं चेति' वाक्यैश्च सौषुप्तादाध्यात्मिकात प्राज्ञादाविद्यकजगदुत्पत्तिं तस्मिन्नेव तल्लयं चावेद्यानन्तरम् ।

'एष हि द्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुष इति' वाक्येन तस्यैवाध्यात्मिकस्य परात्मत्वेन प्राक् निर्दिष्टस्य प्राज्ञस्य स्वारोपितकार्यकरणेऽहमित्यध्यासात् विज्ञानमयत्वरूपं संसारित्वमुपदिश्य ।

'स परेऽक्षरे आत्मनि संप्रतिष्ठते' इत्यनेन वाक्येन सुषुप्तिकाले विज्ञानमयस्य जीवस्योपाधिविलयात् अक्षरपरमात्मसंज्ञकसौषुप्तप्राज्ञरूपेणावस्थानं चादिश्य

'स यो हवै तदच्छाय्यमशरीरमलोहितं शुभ्रमक्षरं वेदयते यस्तु सोम्य स सर्वज्ञस्सर्वोभवति तदेष श्लोकः ॥ विज्ञानात्मा सह देवैश्च सर्वैः प्राणा भूतानि संप्रतिष्ठन्ति यत्र । तदक्षरं वेदयते यस्तु सोम्य स सर्वज्ञस्सर्वमेवाविवेशेति' वाक्येन च तदेव सौषुप्तमक्षराख्यमध्यात्मं तदीयं शुद्धस्वरूपं चाहमस्मीति विजानतः सर्वज्ञत्वसर्वात्मकत्वोपदेशेन स्वस्मिन्नाध्यात्मिक एव समन्विता भवति ।

एवमेवेश केन कठ प्रश्न वाक्यानीव मुण्डकोपनिषदपि 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति' प्रश्नेः तत्प्रतिवचनावसरे 'द्वे विद्ये वेदितव्ये' इत्यादिवाक्येन परापरविभागेन विद्याद्वयं प्रतिज्ञाय तयोर्मध्ये 'अथ परा यया तदक्षरमधिगम्यते यत्तददृश्यमग्राह्यमगोत्रमवर्णमचक्षुश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीरा इति' वाक्येन जगत्कारणत्वेन प्रतिबोधितस्य अक्षरसंज्ञकस्य विद्याधिगम्यस्य पुनरपि विद्याविषयत्वेन आध्यात्मिकत्वेन च परामर्शकस्य 'यस्मिन्द्यौः पृथिवी चान्तरिक्षमोतम्मनस्सह प्राणैश्च सर्वैः । तमेवैकं जानथात्मानमिति' तदुत्तरवाक्यस्य च 'न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति' वाक्यस्य च समन्वयं दर्शयति ।

किञ्च 'इयदामननादिति गुणोपसंहारपादगतस्य एकविंशाधिकरणस्थानेन' द्वासुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्योऽभिचाकशीतीत्यध्यात्माधिकारे मन्त्रमाथर्वणिकारकाः श्वेताश्वतराश्च पठन्ति तथा कठाश्चेति भाष्योक्तप्रकारेण प्रागुक्ताथर्वणशाखीयमुण्डकोपनिषदः तत्तद्वाक्यमूलकं—अदृश्यत्वादिगुणको धर्मोक्ते' रित्यधिकरणं तद्भाष्यञ्च 'द्युभ्वाद्यायतनं स्वशब्दा' दित्यधिकरणं तद्भाष्यं च । 'अनुकृतेस्तस्य चे' त्यधिकरणं तद्भाष्यं च 'इयदामनना' दित्यधिकरणं तद्भाष्यं चाध्यात्मिके प्राज्ञे तादृयशुद्धस्वरूपे च क्रमात्समन्वितं भवति ।

एवमेव माण्डूक्योपनिषदपि सर्वं ह्येतद्ब्रह्मेति' वाक्येन जगतस्समस्तस्य ब्रह्मप्रकृतिकत्वमुपदिश्य किं तद्ब्रह्मेति प्राप्ते–'अयमात्मा ब्रह्मेति वाक्येनाध्यात्मिकं प्रत्यगेव ब्रह्मेति दर्शयित्वा पुनस्तस्यैवाध्यात्मिकस्य स्वात्मनः जीवेश्वरभावं बन्धमोक्षाधिकारित्वञ्च प्रदर्शयितुं 'सोऽयमात्मा चतुष्पादिति' वाक्येन पूर्वोत्तरावस्थाभेदेन चातुर्विध्यं प्रतिज्ञाय तत्रादौ 'जागरितस्थानो बहिःप्रज्ञस्सप्ताङ्ग एकोनविंशति मुखः स्थूलभुग्वैश्वानरः प्रथमः पादः । स्वप्नस्थानोऽन्तःप्रज्ञस्सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्तभुक् तैजसो द्वितीयः पाद' इति वाक्येन जाग्रत्स्वप्नकाले प्रथमद्वितीयपादत्वेन बन्धमोक्षाधिकारयोग्यं शरीरेन्द्रियसङ्घाते अहमित्यध्यासवत्स्वरूपं संप्रदर्श्य । 'यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत् सुषुप्तम् । सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः । एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिस्सर्वस्य प्रभवाप्ययौ हि भूताना'मिति'वाक्येन तृतीयपादत्वेन निर्दिष्टस्य आध्यात्मिकस्य प्राज्ञस्य प्रागुक्तेशकेनकठप्रश्नमुण्डकवाक्यानुसारेणैव आविद्यकनिखिलजगदुपादानत्वं निरङ्कुशमादिश्यानन्तरं–'नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं नप्रज्ञानघनं न प्रज्ञं नाप्रज्ञं–अदृश्यमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेय' इत्याध्यात्मिक एव समन्विता भवति ।

एवमेव माण्डूक्यार्थप्रकाशिकया सभाष्यया ॥ श्लो ॥ 'कार्यकारणसंबद्धाविष्येते विश्वतैजसौ । प्राज्ञः कारणबद्धस्तु द्वौ तौ तुर्ये न सिद्ध्यत इति श्रीगौडपादकारिकयापि आध्यात्मिक एव माण्डूक्यश्रुतेः समन्वयो दर्शितः ।

एवमेव–'कारणत्वेन चाकाशादिषु यथा व्यपदिष्टोक्ते' रित्यधिकरणे तदीयेनानेन सत्यपि प्रतिवेदान्तं सृज्यमानेष्वाकाशादिषु क्रमद्वारके विगाने न स्वधरे

किञ्चिद्विगानमस्ति–कुतः–यथा व्यपदिष्टोक्तेः यथा भूतो ह्येकस्मिन्वेदान्ते सर्वज्ञस्सर्वेश्वरस्सर्वात्मकोऽद्वितीयः कारणत्वेन व्यपदिष्टः तथा भूत एव वेदान्तान्तरेष्वपि व्यपदिश्यते तद्यथा–'सत्यं ज्ञानमनन्तं ब्रह्मे' त्यत्र तावत् ज्ञानशब्देन–परेण च तद्विषयेण कामयितृत्ववचनेन चेतनं ब्रह्म त्वरूपच्छाख्रं–अपरप्रयोज्यत्वेनेश्वरं कारणमब्रवीत्–तद्विषयेणैव परेण तस्माद्वा एतस्मादात्मन आकाशस्संभूत इत्यात्मशब्देन शरीरादिकोशपरंपरया च अन्तरान्तरात्मानुप्रवेशनेन सर्वेषां नः प्रत्यगात्मान निरधारयत्–'सोऽकामयत बहुस्यां प्रजायेयेति च आत्मविषयेण बहुभवनाशंसनेन सृज्यमानानां विकाराणां स्रष्टुरभेदमभाषत ।

तथा 'इदं सर्वमसृजत यदिदं किञ्चेति' समस्तजगत्सृष्टिनिर्देशेन प्राक् सृष्टेराद्वितीयं स्रष्टारमाचष्टे ।

तदत्र यल्लक्षणं ब्रह्म कारणत्वेन विज्ञातं तल्लक्षणमेवान्यत्रापि विज्ञायते 'सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयं तदैक्षत बहुस्यां प्रजायेयेति तत्तेजोऽसृजत सता सोम्य तदा संपन्नो भवति स्वमपीतो भवती'ति ।

तथा 'आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किञ्चन मिषत्स ईक्षत लोकान्नु सृजा' इति च ।

एवं जातीयकस्य कारणस्वरूपनिरूपणपरस्य वाक्यजातस्य प्रतिवेदान्तमविगीतार्थत्वादिति भाष्येण च प्रागुक्तेशकेन कठ प्रश्न मुण्ड माण्डूक्य तत्तद्भाष्यैरिव तैत्तिरीयैतरेयछान्दोग्यैर्जगत्कारणत्वेन निर्दिष्टे आध्यात्मिक एव तेषां समन्वयो दर्शितः ।

एवमेव छान्दोग्यस्याप्यवगतिसामान्यप्रदर्शनाय श्रीब्रह्मणा स्वगीतायां षष्ठाध्याये - श्लो ॥ यथा हिरण्यं निहितं क्षेत्रज्ञानविवर्जिताः । उपर्युपरि गच्छन्त्यो न विन्देयुः प्रजा इमाः । तथा सुषुप्तौ गच्छन्त्यो ब्रह्म लोकं स्वयं प्रभम् । न विन्दन्ति महामोहादहो मोहस्य वैभवम् ।

अयं हृदि स्थितस्साक्षी सर्वेषामविशेषतः । तेनायं हृदयं प्रोक्तश्शिवस्संसारनाशकः । य एवं वेद स स्वर्गं लोकमेति न संशयः । अस्माच्छरीरादुत्थाय सुषुप्तस्सुरर्षभाः । परं ज्योति स्वरूपं तं शिवस्संपद्य हेसुराः । अभिनिष्पद्यते स्वेन व स्वभावतः । एष आत्मा न चैवान्यः– सत्यमेव मयोदितम् । एतदेवामृतं

साक्षादभयं ब्रह्म हे सुराः । य आत्मा दहराकाशस्ससेतुर्विधृतिस्सुराः । असंभेदाय लेकानामेषामेतं महेश्वरम् । अहोरात्रे न तरतो न मृत्युर्न जरापि चेत्यादिवचनैरवस्थाश्रयवति स्वात्मनि दहराकाशत्वजगत्सेतुत्वनिर्मातृत्वद्वारा तुरीये प्रतीचि समन्वयो दर्शितः ।

किञ्च आनन्दस्य, मीमांसाफलमुपसंहृियते **स यश्चायं पुरुष इति** यः गुहायां निहितः परमे व्योम्नि आकाशादिकार्यं स्रष्ट्रान्नमयान्तं तदेवानु प्रविष्टश्च स—इति—टि—वक्ष्यमाणप्रकारेण—निर्दिश्यते कोऽसौ—अयं पुरुषे इति अनेन 'भीषास्माद्वातः पवत' इत्यष्टमानुवाकभाष्येण ।

इहैवान्तश्शरीरे सोम्य स पुरुष इति श्रुतितद्भाष्यार्थप्रकाशकत्वेनास्माभिः प्रागुदाहृततृतीयनिरूपणोक्तप्रकारेण स्वात्मनोऽपरिवेष्टके शरीरेऽहमिति प्रतीयमान आध्यात्मिक एव निखिलमाकाशाद्यन्नमयान्तं कार्यं स्वस्मिन्नध्यस्य तत्राभिमन्ता—अयं पुरुषे इति निर्दिश्यते इत्युक्त्वा पुनस्तत्रैव ।

तत्रत्येनैवानेन यः परमानन्दः श्रोत्रियप्रत्यक्षो निर्दिष्टः यस्यैकदेशं ब्रह्मादीनि भूतानि सुखार्हाण्युपजीवन्ति च सः **यश्चासावादित्ये** इति निर्दिश्यत इति भाष्येण च ।

'कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् अध्यात्मयोगाधिगमेन देवम्मत्वा धीरो हर्षशोकौ जहाती' त्यादि श्रुत्यन्तरोक्तप्रकारेण युवा स्यात् साधु युवाऽध्यायकः । आशिष्ठो दृढिष्ठो बलिष्ठः । तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात् स एको मानुष आनन्दः । ते ये शतं मानुषा आनन्दाः । स एको मनुष्यगन्धर्वाणामानन्दः श्रोत्रियस्य चाकामहतस्येत्यारभ्य उत्तरोत्तरं शतगुणाधिक्येन संभाव्यमानानां देवगन्धर्वादिहिरण्यगर्भावसानकानन्दानां श्रोत्रियस्य चाकामहतस्येत्यभ्यासेन स्वात्मतया श्रोत्रियप्रत्यक्षत्वेन निर्दिष्टस्याध्यात्मिकस्य प्रागुक्ताकाशाद्यन्नमयान्तविकारान्तःपात्यादित्यमण्डलेऽप्यनुवृत्त्यवगमात् तदविरोधेनैव तत्पूर्वापरेषां ज्ञेयस्वरूपपराणां तैत्तिरीयकवाक्यानामप्याध्यात्मिक एव समन्वयस्य यथावच्छ्रौतार्थजिज्ञासवे भगवताऽस्माभ्याकृता दर्शितत्वात्तथैव ग्रहीतव्यः नाधिदैविके ।

किञ्च ईक्षत्यधिकरणे 'गतिसामान्या' दिति सूत्रेण तदीयेनानेन समानैव हि सर्वेषु वेदान्तेषु चेतनकारणावगतिः 'यथाग्नेर्ज्वलतस्सर्वा दिशो विष्फुलिङ्गा विप्रतिष्ठेरन् एवमेवैतस्मादात्मनस्सर्वे प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवाः देवेभ्यो लोका' इति । 'तस्माद्वा एतस्मादात्मन आकाशस्संभूत' इति—'आत्मन एवेदं सर्वमिति आत्मन एष प्राणो जायत इति च आत्मनः कारणत्वं दर्शयन्ति सर्वे वेदान्ताः आत्मशब्दश्चेतनवचन इत्यवोचाम—महच्च प्रामाण्यकारणमेतत् यद्वे-

दान्तवाक्यानां चेतनकारणत्वे समानावगतित्वं चक्षुरादीनामिव रूपादिषु अतो गतिसामान्यात् सर्वज्ञं ब्रह्म जगतः कारणं न प्रधानमिति भाष्येण च उदाहृत-कौषीतकीतैत्तिरीयकप्रश्नोपनिषद्गतात्मशब्दस्य निरुपपदस्यात्मशब्दस्य प्रत्यगात्म-नि रूढत्वादिति तत्र तत्र भाष्योक्तप्रकारेण च 'क्षेत्रज्ञ आत्मा पुरुषः प्राणी तु चेतनो जन्मी जन्तुर्जन्युश्शरीरिण इत्यमरकोशोक्तप्रकारेण च' चेतने ब्रह्मत्वाश्रये आध्या-त्मिके एव समन्वयो दर्शितः ।

एवमेव - 'अक्षरमम्बरान्तधृतेः' अक्षराधियां त्ववरोधस्सामान्यतद्भावाभ्या-मौपसदवत्तदुक्तमित्यधिकरणद्वयेन लिलक्षयिषितस्य 'कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चे'ति प्रश्ने सहोवाच 'एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति अस्थूलमन-ण्विं'त्यारभ्य 'एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चे'ति बार्हदारण्यपञ्च-माध्यायवचनस्य सर्वजगदुपादानभूतमूलाज्ञानाधिष्ठानप्रत्यगात्मपरस्य तत्र भाष्य-कारैः 'अथ परा - यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुः-श्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीरा'इति मुण्डकोपनिषदा तद्भाष्येण च निर्धारिते आध्यात्मिके समन्वयो दर्शितः।

एवमेव च 'यदा सुप्तः स्वप्नं न कञ्चन पश्यति अथास्मिन्प्राण एवैकधा भवति तदैनं वाक् सर्वैर्नामभिस्सहाप्येति चक्षुस्सर्वै रूपैस्सहाप्येती'त्यादिकौषीतकी-श्रुतेश्च 'पुरत्रये क्रीडति यस्तु जीवस्ततस्तु जातं सकलं विचित्र'मिति कैवल्य-श्रुतेश्च स्पष्टमेवाध्यात्मिके समन्वयोऽवगम्यते ।

किञ्च भगवता श्रीब्रह्मणा ब्रह्मगीतायाः चतुर्थाध्यायगतेनानेन ॥ श्लो॥ तस्मा-दस्ति महादेव एव साक्षात्स्वयं प्रभः॥ आनन्दरूपस्संपूर्णो न ततोऽन्यत्तु किञ्चन । इयमेव तु तर्काणां निष्ठा काष्ठा सुरोत्तमाः । प्रत्यक्षादिप्रमाणानां वेदान्तानामपीश्व-राः । स्मृतीनाञ्च पुराणानां भारतस्य तथैव च । वेदानुसारिविद्यानामन्यासामा-स्तिकोत्तमाः ॥ शैवागमानां सर्वेषां विष्णुप्रोक्तागमस्य च ।

अस्मदुक्तागमस्यापि सुरास्सूक्ष्मनिदर्शने । बुद्धागमानां सर्वेषामिति वच-नेन सर्वश्रुतिस्मृतीतिहासपुराणागमानां तदितरप्रमाणानाञ्चाध्यात्मिके प्रत्यगा-त्मन्येव यस्समन्वयो दर्शितः स तु द्वितीयनिरूपणे पञ्चसप्तत्युत्तरशततमादिश्लो-कतद्व्याख्यानाभ्यामवगम्यताम् ।

एवमेव चित्रदीपे श्रीविद्यारण्याचार्यैः। श्लो ॥ सदा विचारयेत्तस्माज्जगज्जी-वपरात्मनः । जीवभावजगद्भावबाधे स्वात्मैव शिष्यते इति जीवभावजगद्भावयोः स्वात्मावस्थाविशेषत्वप्रदर्शनेनाध्यात्मिके सर्वशास्त्राणां समन्वयो दर्शितः ।

किं बहुनाऽस्मिन् शास्त्रे चतुर्थनिरूपणं विना प्रथमादिसप्तमान्तनिरूपणैर्निरूपितानां श्रुत्यादिप्रमाणानां आध्यात्मिके प्रत्यगात्मन्येव समन्वयमवादिष्म । उदर्के चाष्टमादिनिरूपणैर्वक्ष्यमाणानां शास्त्राणामप्याध्यात्मिके स्वात्मन्येव समन्वयं प्रदर्शयिष्यामः ॥ २७ ॥

अ० ॥ नन्वेवमेकस्येव अनेकेषामप्यवस्थात्रयवतां जीवानां तत्तदविद्यया स्वस्मिन्पार्थक्येन जगद्भावभोक्तृत्वादिसंसाराङ्गीकारे जीवभेदेन बन्धमुक्तिव्यवस्थापरशास्त्रस्य सामञ्जस्यं भवेदित्याक्षिप्य निराकरोति **नन्वेवमिति**—

मू॥ नन्वेवं बहुजीवानां साधिदैवस्य हेतुता ॥
स्याच्चेत्तदा बन्धमोक्षव्यवस्था चात्मभेदतः ।
सिध्येद्यदि प्रपीड्येत जीवनानात्वखण्डकम् ॥
अजाधिकरणीयं यद्भाष्यं किं चेत्तदुच्यते ॥ २९॥ ॥

व्या० ॥ **साधिदैवस्येति** जगत इति शेषः **अजाधिकरणीयमिति** अजामेकां लोहितशुक्लकृष्णामित्यादिश्रुतिमूलकचमसाधिकरणीयं भाष्यमित्यर्थः ॥

अ० ॥ इदानीं तदेव जीवनानात्वखण्डनपरं 'अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः । अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः' इति श्रुत्यवष्टम्भेन न चेदमाशङ्कितव्यं एकः क्षेत्रज्ञोऽनुशेते तदन्यो जहातीत्यतः क्षेत्रज्ञभेदः पारमार्थिकः परेषां साङ्ख्यानामिष्टः प्राप्नोतीति—

नहीयं श्रुतिः क्षेत्रज्ञभेदप्रतिपिपादयिषा—किन्तु बन्धमोक्षव्यवस्थाप्रतिपिपादयिषैवैषा - प्रसिद्धन्तु - भेदमनूद्य बन्धमोक्षव्यवस्था प्रतिपाद्यते - भेदस्तूपाधिनिमित्तो मिथ्याज्ञानपरिकल्पितो न पारमार्थिकः—'एको देवस्सर्वभूतेषु गूढस्सर्वव्यापी सर्वभूतान्तरात्मे'त्यादि श्रुतिभ्य इत्यन्तं चमसाधिकरणभाष्यं अर्थतस्संगृह्य एकजीववादे प्रमाणयति **अज इति**—

मू ॥ अजो ह्येक इति श्रुत्या जीवभेदः प्रदर्शितः ॥
इत्याशङ्का न कर्तव्या - नात्मभेदपरा त्वियम् ।
किं त्वेकस्य भ्रमात्प्राप्तभेदमेवानुभाष्य च ॥
भूतात्माध्यासतो बन्धस्तद्विवेकाद्विमुक्तता ।
इति बन्धविमोक्षाख्यव्यवस्थावादिनी श्रुतिः ॥

इत्यादिश्य यतश्चात्रैवैको देव इति श्रुतिं ।
प्रमाणयत्यतोऽनेकतनुषु ह्येकजीवकः ॥ ३३ ॥

व्या॰ ॥ एकस्यैव जीवस्यात्रिवृत्कृतेषु स्थूलभूताद्युपादानकारणेषु तेजोबन्नेषु अहमित्यध्यासवशाद्बन्धः अहं तत्तेजोबन्नादिसाक्षित्वेन तद्भिन्न इति विवेकज्ञानात् तस्यैव मोक्षश्च भवतीति बन्धमुक्तिव्यवस्थापरत्वं तस्याः श्रुतेरादिश्य पुनस्तेषामेव निरीश्वराणां साङ्ख्यानां जीवनानात्वभ्रमनिरासविषये यस्मात् 'एको देवस्सर्वभूतेषु गूढ' इत्यादिश्रुतिं प्रमाणयत्याचार्यः तस्मादनेकशरीरेष्वेकजीववादस्सिद्ध इत्यर्थः ॥

अ॰ ॥ ननु, भाष्यकारैरेकजीववादानुगुण्येन व्याख्यातस्य अजामेकामित्यादिश्वेताश्वतरमन्त्रस्य जीवनानात्वपरत्वे को दोष इति प्रश्नपूर्वकं तत्र बाधं दर्शयति--**जीवेति** ॥

मू॥ जीवभेदपरत्वेऽस्याश्रुतेः को दोष उच्यते ।
तयोर्भेदे विभिन्ना स्यादजेहैकैव गम्यते ॥
सन्निकृष्टपरादेतच्छब्दात्तैस्साधु दर्शितम् ॥ ३४ ॥

व्या॥ तयोरिति अजाशब्दितेतजोबन्नोपाधिकयोःबन्धमोक्षाधिकारिणोः अविद्वज्ज्ञानिनोः भेदपक्षे तत्तदुपाधिभूताप्यजा महाभूतत्रयरूपा विभिन्ना भवितुमर्हति । ज्ञानेन विनष्टायाः विद्वदुपलक्षणभूतायाः अजायास्सकाशादन्यस्याः अविद्वद्विशेषणभूताया अजायाः यावद्विषयमुपसेव्यत्वात् न तयोर्भेद इहावगम्यते–किंतु अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः–अजो ह्येको जुषमाणोऽनुशेत इति' मन्त्रपूर्वभागेन या पुनरजा–स्वाभिमानिना जीवेनोपभुज्यमानत्वेनोपदिष्टा तामेव एनां भुक्तभोगामिति तन्मन्त्रोत्तरभागगतैतच्छब्देन परामृश्य जहातीत्युक्ते तां जुषमाण इति पूर्वभागोक्तभोक्तैव तत्त्यागीति वक्तुं शक्यते-ऽन्यथा प्रकृतहानाप्रकृतप्रक्रिये प्रसज्येयातां अतो भगवद्भिर्भाष्यकारैर्यत् तच्छ्रुतेजीवभेदभ्रमनिरासपरत्वं दर्शितं तदेव साध्वित्यर्थः ॥ ३४ ॥

अ॰ ॥ चिदेकत्ववादिनः जीवभेदेन बन्धमुक्तिव्यवस्थाऽनुपपत्तिं दिदर्शयिषुरादौ चिद्भेदस्य सत्यत्ववादिन एव तदुपपत्तिं दर्शयति **यस्येति**—

मू॥ यस्य सत्यो व्यक्तिभेदो जीवानाञ्च तदीशयोः ।
बन्धमुक्तिव्यवस्था तु संगता तस्य वादिनः ॥ ३५ ॥

व्या० ॥ यस्य वादिनः इत्यन्वयः **तदीशयोरिति** जीवेशयोरित्यर्थः तच्चितोर्योग इत्यादाविव द्वन्द्वः नैकशेषः ॥ ३५ ॥

अ० ॥ इदानीं चिदभेदवादिनस्तदनुपपत्तिमाह—**जीवेशयोरिति**—

मू॥ जीवेशयोश्च जीवानां यस्य भेदो भ्रमात्मकः ।
पुंभेदेन व्यवस्थेयं कथं तस्य समञ्जसा ॥ ३६ ॥

व्या० ॥ **यस्य** वादिन ईशात्मनोः कल्पककल्पितजीवानां च कालत एव भेदः न देशतः तस्य पुरुषभेदेन न बन्धादिरभ्युपेया ॥ ३६ ॥

अ० ॥ उपपादितार्थे चोद्यमनुवदति **अद्वैतिनामिति**—

मू॥ अद्वैतिनां चिदेकत्वे जीवाश्चिद्वेष्टकैर्जडैः ।
अवच्छिन्ना ब्रह्मणोंशा आभासाश्चेति कल्पनैः ॥
जीवेशयोश्च जीवानां भेदात्सा चेत्प्रसिध्यति ॥ ३७॥ ॥

व्या॥ चिद्वेष्टकैरिति ब्रह्मपरिवेष्टकैरुपाधिभिः अवच्छिन्नब्रह्मरूपाः जीवाः अथवा ब्रह्मांशा उत ब्रह्मप्रतिबिम्बभूता भवेयुरिति कल्पनैः जीवेशयोर्जीवानाञ्चोपाधिकृतभेदसंभवाज्जीवभेदेन बन्धमुक्तिव्यवस्था सिध्यत्येवेत्याक्षेपमनुवदति **चेदिति**--

अ० ॥ तच्चोद्यं निराकरोति **ब्रह्मण इति**—

मू॥ ब्रह्मणो वेष्टनाभावात्तृतीयोक्तप्रकारतः ।
जीवस्य प्रतिबिम्बत्वब्रह्मांशत्वाद्यभावतः ।
नानात्वाभावतो नो चेत्कृतहानादिसंभवात् ।
पुंभेदेन व्यवस्थेति सुतरां नोपपद्यते ॥ ३९॥ ॥

व्या॥ तृतीयनिरूपणोक्तप्रकारेण निरवयवस्य ब्रह्मणः तदुपाधिभूतशरीरत्रयेणापि परिवेष्टनाद्यसंभवात्कृतहानाकृताभ्यागमादिदोषसंभवाच्च पुरुषभेदेन बन्धमुक्तिव्यवस्थेत्यभिसन्धिः सुतरां नोपपद्यते–सम्यगेतच्छ्लोकद्वयार्थप्रतिपत्तये प्रागुक्ततृतीयनिरूपणमान्तं श्रुतं चेत् संस्मरेदश्रुतं चेदेतदाचार्यसंप्रदायाभिज्ञमुखात्तद्विचारयेत् ॥ ३९ ॥

अ० ॥ ब्रह्मणो वेष्टनाभावादिति श्लोकद्वयेनोपपादितार्थे–'तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवदित्युत्कान्त्यधिकरणीयसिद्धान्तसूत्रस्येदं--नैतदस्त्यणुरात्मेति—

उत्पत्त्यश्रवणात्–परस्यैव तु ब्रह्मणः प्रवेशश्रवणात् तादात्म्योपदेशाच्च परमेव ब्रह्म जीव इत्युक्तं–परमेव चेत् ब्रह्म जीवः तस्माद्यावत्परं ब्रह्म तावाञ्जीवो भवितुमर्हति परस्य च ब्रह्मणो विभुत्वमाम्नातं–तस्माद्विभुर्जीवः–तथा च स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेष्वित्येवं जातीयकाः जीवविषया विभुत्ववादाश्श्रौतास्स्मार्ताश्च समर्थिता भवन्तीति भाष्यमर्थतस्सङ्गृह्य प्रमाणयति **गत्यागतीति**—

मू ॥ गत्यागत्यनुवादेन न जीवोऽणुर्भवेत्कुतः ॥ ४० ॥
परस्यैवात्मनः कार्ये प्रवेशश्रवणात्तथा ।
तादात्म्यस्योपदेशाच्च ब्रह्मैवात्मेति दर्शितम् ॥ ४१ ॥
तस्माद्यावत्परं ब्रह्म जीवस्तावान्भवेदयम् ।
विभुत्वं ब्रह्मणश्चोक्तं तस्माज्जीवो विभुर्भवेत् ॥ ४२ ॥
स वा एष महानात्मेत्येवं जातीयकाः पुरा ।
विभुत्ववादा जीवस्य श्रौतास्स्मार्ताश्च दर्शिताः ॥ ४३ ॥
इति भाष्यं प्रकुप्येत यदि जीवः परात्मनः ।
अंशो वा प्रतिबिम्बो वाप्यवच्छिन्नस्तदा—यतः ॥ ४४॥
अंशि बिम्बानवच्छिन्नैर्नाशादिस्तुल्यमानवान् ।
लक्ष्यस्योक्तं विभुत्वं चेत् प्रवेशश्रुतितस्तथा ॥ ४५ ॥
स वा एष महांश्चेति विज्ञानमयवाक्यतः ।
वाच्यस्यैव विभुत्वं हि जीवस्योवाच भाष्यकृत् ॥ ४६ ॥
यतोऽतो लक्ष्यवज्जीवो विभुरेको भवेदयम् ।
अन्यथा - नैकपरता - तच्चोद्यपरिहारयोः ॥ ४७॥

व्या ॥ गत्यागत्यानुवादेनेति जीवस्योत्क्रान्त्याद्यनुवादकशास्त्रमात्रेणाणुत्वं नैव सिद्ध्यतीत्युक्त्वा विभुत्वे 'तत् सृष्ट्वा तदेवानु प्राविशदित्यादि शास्त्रं' प्रमाणयति—**परस्यैवेत्यादिना** अत्र तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुतितद्भाष्याभ्यां आत्मानात्मनोः विषमसत्ताकत्वे तयोरविचारकृतमेकं तादात्म्यं दर्शयित्वा तत्त्वम-

सीत्यादि शास्त्रतद्भाष्याभ्यां तत्वंपदार्थविचारकृतमपरं तादात्म्यं दर्शितम् तथैव श्लो-प्रत्यग्बोधो य आभाति सोऽद्वयानन्दलक्षणः । अद्वयानन्दरूपश्च प्रत्यग्बोधैकलक्षणः । इत्थमन्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत् । अब्रह्मत्वं त्वमर्थस्य व्यावर्त्येतेति विद्यायत्तं तादात्म्यमुक्तं—इति भाष्यं यदि जीवः परात्मनः अंशो वा प्रतिबिम्बो वाप्यवच्छिन्नः तदा प्रकुप्येतेत्यन्वयः—तत्कुत इत्यत आह—**यत इत्यादिना** तुल्यमानवानिति तुल्यपरिमाणवानित्यर्थः ॥ उदाहृतभाष्यगतजीवशब्दस्य त्वंपदलक्ष्यार्थपरत्व-वादिनं निराकरोति—**लक्ष्यस्येत्यादिना** विपक्षे बाधमाह—**अन्यथेत्यादिना** चोद्यवाक्यस्य त्वंपदवाच्यपरत्वं परिहारवाक्यस्य त्वंपदलक्ष्यपरत्वं च यद्यभ्युप-गम्येत—तदा तयोर्भिन्नविषयत्वान्नैकविषयता स्यात्—किं च यावत्परं ब्रह्म तावाञ्जीवो भवितुमर्हतीति भाष्यस्य लक्ष्यद्वयपरत्वे तत्त्वंपदवाच्ययोरुपाधिपरिवे-ष्टितत्वपक्षे भिन्नत्वात् तत्त्वंपदयोरेकलक्ष्यार्थपरत्वावगमाय लक्षणावृत्त्याश्रयणं ॥ श्लो ॥ न तत्त्वमोरुभावर्थावस्मात्सिद्धान्ततां गतौ । यस्तत्त्वंशब्दलक्ष्यार्थस्तस्मिन्भेदः प्रकल्पित इत्यादि शास्त्रं च निरर्थकं स्यात्—अस्मत्पक्षे तु जीवत्वागमनात् प्रागिव तदनन्तरमपि समानपरिमाणकमेवं ब्रह्मेति न कश्चिद्दोषः ॥ ४७ ॥

अ० ॥ कथं तर्ह्येकजीववादे बन्धमुक्तिव्यवस्थायाः उपपत्तिरित्याशङ्क्य प्रागुक्तचमसाधिकरणीयभाष्योक्तप्रकारेण एकस्यैव जीवस्य क्रमात्तदुपपत्तिसंभवे सति न लौकिकदृष्टिराश्रयणीयेत्याह **जीवेति**—

मू ॥ जीवानुयोगिके भेदे परमेशानुयोगिके ।
सर्वश्चास्मीति वृत्त्यैव सहाज्ञाने न नाशिते ॥ ४८ ॥
पूर्णात्स्वस्माद्विनाऽन्येशजीवानां व्यक्त्यभावतः ।
बन्धमुक्तिव्यवस्थायाः क्रमादेकस्य संभवे ॥ ४९ ॥
मुक्ता मदन्ये तेऽभूवंस्तदन्योऽहं तु बन्धवान् ।
इति लोकदृशा नैवं व्यवस्था वर्ण्यतां बुधैः ॥ ५० ॥

व्या० ॥ **जीवानुयोगिक इति** स्वेतरे जीवाः अनुयोगिनो यस्य स्व-प्रतियोगिकस्य भेदस्य स जीवानुयोगिकः तस्मिन् तथैव परमेशानुयोगिके स्वस्मा-दन्यः परमेश्वरोऽनुयोगी यस्य स्वप्रतियोगिकस्य भेदस्य सपरमेशानुयोगिकस्तस्मिन् शेषस्तुगमः ॥ ५० ॥

अ० ॥ उपपादितार्थे ब्रह्मसंमतिं प्रतिजानीते **अत्रेति**—

मू ॥ अत्र श्रीब्रह्मगीतायाश्चतुर्थाध्यायसम्मतिः ॥ ९०॥ ॥

व्या ॥ वक्ष्यमाणप्रकारेणास्तीत्यर्थः ।

अ० ॥ नन्वेकस्यैवात्मनः स्वकीयपरकीयशरीरेषु कथं साम्येनावस्थानमुपपद्यते ततो बन्धमुक्तिव्यवस्थान्यथानुपपत्त्या जीवनानात्वस्य अवश्यम्भावादित्याशङ्क्याह—ब्रह्मा **बद्ध इति**—

मू ॥ बद्धो मुक्तो महान् विद्वानज्ञ इत्यादिभेदतः ।
एक एव सदा भाति चेतनस्स्वप्नदृग्यथा ॥ ९१ ॥

व्या ॥ यथा चेतनस्स्वप्नदृक् तैजसाख्यो जीवस्स्वयमेक एव सन्नज्ञानवशाद्गुरुशिष्यादिरूपेण विविधो भाति—एवं जाग्रदवस्थायामप्येक एव विज्ञानमयाख्यो जीवः स्वयमेवाज्ञानवशादहं बद्धोऽयं मुक्तस्स महानेष विद्वानसावज्ञ इति विविधत्वेन भ्रमाद्भातीत्यर्थः ॥ ५१ ॥

अ० ॥ ननु स्वप्नावस्थावतो जीवात् तत्परिकल्पितानां जीवाभासानामिव जाग्रदवस्थापन्नाज्जीवात् तत्परिकल्पितानामपि जीवाभासानां माभूद्भेदस्ततः किमायातमित्यत आह—ब्रह्मा **अत इति**—

मू ॥ अतस्स्वमुक्त्या चान्येषां आभासानामपि ध्रुवम् ।
मुक्तिं जानाति हे देवा आत्मनामात्मविद्वरः॥
स्वसंसारदशायां तु स्वभ्रान्त्या सर्वदेहिनाम् ।
आभासानां च संसारं वेद मुक्तिं तथैव च ॥ ९४ ॥

व्या ॥ यतः कल्पकात्स्वस्मात्कल्पितानां जीवाभासानां भेदो न विद्यते ततः स्वप्नदृगिवायं जाग्रदवस्थोऽपि जीवः तत्कल्पितानां दृष्टिमात्रशरीराणां निरन्तःकरणानां जीवाभासानामपि स्वाविद्याविद्याभ्यामेव बन्धमुक्ती जानातीत्युक्त्वा—नानाजीववादजन्यज्ञानवत्वापेक्षया चैकजीववादजन्यज्ञानवत्वं प्रशंसति **आत्मविद्वर इति** ॥

अ० ॥ ननु कुतः श्रीब्रह्मणा कल्पकस्य चिद्रूपत्वं तत्कल्पितानां चिदाभासत्वमभिप्रेतमित्यत आह—**सच्चिदिति** ॥

मू ॥ सच्चिदानन्द इत्यत्र चिच्छब्दस्स्वात्मबोधकः ।
बुद्धिपर्यायचिच्छब्दश्चिदाभासावबोधकः ॥
यतोऽतो बुद्धिरूपाणां आभासत्वं तदीरितम् ।

व्या ॥ स्पष्टोऽर्थः ॥ ५५ ॥

अ० ॥ इदानीं ब्रह्मवाक्यमुपसंहरति–**इत्यादेशादिति**—

मू॥ इत्यादेशाद्विधेरेकजीववादो विशिष्यते ॥ ५६ ॥

व्या ॥ स्पष्टोऽर्थः ॥ ५६ ॥

अ० ॥ इदानीमलातशान्तिप्रकरणगतं श्रीगौडपादाचार्यवाक्यमप्यत्र प्रमाणयति **स्वप्नदृगिति**—

मू॥ स्वप्नदृक्प्रचरन्स्वप्ने दिक्षु वै दशसु स्थितान् ।
अण्डजान्स्वेदजान्वापि जीवान्पश्यति यान् सदा ॥
स्वप्नदृक्चित्तदृश्यास्ते–न विद्यन्ते ततः पृथक् ।
चरञ्जागरिते जाग्रद्दिक्षु वै दशसु स्थितान् ॥
अण्डजान् स्वेदजान्वापि जीवान्पश्यति यान् सदा ।
जाग्रच्चित्तेक्षणीयास्ते न विद्यन्ते ततः पृथक् ॥
इति श्रीगौडपादैस्तद्भाष्यकारैरपीरणात् ।
आचार्याणामयं ह्येकजीववादो मतो भवेत् ॥ ६० ॥

व्या ॥ दृष्टान्तदार्ष्टान्तिकयोः निर्दिष्टापिशब्दाभ्यां जरायुजोद्भिज्जानां संग्रहः कृतेन अण्डजादिकल्पकस्य स्वप्नजाग्रदवस्थावतो जीवस्य चित्तवृत्तिव्यतिरेकेण अण्डजादीनामसत्वविधानात् स्वप्नजागरितदृशा जीवेनैकेन परिकल्पितानां तच्चित्तवृत्तिमात्रस्वरूपाणां जीवाभासानां वस्त्राभासवत् स्वरूपतएव अचेतनत्वात् एकजीववाद एव आचार्याणां संमत इत्यर्थः ॥ ६० ॥

अ० ॥ उपपादितार्थं भगवद्वाक्यमपि प्रमाणयति **इदमिति**—

मू ॥ इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥
यावत् सञ्जायते किञ्चित्सत्वं स्थावरजंगमम् ।
क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ ॥ ६२ ॥

व्या ॥ **इदमिति** इदमेकमन्तःकरणादिकं शरीरं क्षेत्रशब्दितं यो जीवो वेत्ति स क्षेत्रज्ञ इत्युक्त्वा तस्यैव क्षेत्रज्ञस्याविवेकेन तत्क्षेत्रतादात्म्याध्यासवशात्

जीवाभासरूपचतुर्विधभूतग्रामकल्पकत्वमाह–**यावदित्यादिना** ततस्तत्कल्पक एक एव जीवो बन्धमोक्षाधिकारीति श्रीभगवताऽभिप्रेत इत्यर्थः ॥ ६२ ॥

अ० ॥ इदानीं सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्युपक्रम्य तत्तेजोऽसृजतेत्यादि छान्दोग्यश्रुत्या मूलाज्ञानेन तादात्म्यापन्न एक एव जीवो जगत्कारणत्वेनाभिप्रेत इति छान्दोग्यषष्ठाध्यायार्थनिर्णायकं ब्रह्मगीतायाः पञ्चमाध्यायवचनमुदाहरति । **तयेति**––

मू ॥ तया दुर्घटकारिण्या तादात्म्येनैव सङ्गतम् ।
कारणं सकलस्रष्टृ सर्वसंहर्तृ चास्तिकाः ॥
इत्येकजीववादो हि श्रौतत्वेन विधीरितः ॥ ६३॥ ॥

व्या ॥ **तयेति** मूलाविद्ययेत्यर्थः ॥ आधिदैविकस्य परमेश्वरस्य कर्मसापेक्षत्ववादरीत्या अविवेकपूर्वकं तया तादात्म्यासंभवात् सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति श्रुत्या एकजीववाद एवाभिप्रेत इति ब्रह्मणा दर्शितं ।

एवमेव छान्दोग्यबृहदारण्ययोरप्येकजीववादपरत्वं आत्मगृहीत्यधिकरणीयेनानेन–आत्मगृहीतिः सदेव सोम्येदमग्र आसीदित्यत्र छन्दोगानामपि भवितुमर्हति–इतरवत्–यथा–कतम आत्मेत्यत्र वाजसनेयिनामात्मगृहीतिस्तथैव कस्मात् उत्तरात् तादात्म्योपदेशात् । 'अन्वयादिति चेत् स्यादवधारणात्–यदुक्तं उपक्रमान्वयात् उपक्रमे चात्मशब्दश्रवणाभावात् नात्मगृहीतिरिति तस्य कः परिहार इति चेत् सोऽभिधीयते–स्यादवधारणादिति–भवेदुपपन्ने ह्यात्मगृहीतिः अवधारणात्–तथाहि येनाश्रुतं श्रुतं भवत्यमतम्मतमविज्ञातं विज्ञातमित्येकविज्ञानेन सर्वविज्ञानमवधार्य तत्संपिपादयिषया–सदेवेत्याह–तच्चावधारणं सच्छब्देनात्मगृहीतौ सत्यां संपद्यते–अन्यथा हि योऽयं मुख्य आत्मा स कारणत्वेन न विज्ञात इति नैव सर्वविज्ञानं संपद्येत तथा प्रागुत्पत्तेरेकत्वावधारणं–जीवस्य च अनेन जीवेनात्मनेत्यात्मशब्देन सद्देवताकर्तृकः परामर्शःस्वापावस्थायां च तत्स्वभावसंपत्तिकथनं–टि–**तस्य जीवस्य स्वस्वरूपापत्तिवचनं** परिचोदनापूर्वकं च पुनःपुनस्तत्त्वमसीत्यवधारणमिति सर्वमेतत्तादात्म्यप्रतिपादनायामेव अवकल्पत इति द्वितीयवर्णकभाष्येण–तत्सङ्गाहकेण ॥ श्लो० ॥ द्वयोर्वस्त्वन्यदेकं वा काण्वच्छान्दोग्यषष्ठयोः । उभयत्र पृथग्वस्तु सदात्मभ्यामुपक्रमात् । साधारणोऽयं सच्छब्दस्स आत्मा तत्वमित्यतः । वाक्यशेषादात्मवाची तस्माद्वस्त्वेकमेतयोरिति श्रीमद्विद्यारण्यीयाधिकरणरत्नमालावचनेन च मूलाविद्यया सह तादात्म्यापन्नानन्दमयपरेणोक्तब्रह्मगीतावचनेन च
[illegible]नार्थकत्वादित्यास्थेयम् ॥ ६३॥ ॥

अ० ॥ इदानीमुपपादितमेवार्थं स्थूणानिखननन्यायेन दृढयितुं तत्र चोद्यं प्रदर्शयति **नन्विति**—

मू॥ नन्वानन्दमयस्साधिदैविकस्त्वेश्वरो यदि ॥
नेशोऽयमिति चानन्दमयाधिकरणीयकम् ।
भाष्यं कुप्येत चेतीमां शङ्कां व्यावर्तयेति चेत् ॥

व्या ॥ स्पष्टोऽर्थः ॥ ६५ ॥

॥ आनन्दमयद्वैविध्यप्रदर्शनारम्भः ॥

अ० ॥ इदानीमानन्दमयविभागप्रदर्शनेन समाधत्ते । **स्वप्नेति**—

मू॥ स्वप्नानन्दमयः कार्योपाधिरेकस्ततोऽपि च ।
सुप्तानन्दमयश्चान्यः कारणोपाधिकस्तयोः ॥
कार्यानन्दमयस्यैव सर्वेशत्वं निराकृतम् ।
न कारणस्य सुप्तस्य सर्वेशत्वं निराकृतम् ॥ ६७ ॥

व्या ॥ स्वाप्निकानन्दमयः एकस्ततोऽप्यान्तरः सौषुप्तानन्दमयः परः तयोर्मध्ये कार्योपाधिकस्य स्वाप्नानन्दमयस्यैव सर्वेशत्वं आनन्दमयाधिकरणभाष्येण निराकृतमित्यनेन नापेक्षकं स्थूलजगत्कारणत्वं निराकृतमित्यभिप्रायः । शेषस्सुगमः ॥ ६७ ॥

अ० ॥ इदानीं–यस्य तावदानन्दमयस्य आनन्दमयाधिकरणभाष्ये सर्वेशत्वं निराकृतमिति प्रतिज्ञातं तस्य पाञ्चभौतिकोपाधिकत्वस्वाप्निकत्वादौ श्रीभगवत्पादीयमिदं । एवमेव मनोमयादिभिः पूर्वपूर्वव्यापिभिरुत्तरोत्तरैः सूक्ष्मैरानन्दमयान्तैः आकाशादिभूतारब्धैरविद्याकृतैः आत्मवन्तस्सर्वे प्राणिन इति प्राणमयपरोपनिषद्भाष्यं तथैव **आनन्दमय इति** कार्यात्मप्रतीतिरधिकारान्मयट्छब्दाच्च अन्नादिमया हि कार्यात्मानो भौतिका इहाधिकृताः तदधिकारपतितश्चायमानन्दमयः–मयट्चात्र विकारार्थे दृष्टो यथा अन्नमय इत्यत्र तस्मात् कार्यानन्दमय इति प्रत्येतव्य इत्युपक्रम्य आनन्दमय इति यद्विद्याकर्मणोः फलं तद्विकार आनन्दमयः। स च विज्ञानमयादन्तरः यज्ञादिहेतोर्विज्ञानमयादन्तर इति श्रुतेः - ज्ञानकर्मणोः फलं भोक्तृर्थत्वादन्तरतमं स्यात्–अन्तरतमश्चानन्दमय आत्मा पूर्वेभ्यः–विद्याकर्मणोः प्रियाद्यर्थत्वाच्च–प्रियादिप्रयुक्ते हि विद्याकर्मणी––तस्मात् प्रियादीनां फलरूपाणामात्मसन्निकर्षाद्विज्ञानमयाच्चाभ्यन्तरत्वमुपपद्यते – प्रियादिवासनानिर्वर्तितो ह्यात्मा आनन्दमयो विज्ञानमयाश्रितः स्वप्ने उपलभ्यते इत्यानन्दमयकोशपरोपनिषद्भाष्यं च ।

तत्समानार्थकमेव तस्मादन्नमयादिष्विव आनन्दमयेऽपि विकारार्थ एव मयड् विज्ञेयो न प्राचुर्यार्थ इति भगवत्पादीयं सूत्रभाष्यं चार्थतः संगृह्य प्रमाणयति **ब्रह्मवल्ल्यामिति**—

मू॥ ब्रह्मवल्ल्यां समाम्नाते पञ्चमे त्वनुवाकके ।
य आनन्दमयः प्रोक्तस्तदुपाधिं सुविस्तरम् ॥ ६८ ॥
प्राणकोशपरश्लोकभाष्येऽमुं पाञ्चभौतिकः ।
इत्युक्त्वा तत्परश्रौतवाक्यभाष्ये पुनस्तथा ॥
अन्नादिमयवच्चायं भौतिकश्चाधिकारतः ।
कार्यात्मा च विकारश्च पूर्वेष्विव मयटश्रुतेः॥ ७० ॥
कर्तुरभ्यन्तरश्चायं विज्ञानमयशब्दितात् ।
कर्मादिफलभोक्ता च स्वप्नावस्थ इतीरणात् ॥ ७१ ॥
भूतोपादानताऽभावात्तदा नास्याखिलेशता ॥ ७१॥ ॥

व्या ॥ **तत्परश्रौतवाक्यभाष्य इति** आनन्दमयस्य उपाधिभूतपञ्चमकोशपरश्रुतिभाष्ये इत्यर्थः ॥ **तदेति** स्वप्नकाल इति यावत् । शेषः अवतरणादेव गतार्थः ॥ ७१॥ ॥

अ० ॥ एवं सर्वेश्वरत्वविहीनस्यानन्दमयस्य कार्यानन्दमयत्वं प्रमाणतो निरूप्य अधुना ॥ श्लो० ॥ न कारणस्य सुप्तस्य सर्वेशत्वं निराकृतमिति यत् प्राक् प्रतिज्ञातम् ।

तदनुग्राहकं ब्रह्मविदाप्नोति परं—सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान् कामान्सह ब्रह्मणा विपश्चितेतीति यावद्ब्रह्मवल्ल्यर्थसङ्ग्राहकं वाक्यञ्च ।

तदर्थनिर्णायकं ॥ श्लो० ॥ तद्विद्याविषयं ब्रह्म सत्यज्ञानसुखाद्वयम् । सांसारिकगुहावाच्ये मायाऽज्ञानादिशब्दिते । यो वेद निहितं ब्रह्म परमव्योमसंज्ञिते । सोऽश्नुते सकलान्कामान्न क्रमेण सुरर्षभाः। विदितब्रह्मरूपेण जीवन्मुक्तो न संशय इति ब्रह्मगीतावाक्यञ्च ।

तदनुग्रहीतं यावद्ब्रह्मवल्ल्यादिश्रुत्यर्थनिर्णायकं भगवत्पादीयमिदम् ।

कथं पुनः स्वप्रधानं सद्ब्रह्म आनन्दमयस्य पुच्छत्वेन निर्दिश्यते ब्रह्मपुच्छं प्रतिष्ठेति–नैष दोषः पुच्छवत्पुच्छं प्रतिष्ठा परायणमेकनीडं लौकिकस्यानन्दजातस्य ब्रह्मानन्दः इत्येतदनेन विवक्ष्यते–नावयवत्वं एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुत्यन्तरादिति सौषुप्तपरज्योतिर्ब्राह्मणोपेतमानन्दमयाधिकरणभाष्यम् ।

किं च–स य एवंवित् एतमन्नमयं प्राणमयं मनोमयं विज्ञानमयमानन्दमयमात्मानमुपसङ्क्रामति–अथादृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते इति श्रूयते ।

तत्रैतच्चिन्त्यं कोऽयमेवंवित् कथंवा सङ्क्रामति–टि–किमन्नमयानां तदन्येषां वा व्यष्टिमुत समष्टिमेवात्मत्वेन पश्यतीति किं परस्मादात्मनोऽन्यस्सङ्क्रमणकर्ता प्रविभक्तः उत स एव वेति - किं ततः यद्यन्यस्स्यात् श्रुतिविरोधः - तत् सृष्ट्वा तदेवानुप्राविशत्-अन्योऽसावन्योऽहमस्मीति न स वेद-एकमेवाद्वितीयं तत्त्वमसीति ।

अथ स एव आनन्दमयमात्मानमुपसंक्रामतीति कर्मकर्तृत्वानुपपत्तिः परस्यैव संसारित्वं पराभावो वेत्यारभ्य ।

स एव तु स्यात् तद्भावस्य विवक्षितत्वात् - तद्विज्ञानेन परमात्मभावोह्यत्र विवक्षितः ब्रह्मविदाप्नोति परमिति नह्यन्यस्यान्यभावापत्तिरुपपद्यते - ननु तस्यापि तद्भावापत्तिरनुपपन्नैव - न अविद्याकृताऽतदात्मभावापोहार्थत्वादित्यनेन - ब्रह्मपुच्छं प्रतिष्ठेति पञ्चमानुवाकनिर्दिष्टस्य परमात्मान एव तदीयाविद्यया संसारित्व तदीयविद्यया च तन्निवृत्तिञ्चावेद्य ।

यदि हि विद्वान् स्वात्मनोऽन्यत्र पश्यति ततः अभयं प्रतिष्ठां विन्दत इति स्यात्–भयहेतोः परस्यान्यत्र–टि–**ईश्वरस्य** अभावात्–अन्यत्र चाविद्याकल्पितत्वेन विद्यया अवस्तुत्वदर्शनोपपत्तिः–तद्धि द्वितीयस्य चन्द्रस्यासत्वं यदतैमिरिकेण चक्षुष्मता न गृह्यते–नैवं न गृह्यत इचि चेत्–न–सुषुप्तसमाहितयोः–टि–**स्वातिरिक्तस्येश्वरस्य** अग्रहणात्–सुषुप्तेऽग्रहणमन्यासक्तवदिति चेन्न सर्वाग्रहणात्—जाग्रत्स्वप्नयोरन्यस्य ग्रहणात् सत्वमेवेति चेन्न अविद्याकृतत्वात् जाग्रत्स्वप्नयोः यदन्यग्रहणं जाग्रत्स्वप्नयोः तदविद्याकृतं अविद्याभावेऽभावात् ।

सुषुप्ते अग्रहणमप्यविद्याकृतमिति चेन्न—स्वाभाविकत्वात्—द्रव्यस्य हि तत्वमविक्रिया परानपेक्षत्वात्—विक्रिया न तत्वं परापेक्षत्वात् न हि कारकापेक्षं वस्तुनः तत्वं—सतो विशेषः कारकापेक्षः विशेषश्च विक्रिया जाग्रत्स्वप्नयोश्च ग्रहणं विशेषः याद्धि यस्य नान्यापेक्षं स्वरूपं तत् तस्य तत्वं यदन्यापेक्षं न तत् तत्वं अन्याभावे

अभावात् तस्मात् स्वाभाविकत्वात् जाग्रत्स्वप्नवत् न सुषुप्ते विशेष इत्यन्तेन पुनश्च पुच्छवाक्यनिर्दिष्टस्य सुषुप्त्यवस्थावत्त्वेन आकाशादिजगदुपादानभूतमूलाज्ञानोपाधिमत्त्वेन आध्यात्मिकत्वं संप्रदर्श्य ततोऽन्यस्याधिदैविकेश्वरादेरभावं सुषुप्तिसमाध्यवस्थायामादिश्य ।

अनन्तरमपि—येषां पुनरीश्वरोऽन्य आत्मनः कार्यं चान्यत् तेषां भयानिवृत्तिः भयस्यान्यनिमित्तत्वादित्यन्तकं—ये अन्तःकरणादेः चैतन्यपरिवेष्टकत्वप्रक्रियया आधिदैविकस्येश्वरस्य जगदुपादानत्वनिमित्तत्वावलम्बिनः प्रतिकर्मव्यवस्थावादिनः ये च जीवेशयोर्वास्तवभेदमवलम्ब्य ईश्वरस्य केवलनिमित्तकारणत्ववादिनः तत्तत्पक्षे प्रागुक्तदोषप्रदर्शनपरं ब्रह्मवल्ल्यामष्टमानुवाकभाष्यं च ।

तथैव **आनन्दमयः** आनन्दप्रायः आनन्दानां विषयानन्दानां प्रायः प्राचुर्येण समुदायः यस्मात् स आनन्दप्रायः—एषोऽस्य परम आनन्द इति ज्योतिर्ब्राह्मणश्रुतेरित्यारभ्य सोऽयं प्राज्ञस्तृतीयः पादः एष हि सर्वरूपावस्थः सर्वेश्वरः साधिदैविकस्य भेदजातस्य सर्वस्येशिता—नैतस्माज्जात्यन्तरभूतोऽन्येषामिव—प्राणबन्धनं हि सोम्य मन इति श्रुतेः—अयमेव हि सर्वस्य सर्वभेदावस्थो ज्ञातेत्येष सर्वज्ञः एषोऽन्तर्यामी अनुप्रविश्य सर्वेषां भूतानां नियन्ताप्येष एव अतः यथोक्तं सभेदं जगत्प्रसूयते इत्येष योनिः सर्वस्य—यत एवं प्रभवश्चाप्ययश्च प्रभवाप्ययौ हि भूतानामेष एवेति माण्डूक्यभाष्यञ्च ।

तत्समानार्थकमेव—यत् प्रकृतं सत्यज्ञानानन्दलक्षणं यस्य च प्रतिपत्त्यर्थं पञ्चान्नमयादिकोशा उपन्यस्ताः—यच्च तेभ्योऽभ्यन्तरं येन चैते सर्वे आत्मवन्तः तत् ब्रह्मपुच्छं प्रतिष्ठा—तदेव च सर्वस्याविद्याकल्पितस्य द्वैतजातस्य अवसानभूतमद्वैतं ब्रह्म प्रतिष्ठा आनन्दमयस्यैकत्वावसानत्वादित्युपनिषद्भाष्यं च अर्थतस्सङ्गृह्य प्रमाणयति—**ज्योतिरिति**—

मू ॥ ज्योतिर्ब्राह्मणसंप्रोक्तस्सुप्तो यस्तु स एव हि ॥ ७२ ॥
माण्डूक्यपुच्छवाक्योक्तस्तस्यानन्दमयस्य हि ।
विषयानन्दसन्दोहपरमानन्दरूपिणः ॥ ७३ ॥
सर्वेशतादेश्च तत्तद्भाष्येष्वपि समीरणात् ।
न कारणस्य सुप्तस्य सर्वेशत्वं निराकृतम् ॥ ७४ ॥

व्या ॥ माण्डूक्यपुच्छवाक्योक्तमानन्दमयं तद्ब्रह्मवल्ल्युक्तादानन्दमयकोशाद्व्यावर्तयति **ज्योतिर्ब्राह्मणेत्यादिना** शेषोऽवतरणादेव गतार्थः ॥ ७४ ॥

अ० ॥ अधुना—यथा च भाष्यकारैः कर्तृत्वमात्राभिमानवतो विज्ञानमयस्य तदान्तरस्य पञ्चमकोशोपाधिकस्यानन्दमयस्य भोक्तृत्वमात्राभिमानवतश्च स्वाप्निक-लपाञ्चभौतिकोपाधिकत्वाद्युपदेशेन माण्डूक्यपुच्छवाक्यनिर्दिष्टात् सौषुप्तिकानन्द-मयात् पूर्वभावित्वेन लिङ्गशरीरोपाधिकत्वमुपदिष्टं ।

तथैव शिवगीतायां चतुर्दशाध्याये श्रीभगवता सर्वज्ञेन शिवेन दाशरथये श्रीरामाय आनन्दवल्ल्युक्तपञ्चकोशविवरणप्रकरणे यैर्वाक्यैर्विज्ञानानन्दमययोः लिङ्ग-शरीरोपाधिकत्वमुपदिष्टं तान्यत्र प्रमाणयति—**या कर्मेति**—

मू॥ या कर्मविषया बुद्धिर्वेदशास्त्रैर्विनिश्चिता ।
सा तु ज्ञानेंद्रियैस्सार्धं विज्ञानमयकोशकः ॥
इह कर्तृत्वमानी यस्स एव तु न संशयः ।
इहामुत्र गतिस्तस्येत्युक्त्वा लिङ्गजनिं जगौ ॥ ७६ ॥

व्या॥ **इहेति** विज्ञानमयकोशे तादात्म्याध्यासवशात् तद्गतकर्तृत्वाभिमानी-यः स एव यजेतेत्यादिचोदनाविषयः कर्तेत्यादिश्य तस्यैव इहलोकपरलोकविषयक-क्रियाश्रयत्वावगतिं विषयवीक्षणादिसमये निर्दिश्यानन्तरं शिवो लिङ्गशरीरजनिं जगाविति कविवाक्यम् ॥ ७६ ॥

अ० ॥ एवं कर्तृत्वमात्राभिमानित्वेन विज्ञानमयमुपदिश्य तस्माद्वा एतस्मा-द्विज्ञानमयात् अन्योन्तर आत्मानन्दमय इत्यारभ्य आनन्द आत्मेत्यन्तां श्रुतिमर्थ-तस्सङ्कृत्य पञ्चमकोशत्वेन श्री शिवो रामायोपदिदेश तदप्यत्र प्रमाणयति **एतदिति**—

मू॥ एतल्लिङ्गशरीरं तु तप्तायःपिण्डवद्यतः ।
परस्पराध्यासयोगात् साक्षिचैतन्यसंयुतम् ॥
तदानन्दमयः कोशो भोक्तृत्वं प्रतिपद्यते ।
विद्याकर्मफलादीनां भोक्तेहामुत्र संस्मृतः ॥ ७८ ॥

व्या॥ क्षुत्पिपासाऽऽद्यबाधिर्यकामक्रोधादयोऽखिलाः । लिङ्गदेहगता एते ह्यलिङ्गस्य न विद्यते ॥' इति श्रुत्या लिङ्गशरीरस्यैव क्षुत्पिपासादिकं नात्मन इति यतोऽवगम्यते—ततो लिङ्गशरीरमेव तप्तायःपिण्डवद्यदा साक्षिणा सह तादात्म्या-ध्यासवशेन सचेतनं भवति तदा आनन्दमयकोशसंज्ञकस्सन् इहलोकपरलोकयोः उपासनाकर्मफलभोक्तृत्वाध्यासवान् भवतीत्यर्थः ॥ ७८ ॥

अ० ॥ एवमानन्दमयवाक्यनिर्दिष्टस्य लिङ्गशरीरोपाधिकत्वमुपदिश्य इदानीं ततोऽप्यान्तरस्य सर्वकार्यकल्पनाधिष्ठानभूतस्य ब्रह्मपुच्छं प्रतिष्ठेति पुच्छवाक्य-निर्दिष्टस्य अज्ञानमात्रोपाधिकत्वादेशेन–सुषुप्तस्थान एकीभूत इत्यारभ्य प्रभवाप्ययौ हि भूतानामित्यन्तमाण्डूक्यश्रुतिवत् सौषुप्तिकत्वपरं शिवगीतावाक्यमुदाहरति–**यदेति**—

मू॥ यदाऽध्यासं विहायैष स्वरूपेणावतिष्ठते ।
अविद्यामात्रसंयुक्तस्साक्ष्यात्मा जायते तदा ॥
द्रष्टाऽन्तःकरणादीनामनुभूतेस्स्मृतेरपि ॥ ७९॥ ॥

व्या ॥ एष इति यः प्राग्लिङ्गशरीराभिमान्यानन्दमयो भोक्तेति दर्शित-स्स तदानीं स्वस्य भोक्तृत्वसिद्ध्यर्थम् **अन्तःकरणादीनां** अन्तःकरणमादिर्येषां तत्परिणामानां भोग्यानां तान्यन्तःकरणादीनि तेषामन्तःकरणादीनां अनुभूतेस्स्मृ-तेश्च द्रष्टापि दर्शनक्रियाश्रयोऽपि सः **यदाध्यासं विहाय** यदा सुषुप्तिकाले अध्यासं लिङ्गशरीरतादात्म्याध्यासं विहाय परित्यज्य **अविद्यामात्रसंयुक्तः** सुषुप्तिकाले अन्तःकरणादेः तत्कारणभूतवियदादेश्च प्रभवाप्ययौ हि भूतानामिति माण्डूक्या-दिश्रुत्युक्तप्रकारेण तदुपादानभूतायामविद्यायां विलीनत्वादविद्यामात्रोपाधिकस्सन् **स्वरूपेणावतिष्ठते** वियदादिजगत्कारणस्वरूपेण कारणानन्दमयरूपेण वर्तते **तदा** सुषुप्तिकाले **साक्ष्यात्मा जायते** तदानीमवशिष्यमाणाज्ञानमात्रसाक्षी भव-तीत्यर्थः ॥ ७९॥ ॥

अ० ॥ इदानीं स्वप्नानन्दमय इत्यारभ्योपपादितग्रन्थतात्पर्यमाह—**एवमिति**—

मू॥ एवं कर्तृत्वसंयुक्तो विज्ञानमयसंज्ञकः ॥
भोक्तृत्वमात्रसंयुक्त आनन्दमयनामकः ।
अज्ञानमात्रसंबद्धस्सौषुप्तो जगदीश्वरः ॥
अज्ञानेन विनिर्मुक्तस्तुरीयः केवलो भवेत् ।
एवं हि ब्रह्मवल्ल्यादौ तत्वं ज्ञेयं प्रदर्शितम् ॥
माण्डूक्यभृगुवल्ल्यादौ तत्वादेशस्ततः पृथक् ।
कर्तृत्वभोक्तृतायुक्तो विज्ञानमयसंज्ञकः ॥

केवलाज्ञानकस्स्वात्मा खौषुप्तो निखिलेश्वरः ।
विनष्टे सति चाज्ञाने तुरीयं प्रत्यगीरितम् ॥ ८४ ॥

व्या ॥ **ब्रह्मवल्ल्यादाविति** ब्रह्मवल्ली आदिः यस्य तद्भाष्यादिशास्त्रस्य तद्ब्रह्मवल्ल्यादि तस्मिन् **ततः पृथगिति** ततो ब्रह्मवल्लीतद्भाष्यादुक्तप्रकारात् पृथक् प्रकारान्तरेण माण्डूक्यभृगुवल्ल्यादावुपदेशक्रमः कृत इत्यर्थः॥ शेषस्सुगमः॥

अ० ॥ संप्रति यत्तावत् स्वप्नानन्दमय इत्यादिशास्त्रतात्पर्यमभिहितं तत्र वृद्धसम्मतिं दर्शयति **एवमिति**--

मू॥ एवं श्रीगौडपादैश्च व्यवस्था संप्रदर्शिता ।
कार्यकारणसंबद्धाविष्येते विश्वतैजसौ ॥
प्राज्ञः कारणबद्धस्तु द्वौ तौ तुर्ये न सिध्यतः ।
विद्यारण्यैस्तथा प्रोक्ता श्रुतिभाष्यानुसारतः ॥
सौषुप्तमानन्दमयं प्रक्रम्यैवं श्रुतिर्जगौ ।
एष सर्वेश्वर इति सोऽयं वेदोक्त ईश्वरः ॥
अन्तर्यामी च सर्वज्ञो जगद्योनिस्स एव हि ।
अयं यत् सृजते विश्वं तदन्यथयितुं पुमान् ॥
न कोऽपि शक्तस्तेनायं सर्वेश्वर इति श्रुतः ।
एवमानन्दविज्ञानमयावीश्वरजीवकौ ॥
कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः ।
इत्यादिश्रुतिमादाय संक्षेपाचार्यकैस्तथा ॥
इमावानन्दविज्ञानमयौ जीवेश्वराविति ।
दर्शिता च तथाद्वैतसिद्धावपि समीरिता ॥
अविद्योपाधिको जीवस्सौषुप्तो निखिलेश्वरः ।
इत्युक्त्वात्तदानन्दमयाधिकरणीयकैः ॥

भाष्यैर्न स्यादेकजीववादबाधो मनागपि ।
ततो न कारणत्वस्याप्यौपचारिकता मता ॥ ९३ ॥

व्या ॥ कार्यकारणसंबद्धाविष्येते विश्वतैजसाविति कार्यं विय-दादिभूतभौतिकं कारणं तदुपादानमज्ञानं ताभ्यां संबद्धौ विशिष्टौ जाग्रत्स्वप्नावस्था-वन्तावुभावपि विश्वतैजसाख्यजीवौ भवतः **कारणबद्धस्तु** कारणेन मूलाज्ञान-मात्रेणोपेतस्तु सुषुप्तस्थान इत्यादिमाण्डूक्यश्रुतिप्रतिपाद्यः **प्राज्ञः** आनन्दमय-स्थात् तु शब्देन ब्रह्मवल्लीसमीरितात्कर्मादिफलभोक्तुरानन्दमयात् अज्ञानमात्रोपा-धिकत्वसुषुप्तस्थानत्वादिमान् व्यावर्त्यते **तुर्ये** विद्यावस्थावति प्रत्यगात्मनि **द्वौ तौ** कार्योपेतकारणसंबन्ध एकः कारणमात्रसंबन्धश्चापरः इत्युभावपि **न सिध्यतः** न संभवतः **इत्युक्तत्वात्** इति पूर्वोक्तप्रकारेण परस्परविरोधेन ब्रह्मवल्लीमाण्डू-क्यादिश्रुत्यर्थस्योक्तत्वात् स्वाप्निकस्य कर्मादिफलभोक्तुरानन्दमयस्य सर्वेशत्वादि निराकरणपरैः आनन्दमयाधिकरणीयभाष्यवाक्यैः एकजीववादे जगत्कारणत्वेना-भिप्रेतस्य सौषुप्तानन्दमयस्य सर्वेश्वरत्वादिविधायकशास्त्रस्य न कोऽपि बाधस्सं-भवति ॥

नाप्यवस्थात्रयवतो जीवस्यौपचारिकमेव जगत्कारणत्वं तेषामाचार्याणाम-भिमतं भवेत् तैरेवात्र ॥ श्लो ॥ अयं यत्सृजते विश्वं तदन्यथयितुं पुमान् । न कोऽपि शक्तस्तेनायं सर्वेश्वर इति श्रुत इति मुख्यस्यैव सर्वेश्वरत्वस्य समर्थितत्वात्

यत्र कुत्रचित् सौषुप्तादन्यत्वेनाधिदैविकं परमेश्वरमङ्गीकृत्य तस्य कारणत्व-मुपपादितं चेत् तन्मन्दाधिकारिपरमिति दृष्टिसृष्टिप्रस्तावे अद्वैतसिद्धिकारोक्त-प्रकारेणास्थेयम् ॥ ९३ ॥

अ० ॥ ननु कारणोपाधिकस्य जीवस्य सर्वेश्वरत्वेऽपि न कार्योपाधिकस्य जीवस्य कारणत्वं संभवतीत्यत आह **त्रिवर्णमिति—**

मू ॥ त्रिवर्णं स्वसमानांश्च विकारान्यत्सृजेत् पुनः ।
तेजोबन्नत्रयं तस्य जीवोपाधित्वविश्रुतेः ॥
तदुपाधिवशाद्भोक्तुस्स्थूलकारणता भवेत् ।
एष सुप्तेषु जागर्तीत्येवमाद्यैः पुरोदितैः ॥
वाक्यैर्मनोविशिष्टस्य श्रौतीकारणतेरिता ॥ ९९॥ ॥

व्या ॥ उक्तविशेषणस्य अत्रिवृत्कृतस्य पृथिव्यग्नेजोरूपस्य भूतत्रयस्य ॥ श्रु ॥ 'अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजास्सृजमानां सरूपाः । अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्य' इति जीवोपाधित्वश्रवणादनादेर्विज्ञानमयाख्यस्यापि जीवस्य स्थूलजगत्कारणत्वं सिद्धं । शेषः प्रागेव पञ्चमनिरूपणे त्रयोदशश्लोकादूर्ध्वं व्याख्यातः ॥ ९५॥ ॥

अ० ॥ पुनरुपपादितार्थे किञ्चिच्चोद्यं दर्शयति **एवमिति**—

मू ॥ एवं चेद्दीक्षितैः कस्मादौपचारिकमेव तत् ॥
सर्वेशत्वं प्रसुप्तस्येत्युक्तं तत्कारणं वद ॥ ९६ ॥ ॥

व्या ॥ **दीक्षितैरिति** अप्पयदीक्षितैः सिद्धान्तलेशसंग्रहाख्यग्रन्थ इति शेषः ॥ ९६॥ ॥

अ० ॥ समाधत्ते । **तेषामिति**—

मू ॥ तेषामाध्यात्मिकात्प्राज्ञादन्यस्मिन्नाधिदैविके ॥
भक्त्युद्रेकवशाद्भर्गे सर्वेशत्वप्रसिद्धये ।
प्राज्ञोऽयं नेश्वरश्चेति श्रुत्यर्थो ह्यन्यथेरितः ॥
तावता श्रुतिवृद्धैर्न दर्शितं बाधितं भवेत् ॥ ९८॥ ॥

व्या ॥ हि यस्मात् 'प्राज्ञस्तृतीयः पादः एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्यामी एष योनिस्सर्वस्य प्रभवाप्ययौ हि भूतानां · पुरत्रये क्रीडति यस्तु जीवस्तस्तु जातं सकलं विचित्रं कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः— यदा सुप्तस्स्वप्नं न कञ्चन पश्यत्यथास्मिन्प्राण एवैकधा भवतीत्यादिश्रुत्यर्थः । भगवत्पादवाचस्पतिविद्यारण्यसंक्षेपाचार्यसिद्धिकारायुक्तप्रकारात् । **अन्यथा** प्रतिकर्मव्यवस्थामनुसृत्य तदधिकारिणं प्रति तत्तद्देवतोपासकैरिव दीक्षितैरपि प्रकारान्तरेण **ईरितः** तावता न प्रागुक्तश्रुत्याचार्यदर्शितो बाध्येतेत्यर्थः ॥ ९८॥ ॥

अ० ॥ इदानीं वृत्तानुवादपूर्वकं काश्चिदाक्षिपति **स्वप्नवदिति**—

मू ॥ स्वप्नवत् वस्तुतन्त्राऽस्य सृष्टिस्स्वात्मेक्षणं विना ॥ ९९ ॥
सुषुप्तस्थान इत्यादिमाण्डूक्ये च तथैव च ।
कौषीतक्यां तथाऽन्यत्र भूमावोषधिवद्यथा ॥ १०० ॥
तथाऽक्षरात्सम्भवति विश्वञ्चेति समीर्यते ।

आरण्यके च सौषुप्तात्प्राणाद्या व्युच्चरन्ति हि ॥ १०१ ॥
गुहाव्योमाभिधाऽज्ञाने तादात्म्याध्यासकात्मनः ।
व्योमादि जायते चेति ब्रह्मवल्ल्यां तथैव च ॥ १०२ ॥
यतो भूतानि जायन्ते स्वात्मानन्दात्सुषुप्तिगात् ।
इति चेदन्यथाऽन्यत्र पुंतन्त्रेक्षणपूर्विका ॥ १०३ ॥
स ईक्षाञ्चक्र इत्यत्र या सृष्टिस्सेशकर्तृका ।
तद्बलाद्दीक्षितैरुक्तं को बाधस्तत्र चेच्छृणु ॥ १०४ ॥

व्या॥ स्पष्टोऽर्थः ॥ १०४ ॥

अ० ॥ तच्छ्रुत्यैव तत्पक्षे बाधमाह **स ईक्षाञ्चक्र इति—**

मू॥ स ईक्षाञ्चक्र इत्यत्र तदीक्षाकारबोधकम् ।
उत्क्रान्ते सति कस्मिन्हि कस्मिन्नेव प्रतिष्ठिते ॥ १०५ ॥
उत्क्रमिष्यामि स्थास्यामीतीक्षाकर्तुर्यदीक्षणम् ।
प्राणतद्धर्मतादात्म्यसंसर्गाध्यासपूर्वकम् ॥ १०६ ॥
अविवेककृतं तत्स्यादितीक्षावाक्यमब्रवीत् ।
तदैश्वरसङ्कल्पाधीनसृष्टेस्तु बाधकम् ॥ १०७ ॥

व्या ॥ ईश्वरस्य प्राणे तादात्म्याध्यासहेतुभूताविवेकाभावादित्यर्थः । किञ्च प्राक् पञ्चमनिरूपणे अष्टपञ्चाशाच्छ्लोकादारभ्य पञ्चषष्टितमश्लोकपर्यन्त-कवचनैः ईक्षणस्य जिजागरिषारूपत्वमुपपादितम् इदानीं तज्जिजागरिषायाः जागरणरूपप्राणाद्यनात्मतद्धर्मतादात्म्यसंसर्गाध्यासहेतुत्वं दर्शितम् ॥ १०७ ॥

अ० ॥ उपपादितार्थे ब्रह्मादिसम्मतिमाह **तदैक्षतेति—**

मू॥ तदैक्षतेति श्रुत्यर्थपरया ब्रह्मगीतया
प्रतीत्या केवलं शक्तिरचिद्रूपा तमोमयी ॥ १०८ ॥
सर्वप्रकारैर्विद्वद्भिरनिरूप्या हि शाङ्करी ।
तया दुर्घटकारिण्या तादात्म्येनैव सङ्गतम् ॥ १०९ ॥

कारणञ्चेति विज्ञातं तथा तत्तेज ऐक्षत ।
इति तेजसि तादात्म्यापन्नन्तदविवेकतः ॥ ११० ॥
स्वात्मचैतन्यमेवेति ब्रह्मवल्ल्यां तथाऽन्यथा ।
आकाशभावापत्त्यादिर्नेश्वरे पारिणामिकः ॥ १११ ॥
आध्यासिको वा धर्मोऽतो नेक्षणन्त्वीशकर्तृकम् ॥ १११॥ ॥

व्या ॥ छान्दोग्ये यथातथैव ब्रह्मवल्ल्याञ्च विज्ञातमित्यर्थः ॥ १११॥ ॥

अ० ॥ इदानीमस्मिन्नेकजीववादे संभविष्यत्सकलशङ्कानिराससाधनमाह **यद्यदिति**—

मू ॥ यद्यच्चोद्यं भवेदस्मिन्पक्षे तत्तन्निवारयेत् ॥
स्वप्नदृष्टान्ततो ह्येकजीववादो विशिष्यते ॥ ११२॥ ॥

व्या ॥ **हि** यस्मादस्मिन्नेकजीववादे संभविष्यत्सर्वं **चोद्यं स्वप्नदृष्टान्तादेव** निवारयितुमर्हत्यतोऽयमेकजीववादो नानाजीववादापेक्षया अद्वैतिनामन्तरङ्गत्वाच्च विशिष्यत इत्यर्थः ॥ ११२॥ ॥

अ० ॥ यत्तावदभिहितं स्वप्नदृष्टान्तस्य सर्वचोद्यनिरासकत्वं तदेव दृढीकरिष्यन् प्रश्नमवतारयति **नन्विति**—

मू ॥ नन्वेकजीववादेऽस्मिन्नुपदेष्टुरभावतः ॥ ११३ ॥
न मुक्तिश्चेति शङ्क्येयं स्वप्नाद्व्यावर्तते कथम् ।
स्वानुभूत्यनुसारेण ह्युच्यते हृदि धारय ॥ ११४ ॥

अ० ॥ समाधत्ते **सौषुप्त इति**—

मू ॥ सौषुप्तो जगदीश्वरो जगदिदं सृष्ट्वाऽविवेकादिहा-
प्यात्माध्यासवशाच्चिरं बहुविधं संसारमासाद्य च ।
स्वप्ने कल्पितमित्रतो विषयवत्त्वाज्ञानतो जृम्भिता-
दाचार्याद्भ्रममात्रतां स्वविषये ज्ञात्वा विमुक्तो भवेत् ॥११५

व्या ॥ सौषुप्त एवानन्दमयः स्वाज्ञानतः सर्वं जगत् स्वस्मिन्परिकल्प्य अनन्तरं स्वात्मजगतोरविवेकादनात्मनि अयमेवाहमिति तादात्म्याध्यासवशादने

कथा संसरन्नथ कदाचित्स्वप्ने स्वकल्पितादात्ममुखाज्जिज्ञास्यमिव जाग्रत्यपि स्वावज्ञानपरिकल्पितादाचार्यमुखात् असङ्गो ह्ययं पुरुषः - नेह नानास्ति किञ्चन तत्त्वमसीत्यादि शास्त्रश्रवणमननादिभिश्च स्वगोचराविद्यातत्कार्यविषये त्वाध्यासिकत्ववेदनेन विमुक्तो भवितुमर्हत्यतोऽस्मिन्पक्षे मोक्षस्य सुसंपादत्वात्सर्वमनवद्यम् किञ्चात्रोक्तप्रकारेणैवान्यत्रापि मोक्षपराध्यात्मशास्त्रे क्वचिदुत्तमाधिकारिणे जीवो नाम अविद्याद्युपाधितादात्म्यापन्नं परिपूर्णं ब्रह्म चैतन्यमेव इत्युच्यते क्वचिन्मन्दाधिकारिणे अविद्याद्युपाधिपरिवेष्टितो ब्रह्मैकदेश इत्युच्यतेऽवच्छिन्नपक्षे क्वचिदधमाधिकारिणे ब्रह्मांश इत्युच्यते ।

क्वचिदधमधिमाधकारिणे ब्रह्मप्रतिविम्ब इत्युच्यते तत्रोत्तमाधिकारी तावत् प्रथमपक्षारूढां स्वबुद्धिं परबुद्धिं वा द्वितीयादिपक्षश्रवणान्न चालयेत् बहुशः प्रथमपक्षे साङ्गत्यं द्वितीयादिपक्षेष्वसाङ्गत्यञ्च तृतीयनिरूपणेऽवादिष्म ।

इति श्रीपरमहंसपरिव्राजकाचार्यरामब्रह्मश्रीकृष्णानन्देन्द्रसरस्वतीभगवत्पादशिष्य श्रीमच्चन्द्रिकाचार्याख्ययतीश्वरविरचितायां अमृतरसञ्जरीनामकव्याख्यानोपेतायां अद्वैतसिद्धान्तगुरुचन्द्रिकायां सप्तमेकजीववादनिरूपणं संपूर्णम् ।

हरिः ओम् ।

तत्सत् ॥

॥ हरिः ओम् ॥

अद्वैतसिद्धान्तगुरुचन्द्रिकायाम् ।

॥ अष्टममेकविज्ञानेन सर्वविज्ञाननिरूपणमारभ्यते ॥

अ० ॥ इदानीं प्रथमनिरूपणारम्भे शिष्यैर्यदुक्तं **तद्धियैव सा सर्वश्रीश्च प्रतिज्ञातेति** तदनूद्य अत्राष्टमनिरूपणे तदेकविज्ञानेन सर्वविज्ञानप्रतिज्ञाविशेषनिरूपणं प्रतिजानीते **जगादिति—**

मू ॥ जगत्कारणभूतेऽस्मिन्विज्ञाते प्रत्यगात्मनि ।
सर्वं विज्ञायते चेति भातीति प्राक्प्रदर्शिता ॥
तस्या एव प्रतिज्ञाया विशेषोऽत्र निरूप्यते॥ १॥ ॥

व्या ॥ स्पष्टोऽर्थः ॥ १॥ ॥

अ० ॥ इदानीं तमेव विशेषं सोपपत्तिकं विभजते **अधिकारीति**—

मू ॥ अधिकारिदृशा प्रोक्ताऽज्ञानतत्कार्यभेदतः ॥
सर्वविज्ञानवाक्यस्य तात्पर्यं स्याच्चतुर्विधम् ।
अच्छाये प्रकृतित्वेन विज्ञाते ज्ञायते हि सः ॥
शक्ते तु प्रकृतित्वेन विज्ञाते ज्ञायते गुणः ।
प्रकृत्यज्ञानवज्जीवे विज्ञाते विकृतिर्मता ॥
शोधिते विदिते ज्ञातमज्ञातं च मतं भवेत् ॥ ४॥ ॥

व्या ॥ **अधिकारिदृशेति** ॥ उत्तमाद्यधिकारिणां दृष्ट्यनुसारेण द्वितीयनिरूपणोक्ताज्ञानतत्कार्याणां भेदादित्यर्थः अच्छाय इति 'तदेतदच्छायमशरीरमिति श्रुत्युक्तनिर्मायस्वात्मनीत्यर्थः ॥ ४॥ ॥

अ० ॥ इदानीमुत्तमाधिकारिणे यदुपदेष्टव्यं कार्यकारणयोरेकसत्ताकत्वं तत्र द्वैतभ्रमप्रतिबन्धकभूतमात्मनो यत् यथावत् स्वयं भासिष्यमानं भासमानं वा स्वरूपचैतन्यात्मकं ज्ञानं तस्य प्राक्कालिकत्वाभावोपहितः प्रत्यङ्ङेव जगदुपादानं तस्मिन् विज्ञाते तद्व्यतिरेकेण ज्ञातव्यान्तरं नास्तीति शास्त्राभिप्रायं प्रतिपिपादयिषुस्तदनुकूलंजगत्कारणभूतं स्वात्मतत्वं तमोरूपभावात्मकाज्ञानवर्जितं तदस्मीति विज्ञानतः सर्वात्मत्वसर्वज्ञत्वयोश्च बोधकं 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवती'ति मुण्डकमन्त्रप्रदर्शितस्य शौनकाख्यशिष्यप्रश्नस्य प्रतिवचनभूतं 'स यो हवै तदच्छायमशरीरमलोहितं शुभ्रमक्षरं वेदयते यस्तु सोम्य स सर्वज्ञस्सर्वीभवतीं'ति प्रश्नोपनिषद्ब्राह्मणवाक्यं प्रमाणयितुं तत्राक्षेपादिकं दर्शयति **एतदिति**—

मू ॥ एतदच्छायमित्यादिप्रश्नोपनिषदात्मनः ॥
तमसा वर्जितत्वेऽपि कारणत्वेन वेदितुः ।
सर्वज्ञतां च सार्वात्म्यं यदुवाच न तद्भवेत् ॥

अन्यथा सृष्टिसान्तत्यमापतेच्चेत् न तद्यतः ।
सर्वभ्रमापहज्ञानप्रागभावयुतात्मनि ॥
ज्ञाते तत्र विवर्तन्तु हेतुना सह नश्यति ।
अतो ज्ञानप्रागभावनाशे नैव विवर्त्तता ॥
प्रतिमानामुपादाने गोपुरे विदिते तदा ।
तत्र कृत्स्नविकाराणां स्वरूपाभावतः पृथक् ॥
मृत्स्नासार्वात्म्यविज्ञातुस्सर्वज्ञत्वं यथा भवेत् ।
सर्वात्मना स्वतोभानं सर्वज्ञत्वं भवेदिह ॥ १० ॥

व्या ॥ स यो ह वै तदच्छायमित्यादिश्रुत्युक्तं सर्वज्ञत्वादिकमाक्षिपति—**न तद्भवेदिति** विपक्षे बाधमाह=+**अन्यथेत्यादिना** तमोरूपाज्ञानमन्तरेणापि जगत्सृष्ट्यभ्युपगमे सम्यग्ज्ञानानन्तरमपि तत्वविदः जगदात्मना विवर्त्तमानत्वमापतेदिति प्राप्ते निराकरोति **न तदिति** तत्र हेतुमाह **यत इत्यादिना** कार्यकारणयोरेकसत्ताकत्वे दृष्टान्तमाह-**प्रतिमानामित्यादिना** इहेति एकसत्तावादइत्यर्थः।

अ० ॥ इदानीमुपपादितेऽस्मिन् प्रथमपक्षे वृद्धसंमतिं दर्शयति **विद्यारण्यैरिति—**

मू॥ विद्यारण्यैस्तथैवोक्तमद्वैतानन्दनामके ।
मृद्बोधान्मृत्तिकाबुद्धेत्युक्तं श्रुत्या यथा तथा ॥
निर्माये प्रकृतित्वेन विज्ञाते ज्ञायते हि सः ।
वाचारम्भणवाक्याच्च तदनन्यत्वसूत्रतः ॥
कारणाद्व्यतिरेकेण कार्याभावपरादपि ।
तदनन्यत्वसूत्रीयभाष्यात्प्रागुदितेषु यः ।
प्रतिज्ञावचनस्याद्यस्सप्रशस्ततमो भवेत् ॥ १३॥ ॥

व्या ॥ **ज्ञायते हि सः** जगत्प्रकृतिभूत आत्मैवेत्यर्थ इति प्रतिज्ञाश्रुतेरस्माभिः प्रतिज्ञातचतुर्विधतात्पर्याणां मध्ये यः प्रथमाभिप्रायो दर्शितः स विद्यारण्याचार्याणामपि सम्मत इति दर्शयित्वा तत्र श्रुत्यादिप्रमाणानि दर्शयति **वाचार-**

भणवाक्याच्चेत्यादिना प्रतिज्ञावचनस्य चतुर्विधाभिप्रायमध्ये यः प्रतिपादित-प्रथमाभिप्रायस्स एव प्रशस्ततम इत्यर्थः ॥ १३ ॥

अ० ॥ संप्रति 'ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढा' मिति श्रुत्यवष्टम्भेनाज्ञानस्य आत्मशक्तित्वपक्षे तत्कार्याणां गुणत्वावगमात् ॥ श्री ॥ शक्ते तु प्रकृतित्वेन विज्ञाते ज्ञायते गुण इति यत्प्राक् प्रतिज्ञाश्रुतेर्द्वितीयतात्पर्यमुक्तं तदेव प्रपञ्चयति **स्वात्मेति**—

मू ॥ स्वात्मारोपितशक्तितो भवति चेत् कार्यं तदा चिद्गुण-
स्सोऽयं शक्तिमति प्रतीचि विदिते तज्ज्ञानतो ज्ञायते।
सौवर्णे कलशे मतेऽत्र लिखितं रेखात्म चित्रं यथा
विज्ञातं सकलं च दैर्घ्यसहिते तन्तौ मते चेलगाः ॥ १५ ॥

व्या ॥ यथा चाघातक्रियावहनशक्तिमति सौवर्णे कलशे ज्ञाते सति तत्र टङ्केन लिखितं रेखात्मकं हंसशुकादिरूपं चित्रं ज्ञायते यथाच दैर्घ्यादिगुणत्वपरिमाण-गुणवत्येकस्मिन्तन्तौ विज्ञाते सति तदेकतन्तुनिर्मितत्वेन तदाभिन्नचेलगता ह्रस्व-त्ववैशाल्यमहत्वरूपपरिमाणविशेषा विज्ञायन्ते - एवं शक्तिमति स्वात्मनि वि-ज्ञाते सति तज्ज्ञानेनैव शक्त्या - स्वाश्रयचिदात्मनि कल्पितो दृष्टिरूपगुणोऽपि विज्ञायत इत्यर्थः ॥ १४ ॥

अ० ॥ इदानीं - तन्तुगतरूपस्येवात्मशक्तेर्गुणत्वाभावात् तत्कार्यस्य कथं गुणत्वमित्याक्षिप्य दृष्टान्तेन समाधत्ते **यदीति**—

मू ॥ यदि शक्तेर्गुणत्वं स्यात्तदा स्याच्छक्तिजो गुणः।
इति चेद्गुणभेदेऽपि शक्तेस्स्याद्गुणहेतुता ॥
हरिद्रासुधयोश्शक्तेर्यथैव गुणहेतुता ॥ १५॥ ॥

व्या ॥ यथा हरिद्रासुधाशक्तेः रक्तगुणहेतुत्वं तद्वदात्मशक्तेरपि गुणहेतुत्वं भवेदित्यर्थः ॥ १५॥ ॥

अ० ॥ संप्रति हरिद्रासुधागतरूपगुणकार्यमेव तत्संयोगकाले प्रतीयमानो रक्तगुण इत्याशङ्कामनूद्य तत्र बाधप्रदर्शनेन शक्तेर्गुणहेतुत्वं दर्शयति **न शक्तिज-इति**—

मू ॥ न शक्तिजो रक्तगुणः किन्तु तद्गुणजो यदि ॥
हरिद्राचूर्णसंयुक्ते नवनीते यतो न हि ।
अतो हरिद्रासंयुक्तसुधाशक्तेर्भवेद्गुणः ॥ १७ ॥

व्या ॥ **तद्गुणज इति** तयोर्हरिद्रासुधयोः पीतादिगुणजन्य इत्यर्थः ॥ शेषस्सुगमः ॥ १७ ॥

अ० ॥ अधुना सदृष्टान्तं सुधादौ शक्तिसद्भावं दर्शयति **वह्नाविवेति**—

मू ॥ वह्नाविव सुधायाञ्च पाकशक्तिश्च दृश्यते ॥ १७॥ ॥

व्या ॥ चकारेण हरिद्रायामपि रक्तगुणहेतुभूता शक्तिर्दृश्यत इत्युक्तम् ॥

अ० ॥ अधुना मायां तु प्रकृतिं विद्यादिति श्रुत्यनुसारेण यत्तावत्प्रागभिहितम् ॥ श्लो० ॥ प्रकृत्यज्ञानवज्जीवे विज्ञाते विकृतिर्मेतेति प्रतिज्ञाश्रुतेस्तृतीयतात्पर्यं तदेव प्रपञ्चयति **स्वाज्ञानमिति**—

मू ॥ स्वाज्ञानं प्रकृतिर्भवेद्यदि तदा सत्ताभिदासंभवात्
तत्कार्यं स्वगतं भवेत्सुविदितं ज्ञाते व्यवस्थावति ।
रङ्गाजीवविनिर्मितं पटगतं द्रव्यात्मकं धातुजं
विज्ञातं सकलं यथा सुविदिते चेले व्यवस्थावति ॥ १८॥ ॥

व्या ॥ स्वात्माज्ञानं जगदुपादानमित्यस्मिन्पक्षे स्वात्मनः पारमार्थिकसत्ता-स्वात्माज्ञानतत्कार्ययोः प्रातिभासिकसत्तेति स्वात्मजगतोर्व्यक्तिभेदस्य संभाव्यमानत्वादवस्थात्रयवति स्वात्मनि विज्ञाते तज्ज्ञानादेव स्वात्माज्ञानं तत्परिणामभूतं जगदपि विज्ञायत इत्युक्त्वा तदनुगुणं दृष्टान्तमाह=**रङ्गाजीवेत्यादिना** यथा रङ्गाजीवाख्यचित्रकारपुरुषेण पटे विनिर्मितैः पिष्टलेपनेन मषिमयरेखया च नानावर्णद्रव्यपङ्करञ्जनेन च क्रमात् घट्टितत्वलाञ्छितत्वरञ्जितत्वरूपावस्थात्रयवति पटे विज्ञाते तज्ज्ञानादेव पटगतं पटेतरानेकवर्णद्रव्यसत्ताकं मही-महीधरादिरूपं कार्यजातं विज्ञायते तद्वदित्यर्थः ॥ १८॥ ॥

अ० ॥ इदानीं प्रथमतात्पर्यापेक्षया द्वितीयतृतीयतात्पर्ययोः क्रमादवरत्वं दर्शयति **द्वितीये चेति**—

मू ॥ द्वितीये च तृतीये च प्रातिभासिकतावलात् ॥
स्वात्मज्ञानेन विज्ञातं कार्यं यद्यपि संभवेत् ।

तथापि श्रुतितात्पर्यं मनाक् सङ्कुचितं यतः॥
न प्रतीच्यद्वितीयत्वं चिज्जडानां पृथक्कृतः॥ २०॥॥

व्या॥ द्वितीयतृतीयपक्षत्वेन निर्दिष्टस्य प्रतिज्ञाश्रुतितात्पर्यस्य मनाक्सङ्कोचे हेतुमाह—**यतो न प्रतीच्यद्वितीयत्वमिति** तत्र हेतुमाह—चिज्जडानां पृथक्कृत इति॥२०॥॥

अ०॥ अत्र ब्रह्मगीतां प्रमाणयति। **माययेति**—

मू॥ मायया विद्यते सर्वमिति केचन मोहिताः॥
शिवरूपातिरेकेण नास्ति माया च तत्वतः।
मायया वा शिवादन्यद्विद्यते चेच्छिवस्य तु॥
महत्त्वं परमं सक्षाद्धीयेत सुरपुङ्गवाः।
महत्वस्य च सङ्कोचो नास्ति सम्यङ्निरूपणे॥
अस्ति चेदप्रमाणं स्याच्छ्रुतिस्सत्यार्थवादिनी॥ २३॥॥

व्या॥ इमे श्लोकाः प्राग्द्वितीयनिरूपणे सप्तमप्रदर्शके उदाहृत्य व्याख्याताः

अ०॥ श्लो०॥ शोधिते विदिते ज्ञातमज्ञातं विदितं भवेत् इति यत्प्रतिज्ञा श्रुतेश्चतुर्थतात्पर्यमभिहितं तदिदानीमन्नादो वसुदान इत्यादिश्रुतिमवलम्ब्य प्रपञ्चयति **माययेति**—

मू॥ मायाकर्मयुताधिदैविकचितो जातं जगच्चेत्तदा
ज्ञाताज्ञातविभागतस्तु सकलं ज्ञातं भवेत्साक्षिणा।
कस्माच्चेदभिधेययोस्सजडयोः किञ्चिज्ज्ञसर्वज्ञयो-
रैक्याभाववशाद्धि लक्ष्यमुभयोरस्मीति संवेदनात्॥२४॥

व्या॥ तत्तत्प्राणिकर्मसापेक्षादव्यामोहितान्मायिनो महेश्वरादाधिदैविकान्मृदादिसाधनरहितस्य कुलालादिचित्रघटादिजन्मवत् विचित्रजगदुत्पत्तिस्वीकारपक्षे तत्त्वंपदवाच्ययोस्सर्वज्ञकिञ्चिज्ज्ञयोरैक्याभावात् पदद्वयलक्ष्यभूतेन निवृत्तावरणेन जगदनुपादानभूतसाक्ष्यात्मकविदुषा त्वाधिदैविकपरमेश्वरविनिर्मितस्य वियदादेरज्ञातसत्ताकत्वस्य स्वाप्रिकगजादेः ज्ञातैकसत्वस्य च स्वीकृतत्वात्त-

दुभयविधमपि ज्ञातमज्ञातञ्च कार्यं साक्षिप्रकाशेन विज्ञातं स्यादित्युक्त्वा तदुपपत्तिं प्रश्नपूर्वकमाह **कस्माच्चेत्यादिना अभिधेययोरिति** तत्त्वंपदवाच्ययोरित्यर्थः **सजडयोरिति** मायाविद्योपाधिकयोरीश्वरजीवयोरित्यर्थः ॥ **उभयोरिति** तत्त्वंपदयोरिति यावत् ॥ २४॥ ॥

अ० ॥ पुनश्च चतुर्थतात्पर्यमेव चोद्यपूर्वकमुपपादयति=**कथमिति**—

मू ॥ कथं मायादिनिर्मोकाच्छोधिते सच्चिदात्मके ॥

प्रकृतित्वविहीनेऽस्मिन्ज्ञातेऽन्यज्ज्ञायते यदि ।

एतस्माल्लक्ष्यचैतन्यादपृथग्देशकत्वतः ॥

सर्वेषां लक्ष्यभास्यत्वं ज्ञाताज्ञातविभागतः ॥ २६॥ ॥

व्या ॥ ज्ञाताज्ञातविभागतस्सर्वेषां लक्ष्यभास्यत्वमित्यन्वयः ॥ २६॥ ॥

अ० ॥ इदानीं प्रथमादितात्पर्यापेक्षया चतुर्थतात्पर्येऽस्मिन्नरुचिं दर्शयति **साक्षिणीति**—

मू ॥ साक्षिण्यकारणे ज्ञाते वाच्यसृष्टं मतं भवेत् ॥

इत्येव सर्वविज्ञानवाक्येनोक्तं तथास्य च ।

पारमार्थिकताभावाद्ब्रह्मवत्तदनन्यता ॥

आरम्भणश्रुतिप्रोक्तेत्यत्र स्यात्क्लिष्टकल्पनम् ॥ २८ ॥॥

व्या ॥ अत्रेति चतुर्थपक्षे तावत् शब्दप्रवृत्तिनिमित्तानां जातिगुणक्रियाणामाश्रयत्वेन शब्दप्रत्ययातिरेकेण कार्याणां ब्रह्माभिन्नानां परस्परभेदस्य स्वीकृतत्वात् वाचारम्भणश्रुतेर्मुख्यार्थत्वासंभवेन तया श्रुत्या चतुर्थनिरूपणोक्तप्रकारेण कर्मकार्यस्य वियदादिजगतः सत्यत्वेऽपि ब्रह्मण इव त्रिकालाबाध्यत्वरूपसत्यत्वाभावादस्य जगतः तत्त्वंपदलक्ष्यार्थभूतशुद्धब्रह्मानन्यत्वमभिप्रेतमिति कल्पनं क्लिष्टमित्युक्त्या चतुर्थतात्पर्यापेक्षया तृतीयादितात्पर्याणां प्रशस्तत्वादिकं क्रमाद्दर्शितमित्यर्थः ॥ २८॥ ॥

अ० ॥ ननु कोऽसौ ज्ञाताज्ञातवस्तुद्वयावभासकस्साक्षी अज्ञानोपाधिकश्चेदस्य चतुर्थतात्पर्यगम्यस्य चैतन्यस्य प्रथमादितात्पर्यगम्याज्जगत्कारणचैतन्याद्वैलक्षण्याभावेन प्रतिज्ञाश्रुतितात्पर्यस्य चातुर्विध्यव्याघातस्स्यात् तदतिरिक्तश्चेत्तत्र किं प्रमाणमिति प्राप्ते कैवल्यश्रुतिं प्रमाणयति **त्रिष्विति**—

मू॥ त्रिषु धामसु यद्भोज्यं भोक्ता भोगश्च यद्भवेत्॥
तेभ्यो विलक्षणस्साक्षी चिन्मात्रोऽहं सदाशिवः॥ २९॥॥

व्या॥ अवस्थात्रयेषु यद्भोज्यं विषयजातं यश्च भोक्ता विश्वतैजसप्राज्ञात्मकः यश्च भोगस्सुखदुःखसाक्षात्कारः यच्च भोगसाधनीभूतं करणं तेभ्यो विलक्षणस्सच्चिदानन्दरूपो विदुषोऽहमिति प्रकाशमानः एकत्वावरणरहितश्चैतन्यस्वरूपे यस्स एव साक्षीत्यर्थः॥ २९॥॥

अ०॥ नन्वेवं विदुषोऽहमिति प्रकाशमानस्य साक्षिणो ज्ञाताज्ञातवस्त्वव-भासकत्वे किं प्रमाणमित्यत आह **ज्ञातरूपेणेति—**

मू॥ ज्ञातरूपेण चाज्ञातस्वरूपेण च साक्षिणः॥
सर्वं भाति तदाऽऽभाति ततस्तव्यापि सर्वदा।
इति श्रीब्रह्मगीतायां चतुर्थाध्यायके स्मृतम्॥ ३१॥

व्या॥ ज्ञातरूपेण चाज्ञातस्वरूपेण च विद्यमानं सर्वं यतस्साक्षिणो भाति यतश्च तत्साक्षी आसमन्तात्प्रकाशते ततस्तत्साक्षि चैतन्यं विद्यादशायामिवाविद्यादशायामपि ज्ञाताज्ञातसर्वावभासकत्वेन सदा सर्वव्यापि भवतीत्यनेन चतुर्थतात्पर्यनिष्ठस्य अविद्यावस्थातः विद्यावस्थायां असङ्गत्वाद्यावरणनिवृत्तिव्यतिरेकेण न कोऽपि विशेष इति चतुर्थतात्पर्यस्य प्रथमादितात्पर्येभ्यो विहीनत्वमव गम्यत इति भावः॥ ३१॥

अ०॥ इदानीं प्रथमतात्पर्यनिष्ठाफलमाह **आद्य इति—**

मू॥ आद्ये निष्ठा यदा ब्रह्मविद्वरिष्ठस्तदा भवेत्।
समाधौ तदभावे च विना वृत्तिं स्वभानतः॥ ३२॥

व्या॥ आद्यपक्षे स्वात्मातिरेकेण तदवभास्यवृत्त्याद्यभावात् समाध्यनुष्ठाने तदननुष्ठाने वा वृत्तिं विना स्वात्मनो भानसंभवात् ब्रह्मविद्वरिष्ठत्वं संभवेदित्यर्थः॥ ३२॥

अ०॥ तत्र ब्रह्मगीतायाश्चतुर्थाध्यायवचनानि प्रमाणयति **ब्रह्मण इति**

मू॥ ब्रह्मणोऽन्यत्सदा नास्ति वस्तुतोऽवस्तुतोऽपिच।
तथा सति शिवादन्यत्कथं पश्यति तत्ववित्॥ ३३॥

व्या ॥ हे सुराः भवदाशङ्कानिवृत्त्यर्थं प्रागस्मिन्नेव चतुर्थाध्याये समीरितैः श्लो ॥ ब्रह्मण्यध्यस्तमायाया निवृत्तिं कुरुते तु सा । विद्या यदि न मायायाः प्रत्यगात्मन्यसंभवात् ॥ प्रत्यगात्मा परंज्योतिर्माया सा तु महत्तमः । तथा सति कथं मायासंभवः प्रत्यगात्मनि ॥ तस्मात्तर्कप्रमाणाभ्यां स्वानुभूत्या च चिद्घने ॥ स्वप्रकाशैकसंसिद्धे नास्ति माया परात्मनीत्यादिवचनैरुक्तरीत्या प्रत्यग्ज्योतिषि तमोरूपाज्ञानस्य आध्यासिकस्यासंभाव्यमानत्वात् तदीयमनिर्वचनीयं गुणात्मकं द्रव्यात्मकं वा तदतिरिक्तं सत्यं वा वस्तु ब्रह्मणोऽन्यत् सर्वदा नास्त्येव तथा सति तत्वविदस्वातिरिक्तवस्त्वभावात्किमपि न पश्यतीत्यर्थः ॥ ३३ ॥

अ० ॥ एवं स्वातिरिक्तवस्त्वन्तराभावपरं ब्रह्मवाक्यमुदाहृत्य अधुना स्वप्रतियोगिकभेदाभावपरमपि ब्रह्मवाक्यमुदाहरति **भेद इति**—

मू ॥ भेदोऽभेदस्तथा भेदाभेदस्साक्षात्परात्मनः ।
नास्ति स्वात्मातिरेकेण स्वयमेवास्ति सर्वदा ॥ ३४ ॥

व्या ॥ स्पष्टोऽर्थः ॥ ३४ ॥

अ० ॥ यत एवमतः प्रत्यग्ज्योतिरावारकतमस्तत्कार्याभावात् प्रत्यक्चैतन्यप्रकृतिकत्वाच्च सर्वस्य तदनन्यत्वेन तत्वविदो हेयोपादेयाभावपरं ब्रह्मवाक्यमप्युदाहरति **ब्रह्मैवेति**—

मू ॥ ब्रह्मैव विद्यते साक्षाद्वस्तुतोऽवस्तुतोऽपि च ।
तथा सति शिवज्ञानी किं गृह्णाति जहाति किम् ॥ ३५ ॥

व्या ॥ स्पष्टोऽर्थः ॥ ३५ ॥

अ० ॥ इदानीमुपपादितार्थे उपपत्तिं प्रदर्शयति—**इतीति**—

मू ॥ इत्युक्त्वा ब्रह्मगीतायां चतुर्थाध्यायके ततः ।
मायया विद्यते सर्वमिति केचन मोहिताः ॥
शिवरूपातिरेकेण नास्ति माया च तत्वतः ।
मायया वा शिवादन्यद्विद्यते चेच्छिवस्य तु ॥
महत्त्वं परमं साक्षाद्धीयेत सुरपुङ्गवाः ।
महत्त्वस्य च संकोचो नास्ति सम्यङ्निरूपणे ॥

अस्तिचेद्प्रमाणं स्याच्छ्रुतिस्सत्यार्थवादिनी ।
इत्येतैः पूर्ववत्पश्चात्तमोऽज्ञाननिराकृतैः ॥
प्रतिज्ञा श्रुतितात्पर्यं यदाद्यं ब्रह्मसम्मतम् ॥ ३९॥ ॥

व्या ॥ **पूर्ववदिति** पूर्वोक्तैर्ब्रह्मण्यध्यस्तमायाया इत्यादिवचनैरिवेत्यर्थः ॥ इमे श्लोकाः प्रागस्मिन्निरूपणे प्रतिज्ञाश्रुतेर्द्वितीयतृतीयतात्पर्यपक्षे प्रत्यगात्मनः अद्वितीयत्वसंकोचप्रदर्शनार्थमुपन्यस्ताः । इदानीं तु प्रतिज्ञावचनस्य प्रथमतात्पर्यप्राशस्त्यप्रदर्शनाय पुनरुपन्यस्ताः ।

द्वितीयनिरूपणे सप्तमप्रदर्शके व्याख्याताश्चातो न पौनरुक्त्यमिति भावः ॥

अ० ॥ अधुना - द्वितीयतात्पर्यनिष्ठाफलमाह **द्वितीयस्थ इति**—

मू ॥ द्वितीयस्थो यदा ब्रह्मविद्वरीयांस्तदा भवेत् ॥
स्वभास्यगुणदृष्ट्यन्यविकाराणामभावतः ।
सर्वदाऽस्य तया दृष्ट्या स्वात्ममात्रानुभूतितः ॥ ४१ ॥

व्या ॥ **स्वभास्यगुणदृष्ट्यन्यविकाराणामभावत इति** । स्वस्य जगत्कारणभूतस्य शक्तिरूपाज्ञानवतः भास्यभूताः याः गुणात्मकदृष्टयः तदतिरिक्तविकाराणामभावादस्य द्वितीयतात्पर्यनिष्ठावतः सर्वदा तद्दृष्ट्या स्वात्ममात्रानुभववत्त्वात् ब्रह्मविद्वरीयस्त्वमिति भावः ॥ ४१ ॥

अ० ॥ इदानीं तृतीयतात्पर्यनिष्ठाफलमाह **तृतीय इति**—

मू ॥ तृतीये तु यदा निष्ठा तदा स्याद्ब्रह्मविद्वरः ।
स्वभास्यद्रव्यदृष्ट्यन्यविकाराणामभावतः ॥
सर्वदाऽस्य तया दृष्ट्या स्वात्ममात्रानुभूतितः ॥ ४२॥ ॥

व्या ॥ **स्वभास्यद्रव्यदृष्ट्यन्यविकाराणामिति** । स्वस्य जगत्कारणभूतस्य परिणाम्यज्ञानतादात्म्यापन्नस्य भास्यभूताः याः द्रव्यात्मकदृष्टयः तदतिरेकेण बाह्यार्थानामभावात् शेषः पूर्ववत् ॥ ४२॥ ॥

अ० ॥ यत्तावदभिहितं कारणात्मन एव सर्वदृष्टिविषयत्वं तत्र वाचास्म्भणश्रुत्यादिकं प्रमाणयति **वाचेति**—

मू ॥ वाचारम्भणमित्यादिवेदवाक्यात्तथैव च ॥
तदनन्यत्वसूत्राच्च घटशब्दान्मृदोऽपि च ।
न तु कश्चिद्विकारोऽस्ति वृत्तेनेति च भाष्यतः ॥
पाठभेदेन भावाच्चोपलब्धेरिति सूत्रतः ।
तदीयभाष्यतो वाचस्पत्यादपि च तन्तवः ॥
गोचराः पटबुद्धेस्स्युर्न पटो गोचरो यथा ।
जगद्बुद्धेस्तथा प्रत्यङ्नोचरोऽन्यो न विद्यते ॥
प्रत्यग्रूपे प्रमाणानां निष्ठां ब्रूमोऽद्वितीयके ।
इत्यादिशासनात्स्वात्ममात्रस्यानुभवस्सदा ॥ ४७ ॥

व्या॥ प्राक् षष्ठे दृष्टिसृष्टिनिरूपणे व्याख्यातैरेतैश्श्लोकैस्तत्र दृष्टिव्यतिरेकेणानात्मभूतबाह्यार्थाभावो दर्शितः । अत्र तु सर्वदृष्टीनामात्मैव विषय इति प्रदर्शनार्थमुपन्यस्ताः अतो न पौनरुक्त्यमिति भावः ॥ ४७ ॥

अ० ॥ इदानीं प्रश्नपूर्वकं द्वितीयतृतीयपक्षयोर्भेदं दर्शयति **तर्हीति** —

मू ॥ तर्ह्येतयोर्विभेदस्तु किन्निमित्तो भवेद्यदि ।
द्वितीये स्वगुणत्वेन दृष्टेस्स्वस्याद्वितीयता ॥
द्रव्यत्वेन तृतीये तु तादृशी नाद्वितीयता ।
इतीयानेव तद्भेदस्तुर्यनिष्ठाफलं शृणु ॥ ४९ ॥

व्या ॥ एतयोरिति द्वितीयतृतीयतात्पर्यनिष्ठाफलयोः **स्वगुणत्वेन दृष्टेरिति** दृष्टेः स्वगुणत्वं तावत्प्राक् त्रयोदशादिश्लोकेनोदाहृत्य व्याख्यातं **तद्भेद इति** तयोर्द्वितीयतृतीयतात्पर्यनिष्ठाफलयोर्भेदः तद्भेद इत्यर्थः ॥ इतस्तुरीयतात्पर्यनिष्ठाफलं शृण्वित्यर्थः ॥ ४९ ॥

अ० ॥ तदेव तुरीयतात्पर्यनिष्ठाफलं दर्शयति **तुर्येति**—

मू ॥ तुर्यतात्पर्यनिष्ठत्वे ब्रह्मवित्त्वं न चेतरत् ।
समाधीतरकालेऽस्य बाह्यार्थद्वयदर्शनात् ॥ ९० ॥

व्या॥ बाह्यार्थद्वयदर्शनादिति बाह्यस्य दृष्टिव्यतिरिक्तस्यार्थद्वयस्य व्यावहारिकप्रातिभासिकरूपार्थद्वयस्य दर्शनाद्ब्रह्मवित्त्वमेव भवेदित्यर्थः ॥ ५० ॥

अ० ॥ पुनश्चोद्यपूर्वकं चतुर्थतात्पर्यनिष्ठस्य तत्वविदां मध्ये सामान्यत्वं दर्शयति **तुर्यतात्पर्येति**—

मू॥ तुर्यतात्पर्यनिष्ठोऽपि बाह्यदृष्टिविनिग्रहात् ।
सदा स्वात्मैकनिष्ठस्स्याच्चेद्भ्याता न स तत्ववित् ॥ ५१ ॥

व्या॥ अस्य प्रारब्धफलानुभवकाले न स्वात्मनिष्ठत्वमित्यर्थः ॥ ५१ ॥

अ० ॥ इदानीं सदृष्टान्तं ब्रह्मवित्त्वादेः फलमाह **यवाग्विति**—

मू॥ यवाग्वन्नादिभोक्तृत्वे सुखाधिक्यं यथोचितम् ।
भवेदप्येकरूपैव क्षुन्निवृत्तिर्यथा तथा ॥
ब्रह्मवित्तद्वरत्वादौ विशेषेण क्रमाद्भवेत् ।
जीवन्मुक्तिसुखाधिक्यं कैवल्यं त्वेकरूपकम् ॥ ५२ ॥

व्या॥ स्पष्टोऽर्थः ॥ ५३ ॥

इति श्रीपरमहंसपरिव्राजकाचार्यरामब्रह्मश्रीकृष्णानन्देन्द्रसरस्वतीभगवत्पादशिष्यश्रीमच्चन्द्रिकाचार्याख्ययतीश्वरविरचितायां अमृतरसझरीनामकव्याख्यानोपेतायां अद्वैतसिद्धान्तगुरुचन्द्रिकायां अष्टमं एकविज्ञानेन सर्वविज्ञाननिरूपणं संपूर्णम् ।

ओं तत्सद्ब्रह्मैवाहमस्मि
हरिः ओम्।
तत्सत्॥

—:o:—

॥ हरिः ओम् ॥

अद्वैतसिद्धान्तगुरुचन्द्रिकायाम् ।

नवमं वाच्यैक्यनिरूपणं आरभ्यते ।

अ० ॥ अधुना नवमं वाच्यैक्यनिरूपणमारभमाणश्श्रीमच्छङ्करभगवत्पादप्रसादं प्रार्थयते **जीवेशेति**—

मू ॥ जीवेशभेदवादान्धकारचण्डप्रभाकरः ।
साक्षाच्छिवावतारो यो मय्याचार्यः प्रसीदतु ॥ १ ॥

व्या ॥ स्पष्टोऽर्थः ॥ १ ॥

अ० ॥ इदानीं नवमनिरूपणे प्रमेयं दर्शयति **पुरेति**—

मू ॥ पुरा निवेदितं शिष्यैर्वाच्यैक्यमपि संमतम् ।
इति यत् तद्विशेषस्तु नवमेऽत्र निरूप्यते ॥ २ ॥

व्या ॥ **तद्विशेषस्त्विति** तस्य तत्त्वंपदवाच्यैक्यस्य विशेषः प्राक् शिष्यैरपेक्षितोऽत्र निरूप्यत इत्यर्थः ॥ २ ॥

अ० ॥ शिष्यस्स्वाचार्यं पृच्छति **सौषुप्त इति**—

मू ॥ सौषुप्तो जगदीश्वरो यदि तदा तच्छब्दवाच्योऽस्ति किं
नो वा सोऽस्ति यदीह तेन सह मेऽभेदो न वा वर्तते ।
यद्यस्ति स्फुरणं कुतो न भवति ह्यत्रोपमानादिना
साक मे परमीरुकस्य वद भो वाच्यैक्यमावश्यकम् ॥ ३ ॥

व्या ॥ सौषुप्तस्य जीवस्य प्रथमादिनिरूपणोक्तप्रकारेण जगत्कारणत्वपक्षे तत्त्वमसीति महावाक्यस्य तत्पदस्य वाच्यार्थोऽस्ति किं नवा अस्तिचेत् इह जीवदशायां तेन सह ममैक्यमस्ति किं नवा अस्ति चेदहमेव तत्त्वमसीति वाक्यं घटकीभूततत्पदवाच्यः सर्वज्ञत्वादिधर्माश्रय इति कुतो न भामीत्याचार्याय स्वप्रश्न-

मावेद्य 'उदरमन्तरं कुरुते । अथ तस्य भयं भवति' 'भीषास्माद्वातः पवते' इत्यादि-श्रुत्यनूदितस्य स्वभिन्नत्वेन गृहीतात्तत्पदवाच्यादन्तर्यामिणस्सकशात् जायमानस्य भयस्य निवृत्त्यर्थं वाच्यैक्योपदेशं प्रार्थयते **अत्रेत्यादिना** अत्र वाच्यैक्याप्रतीता-वित्यर्थः ॥ **परभीरुकस्येति** परस्मादन्तर्यामिणो भीतस्येत्यर्थः ॥ ३ ॥

अ० ॥ इदानीं तदाचार्यो वाच्यैक्यमुपदिशति **वाच्यैक्यमिति**—

मू ॥ वाच्यैक्यं त्वदपेक्षितं तु शृणु तेऽसंवेष्टनाद्व्यापि न-
स्स्वाज्ञानान्निखिलेश्वरस्य निखिलाभिज्ञस्य चापाततः ।
किञ्चिज्ज्ञत्वमसद्वृधा वदसि भोस्स्वाज्ञातसत्वभ्रमे
संजाते हि तदप्रतीतिसमये स्वप्ने यथा तैजसः ॥ ४ ॥

व्या ॥ **वाच्यैक्यं त्वदपेक्षितं शृण्विति** शिष्यमभिमुखीकृत्य तस्य तत्पदवाच्यत्वावेदनाय व्यापकत्वादिधर्माश्रयत्वं दर्शयति—**तेऽसंवेष्टनादित्यादिना** असंवेष्टनात् प्राक् तृतीयनिरूपणोक्तप्रकारेणाज्ञानतत्कार्यैस्ते संवेष्टनाभावात् स्वतश्च व्यापी तत एव स्वाज्ञाने तादात्म्यवशान्निखिलस्य प्रातिभासिकस्य वियदादे-रीश्वरश्च भवसि ततो हि निखिलगोचरज्ञानवांश्च भवसि निखिलगोचरज्ञानवत्त्वादेव तव मूलाज्ञानतत्कार्ययोः जीवनानुकूलतुरीयस्वरूपानभिज्ञत्वातिरेकेण कालत्रयेऽप्यसत् किञ्चिज्ज्ञत्वं सर्वज्ञत्वव्यावर्तकमिवाह किञ्चिज्ज्ञ इति **वृधा वदसि** इत्युक्त्वा तत्र कारणमाह **आपातत इति** स्थूलज्ञानादित्यर्थः ॥ कदा वदामीत्यत आह **स्वा-ज्ञातेत्यादिना** स्वेनाज्ञातस्य वस्त्वन्तरस्यासत्वेऽप्यावृतत्वेन तदस्तीति भ्रमे सति तस्य प्रतीत्यभावसमये वदसीत्युक्त्वा तत्र दृष्टान्तमाह **स्वप्ने यथा तैजस इति** स्वप्ने भवानेव तैजससंज्ञकस्सन् यथा किञ्चिज्ज्ञत्वादिकं वदति तद्वदित्यर्थः ॥ ४ ॥

अ० ॥ स्वप्ने यथा तैजस इत्युक्तमेव दृष्टान्तं विशदयति **स्वप्न इति**—

मू ॥ स्वप्ने दृष्टगजादीनां यस्तु पार्श्वे न दृश्यते ।
तस्य सत्तात्रयाभावाज्ञनाद्यद्वद्ब्रवीषि च ॥ ५ ॥

व्या ॥ स्पष्टोऽर्थः ॥ ५ ॥

अ० ॥ इदानीं आधिदैविकस्येश्वरत्ववाद्यभिमतं दृष्टान्तमाह **सूत्रात्मेति**—

मू ॥ सूत्रात्मा जगतो यथा च भवति स्रष्टा च सन्नीश्वर-
स्सृष्टे तत्प्रकृतावहंकृतिवशात्प्राप्नोति संसारिताम् ।

तद्वत्त्वं जगतः प्रबोधसमये स्रष्टृत्वतोऽपीश्वर-
स्मृष्टे तत्प्रकृतावहंकृतिवशाज्जीवस्तयोरेकता ॥ ६ ॥

व्या॥ यथा चापञ्चीकृतपञ्चमहाभूततत्कार्यलिङ्गशरीरोपाधिको हिरण्यगर्भाख्य आधिदैविकः पुरुषः स्थूलभूतादिस्रष्टृत्वादीश्वरत्वं स्वसृष्टतत्कारणेष्वहमभिमानाज्जीवत्वं च भजति तद्वत् त्वमपि–'यदा सुप्तस्स्वप्नं न कञ्चन पश्यतीत्यादिश्रुत्युक्तप्रकारेण जगत्स्रष्टृत्वादीश्वरत्वं स्वसृष्टतत्कारणेष्वहमिति तादात्म्याध्यासाज्जीवत्वं च भजसीत्युक्त्वा फलितमाह **तयोरिति** तयोस्तत्वंपदवाच्य' योरेकता अस्मत्पदवाच्यस्य जगत्स्रष्टृत्वसंसारित्वाश्रयत्वादिदमेव वाच्यैक्यमिति भावः ॥ ६ ॥

अ० ॥ एवमीश्वरत्वाध्यासाश्रयमेव प्रत्यक्चैतन्यं जीवत्वाध्यासाश्रयमित्यादिश्य अधुना नेश्वरत्वाध्यासं विना जीवत्वाध्यासस्संभवतीति सदृष्टान्तमाह **कृश इति**—

मू ॥ कृशेऽभिषेकपात्रेऽस्मिन्विशाले धातुनिर्मिते ।
पादतो बाणलिङ्गस्य स्थापनार्थमपेक्षितः ॥
गर्तो यथात्र संस्फोटं विना कर्तुं न शक्यते ।
तथेशत्वं विना स्वस्मिन्न जीवत्वं भवेत्किल ॥ ८ ॥

व्या ॥ कृशे ताम्राद्यभिषेकपात्रे तदतिरिक्तपीठमन्तरेण ऊर्ध्वशिरस्कत्वेन बाणलिङ्गस्य स्थापनार्थमपेक्षितो गर्तो यथा तदनुकूलबुद्बुदाकारमन्तरेण तत्पात्रे कर्तुं न शक्यते तद्वत् प्रत्यगात्मनीश्वरत्वाध्यासं विना जीवत्वाध्यासो न संभवेदित्यादिश्य तत्र 'तत्सृष्ट्वा तदेवानुप्राविशत् सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन्यदास्त' इत्यादि श्रुतिप्रसिद्धिं दर्शयति **किलेति** ॥ ८ ॥

अ० ॥ ननु, तत्त्वंपदवाच्ययोरेवमत्यन्ताभेदे तयोर्भेदव्यवहारस्य का गतिरित्यत आह **यस्मादिति**—

मू ॥ यस्मादीश्वरतां विना तु न भवेत्सुप्तस्य ते जीवता
शारीरेश्वरयोर्विभेदवचनं भ्रान्तैर्वृथा प्रोच्यते ।
कर्तृत्वेन विना यथा च न भवेज्जीवस्य ते भोक्तृता
मिथ्यात्ववशाद्धि संसृतिरपि स्वप्ने यथा जाग्रति ॥ ९ ॥

व्या ॥ यस्मात् पूर्वोक्तप्रकारेण सुषुप्त्यवस्थामापन्नस्य तव परमेश्वरत्वं विना जीवता न संभवति अतः शरीरेश्वरयोर्भेदव्यवहारः केवलमूढजनप्रलाप इत्युक्त्वा तत्र दृष्टान्तमाह **कर्तृत्वेनेत्यादिना** ननु मम कर्मकर्तृत्वपूर्वकं तत्फलभोक्तृत्वेऽपि न कलत्रपश्वादिनिर्मातृत्वपूर्वकं तद्भोक्तृत्वमिति प्राप्ते दृष्टान्तेन परिहरति **निर्मातृत्वेत्यादिना** संसरत्यनेनेति संसृतिः भोगः-दृष्टान्तेन दर्शितमर्थं दार्ष्टान्तिकेऽप्यतिदिशति **जाग्रतीति** ॥

अ० ॥ ननु मम सर्वजगन्निर्मातृत्वे तदनुकूलसर्वज्ञत्वमेव प्रतीयेत कुतस्तद्विरुद्धकिञ्चिज्ज्ञत्वप्रतीतिरित्यत आह **वल्मीकेति**--

मू ॥ वल्मीकोदरमध्यकायभुजगस्तद्बाह्यदेशे यदा
रन्ध्राभ्यामटनं करोति हि तदा गत्यागतिग्राहिता ।
यद्वत्स्यादभिभावकेन किल ते किञ्चिज्ज्ञताविभ्रमः
स्वाध्यस्ताखिलधीस्वतोऽस्ति च ततः किञ्चिज्ज्ञसर्वज्ञता ॥

व्या ॥ अल्पान्तरदेशस्य वल्मीकस्य द्वाराभ्यां तद्बहिः गमनागमनं यथा तथा पर्यटतो वल्मीकान्तरदेशस्थमध्यशरीरवतः सर्पस्य गूढपादत्वात् यदा तदीयद्वितीयादिपादानामेकदा स्वस्वपूर्वपादसंचारार्हदेशप्रवेशः संभवति तदा तत्तत्प्रथमपादस्य तत्तत्पुरोदेशप्राप्तिक्रियायाः एकत्वेऽपि यथा तव वल्मीकान्तःप्रविशत्सर्पशरीराश्रितक्रियानुसारेण आपुच्छमस्तकं गतिक्रियाग्राहित्वं रन्ध्रान्तरद्वारा वल्मीकाद्बाह्यदेशे निर्गच्छत्सर्पाश्रितक्रियानुसारेण आशिरःपुच्छान्तमागतिग्राहित्वं च संभवति तथा स्वात्मनः स्वारोपितसर्ववस्त्ववभासकत्वरूपसर्वज्ञत्वस्य एकत्वेऽपि तस्य सर्वावभासकत्वरूपसर्वज्ञत्वस्य **अभिभावकेन** इतरग्रहणेन स्वारोपितेषु अज्ञातपार्श्वान्तरसत्वविभ्रमेण कृताग्रहणरूपाभिभवात् किञ्चिज्ज्ञत्वभ्रान्तिः स्वारोपितानां वियदादीनां सर्वेषां प्रातिभासिकत्वेन तद्बलात् सर्वज्ञत्वमप्यस्तीत्युक्त्वा तयोराध्यासिकत्वेन स्वप्ने पित्रादिकल्पकत्वतत्पुत्रत्वयोरिव परस्परविरोधाभावादेकस्य तदुभयधर्मवत्वं संभवेदित्याह --**तत इति** ॥ १० ॥

अ० ॥ इदानीं सर्वज्ञत्वकिञ्चिज्ज्ञत्वयोः समानविषयकत्वानुमानेनापि वाच्यैक्यं दर्शयति **यादृक्षेति**--

मू ॥ या तु सर्वज्ञता प्रोक्ता सैव किञ्चिज्ज्ञता भवेत् ।
मध्ये दृग्दृश्ययोस्सर्वदृश्यायत्तत्वसाम्यतः ॥

स्वप्ने स्वप्नदृशो यद्वत्ततो वाच्यैकता भवेत् ॥ ११॥ ॥

व्या० ॥ किञ्चिज्ज्ञत्वसर्वज्ञत्वयोर्मध्ये अन्यतरत्पक्षीकृत्यान्यतरत्वं साध्यते तत्र हेतुमाह-**मध्ये दृग्दृश्योस्सर्वदृश्यायत्तत्वसाम्यत इति** 'श्लो० ॥ तस्मादस्ति महादेव एव साक्षात्स्वयंप्रभः । आनन्दरूपस्संपूर्णो न ततोऽन्यत्तु किञ्चने'ति ब्रह्मगीतोक्तरीत्या आत्मानात्मनोर्मध्ये एकदेशवाचि किञ्चिच्छब्दार्थभूतसर्वदृश्यायत्तत्वसाम्यात् सर्वज्ञत्वकिञ्चिज्ज्ञत्वयोरिति शेषः-तत्र दृष्टान्तमाह—**स्वप्ने स्वप्नदृशो यद्वदिति** फलितमाह **तत इत्यादिना** ननु, यस्सर्वज्ञस्सर्वविदित्यादि श्रुत्या जगत्स्रष्टुर्यत्स्वात्मनो नित्यशुद्धत्वादिकं-यच्च स्वारोपितं द्वैतजातं तदुभयावगाहिज्ञानवत्वमेव विवक्षितं नत्वारोपितदृश्यमात्रज्ञानवत्वं सोऽकामयत बहुस्यामिति श्रुत्या स्वात्मविषयकज्ञानवत्वदर्शनादिति चेन्नैवं ।

तस्य स्वात्मनि जगदध्यासकर्तुः तदध्यासापेक्षितमहमिति यत् सामान्यज्ञानं तस्य बहुस्यामिति श्रुतिसिद्धत्वेऽपि स्वप्नसृष्टिसमये तैजसस्येव न जगत्सृष्ट्यारंभकाले निर्विशेषत्वावगाहिज्ञानमस्ति ॥ श्लो० ॥ तया दुर्घटकारिण्या तादात्म्येनैव सङ्गतम् । कारणं सकलस्रष्टृ सर्वसंहर्तृ चास्तिकाः ॥ इति प्रागुदाहृतब्रह्मगीतावचनोक्तप्रकारेण मायायां तादात्म्याध्यासवतः तन्मायास्वात्मनोरविवेकदर्शनात् अतो न कश्चिद्दोषः ॥ ११ ॥

अ० ॥ इदानीमेतादृशप्रज्ञावानेव तत्त्वंपदवाच्यैक्यादिदर्शी भवेन्नेतर इत्याह—**स्वस्मिन्निति**—

मू॥ स्वस्मिन्नीक्षणयोर्द्वयं च सुमतिर्यो वेत्ति वाच्यैकता-
बोधेनापि निवर्तते भृगुरिवाम्भोजे यथा दृष्टिमान् ।
मन्दो जीवपरौ विरुद्धविषणावित्यज्ञतादोषत-
श्चिद्रूपत्वधियास्मि सर्वविदिति ब्रूतेऽन्धवत्पङ्कजे ॥ १२॥ ॥

व्या० ॥ य इति-या तु सर्वज्ञता प्रोक्ता सैव किञ्चिज्ज्ञता भवेदिति प्रागुदाहृतश्लोकोक्तप्रकारेण यस्सर्वज्ञस्सर्वविदिति श्रुत्यन्तर्गतसर्वशब्दार्थाभिज्ञः सुमतिः 'पुरत्रये क्रीडति यस्तु जीवस्ततस्तु जातं सकलं विचित्रम् । मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् । मायं सर्वं लयं य तीत्यादिश्रुत्युक्तं यद्ब्रह्मणस्तटस्थलक्षणं यच्च 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति श्रुत्युक्तं स्वरूपलक्षणं तदुभयं च स्वस्मिन्वेत्ति सः तत्त्वंपदवाच्यैकताबोधेन अपिशब्दाल्लक्ष्यैकत्वज्ञानेन च निवर्तते इत्युक्त्वा तत्र वैदिकदृष्टान्तमाह—**भृगुरिवेति** – 'भृगुर्वै वारुणिः-वरुणं पितरमुपससार अधीहि भगवो

वेद्मीति' उपक्रम्य 'तँ होवाच यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेति' पितृमुखाद्ब्रह्मणस्तटस्थलक्षणं श्रुत्वा तस्य परिच्छिन्नेष्वन्नमयप्राणमयमनोमयेष्विव कर्तृत्वभोक्तृत्वधर्मद्वयविशिष्टत्वेन कोशद्वयात्मके विज्ञानमयेऽप्यदर्शनात् आनन्दो ब्रह्मेति व्यजानात् आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते आनन्देन जातानि जीवन्ति आनन्दं प्रयंत्यभिसंविशन्ती'ति श्रुत्युक्तप्रकारेण स्वस्मिन्सौषुप्तिकानन्दमये तटस्थलक्षणं तदानन्दस्य सच्चिद्रूपत्वात्स्वरूपलक्षणं च यथा दृष्ट्वा शान्ताकाङ्क्षो बभूवेति वैदिकदृष्टान्तमुक्त्वा तत्र लौकिकमपि दृष्टान्तमाह—**अम्भोजे यथा दृष्टिमानिति** यथाहि लोके चक्षुष्मान् आप्तमुखादम्भोजस्य पूर्णचन्द्रसमानाकारत्वे सति आह्लादकरत्वमिति स्वरूपलक्षणं मध्यवर्तिमेरुकर्णिकाकारहरिद्राभबीजकोशवत्त्वमिति तदितरलक्षणं च श्रुत्वा तदुभयं तत्र योजयञ्छान्ताकाङ्क्षो भवति तद्वत्तदुभयलक्षणं सुमतिस्त्वात्मनि योजयन्निवर्तत इत्युक्त्वा स्वात्मनि तटस्थब्रह्मलक्षणयोजनाशक्तं दूषयति—**मन्द इत्यादिना अज्ञतादोषत इति** वियदादिषु प्रातिभासिकत्वज्ञानाभावरूपदोषेण स्वस्य परमेश्वरज्ञानविषयेष्वेकदेशग्राहकत्वभ्रान्त्या 'चतुर्मुखेन्द्रदेवेषु मनुष्याश्वगवादिषु । चैतन्यमेकं ब्रह्मातः प्रज्ञानं ब्रह्ममय्यपि' इति महावाक्योपनिषदुक्तप्रकारेण स्वस्मिन् स्वरूपलक्षणभूतचिद्रूपत्वावगाहिज्ञानेन सर्वविदस्मीति ब्रूत इत्युक्त्वा तत्र दृष्टान्तमाह—**अन्धवत्पङ्कज इति** यथा चान्धः पङ्कजे प्रागुक्तद्वितीयलक्षणस्यापातग्रहणमात्रेण सर्वज्ञोऽस्मीति प्रलपति तद्वदित्यर्थः ॥ १२॥ ॥

अ० ॥ इदानीं जीवेश्वरयोः प्रतिबिम्बत्वपक्षे कथं वाच्यैक्यमिति पृच्छति—**ईश्वर इति**—

मू ॥ ईश्वरो नाम मायायां ब्रह्मणः प्रतिबिम्बकः ॥
मनसि प्रतिबिम्बस्तु जीव इत्यत्र तत्कथम् ॥ १३॥ ॥

व्या० ॥ स्पष्टोऽर्थः ॥ १३॥ ॥

अ० ॥ तदुत्तरमाह—**तन्मायेति**—

मू ॥ तन्मायाविकृतित्वेन मनसस्तच्चिदेकता ॥
क्षीरस्थप्रतिबिम्बस्य तद्विकारस्थता यथा ॥ १४॥ ॥

व्या० ॥ **तच्चिदेकतेति** तयोर्मायामनसोः प्रतिबिम्बभूतायाश्चित एकता तच्चिदेकता तत्रोपपत्तिं दर्शयति—**तन्मायाविकृतित्वेन मनस इति** मनस ईश्वरोपाधिभूतमायाविकारत्वेन मायागतब्रह्मप्रतिबिम्ब एव मनोगतब्रह्मप्रतिबिम्बे

भवतीत्युक्त्वा तत्र दृष्टान्तमाह क्षीरस्थेत्यादिना यदा क्षीरम् दध्यादिरूपेण परिणमते तदा क्षीरगतप्रतिबिम्ब एव दध्यादिगतप्रतिबिम्बत्वेन दृश्यते तद्वदतो जीवेश्वरयोर्ब्रह्मप्रतिबिम्बत्वपक्षेऽपि तदभेदसिद्ध्यर्थं न लक्षणावृत्तिराश्रयणीया तदुपाध्योर्मुद्घटयोरिवाभेदावगमादित्यर्थः ॥ १४॥ ॥

अ० ॥ इदानीं जीवेशयोरंशांशित्वपक्षेऽपि प्रश्नपूर्वकं वाच्यैक्यं दर्शयति—**जीव इति**—

मू ॥ जीवोंऽशो भवतीति वादिसमये वाच्यैकतां ब्रूहि चे-
दीशत्वं सकलांशकेऽस्ति हि भुवश्चांशेषु भूत्वं यथा ।
अंशेभ्यो व्यतिरेकतः किल भुवोऽसत्वादिहास्त्यंशता
त्वं स्त्री त्वं च पुमानसीति निगमाद्वाच्यैकताऽत्रापि चा॥ १५॥ ॥

व्या० ॥ **वादिसमय इति** ॥ वादिनां सिद्धान्ते इत्यर्थः समयाश्शपथाचारकालसिद्धान्तसंविद इत्यमराभिधानात् जीवेशयोरंशांशित्वपक्षे वाच्यैक्यस्य विद्वत्प्रसिद्धिं ईशत्वं च सकलांशकेऽस्ति हीति वाक्येन दर्शयित्वा तत्र दृष्टान्तमाह—**भुवश्चांशेषु भूत्वं यथेति** ननु भूत्वस्य व्यापकत्वात्तदंशेषु विद्यमानत्वेऽपि तदंशत्वस्य व्याप्यत्वेन भूमावसत्त्वात् न वाच्यैक्यसिद्धिरित्यत आह—**अंशेभ्य इत्यादिना इहेति** नानांशात्मिकायां भुवीत्यर्थः ॥

एवमंशिनि अंशत्वसद्भावमुक्त्वा तत्र—"त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी । त्वं जीर्णो दण्डेन वञ्चसि सोऽकामयत बहुस्यां प्रजायेयेत्यादिश्रुतिं प्रमाणयति **त्वमित्यादिना** फलितमाह वाच्यैकताऽत्रापि चेति अस्मिन्नपि पक्षे वाच्यैक्यं भवेदित्यर्थः ॥ १५॥ ॥

अ० ॥ इदानीं—'दृश्यते त्विति' सूत्रार्थप्रस्तावसमये यस्तावदभिहितः श्रुत्यनुगृहीत एव ह्यत्र तर्कोऽनुभवाङ्गत्वेनाश्रीयते स्वप्नान्तबुद्धान्तयोरुभयोरितरेतरव्यभिचारादात्मनोऽनन्वागतत्वं—संप्रसादे च प्रपञ्चपरित्यागेन सदात्मना संपत्तेर्निष्प्रपञ्चसदात्मकत्वं—प्रपञ्चस्य ब्रह्मप्रभवत्वात् कार्यकारणयोरनन्यत्वन्यायेन ब्रह्मा व्यतिरेक इयेवं जातीयक इति अस्मादपि भाष्यादवस्थात्रयवतो जीवस्य जगत्कारणत्वावगमात् वाच्यैक्यसिद्धिरित्याह—**तर्कादिति**—

मू ॥ तर्काद्वाप्यसमीरितादपि भवेद्वाच्यैकता तत्त्वमो-
स्त्वम्प्राग्येन ममात्ययस्य विरहान्नित्योऽस्म्यसङ्गोऽस्म्यहम् ।

सौषुप्ते मयि सर्वकार्यविलयात्तत्कल्पकश्चास्म्यहं
सर्वज्ञो निखिलात्मकोऽस्मि च ततस्स्वप्ने यथा तैजसः॥ १६॥ ॥

व्या० ॥ **तत इति** जगदुपादानत्वात् सर्वज्ञो निखिलात्मकश्चास्मीत्यर्थः— अत्रोदाहृतस्य भाष्यस्य सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरं । प्राज्ञस्तृतीयः पादः एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिस्सर्वस्य प्रभवाप्ययौ हि भूतानाम्। पुरत्रये क्रीडति यस्तु जीवस्ततस्तु जातं सकलं विचित्रमित्यादिश्रुतिमूलकत्वात् तत्त्वंपदवाच्यैक्यसिद्धिरिति भावः ॥ १६॥ ॥

अ० ॥ पुनस्तत्र चोद्यपूर्वकमुपपत्त्यन्तरं दर्शयति—**किञ्चिज्ज्ञस्येति**—

मू ॥ किञ्चिज्ज्ञस्यास्य जीवस्य सर्वज्ञत्वं कथं यदि ॥
यस्सर्वज्ञस्सर्ववित्च यस्य ज्ञानमयं तपः ।
तस्मादेतद्ब्रह्मनाम रूपमित्यत्र मुण्डके ॥
सर्वनाम्ना तु यः प्रोक्तस्तस्य कैवल्यवेदतः ।
जीवत्वेन परामर्शाद्भवेद्वाच्यैकता किल ॥ १९ ॥

व्या० ॥ कैवल्यवेदत इति पुरत्रये क्रीडति यस्तु जीवस्ततस्तु जातं सकलं विचित्रमिति श्रुत्या यस्सर्वज्ञस्सर्ववित्तदिति निर्दिष्टस्य जीवत्वावगमेन तस्य स्वसृष्टदृष्ट्यात्मकसर्ववस्त्ववभासकत्वरूपसर्वज्ञत्वादेः श्रुतिसिद्धत्वेन तत्त्वंपदवाच्यैक्यासिद्धिरित्यर्थः ॥ १९ ॥

अ० ॥ इदानीं दृश्यसृष्टेर्दृष्टिसमसमयत्वप्रक्रिययापि जीवस्य सर्ववस्तुविषयकसर्वज्ञानाश्रयत्वरूपसर्वज्ञत्वमभ्युपगम्य वाच्यैक्यं दर्शयति—**नन्विति**—

मू ॥ ननु सर्वज्ञता नाम सर्वगोचरधीर्यदि ।
चतुर्थादितरैः पूर्वैस्सप्तभिश्च निरूपणैः ॥
अपि माण्डूक्यतस्तादृक् सर्वज्ञत्वं च दर्शितम् ।
सर्वेशत्वं नियन्तृत्वं भूतप्रकृतितादिकम् ॥
निरूपितमितो नान्यद्वाच्यैक्यार्थमपेक्षते ॥ २१॥ ॥

व्या० ॥ **चतुर्थादितरैरिति** चतुर्थनिरूपणातिरिक्तैः प्रथमाद्यष्टमान्तैस्सप्तभिर्निरूपणैरित्यर्थः ॥ शेषस्सुगमः ॥ २१॥ ॥

अ० ॥ किञ्च एकविज्ञानेन सर्वविज्ञानबोधकेन प्रागुक्ताष्टमनिरूपणेनापि वाच्यैक्यं सुखेन विज्ञातुं शक्यत इत्याह—**अष्टमेनेति**—

मू ॥ अष्टमेनोक्तरीत्यैव येन विज्ञायतेऽखिलम् ॥
तस्य सर्वज्ञतासिद्धेर्वाच्यैक्यं ज्ञायते यथा ।
तुर्यं निरूपणं त्वेकं मुक्त्वाऽन्येषु निरूपितैः ॥
श्रुतिसूत्रादिभिस्तद्वद्वाच्यैक्यं सिद्धमेव हि ।
तथापि तत्र तत्रोक्तं वृद्धवाक्यादिकं ब्रुवे ॥ २४ ॥

व्या ॥ अन्येष्विति निरूपणेष्वित्यर्थः शेषस्सुगमः ॥ २४ ॥

अ० ॥ 'देहयोगाद्वा-सोऽपीति'सूत्रतद्भाष्ये संगृह्य प्रमाणयति—**देहाभिमानत इति**—

मू ॥ देहाभिमानतो ज्ञानमैश्वर्यञ्च तिरोहितम् ।
इत्युक्तेस्तत्तिरोधानं वाच्यैक्ये स्यान्न चान्यथा ॥ २४ ॥

व्या० ॥ **तत्तिरोधानमिति** यज्जीवस्य स्वारोपितसर्वजगदवभासकत्वरूपं सर्वज्ञानं यच्च सर्वजगत्कारणत्वरूपमैश्वर्यं तयोर्यत्तिरोधानं तत्—त्वं पदवाच्यस्यैव तत्पदवाच्यत्वे संभवेत् नान्यथा सिध्यतीत्यर्थः ॥ २४ ॥

अ० ॥ एवं दृष्टिसृष्टिपक्षानुसारेण वाच्यैकत्वे माण्डूक्यब्रह्मवल्ल्याद्यर्थनिर्णायकविद्यारण्याचार्यसम्मतिं दर्शयति—**सौषुप्तमिति**—

मू ॥ सौषुप्तमानन्दमय प्रक्रम्यैवं श्रुतिर्जगौ ।
एष सर्वेश्वर इति सोऽयं वेदोक्त ईश्वरः ॥
आनन्दमय ईशोऽयं बहुस्यामित्यवैक्षत ।
हिरण्यगर्भरूपोऽभूत्सुप्तिस्वप्नौ भवेद्यथा ॥
एवमानन्दविज्ञानमयावीश्वरजीवकौ ।
इति माण्डूक्यतः पुच्छब्रह्मव्यापारबोधकात् ।
तदैक्षतेति चक्रे स ईक्षामित्यादितश्च तत् ॥ २७॥ ॥

व्या० ॥ इत्थं कस्मात्प्रमाणादवगम्यत इत्यत आह **इति माण्डूक्यत इत्यादिना** सुषुप्तस्थान एकीभूत इत्यारभ्य एष सर्वेश्वर इत्यादिमाण्डूक्यवाक्यतः ।

तथा ब्रह्मपुच्छं प्रतिष्ठेति सौषुप्तं तत्त्वमुपक्रम्य सोऽकामयतेति ब्रह्मवल्ली-वाक्यात् ।

तदैव तदैक्षत बहुस्यां प्रजायेयेत्युपक्रमे पठितस्य सद्वस्तुनः सतः सोम्य तदा सम्पन्नो भवति स्वमपीतो भवतीति सौषुप्तिकत्वप्रदर्शकात् छान्दोग्यवाक्याच्च ।

तथैव स ईक्षांचक्रे कस्मिन्नहमुत्क्रान्ते उत्क्रान्तो भविष्यामि कस्मिन् वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरित्यादि प्रश्नोपनिषत्प्रतिपाद्यस्य स्वसृष्टे प्राणे तादात्म्यावगमादध्यात्मत्वं 'अत्रैष देवस्स्वप्नान् पश्यतीत्युपक्रम्य विज्ञानात्मा सह देवैश्च सर्वैः प्राणा भूतानि संप्रतिष्ठन्ति यत्र । तदक्षरं वेदयते यस्तु सोम्य स सर्वज्ञः सर्वमेवाविवेशेति' तत्रत्यादेव वाक्यात् सौषुप्तलक्ष्यावगम्यते ततोऽपि चकारेण सुखमहमस्वाप्समिति सौषुप्तविज्ञानमययोः । अभेदप्रत्यभिज्ञाबलाच्च वाच्यैक्यं तत्सिद्धमित्यर्थः ।

अ० ॥ इदानीं तत्र श्रीभगवत्पादसंमतिमाह—**राहुग्रस्तेति** —

मू ॥ राहुग्रस्तदिवाकरेन्दुसदृशो मायासमाच्छादनात्
सन्मात्रः करणोपसंहरणतो योऽभूत्सुषुप्तः पुमान् ।
प्रागस्वाप्समिति प्रबोधसमये यः प्रत्यभिज्ञायते
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥
इति श्रीभगवत्पादैर्वाच्यैक्यं स्फुटमीरितम् ॥ २८॥ ॥

व्या० ॥ **दक्षिणामूर्तय इति** दक्षिणो जगत्सृष्टिस्थितिसंहारविषये समर्थश्चासावमूर्तिश्च अशरीरश्चेति दक्षिणामूर्तिः सौषुप्तः प्राज्ञः तस्मै । तस्य विज्ञानमयेन सद्वितीयत्वभ्रमनिवृत्त्यर्थं नमश्शब्दितामेदमुपाधिविशिष्टयोस्तयोरैक्यमनुसन्दधामीति यावत् ॥ २८॥ ॥

अ० ॥ इदानीमत्र संक्षेपाचार्यादिसंमतिं दर्शयति—**कार्योपाधिरिति**

मू ॥ कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः ॥
इत्यादिश्रुतिमादाय संक्षेपाचार्यकैश्च तैः ।
इमावानन्दविज्ञानमयौ जीवेश्वराविति ॥

दर्शितं च तथाऽद्वैतसिद्धावुक्तं यतस्तयोः ।
तदेकत्वप्रत्यभिज्ञाबलाद्वाच्यैकता मता ॥ ३१ ॥

व्या० ॥ **तयोरिति** संक्षेपाचार्याद्वैतसिद्धिकारयोरपि विज्ञानानन्दमययो-स्सुखमहमस्वाप्समित्यादिप्रत्यभिज्ञानादुपाधिवैशिष्ट्येनाप्येकत्वमभिमतमित्यर्थः ॥

अ० ॥ इदानीमुदीरितार्थे चोद्यमनूद्य निराकरोति--**नान्वित्यादिना**--

मू ॥ ननु सुप्तिपरित्यागे सुप्तेनास्यैकताग्रहात् ।
लक्ष्म्यैकता भवेदेषा--न वाच्यैक्यं भवेद्यदि ॥ ३२ ॥
कार्यकारणसंबद्धाविष्येते विश्वतैजसौ ।
प्राज्ञः कारणबद्धस्तु द्वौ तौ तुर्ये न सिद्ध्यतः ॥ ३३ ॥
इत्यानन्दमयोपाधिमत्वस्यास्य च जाग्रतः ।
विश्वतैजसयोस्सुप्तौ प्राज्ञत्वस्योपदेशतः ॥ ३४ ॥
पादत्रयेण वाच्यैक्यं दर्शयित्वा चतुर्थतः ।
तदुपाधी परित्यज्य लक्ष्यैकत्वं प्रदर्शितम् ॥ ३५ ॥
तेषां श्रीगौडपादानां न वाच्यैक्यं मतं यदि ।
कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः ॥ ३६ ॥
इत्यागमविरुद्धार्थवादिताऽतश्च तद्भवेत् ॥ ३६ ॥ ॥

व्या० ॥ सुषुप्त्यवस्थाविनिर्मुक्तेन प्राज्ञेन सह जाग्रत्कालिकान्तःकरण-साक्षिण एव सुखमहमस्वाप्स्वमित्यभेदपरामर्शाल्लक्ष्यैकत्वमेवावगम्यते । न वाच्यैक्य-मिति चोद्यं नन्वित्यादिनानूद्य गौडपादकारिकया परिहरति **कार्यकारणसंबद्धा-विति** तत्कारिकागतपादत्रयस्य तच्चोद्यपरिहारकत्वं दर्शयति **इतीत्यादिना** कार्यकारणसंबद्धाविष्येते विश्वतैजसाविति प्रथमद्वितीयपादकृतेन जाग्रदवस्थापन्न-स्य विश्वस्य चकारेण तैजसस्य च उपाधिभूततत्तच्छरीरस्य तदुपादानात्मकेन प्राज्ञोपाधिभूतमूलाज्ञानेनानुस्यूतत्वेन तदज्ञानतत्कार्योपाधिकत्वोपदेशेन च तृतीय-पादकृतेन विश्वतैजसयोस्तदुपाध्योश्च सुषुप्तिकाले प्राज्ञतदुपाध्यात्मनाऽवस्थानो-पदेशेन च वाच्यैक्यं दर्शयित्वा **द्वौ तौ तुर्ये न सिद्ध्यत इति** चतुर्थपादेन हि भवदुक्तलक्ष्यैक्यं दर्शयतीत्याह **चतुर्थत इति** अनया कारिकया विश्वादीनां

स्वरूपमात्रमादिष्टं नत्वैक्यमित्याशङ्क्य तत्र बाधमाह **तेषामित्यादिना** स्वाप्रज्ञा यत्कालिकस्य जीवस्य कार्यमात्रोपाधिकत्वप्रदर्शकत्वे 'कार्योपाधिरयं जीव इत्यागमस्य' यो विरुद्धार्थः प्रागत्यत्रयस्त्रिंशश्लोकोक्तप्रकारेण कार्यकारणोभयोपाधिकत्वरूपः तद्वादित्वमापद्येतेति परपक्षे दोषमापाद्य स्वपक्षे तत्परिहारमाह **अत इत्यादिना** जीवोपाधिभूतस्य कार्यस्य तत्प्रकृत्याऽनुस्यूतत्वात् कार्योपाधिरयञ्जीव इत्यागमस्यापि जीव उभयोपाधिकत्वबोधकत्वेन वाच्यैक्यादिपरत्वे तदाचार्याणां उदाहृतश्रुतिविरुद्धार्थवादित्वाभावाद्यत्प्रतिज्ञातं तद्वाच्यैक्यं संभवेदित्यर्थः ॥ ३६ ॥

अ० ॥ इदानीं तत्त्वमसीत्यत्र तत्पदवाच्यार्थस्तावदाधिदैविकः परमेश्वरस्य च समष्टिस्थूलसूक्ष्मकारणशरीरोपाधिसंबन्धाद्विराड्हिरण्यगर्भोऽन्तर्यामीति त्रिविधः । त्वंपदवाच्यस्त्वाध्यात्मिको जीवस्य च व्यष्टिस्थूलसूक्ष्मकारणशरीरोपाधिसंबन्धाद्विश्वस्तैजसः प्राज्ञ इति त्रिविध इत्याध्यात्मिकाधिदैविकभेदभ्रमस्य वाच्यैक्यज्ञानं प्रति प्रतिबन्धकत्वात् तन्निरासकानि--

पञ्चीकृतपञ्चमहाभूतानि तत्कार्यं च सर्वं विराडित्युच्यते । एतत्स्थूलशरीरमात्मनः—इन्द्रियैरर्थोपलब्धिर्जागरितं तदुभयाभिमान्यात्मा विश्वः—

अपञ्चीकृतपञ्चमहाभूतानि तत्कार्यं च सर्वं सप्तदशकं लिङ्गं भौतिकं हिरण्यगर्भ इत्युच्यते । एतत्सूक्ष्मशरीरमात्मनः । करणेषूपसंहृतेषु जागरितसंस्कारजः प्रत्ययः स्वप्नः तदुभयाभिमान्यात्मा तैजसः ।

शरीरद्वयकारणमात्माज्ञानमव्याकृतमित्युच्यते । एतत्कारणशरीरमात्मनः सर्वप्रकारकज्ञानोपसंहारे बुद्धेः कारणात्मनाऽवस्थानं सुषुप्तिः । तदुभयाभिमान्यात्मा प्राज्ञ इति भगवत्पादकृतपञ्चीकरणवाक्यानि तद्व्याख्यानभूतानि ॥

श्लो० ॥ पञ्चीकृतानि भूतानि तत्कार्यञ्च विराड् भवेत् । स्थूलं शरीरमेतत्स्यादशरीरस्य चात्मनः । आधिदैवतमध्यात्ममधिभूतमिति त्रिधा । एकं ब्रह्मविभागेन भ्रमाद्भाति न तत्वतः । इन्द्रियैरर्थविज्ञानं देवतानुग्रहान्वितैः । शब्दादिविषयं ज्ञानं तज्जागरितमिष्यते । येयं जागरितावस्था शरीरं करणाश्रयं । यस्तयोरभिमानी स्याद्विश्व इत्यभिधीयते । विश्वं वैराजरूपेण पश्येद्भेदनिवृत्तये ।

श्लो० ॥ ज्ञानेन्द्रियाणि पञ्चैव पञ्च कर्मेन्द्रियाणि च । मनोबुद्धिरहंकारश्चित्तं चेति चतुष्टयम् । प्राणोऽपानस्तथा व्यान उदानाख्यस्तथैव च । समानश्चेति पञ्चैताः कीर्तिताः प्राणवृत्तयः । खं वाय्वग्न्यम्बुक्षितयो भूतसूक्ष्माणि पञ्च च । अविद्याकामकर्माणि लिङ्गं पुर्यष्टकं विदुः । एतत्सूक्ष्मशरीरं स्यान्मायिकं प्रल्यगात्मनः । करणोपरमे जाग्रत्संस्कारोत्थप्रबोधवत् । ग्राह्यग्राहकरूपेण स्फुरणं स्वप्न-

ऽभ्यते । अभिमानी तयोर्यस्तु तैजसः परिकीर्तितः । हिरण्यगर्भरूपेण तैजसं चिन्तयेद् बुधः

चैतन्याभासखचितं शरीरद्वयकारणम् । आत्माज्ञानं तदव्यक्तमव्याकृतमुदीर्यते । ज्ञानानामुपसंहारे बुद्धेः कारणतास्थितिः । वटबीजे वटस्येव सुषुप्तिराभधीयते । यस्तयोरभिमानी स्यात् प्राज्ञ इत्यभिधीयते । जगत्कारणरूपेण प्राज्ञात्मानं विचिन्तयेत् । विश्वतैजससौषुप्तं विराट्सूत्राक्षरात्मभिः । विभिन्नमिव सम्मोहादेकं तत्वं चिदात्मकम् । विश्वादिकत्रयं यस्माद्वैराजादित्रयात्मकम् । एकत्वेनैव संपश्येदन्याभावप्रसिद्धये । इति वार्तिकाचार्यकृतपञ्चीकरणीयवार्तिकवचनानि आर्थतस्संगृह्य वाच्यैक्यं दर्शयति—**विश्वेति**—

मू ॥ विश्व त्वं स विराडसि त्वमसि भो सूत्रात्मकस्तैजस
त्वं प्राज्ञासि महेश्वरोऽपि सकलोपादानभूतः किल।
इत्थं देशिकपुङ्गवैस्त्रिविधकं वाच्यैक्यमादर्शितं
श्रीपञ्चीकरणे च वार्तिककृता तन्मूलके वार्तिके ॥ ३७॥ ॥

व्या ॥ उक्तप्रकारेण वाच्यैक्यानभ्युपगमे 'अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजास्सृजमानां सरूपाः। अजो ह्येको जुषमाणोऽनुशेते अहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्ये'ति च ज्ञेयस्वरूपपरश्रुत्यनुसारेण जीवस्य पञ्चमहाभूताद्युपाधिकत्वपराणां प्रागुदाहृतपञ्चीकरणादिवाक्यानां श्लो ॥ विश्व वैराजरूपेण पश्येद्भेदनिवृत्तये । हिरण्यगर्भरूपेण तैजसं चिन्तयेद्बुधः । जगत्कारणरूपेण प्राज्ञात्मानं विचिन्तयेदिति सप्रयोजनं । तत्वंपदवाच्यानां त्रिविधानामप्येकत्वावधायकानां पञ्चीकरणीयवार्तिकवचनानामप्यप्रामाण्यापत्तेः अवश्यं त्रिविधमपि वाच्यैक्यमपि शब्दात्प्राज्ञस्य तैजसाद्यैक्यञ्च सिद्धम् ।

अ० ॥ ननु वाक्यार्थज्ञानस्य पदार्थज्ञानपूर्वकत्वात् पञ्चीकरणतद्वार्तिकोक्तरीत्या पदार्थद्वयाभावे कथं तत्त्वमसीत्यादिवाक्यार्थावगतिरिति शङ्कते । **विनेति**—

मू ॥ विनाधिदैविकं तत्वं जीवस्याध्यात्मिकस्य भोः ॥
तदसीत्युपदेशेन सर्वेशत्वं कथं स्फुरेत् ॥ ३८॥ ॥

व्या० ॥ स्पष्टोऽर्थः ॥ ३८॥ ॥

अ० ॥ समाधत्ते—**यमिति**—

मू ॥ यं मन्यसे ममारेति नद्यां स दशमोऽसि च ॥
स कौन्तेयोऽसि राधेय कर्ण सूर्यात्मजोऽसि च ।
राड् व्याध भवसीत्याद्यैर्दशमत्वादिवत् स्फुरेत् ॥ ४० ॥

व्या ॥ कदाचित् दश पुरुषा देशान्तरगमनसमये नदीतरणार्थं तत्प्रवाहेऽवर्तार्य तत्पारं च संप्राप्य किं सर्वे वयमागता न वेति जिज्ञासया जनपरिगणनाय प्रवृत्तास्सर्वे स्वाज्ञानवशादात्मानमेकं मुक्त्वा अयमेकोऽयं द्वितीय इति क्रमादयं नवम इतोऽन्यस्यादर्शनाद्दशमो नद्यामेव गत इति विक्रोशन्ति स्म तत्र दैवादागतः कश्चिदपरो विद्वांस्तेषां स्वरूपाज्ञानं जानन् त्वमेव दशमोऽसीति प्रतिपुरुषमुपदिदेश ते च तदुपदेशेनोद्देश्यभूतस्वात्मातिरिक्तदशमपुरुषाभावेऽपि यथा स्वात्मन्येवावगतदशमत्ववन्तो भवेयुः-यथा वा कर्णः स्वातिरिक्तव्यक्त्यन्तरग्रहणं विनास्मिन्नेव कौन्तेयत्वं सूर्यात्मजत्वं चाग्रहीत्-यथा वा व्याधकुलसंवर्धितो राजपुत्रो व्याधोऽहमिति ग्रहीत एव शरीरे तदतिरिक्तशरीरग्रहणं विनैव राजत्वं च विदितवान् तथा विनाधिदैविकं तत्वं स्वस्मिन्नेव सर्वेशत्वाद्यवगतिरपि महावाक्याद्भवेदित्यर्थः ॥ ४० ॥

अ० ॥ इदानीमुपपादितार्थे अन्योऽप्येवं यो विदध्यात्ममेवेति कठवल्लीवाक्यं प्रमाणयति —**अध्यात्ममिति**—

मू ॥ अध्यात्ममेव यो वेत्ति सर्वबीजतया स हि ।
मुक्तस्यादिति शास्त्रेण वाच्यैक्यं श्रुतिसंमतम् ॥ ४१ ॥

व्या० ॥ यस्मादेव कारणाध्यात्ममेव तदितरस्मादाधिदैविकात् परमेश्वराद्वैयत्वेन व्यावर्तयति श्रुतिरतोऽध्यात्ममेवैकं प्रत्यक्चैतन्यं तत्त्वंपदवाच्यमिति श्रुत्याभिप्रेतमित्यर्थः ॥ ४१ ॥

अ० ॥ इदानीमुदाहृतकठवल्लीवाक्यमूलकं ब्रह्मगीतावाक्यमप्यत्र प्रमाणयति--**एतदिति**—

मू ॥ एतत्साक्षात्सच्चिदानन्दरूपं भावाभावाशेषलोकस्य हेतुम् ।
श्रुत्या युक्त्या ब्रह्म जानन्ति मर्त्या विद्यायोगादेव मुक्ता भवन्ति ॥

व्या० ॥ **एतदिति** क्रमाद्गुरुशिष्योक्तं त्वमहंशब्दार्थभूतप्रत्यक्चैतन्यमुद्दिश्य भावाभावाशेषलोकहेतुत्वविधानात् तत्त्वंपदवाच्यैक्यं सिद्धं उदाहृतश्रुति-

सूत्रादीनां वाच्यैक्यपरत्वं सप्तमनिरूपणे सप्तविंशश्लोकवृत्तौ विस्तरेण दर्शितम्॥४२

अ० ॥ इदानीं बृहदारण्ये चतुर्थाध्याये प्रथमब्राह्मणावसाने सुषुप्तयवस्थावन्तमधिकृत्य 'स यथोर्णनाभिस्तन्तुनोच्चरेद्यथाग्नेः क्षुद्रा विष्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनस्सर्वे प्राणास्सर्वे लोकास्सर्वे देवास्सर्वाणि च भूतानि व्युच्चरन्तीति यदात्मतत्वं सर्वजगत्कारणत्वेन श्रूयते तदाधिदैविकमेव तत्पदवाच्यं नाध्यात्ममिति भ्रमनिरासाय भाष्यकारैर्यदुक्तं--विज्ञानमयस्य प्राक्प्रतिबोधाद्यत्स्वरूपं तस्मात्सर्वं जगज्जायत इत्यादि—तद्भाष्यमर्थतस्संगृह्य वाच्यैक्ये प्रमाणयति—**प्रागिति**—

मू ॥ प्राग्विज्ञानमयस्य जागरणतो यद्रूपमस्माच्छ्रुति-
स्सृष्टिं ब्रूत इतीरिते स तु पुनर्बद्धः प्रबुद्धात्पृथक् ।
एवं बद्धविभिन्नतां निगदतोभ्रान्तिद्वये वारिते
सौषुप्ते जगदीशताद्यवगमादैक्यं भवेद्वाच्ययोः ॥ ४३ ॥

व्या० ॥ **विज्ञानमयस्येति** जीवस्य **जागरणतः** जाग्रदवस्थायाः **प्राक्** सुषुप्तयवस्थायां **यद्रूपं** सुषुप्तयवस्थाभिमानकमज्ञानोपाधिकमाध्यात्मिकं प्राज्ञस्वरूपं **अस्माच्छ्रुतिस्सृष्टिं ब्रूत इतीरिते** भाष्यकारैरादिष्टे सति सौषुप्तस्य विज्ञानमयादभिन्नत्वेन—स जगत्कारणमपि संसार्येव तदन्योऽसंसारीश्वरो नास्तीति प्रथमपूर्वपक्षप्रदर्शकम् ।

'न तावदसंसारी परः पाणिपेषणप्रतिबोधिताच्छब्दादिभुजोऽवस्थान्तरविशिष्टादुत्पत्तिश्रुतेः न प्रशासिताऽशनायाद्यतीतः परो विद्यते इत्यारभ्य वागादिकरणव्यावृत्तस्य कर्तुरेव वेदितव्यतां दर्शयति, इत्यन्तं पूर्वपक्षभाष्यं सङ्गृह्णाति—

स तु पुनर्बद्ध इति ॥

सतु विज्ञानमयादभिन्नः सौषुप्तिकस्तावत् संसारिविज्ञानमयाभिन्नत्वात् बद्ध एव न तदतिरिक्तस्त्वसंसारीश्वर इति पूर्वपक्षं दर्शयित्वा तन्निरासार्थमुत्थापितं 'अन्न पिताऽपिता भवतीति' श्रुतेरसंसारी तावत्सौषुप्तः प्राज्ञ एव सर्वजगत्कारणत्वादीश्वरः विज्ञानमयाच्च पर इति जीवेशयोर्भेदवाद्याभिमतं द्वितीयपूर्वपक्षप्रदर्शकम् ।

'यो जागरिते शब्दादिभुग्विज्ञानमयस्स एव सुषुप्ताख्यमवस्थान्तरङ्गतोऽसंसारी परः प्रशासिताऽन्यस्स्यात्' इति भाष्यं च संगृह्णाति प्रबुद्धात्पृथगिति—प्रबुद्धाज्जाग्रदवस्थामापन्नाद्विज्ञानमयात्पृथगन्य इति प्राप्ते तयोर्भेदनिराकरणपरम्

'इति चेन्नादृष्टत्वात्—नह्येवंधर्मकः पदार्थो दृष्टोऽन्यत्र वैनाशिकसिद्धान्तात् न हि लोके गौस्तिष्ठन् गच्छन् गौर्भवति शयानस्त्वश्वादिजात्यन्तरामिति-न्यायाच्च यद्धर्मको यः पदार्थः प्रमाणेनावगतो भवति स देशकालावस्थान्तरेष्वपि तद्धर्मक एव भवति स चेत्तद्धर्मकत्वं व्यभिचरति सर्वः प्रमाणव्यवहारो लुप्येतेत्यन्तं सिद्धान्तभाष्यं च ।

तथैव स्वाप्ययादिति ईक्षत्यधिकरणीयसिद्धान्तसूत्रार्थप्रकाशकमिदं तदेव सच्छब्दवाच्यं कारणं प्रकृत्य श्रूयते 'यत्रैतत्पुरुषस्स्वपिति नाम सता सोम्य तदा संपन्नो भवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतो भवतीत्येषा' श्रुतिः स्वपितीत्येतत्पुरुषस्य लोकप्रसिद्धं नाम निर्वक्ति स्वशब्देनेहात्मोच्यते यः प्रकृतस्सच्छब्दवाच्यः तमपीतो भवति अपिगतो भवतीत्यर्थः अपिपूर्वस्य एतेर्लयार्थत्वं प्रसिद्धं प्रभवाप्ययाविति उत्पत्तिप्रलययोः प्रयोगदर्शनात् मनःप्रचारोपाधिविशेषसंबन्धादिन्द्रियार्थान् गृह्णन् तद्विशेषापन्नो जीवो जागर्ति तद्वासनाविशिष्टः स्वप्नान् पश्यन् मनश्शब्दवाच्यो भवति स उपाधिद्वयोपरमे सुषुप्तावस्थायामुपाधिकृतविशेषाभावात् स्वात्मनि प्रलीन इवेति स्वं ह्यपीतो भवतीत्युच्यते यथा हृदयशब्दनिर्वचनं श्रुत्या दर्शितं 'स वा एष आत्मा हृदि तस्यैतदेव निरुक्तं हृदयमिति तस्माद्धृदयमिति' यथा वा अशनायोदन्याशब्दप्रवृत्तिमूलं दर्शयति श्रुतिः 'आप एव तदशितं नयन्ते तेज एव तत्पीतं नयत इति च' एवं स्वमात्मानं सच्छब्दवाच्यमपीतो भवतीति इममर्थं स्वपितिनामनिर्वचनेन दर्शयतीत्यारभ्य श्रुत्यन्तरं च प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमिति सुषुप्त्यवस्थायां चेतने अप्ययं दर्शयति अतो यस्मिन्नप्ययसर्वेषां चेतनानां तच्चेतनं सच्छब्दवाच्यं जगतः कारणं स्यादिति सौषुप्तस्याध्यात्मिकस्य स्वात्मनः छान्दोग्यश्रुत्युक्तसत्तत्पदवाच्यार्थत्वपरं भाष्यं च ।

सङ्गृह्णाति—**एवमित्याद्युत्तरार्धेन—सौषुप्ते** त्वमस्वाप्सीः अहमस्वाप्समिति त्वमहंपदवाच्ये **जगदीशाद्यवगमात्** जगदीश्वरत्वादितत्पदवाच्यधर्मज्ञानात् तत्त्वंपदवाच्ययोरैक्यं भवेदित्यर्थः ॥ ४३ ॥

अ० ॥ इदानीमुपपादितार्थे 'अवस्थितेरिति काशकृत्स्न इति' सूत्रं तदीयं—अस्यैव परमात्मनोऽनेनापि विज्ञानात्मभावेन अवस्थानादुपपन्नमिदमभेदेनोपक्रमणमिति काशकृत्स्नाचार्यो मन्यते—तथा च ब्राह्मणं—अनेन जीवेनात्मनाऽनु-

प्रविश्य नामरूपे व्याकरवाणीत्येवं जातीयकं परस्यैवात्मनो जीवभावेनावस्थानं दर्शयति—मन्त्रवर्णश्च । 'सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन्यदास्ते' इत्येवं जातीयकः——न च तेजःप्रभृतीनां स्रष्टृ जीवस्य पृथक्सृष्टिश्रुतायेन परस्मादात्मनोऽन्यः तद्विकारो जीवस्स्यात् काशकृत्स्नाचार्यस्याविकृतः परमेश्वरो जीवो नान्य इति मतं आश्मरथ्यस्य तु यद्यपि जीवस्य परस्मादनन्यत्वमभिप्रेतं तथापि प्रतिज्ञासिद्धेरिति सापेक्षत्वाभिधानात्कार्यकारणभावः कियानभिप्रेत इति गम्यते औडुलोमिपक्षे पुनः स्पष्टमेवावस्थान्तरापेक्षौ भेदाभेदौ गम्येते तत्र काशकृत्स्नीयं मतं श्रुत्यनुसारीति गम्यते प्रतिपिपादयिषितार्थानुसारित्वात्तत्त्वमसीत्यादि श्रुतिभ्यः एको ह्ययमात्मा नाममात्रभेदेन बहुधाभिधीयते न हि सत्यं ज्ञानमनन्तं ब्रह्म यो वेदनिहितं गुहायामिति काञ्चिदेवैकां गुहामधिकृत्यैतदुक्तं न च ब्रह्मणोऽन्यो गुहायां निहितोऽस्ति 'तत्सृष्ट्वा तदेवानुप्राविशदिति' स्रष्टुरेव प्रवेशश्रवणात् ये तु निर्बन्धं कुर्वन्ति ते वेदान्तार्थं बाधमानाश्श्रेयोद्वारं सम्यग्दर्शनमेव बाधन्त इत्यन्तं भाष्यञ्चार्थतस्संगृह्य वाच्यैक्ये प्रमाणयति—**आचार्य इति**—

मू ॥ आचार्यः काशकृत्स्नोऽयं मन्यतेवऽस्थितेरिति ।
इति सूत्रात्तदीयाच्च भाष्यकारसमीरितात् ॥

विज्ञानात्मस्वरूपेणावस्थितेः परमात्मनः ।
परमेश्वर एव स्याज्जीवोऽन्यो नेति भाष्यतः ॥

सूक्ष्मात्मना सूक्ष्मभूतं सृष्ट्वा पश्चात्तु देवता ।
तत्राभिमानतो लब्धे जीवत्वे च प्रजीविते ॥

स्थूलस्य जगतः स्रष्टृ स्यादिति ब्राह्मणादपि ।
एवं जातीयकात्सर्वरूपाणि च विचित्य च ॥

धीरो नामान्यभिवदन्निति तत्रोक्तमन्वतः ।
इदमेवाश्मरथ्यादिमताद्ग्राह्यतमं भवेत् ॥

तत्त्वमस्यादिशास्त्रानुसारित्वाच्चेति भाष्यतः ।
तथैवान्यो गुहानिष्ठो ब्रह्मणश्चेति शङ्किते ॥

ब्रह्मणोऽन्यो गुहायां न निहितोऽस्ति कुतो यदि ।
स स्रष्ट्वा तत्प्रविश्याथाऽभवत्सत्त्यत्तथा श्रुतेः ॥

तत्त्वमोरपि वाच्यैक्यं सिध्येदप्युपपत्तितः ।
स्रष्टुस्तत्पदवाच्यस्य वक्तृता मन्त्रतो यथा ॥
तथा तदानुगुण्येन स्रष्टृता दिश्यते किल ।
वक्तुस्त्वंपदवाच्यस्य तत्त्वमस्यादिवाक्यतः ॥

ततोऽपि संभवेदैक्यं वाच्ययोरुभयोरपि ॥ ९९॥ ॥

व्या० ॥ **देवतेति** सेयं देवतैक्षतेति छान्दोग्ये श्रूयमाणा आदौ **सूक्ष्मभूतं** अत्रिवृत्कृतं पृथिव्यप्तेजोरूपं महाभूतत्रयम् सृष्ट्वेत्यन्वयः **स सृष्ट्वेति** सोऽकामयत बहुस्यां प्रजायेयेति' तैत्तिरीयश्रुत्युक्तः परमात्मा **अभवत् सत्त्यत्तथा श्रुतेः** सत्पृथिव्यप्तेजः—त्यद्वायुराकाशं चाभवदित्यर्थः। सच्च त्यच्चाभवदिति श्रुतेः एतेभ्यः प्रमाणेभ्यस्तत्त्वंपदवाच्यैक्यं दर्शयित्वा तदुपपत्तितो दर्शयति—**अप्युपपत्तित इत्यादिना** यथा 'सर्वाणि रूपाणि विचित्यधीरो नामानि कृत्वाभिवदन्यदास्त' इति मन्त्रवर्णेन जगत्स्रष्टुर्नामरूपाभिवदनकर्तृतारूपं त्वंपदवाच्यत्वमुपदिश्यते तथा तत्त्वमसीत्यादिवाक्येनापि तन्मन्त्रानुसारेण नामरूपाभिवदनकर्तुस्त्वंपदवाच्यस्य जगत्स्रष्टृत्वमादिश्यत इत्युपपत्तिं दर्शयित्वा फलितमाह—**ततोऽपीत्यादिना** उपपत्तितः आपिशब्दात्प्रागुक्तेभ्यः प्रमाणेभ्यश्चेत्यर्थः ॥ ९२॥ ॥

अ० ॥ प्राग्यदुक्तमीक्षणादेवता सूक्ष्मभूतमित्यादिश्लोकेन देवता तावत्तेजोबन्नात्मकभूतत्रयाभिमानेन लब्धजीवभावापरित्यागेनैव स्थूलजगत्कारणमभवदिति तदेव दृष्टान्तेन उपपादयति **स्निग्धत्वेनेति**—

मू ॥ स्निग्धत्वेन विशिष्टैव मृद्घटादिर्भवेद्यथा ॥
अभिमन्तृस्वरूपेण सूक्ष्मभूते प्रवेशिनी ।
याऽभिमन्तृत्वयुक्ता सा देवता व्याकृतात्मिका ॥
स्निग्धत्वस्य परित्यागे मृद्वत्सेयं तु देवता ।
जीवत्वस्य परित्यागे नैव कारणतामियात् ॥ ९९ ॥

व्या० ॥ **व्याकृतात्मिकेति** स्थूलीकृतनामरूपात्मिकाऽभवदित्यर्थः **जीवत्वस्येति** अत्रित्रिवृत्कृतेषु तेजोबन्नेष्वहमित्यभिमानवत्वस्येति यावत्—शेषस्सुगमः ॥ ५५ ॥

अ० ॥ उक्तमेवार्थमाक्षिप्य श्रुतीनामवगतिसामान्यप्रदर्शनेनोपपादयति—**सर्जनेति**—

मू ॥ सर्जनानुपयोगि स्याज्जीवत्वं चेत्तदा श्रुतिः ।
छान्दोग्यतैत्तिरीयादिः किमर्थं नियमेन च ॥
स्थूलनिर्मातृतां सुप्ते जीवत्वप्राप्तिपूर्वकम् ।
कैवल्यश्रुतिवद्ब्रूते ततो वाच्यैकता भवेत् ॥ ५७ ॥

व्या ॥ विज्ञानमयत्वरूपजीवत्वस्य स्थूलजगत्सर्जनानुपयोगित्वे 'सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवताः अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति च' 'सोऽकामयत बहुस्यां प्रजायेये'त्युपक्रम्य तदनुप्रविश्य सच्च त्यच्चाभवदिति च छान्दोग्यतैत्तिरीयादिश्रुतिः पुरत्रये क्रीडति यस्तु जीवस्ततस्तु जातं सकलं विचित्रमिं'ति कैवल्यश्रुतीयविज्ञानमयत्वप्राप्तिपूर्वकं स्थूलजगत्स्रष्टृत्वं नियमेन किमर्थं ब्रूते ततश्श्रुतीनामवगतिसामान्यदर्शनाद्वाच्यैक्यं सिद्धमित्यर्थः ॥५७॥

अ० ॥ इदानीमुपपादितमेव वाच्यैक्यं 'शारीरश्चोभयेऽपि हि भेदेनैनमधीयते, इत्यविद्वत्प्रसिद्धार्थानुवादकसूत्रावष्टम्भेन आक्षिप्य अज्ञातार्थाबबोधकेनान्तर्यामिब्राह्मणवाक्येन 'अदृष्टो द्रष्टाऽश्रुतश्श्रोताऽमतो मन्ताऽविज्ञातो विज्ञातेत्यादिवाक्येन' तदन्तर्यामिणो द्रष्टृत्वादिविज्ञानमयत्वविधानात् 'नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोतेत्यादिवाक्येन' अन्तर्यामिणस्तस्मादस्य विज्ञानमयस्य भेदनिरासाच्च तदेव वाच्यैक्यं सिद्धान्तयति **शारीरश्चेति**—

मू ॥ शारीरश्चोभये ते हि भेदेनैनमधीयते ।
इत्यादिसूत्रतन्मूलवेदवाक्यैश्च वाच्ययोः ॥
जीवेशयोर्विभेदोक्तेर्न वाच्यैक्यं भवेद्यदि ।
योऽन्तर्बहिस्स्थितो यच्च कार्येऽहम्मानितावशात् ॥
आन्तरोऽसीत्यविज्ञातस्सर्वात्मा यो नियामकः ।

तस्यैव द्रष्टृतारूपसंसारित्वविधायकात् ॥
अन्तर्यामिब्राह्मणस्यादृष्टो द्रष्टेति वाक्यतः ।
उत्तरत्रापि नान्योऽतो द्रष्टा श्रोतेति च श्रुतेः ॥
प्रेर्यप्रेरकयोर्भेदनिरासादेकता तयोः ।
एवं श्रीब्रह्मगीतायां श्रुत्यर्थोऽयं प्रदर्शितः ॥
अदृष्टोऽयं तथा द्रष्टा श्रोता चायं तथाऽश्रुतः ।
अमतश्च तथा मन्तेत्यादिवाक्यात्स्वयंभुवा ॥ ६३ ॥

व्या ॥ शारीरश्चोभयेऽपि हि भेदेनैनमधीयते इति सूत्रं संगृह्णाति **शारीरश्चेत्यादिना** हि यस्मात् उभये ते माध्यन्दिनाः काण्वाश्च यो विज्ञाने तिष्ठन् य आत्मनि तिष्ठन्निति च श्रुत्या अन्तर्यामिणो भेदेन एनं शारीरमधीयते तस्माद्घटाकाशवच्छरीरपरिवेष्टनात् स्वभावतो वा ब्रह्मभिन्नो विज्ञानमयरूपश्शारीरश्च साङ्ख्याभिमतप्रधानमिव नान्तर्यामी भवतीति असङ्गस्यात्मनो निरवयवत्वेऽप्युपाधिपरिवेष्टितत्वं नियम्यान्तःकरणादितादात्म्यादिप्रयुक्तप्रेर्यत्वभ्रमानुवादकसूत्रावष्टम्भेन न वाच्यैक्यं घटत इति प्राप्ते ।

सोपाधिकस्यापि जीवस्य तृतीयनिरूपणोक्तप्रकारेण उपाधिपरिवेष्टितत्वासंभवेन जीवेशयोर्देशतो भेदाभावे सति तयोराधाराधेयत्वस्य 'य आत्मनि तिष्ठन्निति' श्रुत्यभिप्रेतत्वाभावात् 'तत्सृष्ट्वा तदेवानुप्राविशत् अहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्येत्यादिश्रुत्या'ऽन्तर्यामिणो जगत्स्रष्टुः सूक्ष्मभूतसृष्टेरुत्तरकालभाविकर्तृत्वभोक्तृत्वरूपजीवत्वाश्रयत्वावगमाच्च अन्तर्यामिण 'एषोऽन्तर्याम्येष योनिस्सर्वस्य प्रभवाप्ययौ हि भूताना'मिति श्रुत्यनुसारेण स्वविकारेषु तत्स्वरूपत्वेन विद्यमानत्वमेव 'यः पृथिव्यां तिष्ठन् यो विज्ञाने तिष्ठन्नित्यादिश्रुत्यभिप्रेतः न जीवेशयोराधाराधेयभाव इत्याह—**यदीत्यादिना** यस्त्वविकारेष्वन्तर्बहिश्च व्याप्य स्थितः यः स्वकार्येऽहमभिमानवशात् यं पृथिवी न वेद यमात्मा न वेदेत्यादिश्रुत्युक्तप्रकारेण आन्तरोऽस्मीत्यविज्ञातश्च आन्तरोऽस्मीति ज्ञानाभावादेव यस्सर्वात्मा भवति सर्वोऽहमित्याध्यासिकबुद्धिमान्भवति यश्चान्तर्यामिब्राह्मणेन प्रदर्शितस्य साधिदैविकस्य भेदजातस्य कारणत्वान्नियामकश्च भवति सोऽयमन्तर्यामी चक्षुरादिविषयोऽपि चक्षुरादुपाधिकस्सन्द्रष्टृत्वादिरूपविज्ञानमयत्वाश्रयो भवतीति'अदृष्टो

द्रष्टाऽश्रुतः श्रोतेत्याद्यन्तर्यामिब्राह्मणेन तच्छेषेण नान्योऽतोऽस्ति द्रष्टेत्यादिना च'तन्मूलकब्रह्मगीतया च विज्ञानमयस्यान्तर्याम्यनन्यत्वावगमाच्च वाच्यैक्यं सिद्धमित्यर्थः ॥

ननु जीवो नाम ब्रह्मप्रतिबिम्बो ब्रह्मांशो वा अन्तःकरणपरिवेष्टितब्रह्मरूपो वा भवतु तस्मिन् दर्पणान्तर्गतबदरफलप्रतिबिम्बे तद्दर्पणस्थबदरफलस्येव समुदायावयवे समुदायस्येव घटाकाशोपरि महाकाशस्येव च ब्रह्मणो विद्यमानत्वमेव 'य आत्मनि तिष्ठन्नित्यादिश्रुतितात्पर्यविषयः'किन्न स्यादिति चेन्न तृतीयनिरूपणे दशमादिश्लोकैरुदाहृतयुक्त्यादिप्रमाणैः सप्तमनिरूपणे चत्वारिंशादिश्लोकैरुदाहृतप्रमाणादिभिश्च जीवस्य ब्रह्मत्वातिरेकेण तत्प्रतिबिम्बत्वादेर्बाध्यमानत्वान्नैतच्चोद्यावकाशः ॥ ६३ ॥

अ० ॥ उक्तमेवार्थं प्रकारान्तरेण परिचोद्य दृढयति **सप्तममिति**—

मू ॥ सप्तमं ब्राह्मणं लक्ष्यचिदेक्यपरं यदि ।
लक्ष्यं किं शुद्धमन्यद्वा शुद्धमेवेति चेत्तदा ॥

अन्तर्यामी तदुक्तस्यान्मायी वाच्योऽस्य एव हि ।
द्रष्टृत्वश्रोतृतादेशाद्वाच्यैक्यं सिद्धमेव तत् ॥ ६५ ॥

व्या ॥ बृहदारण्ये पञ्चमाध्यायगतं सप्तममन्तर्यामिब्राह्मणं तावन्न तत्त्वंपदवाच्यैक्यपरम् । किन्तु तल्लक्ष्यैक्यपरमेवेति पूर्वपक्षमनूद्य विकल्पयति **लक्ष्यं किं शुद्धमन्यद्वेति** परोक्तिमनुवदति **शुद्धमेवेति चेदिति** विकल्पप्रयोजनं दर्शयति **तदेत्यादिना** मायादिवर्जितस्य शुद्धस्यैव तत्त्वंपदलक्ष्यत्वे अन्तर्यामिब्राह्मणप्रतिपाद्यस्य मायोपाधिकत्वात् तत्पदवाच्यत्वेन द्रष्टृत्वश्रोतृत्वादिधर्माश्रयत्वविधानात् त्वंपदवाच्यत्वेन च अवगमात्तदेव वाच्यैक्यं सिद्धमित्यर्थः ॥ ६५ ॥

अ० ॥ इदानीमन्तर्यामिणो मायोपाधिकत्वे किं प्रमाणमित्यत आह— **मायां त्विति** ॥

मू ॥ मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम्
विद्यादिति श्रुतस्यैव नियन्तृत्वप्रबोधतः ॥ ६६ ॥

व्या० ॥ स्पष्टोऽर्थः ॥ ६६ ॥

अ० ॥ इदानीमुपपादितार्थे भगवद्वाक्यमप्युदाहरति—**ईश्वर इति**—

मू॥ ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥ ६७ ॥

व्या० ॥ स्पष्टोऽर्थः ॥ ६७ ॥

अ० ॥ इदानीं चोद्यमनूद्य परिहरति **अमुष्मादिति**—

मू॥ अमुष्माद्भगवद्वाक्यान्नियन्तुर्भाति मायिता ।
तथापि वाच्ययोर्भेदप्रतीतेरेकता कथम् ॥
आपातबुद्धिमत्त्वेन वाक्यार्थो भाति वोऽन्यथा ॥ ६८॥ ॥

व्या० ॥ **अन्यथेति** भगवद्वाक्यार्थस्तन्मूलभूतान्तर्यामिब्राह्मणविरोधेन युष्माकं भातीत्यर्थः ॥ ६८॥ ॥

अ० ॥ इदानीं यस्सर्वेषु भूतेषु तिष्ठन्नित्यारभ्य कृत्स्नान्तर्यामिब्राह्मणविरोधेन तन्मूलकस्य–ईश्वरस्सर्वभूतानामित्यादिभगवद्वचनस्य अर्थप्रकाशकानां चित्रदीपगतविद्यारण्यवचनानां मध्ये सर्वभूतानीति तद्भगवद्वचनगतस्य पदस्यार्थप्रकाशकम् । विद्यारण्यीयं वचनं यथावद्भगवद्वाक्यार्थवेदनायोदाहरति **सर्वेति**–

सर्वभूतानि विज्ञानमयास्ते हृदये स्थिताः ॥

व्या० ॥ **हृदय इति** हृदयपुण्डरीके इत्यर्थः ॥ ६९ ॥

अ० ॥ ननु तेषां कुतो हृदयेऽवस्थानमित्याशङ्क्य हृद्यन्तर्यामिणो विज्ञानमयरूपेणावस्थानादिति समाधानपरं विद्यारण्याचार्यवचनमुदाहरति **तदिति**—

मू॥ तदुपादानभूतेशस्तत्र विक्रियते खलु ॥ ६९॥ ॥

व्या० ॥ **तदुपादानभूतेश इति** तस्य जीवोपाधेर्विज्ञानमयकोशस्य उपादानभूताज्ञानोपाधिक ईश्वरस्तत्र हृदयकमलस्थविज्ञानमयकोशे विक्रियते तादात्म्याध्यासवान् इत्युक्त्वा तत्र खलुशब्दोनान्तर्यामिणोऽदृष्टो द्रष्टाऽश्रुतश्श्रोतेत्याद्यन्तर्यामिब्राह्मणोक्तद्रष्टृत्वाद्यध्यासप्रसिद्धिर्दर्शिता ॥ ६९॥ ॥

अ० ॥ इदानीं यन्त्रारूढानीत्यत्र यन्त्रारोहशब्दयोरर्थप्रदर्शनपरं तद्विद्यारण्याचार्यवचनमुदाहरति **देहादीति**—

मू॥ देहादिपञ्जरं यन्त्रं तदारोहोऽभिमानिता ॥ ७० ॥

व्या ॥ स्पष्टोऽर्थः ॥ ७० ॥

अ० ॥ इदानीं भ्रामयन्निति पदे प्रकृत्यर्थपरं विद्यारण्याचार्यवाक्यमुदाहरति **विहितेति—**

विहितप्रतिषिद्धेषु प्रवृत्तिर्भ्रमणं भवेत् ।

व्या ॥ स्पष्टोऽर्थः ॥ ७०॥ ॥

अ० ॥ इदानीं णिच्प्रत्ययमायापदयोरर्थप्रदर्शनपरं विद्यारण्याचार्यवचनमुदाहरति **विज्ञानेति—**

मू ॥ विज्ञानमयरूपेण तत्प्रवृत्तिस्स्वरूपतः ॥

स्वशक्त्येशो विक्रियते मायया भ्रामणं हि तत् ।

व्या ॥ स्पष्टोऽर्थः ॥ ७१॥ ॥

अ० ॥ इदानीं श्रौतस्य यमयतीति पदस्याप्ययमेवार्थ इति बोधकं विद्यारण्याचार्यवाक्यमुदाहरति **अन्तरिति—**

मू ॥ अन्तर्यमयतीत्युक्त्याऽयमेवार्थश्श्रुतौ श्रुतः ॥ ७२ ॥

व्या ॥ स्पष्टोऽर्थः ॥ ७२ ॥

अ० ॥ उक्तस्यैवार्थस्य पर्यायान्तरेष्वतिदेशकं विद्यारण्यीयवचनमुदाहरति **पृथिवीति—**

मू ॥ पृथिव्यादिषु सर्वत्र न्यायोऽयं योज्यतां धिया ।

व्या ॥ स्पष्टोऽर्थः ॥ ७२॥ ॥

अ० ॥ एवमीश्वरस्सर्वभूतानामिति भगवद्वचनं कैवल्याख्यातमित्यत आह **इतीति—**

मू ॥ इति श्रीचित्रदीपाख्ये विद्यारण्यैस्समीरितः ॥

भगवद्वचनस्यार्थस्तेन वाच्यैकता भवेत् ॥ ७३॥ ॥

व्या ॥ स्पष्टोऽर्थः ॥ ७३॥ ॥

अ० ॥ एवमन्तर्यामिब्राह्मणानुसारेण वाच्यैक्यं दर्शयित्वा प्रश्नपूर्वकं तदुत्तरब्राह्मणेन लक्ष्यैक्यमपि सिद्धमित्याह **किमिति—**

मू ॥ किं लक्ष्यैक्यपरं शास्त्रं नास्त्युतास्तीति चेद्भवेत् ।

निरुपाधिकतादेशादृष्टं लक्ष्यबोधकम् ॥ ७४॥ ॥

व्या० ॥ **अष्टममिति** अस्थूलमनण्वित्यारभ्याहृष्टं द्रष्टृश्रुतं श्रोत्रित्यादि निर्धर्मपरं ब्राह्मणं लक्ष्यबोधकमित्यर्थः ॥ ७४॥ ॥

अ० ॥ इदानीमेवं वाच्यैक्ये सिद्धे सति किमर्थं लक्षणादानमित्याशङ्क्य परिहरति **वाच्यैक्य इति**—

मू॥ वाच्यैक्ये सति लक्षणां तु गुरवश्शास्त्रे किमर्थं जगु-
श्चेत्केचित्परिवेष्टितश्च वपुषा जीवः—परो मायया ।
कृत्वैवं परिचोदयन्ति च कथं वाक्यं ब्रवीत्येकता
मित्येषामधिकारमांद्यमनु तैस्सा लक्षणा स्वीकृता ॥ ७५ ॥

व्या ॥ **वाच्यैक्ये सतीत्यादिना** पूर्वपक्षमनूद्य समाधत्ते **केचिदित्यादिना** केचिन्मन्दाधिकारिणो जीवस्य परलोकादिगामित्वात्स **वपुषा** चकारेण परिच्छिन्नाविद्यया च **परिवेष्टितः** (**परः**) आधिदैविकः परमेश्वरस्तु अविद्यापेक्षया व्यापिन्या मायया चकारेण तदीयदेवशरीरेण च **परिवेष्टित इति** (**कृत्वा**) तयोः परिच्छिन्नापरिच्छिन्नयोः कथं तत्त्वमसीत्यादिमहावाक्यंसामानाधिकरण्येन एकतां ब्रवीतीति चोदयन्ति तेषां स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेष्वित्यादिश्रुत्यर्थग्रहणासामर्थ्यरूपबुद्धिमान्द्यानुसारेण तदुपदेष्टृभिः जहदजहल्लक्षणा स्वीकृता न तु वाच्यैक्यासंभवेन तथा चोक्तं यज्ञवैभवखण्डे आचार्यधर्मः श्लो ॥ पुनश्शिष्यस्य मेधावी चित्तपाकमवेक्ष्य च । अविद्यापाशविच्छेदं कुर्यात्प्राज्ञस्तु देशिकः ॥ विदित्वा शिष्यचित्तस्य विपाकं पुनरास्तिकाः । दद्यात्पाकानुगुण्येन विद्यामेनां महेश्वरीमिति अतो न कश्चिद्दोषः ॥ ७५॥ ॥

अ० ॥ अधुना प्रागुक्तसिद्धान्ततात्पर्यमाह **जीवेशयोरिति**—

मू॥ जीवेशयोर्देशतो हि विभेदग्राहिणे तु सा ।
लक्षणा गुरुभिः प्रोक्ता ततो दोषो न कश्चन ॥ ७६ ॥

व्या ॥ स्पष्टोऽर्थः ॥ ७६॥ ॥

अ० ॥ इदानीं प्रतिज्ञातार्थं बृहदसम्मतिं 'त्वं वाहमस्मि भगवो देवतेऽहं वै त्वमसीति' श्रुतिञ्चार्थतः संगृह्य श्लोकचतुष्टयेन संवादयति **तथेति**—

मू॥ तथैव विद्यारण्यादिवृद्धैः प्रोक्तं तदुच्यते ।
न तत्त्वमोरुभावर्थावस्मत्सिद्धान्ततां गतौ ॥

अनादिमायया भ्रान्ता जीवेशौ सुविलक्षणौ ।
मन्यन्ते तद्भ्रुदासाय केवलं शोधनं तयोः ॥

मू ॥ त्वयि मयि च गण्यमाने
मशकान्मशकोऽहमेव देहदृशा ।
विश्वाधिकेश ते मे
सद्बोधानन्दपूर्णता तुल्या ॥ ७९ ॥
देवतेऽस्म्यहमेव त्वं त्वमेवासि मदात्मना ।
इत्यत्र पदयोर्नास्ति पर्यायत्वं तथा सति ॥
लक्ष्यैक्यमात्रं तत्र स्यान्न वाच्यैक्यमिति स्थितिः ॥ ८० ॥ ॥

व्या ॥ इति स्थितिरिति एवमेव प्रतिकर्मव्यवस्थासिद्धान्तः सम्बोध्य-सम्बोधकयोः देशतो भेदादित्यर्थः ॥ ८० ॥ ॥

अ० ॥ अधुना वाच्यैक्यस्य प्रमाणबाहुल्ये सति तस्य न प्रतिकर्मव्यवस्थावादेन बाध इति सार्धेन श्लोकपञ्चकेन दर्शयति **मय्येवेति**—

मू ॥ मय्येव सकलं जातमिति ज्ञानुभवे सति ॥ ८१ ॥
वाक्यस्थपदयोर्यत्र पर्यायत्वं तु संभवेत् ।
तत्र स्यादेव वाच्यैक्यं करादिपदवत्तथा ॥ ८२ ॥
समानशक्तिमत्वाद्धि पर्यायं वाच्यबोधकम् ।
इति न्याये च तत्रस्थे ह्युपमाने च संस्थिते ॥ ८३ ॥
तत्सृष्ट्वा सृष्टमेवासौ प्राविशज्जीवरूपतः ।
इति श्रुतेः कालतो हि भेदे जीवेशयोरपि ॥ ८४ ॥
मुख्याधिकारिणे सद्यो मोक्षपात्राय धीमते ।
जन्मादिसूत्रभाष्याद्धि लक्षणानन्दवाक्ययोः ॥ ८५ ॥
पर्यायत्वेन वाच्यैक्ये शासिते धर्मसाम्यतः ।
प्रतिकर्मव्यवस्थातो नास्य बाधो मनागपि ॥ ८६ ॥

व्या ॥ यत्रेति यस्मिन्प्रकरण इत्यर्थः अत्रेदमनुमानमुक्तम् पर्यायपदानि च्यैक्यपराणि समानशक्तिमत्वात् हस्तकरादिशब्दवदिति जीवेशयोः कालतो-देऽपीत्यन्वयः अपिशब्दात् स भेदो नाध्यात्मिकजीवैशैक्यपरामर्शबाधक इति शेतम् ।

धर्मसाम्यत इति लक्ष्ये तल्लक्षणसमन्वयविधेयसाक्षात्कारयोः पूर्वमेव भुतावहमहमिति स्वतः प्रकाशमानस्वात्मानन्दपरेण 'आनन्दो ब्रह्मेति व्यजानादि-दिवाक्येन उद्देश्यवस्तुनिर्णायकेन सह—सामान्यत एवोद्देश्यबोधकस्य यतो वा मानि भूतानि जायन्त इत्यादिलक्षणवाक्यस्य जन्मादिकारणत्वविधेयब्रह्मत्वरूप मबोधकत्वस्य विद्यमानत्वात् तयोर्धर्मसाम्यं तस्माद्धर्मसाम्यादित्यर्थः । शेषः गमः ॥ ८६ ॥

अ० ॥ उक्तमेव न्यायं सार्धेन श्लोकेन तत्त्वमसीति वाक्यगततत्त्वंपदयो-तिदिशति **तत्वमिति**

मू ॥ तत्त्वंपदञ्च पर्यायं वाच्यैकत्वपरं भवेत् ।
ब्रह्मत्वादिपराभ्यान्तु सौषुप्ते हि निजात्मनि ॥ ८७ ॥
लक्षणानन्दवाक्याभ्यां साम्यात्तद्वाक्यवत्तथा ।

व्या ॥ अत्रेदमनुमानमुक्तम् तत्त्वमसीति महावाक्यान्तर्गतं तत्त्वमिति द्वयमपि पर्यायम् वाच्यैक्यबोधकञ्च भवितुमर्हति दृष्टिसृष्टिप्रक्रियया स्वात्मनि गज्जन्मादिकारणत्वब्रह्मत्वबोधकलक्षणानन्दवाक्याभ्यां समत्वात् लक्षणानन्द-क्यद्वयवदिति ॥ ८७ ॥

अ० ॥ भृगुवल्ली कौषीतकीमाण्डूक्यब्रह्मवल्लीभिरिव सौषुप्ते प्राज्ञे जीवे-त्वरूपं वाच्यैक्यन्दर्शयित्वाऽधुना तद्भृगुवल्ल्यादिना च जाग्रदवस्थावति विज्ञान-येऽपि तद्वाच्यैक्यं दर्शयति **यथोर्मीणामिति**—

मू ॥ यथोर्मीणां व्यक्तिभेदे सत्यब्धेर्दृग्विभेदतः ॥ ८८ ॥
जन्मस्थितिविनाशानामाधारत्वं—तथैव हि ।
भृगुवल्ल्यां श्रूयमाणलटाञ्जाग्रत्परत्वतः ॥ ८९ ॥
भूतानां सत्यनेकत्वे दृग्भेदात्स्म्यान्निजात्मनः ।
जन्माद्याधारता तस्माद्विज्ञानेऽपीशता—ननु ॥ ९० ॥
ऐतदात्म्यमिति श्रुत्या मतभेदोऽत्र चेत्—स तु ।

स्वात्मा,'भेदोऽस्य यद्बीजं तदसीति लटस्तथा ॥ ९१ ॥
तच्छब्दाद्बोधितस्याग्रे निर्णायकतयेरितात् ।
स आत्मा तत्त्वमित्युक्ता जागरेऽपीक्षतात्मनि ॥ ९१ ॥

व्या ॥ प्रथमतः प्रतिपाद्यांशे दृष्टान्तपरां 'यथा फेनतरङ्गादिसमुद्रादुत्थितं पुनः । समुद्रे लीयते तद्वज्जगन्मय्यनुलीयत इति श्रुतिं सङ्गृह्णाति **यथोर्मीणामि-त्यादिना** दार्ष्टान्तिकपरां श्रुतिं दर्शयति **तथैव हीत्यादिना** प्रश्नपूर्वकम् छान्दो-ग्यस्याप्युक्तार्थपरत्वं दर्शयति नन्वित्यादिना **लटस्तथेति** यथा भृगुवल्ल्यां आन-न्दाद्धयेव खल्विमानि भूतानि जायन्ते जीवन्ति अभिसंविशन्तीति श्रूयमाणलटां विज्ञानमये जाग्रत्कालिकजगत्प्रकृतितापरत्वं तथा तत्त्वमसीति वाक्यगतलटोऽपि वार्तमानिकत्वात् एतदात्म्यमिदं सर्वमिति वाक्योक्तं जाग्रत्कालिकसर्वकार्यप्रकृतित्वं विज्ञानमये दर्शयति **तच्छब्दाद्बोधितस्याग्र इत्यादिना** सृष्टेः प्राक् तदैक्ष-त बहुस्यामिति यदुपक्रमे पठितं सदाख्यं जगदुपादानं तदेव स्वप्नान्तम्मे सोम्य विजानीहि सता सोम्य तदा सपन्नो भवति स्वमपीतो भवति तस्मादेनं स्वपिती-त्याचक्षते स्वं ह्यपीतो भवतीत्यादिवाक्यबोधितस्य जगदभिन्ननिमित्तोपादानभूतस्य जिजागरिषोरित्यर्थः कोऽसौ जिजागरिषुरित्यत आह **स आत्मेति** य आत्मेदा-नीं जागर्ति स एवप्राक् जिजागरिषुः फलितमाह **तत्त्वमिति** यत् प्राक् तदैक्ष-तेति श्रुत्युक्तञ्जिजागरिषु य इदानीं जागर्त्ति तदुभयं त्वमेवासीत्यर्थः जिजागरि-षात्वं तावदीक्षणस्य प्रागेव पञ्चमनिरूपणेऽष्टपञ्चाशाच्छ्लोकादारभ्य चतुष्षष्टि-तमश्लोकपर्यन्तं प्रमाणतो दर्शितम् अतो विज्ञानमये जीवेशत्वरूपं वाच्यैक्यं सिद्ध-मित्यर्थः ॥ ९२ ॥

अ० ॥ यत्पुनः जगदुपादानत्वेन सौषुप्ते विज्ञानमयेऽपि तत्त्वंपदवाच्यैक्यमा-दिष्टं तदेव प्रश्नपूर्वकमुपपादयति **पुनरिति**—

मू॥ पुनस्सुप्तेऽपि विज्ञानमये प्रकृतिता कुतः
सुप्त्यारम्भे विलीनत्वात्तदन्ते जायते जगत् ॥ ९३ ॥
जातस्य जाग्रदारम्भे तदन्ते विलयस्ततः ।
विज्ञानविरतिस्सुप्तिस्तच्च्युती स्वप्नजागरौ ॥
अतस्सुप्तेऽपि विज्ञानमये प्रकृतिताऽस्त्यतः ।

तत्त्वंपदाभ्यां वाच्यत्वादेकैकस्मिन्तयोर्यथा ॥
ऐक्यं स्यात्—प्रत्यभिज्ञातस्तथा स्यात्सुप्तबुद्धयोः ॥९५॥ ॥

व्या० ॥ दृष्टिसृष्टिप्रक्रियया सुप्ते विज्ञानमये च जगदुपादानत्वमाह **अत इत्यादिना** फलितमाह **अतः तत्त्वंपदाभ्यामित्यादिना प्रत्यभिज्ञात इति** सुखमहमस्वाप्समिति परामर्शादित्यर्थः शेषस्सुगमः ।

अ० ॥ कतम आत्मेति प्रश्नस्य योऽयं विज्ञानमयः प्राणेषु हृयन्तर्ज्योतिः पुरुषः स इत्युपक्रम्य स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्मेति प्रतिवचनभूतेन वाजसनेयकेन सह ।

'सदेव सोम्येदमग्र आसी' दित्युपक्रमे पठितं यत् सदाख्यं जगदुपादानं तदेव 'स्वप्नान्तं मे सोम्य विजानीहीति यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा संपन्नो भवति स्वमपीतो भवतीति' सुषुप्त्यवस्थावत्त्वेन स्वशब्देनानुकृष्य उदर्के तत्सौषुप्तस्यैव 'स आत्मा तत्त्वमसीति' नवधा विज्ञानमयेनाभेदबोधकस्य छान्दोग्यवाक्यस्य समानार्थकत्वनिर्णायकेन 'आत्मगृहीतिरितरवदुत्तरात्' दित्यधिकरणेन तद्राध्येण च तत्त्वंपदवाच्यैक्यं विवक्षितमित्यत्र तदधिकरणार्थसङ्ग्राहकमधिकरणरत्नमालावाक्यं संवादयति **द्वयोरिति**—

मू॥ द्वयोर्वस्त्वन्यदेकं वा काण्वच्छान्दोग्यषष्ठयोः ॥ ९६ ॥
उभयत्र पृथग्वस्तु सदात्मभ्यामुपक्रमात् ।
साधारणोऽयं सच्छब्दस्स आत्मा तत्त्वमित्यतः ॥ ९७ ॥
वाक्यशेषादात्मावाची तस्माद्वस्त्वेकमेतयोः ।
इत्यत्रत्यात्सदाख्यस्य स्याद्विज्ञानमयस्य च ॥
प्रकृतित्वव्यवस्थातो वाच्यैकत्वं च तत्त्वमोः ॥ ९८॥ ॥

व्या० ॥ तत्त्वमोरिति तत्त्वंपदयोरित्यर्थः ।

अ० ॥ संप्रति वाच्यावैक्ये वार्त्तिकाचार्याभिप्रायमाह **वार्तिककृदिति**—आर्यावृत्तम् ।

मू॥ वार्तिककृदाह चैक्यं नाभासोऽशो न चाप्यवच्छिन्नः ।
ब्रह्मैवाविद्यावत्संसारीवास्ति मुक्त इव चेति ॥ ९९॥ ॥

व्या० ॥ स्पष्टोऽर्थः ।

अ० ॥ अस्मिन्नद्वैतसिद्धान्तगुरुचन्द्रिकाख्यशास्त्रे चतुर्थनिरूपणादन्यैर्वाच्यैक्यमवगम्यतामित्याह **नवमेनेवेति**—

मू॥ नवमेनैव वाच्यैक्यं प्रागुक्तैरुत्तरत्र च ॥ १०० ॥
अन्यैर्निरूपणैस्तुर्यादत्रत्यैर्नवभिः किल ।
स्वस्योपादानतादेशाद्वाच्यैक्यं स्याच्च तत्त्वमोः ॥ १०१ ॥

व्या ॥ **तुर्यादिति** चतुर्थनिरूपणादित्यर्थः ॥ स्पष्टमन्यत् ॥ १०१ ॥

अ० ॥ सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीत्यत्रत्यप्रवेशशब्दार्थज्ञानस्य वाच्यैक्यप्रत्ययहेतुत्वात्तद्विषयकप्रश्नमवतारयति **देवतेति**—

मू॥ देवता सूक्ष्मभूतानि प्राविशज्जीवरूपतः ।
स्थूलस्य सर्जनायेति श्रुतावुक्तं हि तत्र तु ॥ १०२ ॥
प्रवेशार्थस्तु किंरूपस्तं विनेदं भवेन्न किम् ॥ १०२॥ ॥

व्या॥ **इदमिति** जगत्सर्जनमित्यर्थः ॥ १०२॥ ॥

अ० ॥ प्रश्नद्वयस्य सोपपत्तिकमुत्तरमाह **उत्थायेति**—

मू॥ उत्थायेत्यभिमानहानकथनाद्भूतेऽभिमानो मतो
नेतेऽध्यासवियोगतस्त्वमनने रज्जावहिर्नो यथा ।
स्तब्धीभूतहृदो यथा च न भवेद्दृष्ट्यात्मको—नो तथा
भूतात्तेन परात्मनश्च तमसि प्रोक्ता ह्यहं मानिता ॥ १०३॥ ॥

व्या ॥ **उत्थायेति** एष संप्रसादोऽस्माच्छरीरात् समुत्थायेति समुत्थानशब्देन शरीराभिमानत्यागस्य विवक्षितत्वात् भवत्प्रदर्शितप्रवेशशब्दस्य **भूते** तेजोबन्नात्मके **अभिमानो** ऽहमित्यध्यासो **मतः** अभिमतार्थः इतोऽन्यादृशस्य देशान्तरापसरणरूपेण अंशात्मना वा प्रतिबिम्बात्मना वा प्रवेशस्य आकाशवत् सर्वगताया निरंशाया नीरूपायाश्च देवतायाः असंभाव्यमानत्वात्

ननु, गगनस्य जलादाविव नीरूपस्यापि ब्रह्मणोऽन्तःकरणे प्रतिबिम्बभावेन प्रवेशः किन्न स्यादिति चेन्न जलेऽपि गगनदेशगतसवित्रादिप्रकाशप्रतिबिम्बातिरेकेण पृथगाकाशस्य प्रतिबिम्बानुपलब्धेः इति प्रथमप्रश्नस्य सोपपत्तिकमुत्तरमुक्त्वा

नाध्यासिकजगत्स्रष्टुः स्वोपाधावभिमानाभावे कार्याध्यासकर्तृत्वमिति द्वितीयप्रश्नं प्रतिवक्तुकामः तत्र दृष्टान्तमाह **नेत्र इत्यादिना** यथा स्वस्वरूपानुसन्धानसमये नेत्रेन्द्रिये ममेत्यभिमानस्याभावाद्रज्जौ नाध्यासिकस्सर्पः सम्भवतीति प्रतिकर्मव्यवस्थाप्रक्रियया दृष्टान्तमुक्त्वा दृष्टिसृष्टिपक्षरीत्या च दृष्टान्तमाह **स्तब्धीभूतेत्यादिना** 'यथा गार्ग्य मरीचयोऽर्कस्यास्तङ्गच्छतस्सर्वा एतस्मिंस्तेजोमण्डले एकीभवन्ति ताः पुनः पुनरुदयतः प्रचरन्त्येवं ह वै तत्सर्वं परे देवे मनस्येकीभवन्ती'ति प्रश्नोपनिषदादिभिर्मनसः सर्वजगत्प्रकृतित्वेऽपि उदासीनावस्थां आपन्नादहमित्यनभिमन्यमानादन्तःकरणाद्यथा न दृष्ट्यात्मकः प्रपञ्चः संभवतीति प्रातिभासिकदृष्टान्तमुक्त्वा तन्न्यायं तेजोबन्नेऽप्यतिदिशति **नो तथाभूतादिति** तथा सदाख्यदेवतयाऽहमित्यनभिमन्यमानादपि तेजोबन्नात् न नामरूपव्याकरणं संभवति यत एवमनभिमन्यमानादुपाधेर्न कार्याध्यासस्संभवति अत एव मूलाज्ञानेऽप्यहमिति तादात्म्याध्यासपूर्वकमेव सद्रूपस्य प्रत्यक् चैतन्यस्य वियदादि जगदारोपकत्वमुक्तमित्याह–**तेनेत्यादिना** तत्तदध्यासकर्तुरात्मनः स्वोपाधावहमित्यध्यासस्यावश्यकत्वहेतुना ॥ श्लो ॥ तया दुर्घटकारिण्या तादात्म्येनैव सङ्गतं । कारणं सकलस्रष्टृ सर्वसंहर्तृ चास्तिका इति ब्रह्मगीतायाः पञ्चमाध्यायवचनेन परमात्मनस्तमोरूपाज्ञानेऽहमिति तादात्म्याध्यासो दर्शित इत्यर्थः ॥ १०३॥ ॥

अ० ॥ यत्तावत्प्रतिज्ञातं ब्रह्मणो मूलाज्ञानेऽहमित्यभिमानवत्वं तत्र पञ्चीकरणीयानि वार्तिकवचनानि प्रमाणयति––**आसीदिति**––

मू॥ आसीदेकं परं ब्रह्म नित्यमुक्तमविक्रियम् ॥ १०४ ॥
तत्स्वमायासमावेशाद्बीजमव्याकृतात्मकम् ॥
तस्मादाकाशमुत्पन्नं शब्दतन्मात्ररूपकम् ॥ १०५ ॥

व्या० ॥ **आसीदेकमिति** त्रिविधपरिच्छेदरहितं **परं** अव्यक्तादप्यन्तरं **ब्रह्म** तुरीयं प्रत्यक् चैतन्यं **नित्यमुक्तं** असङ्गत्वात् सदाऽविद्यादिदोषासंस्पृष्टं **अविक्रियं** कूटस्थं यत् **तत्स्वमायासमावेशात्** स्वारोपितमायायामहमित्यभिमानात्स्वयमपि **अव्याकृतात्मकं** अव्याकृते मूलाज्ञाने आत्मा अहमित्याध्यासिकी बुद्धिर्यस्य ब्रह्मणस्तदव्याकृतात्मकमीश्वराख्यं **बीजं** वियदाद्युपादानकारणमभवदित्यर्थः ॥

अ० ॥ ब्रह्मणः स्वमायासमावेशस्य अहमित्यभिमानरूपत्वे पुनः पञ्चीकरणीयान्येव वार्तिकवचनान्युदाहरति––**चैतन्येति**––

मू॥ चैतन्याभासखचितं शरीरद्वयकारणम् ॥
आत्माज्ञानं तदव्यक्तमव्याकृतमुदीर्यते ।
ज्ञानानामुपसंहारे बुद्धेः कारणतास्थितिः ॥
वटबीजे वटस्येव सुषुप्तिरभिधीयते ।
यस्तयोरभिमानीस्यात्प्राज्ञ इत्यभिधीयते ।
जगत्कारणरूपेण प्राज्ञात्मानं विचिन्तयेत् ॥ १०८ ॥

व्या० ॥ **चैतन्याभासखचितमिति** सुषुप्तौ चैतन्यस्फुरणेन प्रकाशितमिति यावत् नान्यथा श्लो०॥वार्तिककृन्मतामित्थन्न प्रतिबिम्बो न चाप्यवच्छिन्नः। ब्रह्मैवाविद्यातस्संसरतीवाथ मुच्यत इवेति सौषुप्तादिजीवे प्रतिबिम्बादिभावस्य निराकृतत्वात् ।

अथवा सौषुप्तस्य प्रतिबिम्बत्वं वक्तुकामैः व्याख्यातृभिः व्याख्येयञ्च तत्तन्मूलं पाठभेदमिव कृतं वा न जाने विमृश्यताम् ।

यद्विराट्संज्ञकपञ्चीकृतभूतभौतिकस्य हिरण्यगर्भसंज्ञकापञ्चीकृतवियदादिसूक्ष्मशरीरस्य च उपादानमात्माज्ञानमव्याकृतसंज्ञकं--

या च सुषुप्त्यवस्था तदुभयाभिमानिनं प्राज्ञमेव जगत्कारणमिति जानीयादित्युपदेशान्मूलाज्ञाने ब्रह्मणस्तादात्म्यरूपोऽहमभिमानस्सिद्ध इत्यर्थः ॥ १०८ ॥

अ० ॥ ननु, एषोऽन्तर्यामीत्यादि श्रुतिप्रतिपाद्यस्याव्यामोहितस्य परमात्मनः कथमनात्मन्यज्ञानेऽहमित्यभिमानित्वमित्याशङ्क्य नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोतेत्यन्तर्यामिब्राह्मणोक्तप्रकारेण तदतिरिक्तविदन्तराभावात् तस्यैव व्यामोहितत्वे कैवल्यश्रुतिमर्थतस्संगृह्य प्रमाणयति—**स एवेति**--

मू॥ स एव मायापरिमोहितात्मा शरीरमास्थाय करोति सर्वम् ।
वधूदकान्नादिविचित्रभोगैस्स एव जाग्रत्परितृप्तिमेति ॥१०९॥

व्या० ॥ **स एवेति** ॥ स एव परमेश्वरः कोऽसावित्यत आह—**मायापरिमोहितात्मेति** मायया स्वात्मविषयकाज्ञानेन परिमोहितस्तिरोहितः आत्मा नित्यमुक्ताद्वितीयस्वात्मस्वरूपं यस्य स मायापरिमोहितात्मा तथाभूतस्सन्स किंकरोतीत्यत आह--**शरीरमास्थाय करोति सर्वमिति** स्वमायामयमिदं शरीरमास्थायाविवेकेनात्मत्वेन परिगृह्य भोगस्य कर्मैव कारणमिति भ्रान्त्या सर्वं श्रौतस्मार्तादिकं कर्म करोतीत्युक्त्वा जीवः किल स्वभोगार्थं कर्म करोति नेश्वर इतीमामाशङ्कां श्रुतिः स्वयमेव वारयति 'स्त्र्यन्नपानादिविचित्रभोगैस्स एव जाग्र-

त्परितृप्तिमेतीति' तामर्थतस्संगृह्णाति—**वधूदकान्नादीति** स एव परमेश्वरो **जाग्रत्** जागरणावस्थावान् सन् भोक्तृत्वाध्यासाद्वध्वादिभोगैः परितुष्यति नेतर इत्येवकारेण भेदो व्यावर्त्यते अतो मायापरिमोहित आध्यात्मिक एव नाधिदैविकः॥

अ० ॥ इदानीमुदाहृतकैवल्यश्रुत्या फलितमाह—**स एवेति**—

मू॥ स एवेत्यस्य चावृत्त्याप्येवकाराच्च वाच्ययोः।
जीवेशयोरभेदो हि श्रुत्या सम्यक् प्रदर्शितः ॥

व्या० ॥ स एवेत्यस्य वाक्यस्यावृत्त्येत्यर्थः॥ शेषस्सुगमः॥

अ० ॥ एवं श्रुतिस्मृतिन्यायविद्वदनुभवैराध्यात्मिकस्यानिदं चैतन्यस्य जगत्कारणत्वप्रदर्शनेन तत्त्वंपदवाच्यैक्यमुपदिशन्तं क्वश्चिदाधिदैविकस्येदंपदार्थस्योपास्यस्य तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत इति श्रुत्याऽब्रह्मत्वेन प्रदर्शितस्य उगत्कारणत्वमवलम्ब्य लक्ष्यैक्यमात्रसद्भावबादी पृच्छति—**वाच्यार्थयोरिति**—

मू॥ वाच्यार्थयोर्विभेदस्तु सिध्यत्युत न सिध्यति।
इत्यावामधुना कुर्वो विचारं कञ्चिदेव चेत्॥ १११ ॥

व्या० ॥ स्पष्टोऽर्थः॥

अ० ॥ इदानीमाध्यात्मिकाधिदैविकेश्वरत्ववादिनौ क्रमाद्वादिप्रतिवादिभावमापन्नौ ईश्वराख्यतत्वनिर्णयार्थं विचारयतः **मत्तोऽन्य इति**—

मू॥ मत्तोऽन्यः परमेश्वरोऽस्य जगतां स्रष्टृत्वमन्यस्य मे
नास्तीति ब्रुवतोपमा परमता संप्रोच्यतां श्रूयताम्।
प्रत्यक्तत्वमजानतस्तव यथा स्वप्ने तथाऽतोऽज्ञता
यद्येवं भवतु स्वरूपनिरताच्चेत्सृष्टिरस्मात्कथम्॥ ११२॥

व्या॥ प्रथमत आध्यात्मिकेश्वरत्ववादी पृच्छति **मत्तोऽन्य इत्यादिना** मत्त आध्यात्मिकादन्यः परमेश्वर आधिदैविक इति य उच्यते अस्याधिदैविकस्य जगतां भूम्यन्तरिक्षस्वर्गलोकानां स्रष्टृत्वं भवेदिति शेषः **अन्यस्य** तदन्यस्य **मे** आध्यात्मिकस्य नास्ति जगत्स्रष्टृत्वमिति **ब्रुवता** आधिदैविकेश्वरत्ववादिना भवता **परमता** परस्य त्वदन्यस्याध्यात्मिकेश्वरत्ववादिनो मता सम्मता **उपमा** उपमानं **संप्रोच्यतां** इत्याध्यात्मिकेश्वरत्ववादिना पृष्टस्सन्नपर उत्तरमाह **श्रूयतामित्यादिना** यथा स्वप्नकाले स्वकृ तत्वमजानतस्तव विचित्रगजाश्वादिकल्पकत्वं

तथा आधिदैविकस्यापि विचित्रजगत्सृष्टृत्वमित्युक्तमाने परेण दर्शिते सति सिद्धान्ती परमते बाधमाह **अतोऽज्ञतेति** अत आधिदैविकस्य परमेश्वरस्यापि स्वप्ननिर्मात्रज्ञसाम्यादज्ञत्वमापतेदिति प्राप्ते परस्तत्परिहरति--**यद्येवं भवतु स्वरूपनिरतादिति** दृष्टान्ते तावत् स्वात्मयाथात्म्यमविजानतो जीवात् स्वप्नोत्पत्तावपि स्वरूपावरणाभावेन सदा स्वस्वरूपयाथात्म्यानुसन्धानवत आधिदैविकादीश्वरादेव भवतु जगत्सृष्टिरिति प्राप्ते आध्यात्मिकेश्वरत्ववादी तदनूद्य आक्षिपति **चेत्सृष्टिरस्मात्कथमिति** आत्मादनावृतस्वरूपयाथात्म्यवत आत्मारामादाध्यासिकी पारमार्थिकी वा जगत्सृष्टिः कथ सिध्यति--तदैक्षत बहुस्यां प्रजायेयेति सेयं देवतैक्षत हन्ताऽहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति च भवन्मते जिज्ञासारिषातिरिक्तस्रष्टव्यानुसन्धानादिपूर्वकमेव स्रष्टृत्वस्य वक्तव्यत्वे तदनुगुणदृष्टान्ताभावादिति भावः ॥ ११२ ॥

अ० ॥ एवमाधिदैविकस्य परमेश्वरस्य स्वस्वरूपव्यामोहानभ्युपगमात्--न स्वस्मिन् जगदारोपकत्वरूपमीश्वरत्वं संभवतीति निराकरणेन शान्तविपरीतभावनं प्रतिवादिनं सिद्धान्ती पृच्छति वाच्यैक्यप्रत्ययोत्पादनाय **कस्त्वमिति**--

मू ॥ कस्त्वं तात मया सार्धं वादकृद्वद मे प्रिय ।
देहो वासि तदन्यः किमिति चेदुच्यते गुरो ॥ ११३ ॥
भवदीयोपदेशेन ज्ञातो यस्त्वात्मरूपतः ।
प्रत्यभिज्ञायते योऽहमस्वाप्समिति चैकधा ॥ ११४ ॥

व्या० ॥ **गुरविति** संबोधनेन स्वस्य प्रतिवादिभावं परित्यज्य शिष्यभावौ दर्शितः । शेषस्सुगमः ॥ ११४ ॥

अ० ॥ गुरवे तदेव स्वात्मतत्वं निवेदयति--**यस्येत्यादिना**--

मू ॥ यस्याज्ञानविजृम्भितं जगदिदं स्वप्ने सुषुप्तौ क्रमात्
यस्मिन्नेव विलीयते स च गुरो ह्यस्मीति चेत्सोऽस्म्यहम् ।
इत्यस्मिंस्तव निश्चये सति कुतो नेशो भवेयं सदे-
त्युक्तिस्स्यादविचारतो--यदि ततो वाच्यैकता संस्मृता ॥ ११५ ॥

व्या ॥ **यस्येत्यादि** सौषुप्तपरं शिष्यवाक्यमनूद्य पृच्छति **सोऽस्म्यहमित्यादिना** यो जगतो जन्मादिकारणभूतस्सौषुप्तस्सोऽस्म्यहमिति निश्चयज्ञाने सति **नेशो भवेयमित्युक्तिः** कस्मात्तव स्यादिति पृष्टस्सञ्छिष्य उत्तरमाह--

अविचारित इति तं प्रति गुरुराह **यदि तत इति** 'यदा सुप्तस्स्वप्न न कञ्चन पश्यत्यथास्मिन्प्राण एवैकधा भवति तदैनं वाक् सर्वैर्नामभिस्सहाप्येति - चक्षुस्सर्वै-रूपैस्सहाप्येति श्रोत्रं सर्वैश्शब्दैस्सहाप्येति मनस्सर्वैर्ध्यानैः सहाप्येति स यदा प्रति-बुध्यते यथाग्नेर्ज्वलतस्सर्वा दिशो विष्फुलिङ्गा विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनस्सर्वे प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोकाः--पुरत्रये क्रीडति यस्तु जीवस्ततस्तु जातं सकलं विचित्रं--प्राज्ञस्तृतीयः पाद एष सर्वेश्वर एष सर्वज्ञ एषो-न्तर्याम्येष योनिस्सर्वस्य प्रभवाप्ययौ हि भूतानामिति कौषीतक्यादिश्रुतिभिर्जग-त्कारणत्वेनाकेदितेन सौषुप्तेन सह विज्ञानमयस्य प्रागस्वाप्समित्यभेदेन परामर्शात् वाच्यैकता संस्मृता भवतीति शेषः ॥ ११५ ॥

अ० ॥ आचार्यं प्रति भगवत्कृपयैव सम वाच्यैक्यविज्ञानमभवदित्याह **जीवेशाविति**—

मू ॥ जीवेशौ तु विदेशतः किल भिदावन्तावितिं भ्रान्ततां
त्यक्त्वा कालविशेषतो विभुरहं स्वप्ने जगज्जागरे ।
अज्ञानादेवशात्सृजाम्यहमतस्सुप्तोऽस्म्यभेदग्रहात्
वाक्यात्तत्वमसीति ते च कृपया वाच्यैक्यविज्ञानवात् ॥

व्या ॥ श्लो ॥ चित्तव्यापारनाशे तु तदभावं सुरर्षभाः । स्वप्रकाशेन जाना-ति सुषुप्तो वेद तामपीति ब्रह्मगीतोक्तप्रकारेण जाग्रत्स्वप्नकालयोः मध्यारोपितद्वै-तभ्रमस्य लयाधिकरणत्वेन ह्यदानीं सुप्तोऽस्मीत्यभेदावगाहिना सुषुप्तिकालिकस्वरूप-प्रकाशेन

किं तच्चरित्रं समग्रं श्रुतमिति पृष्टे तदर्धमेव श्रुतं पश्चात्सुप्तस्सन्न जाना-मीति विज्ञानमयेन सहसुप्तस्याभेदव्यवहारेण च वक्ष्यमाणेन ।

अनेन तृतीयाध्यायस्य तत्त्वंपदयोरेकार्थत्वपरे द्वितीयपादे तृतीयाधिकरणो-क्तेनानेन--एतेनेश्वरस्योत्थानं व्याख्युक्तं नित्यनिवृत्ताविद्यत्वादिति--भाष्येण आधिदैविक-स्य परमेश्वरस्य तत्तत्प्राणिकर्मसापेक्षतया तेभ्यो विषमफलदातृत्वनित्यनिवृत्ताविद्य-त्वेन अनिवृत्ताविद्यत्वतो विज्ञानमयात् सौषुप्तानन्दमयाच्च वास्तवभेदस्य पाशुप-ताद्यभिमतकेवलनिमित्तकारणत्वस्य चाभिप्रेतत्वात् तेन सह त्वंपदवाच्यस्यैक्या-भावेऽपि ।

तदुत्तरेणानेन अपि च न जीवो नाम कश्चित्परस्मादात्मनोऽन्यो विद्यते-यो जलबिन्दुरिव जलराशेः = सतो विविच्येत सदेव तूपाधिसंपर्काज्जीव इत्यु

पचर्यत इत्यसकृत् प्रपञ्चितमिति भाष्येण तदैक्षत बहुस्यां प्रजायेयेत्यादिश्रुत्युक्तं यत् सदाख्यं आध्यासिकस्य जगतोऽभिन्ननिमित्तोपादानं सौषुप्तानन्दमयरूपमनिर्वृत्ताविद्यमाध्यात्मिकं स्वात्मतत्वं तस्य स्वारोपितकार्यकरणोपाधौ अहमित्यात्मत्वाध्यासात् सोऽकामयतेत्युपक्रम्य तत्सृष्ट्वा तदेवानुप्राविशत् अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीत्यादि श्रुत्यनुसारेण प्रतिबिम्बादिभावमन्तरेण साक्षादेव विज्ञानमयाख्यजीवरूपेण अवस्थानोपदेशाच्च तत्त्वंपदयोर्वाच्यैक्यं सिद्धम् ।

तथैव तृतीयाध्यायस्य तत्त्वंपदयोरेकार्थत्वपरे द्वितीयपादे पञ्चमाधिकरणीयस्य 'दर्शनाच्चेति सूत्रस्य भाष्यावसाने परव्याख्यानानिराकरणावसरे किं ज्ञेयब्रह्मप्रकरणस्थानामाकारशब्दानां निषेधपरत्वमुतोपासनाप्रकरणस्थानामपि तत्राद्यमङ्गीकरोतीत्यवतरणोपेक्षेन ।

ये हि परविद्याधिकारे केचित्प्रपञ्चा उच्यन्ते यथा "युक्ता ह्यस्य हरयश्शता दशेत्ययं वै हरयोऽयं वै दश च सहस्राणि बहूनि चानन्तानि चेति एवमादयः ते भवन्तु प्रविलयार्थाः" "तदेतत् ब्रह्मापूर्वमनपरमनन्तरमबाह्यमित्युपसंहारादिति" भाष्येण तदीयेनानेन ।

अस्य जीवभावं प्राप्तस्येश्वरस्य **दशहरयः** विषयाहरणात् दशेन्द्रियाणि—प्राणिभेदापेक्षया शतानि सहस्राणि च तेषामीश्वराद्भेदमाशङ्क्याह—**अयमिति** अयमीश्वर एव हरय इत्यर्थ इति रामानन्दीयव्याख्यानेन च एकस्यैव जीवेश्वर भावाश्रयत्वकरणस्वामित्वसार्वात्म्यानामुपदिष्टत्वात् जगदुपादानचैतन्यपरतत्पदस्य च कर्तृत्वभोक्तृत्वपरत्वंपदस्य च वाच्यैक्यं प्रदर्शयति स्म ॥ ११६ ॥

अ० ॥ इदानीं नवमनिरूपणमुपसंहरति **प्राज्ञोऽस्मीति**—

मू ॥ प्राज्ञोऽस्मीति सुवेदनात्किल यतस्सर्वज्ञसर्वेशता
सार्वात्म्यञ्च नियन्तृताऽखिलजगत्स्थित्यप्ययाधारता ।
लभ्यातद्श्रवणादिभिस्स्वपरयोर्भेदभ्रमादागतां
त्यक्त्वा संशयभावनां च विदुषा वाच्यैक्यमादीयता ॥ ११७ ॥

व्या० ॥ यस्मात्प्राज्ञस्तृतीयः पाद एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येषयोनिस्सर्वस्य प्रभवाप्ययौ हि भूतानामित्यादिभिः प्रागुक्तप्रमाणैः प्राज्ञोऽस्मीति सम्यग् ज्ञानादेव कण्ठगतचामीकरन्यायेन स्वस्य सर्वज्ञत्वादिकं लभ्यते अतो नाहमीश्वर इति यो देशकृतो भेद इति भ्रमोत्पन्नामहं तत्पदवाच्यस्सर्वज्ञो वा न वाऽहं सर्वे-

श्वरोवा न वाऽहं सर्वात्मको वा न वाऽहं सर्वनियन्ता वा न वाऽहं निखिलजगज्ज-न्मादिकारणं वा न वेति संशयभावनामसंभावनां विपरीतभावनां च क्रमात् स्वस्मिन् जगदध्यारोपनिर्णायकश्रवणमननिदिध्यासनैः परित्यज्य वाच्यैक्यमादीयतां विदुषेत्यर्थः ॥११७॥

इति श्रीपरमहंसपरिव्राजकाचार्यरामब्रह्मश्रीकृष्णानन्देन्द्रसरस्वतीभगव-त्पादशिष्यश्रीमच्चन्द्रिकाचार्याख्ययतीश्वरविरचितायां अमृतरस-झरीनामकव्याख्यानोपेतायां अद्वैतसिद्धान्तगुरु-चन्द्रिकायां नवमं वाच्यैक्य निरूपणं संपूर्णम् ।

ओं तत्त्वद्वैवाहमस्मि

हरिः ओम्।

तत्सत्॥

—:o:—

॥ हरिः ओम्॥

अद्वैतसिद्धान्तगुरुचन्द्रिकायाम् ।

दशमं लक्ष्यैक्यनिरूपणं आरभ्यते ।

अ० ॥ इदानीं दशमनिरूपणमारभमाणः स्वाचार्यं नमस्करोति—**वन्दे इति**—

मू ॥ वन्दे परमहंसेन्द्रश्रीकृष्णेन्द्रसरस्वतीः ।
शिष्यप्रार्थितलक्ष्यार्थविशेषप्रतिपत्तये ॥ १ ॥

व्या० ॥ स्पष्टोऽर्थः ॥ १ ॥

अ० ॥ अधुना शिष्यानभिमुखीकृत्य वक्ष्यमाणविशेषं ज्ञापयति-**वक्ष्य इति**

मू ॥ वक्ष्ये माधवतीर्थाद्या भवद्भिः प्रार्थिताश्च ये ।
लक्ष्यैक्यस्य विशेषास्तान्मन्दानामपि सिद्धये ॥ २ ॥

व्या० ॥ **मन्दानामिति** वाच्यैक्यसाक्षात्कारेऽसमर्थानामपिशब्दात्तत्रापि समर्थानां च नित्यशुद्धात्मप्रतिपत्तये लक्ष्यैक्यविशेषान्वक्ष्य इत्यर्थः ॥ २ ॥

अ० ॥ संप्रति लक्ष्यैक्यविशेषप्रदर्शनार्थं तदनुकूलं मूलाज्ञानशरीरयोः विशेषणत्वादिकं दर्शयति **सुप्तस्येति**—

मू॥ सुप्तस्य स्यात्प्रबुद्धस्याऽज्ञानं लिङ्गादिकं क्रमात् ।
विशेषणमुपाधिश्चाप्युपलक्षणमत्र तु ॥
तादात्म्येऽतो विवेकेऽस्य विनाशे स्वविचारतः ॥ ३॥ ॥

व्या० ॥ अज्ञाने सुप्तस्य तादात्म्ये सति **अतः** अज्ञानात्तस्य विवेके सति च **अस्य** अज्ञानस्य स्वात्मविचारात् निवृत्तौ च विशेषणत्वादिकं भवेत् तथा प्रबुद्धस्यापि लिङ्गादिकं भवेदित्यर्थः ॥ ३॥ ॥

अ० ॥ अधुना विशेषणादीनां लक्षणं प्रतिजानीते—**एतदिति**—

मू॥ एतद्विशेषणादीनां पृथग्लक्षणमुच्यते ॥ ४ ॥

व्या० ॥ स्पष्टोऽर्थः ॥ ४ ॥

अ० ॥ तत्र विशेषणस्य लक्षणमाह—**प्रमेयेति**—

मू॥ प्रमेयानुगतं विद्यमानं व्यावर्तकं च यत् ।
विशेषणं भवेल्लम्बकर्णमित्यत्र कर्णवत् ॥ ५ ॥

व्या० ॥ **प्रमेयानुगतमित्यादिना** विशेषणस्य लक्षणमुक्त्वा तत्र दृष्टान्तमाह—**लम्बकर्णमित्यादिना** लम्बकर्णं पश्येत्यत्र यथा कर्णस्य तदवच्छेद्यानुगतत्वादिकं लक्षणं तद्वदित्यर्थः ॥ ५ ॥

अ० ॥ इदानीमुपपादितं विशेषणलक्षणमीश्वरजीवव्यावर्तकमायाशरीरयोर्योजयति **अव्याकृत इति**—

मू॥ अव्याकृतोऽस्म्यहं—कर्त्ता—मनुष्यो ब्राह्मणोऽस्म्यहम् ।
इत्यत्राव्याकृते—चित्ते—शरीरे—तन्नयेत्क्रमात् ॥ ६ ॥

व्या॥ **अव्याकृतोऽस्मीत्यादिना** अहमित्यभिमन्यमानेष्वज्ञानान्तःकरणस्थूलशरीरेषु प्रागुक्तं **तत्** विशेषणलक्षणं योजयेदित्यर्थः ॥ तत्र स्थूलसूक्ष्मशरीरयोर्जीवेनाहमित्यभिमन्यमानत्वं तावत्प्रसिद्धमेव अव्याकृतस्य आध्यात्मिकेश्वरेण आधिदैविकेनेश्वरेण वा अहमित्यभिमन्यमानत्वन्तु ॥ श्लो ॥ आत्माज्ञानं तदव्यक्तमव्याकृतामितीर्यते । यस्तत्राप्यभिमानी स्यात्प्राज्ञ इत्यभिधीयते । आसीदे-

कं परं ब्रह्म नित्यमुक्तमाविक्रियम् तत्स्वमायासमावेशाद्बीजमव्याकृतात्मकमिति पञ्चीकरणवार्तिकवचनेन ॥ श्लो ॥ प्रतीत्या केवलं शक्तिरचिद्रूपा तमोमयी ॥ सर्वप्रकारैर्विद्वद्भिरनिरूप्या हि शांकरी । तथा दुर्घटकारिण्या तादात्म्येनैव सङ्गतम् । कारणं सकलस्रष्टृ सर्वसंहर्तृ चास्तिका इति ब्रह्मगीतायाः पञ्चमाध्यायवचनेन च सिद्धम् ।

अ० ॥ अधुनोपाधेर्लक्षणमाह **मेयेति**—

मू ॥ मेयाननुगतो विद्यमानो व्यावर्तकश्च यः ।
उपाधिः कर्णसंयुक्तं श्रोत्रमित्यत्र कर्णवत् ॥ ७ ॥

व्या० ॥ कर्णशष्कुल्यवच्छिन्नं नभश्शोत्रमित्यत्र कर्ण इव प्राज्ञेश्वरविज्ञानमयेभ्यः विवेचितमव्याकृतादिकं जीवन्मुक्तिसमये तेषामुपाधिर्भवेत् ॥ ७ ॥

अ० ॥ संप्रत्युपलक्षणस्य लक्षणमाह--**मेयाननुगतमिति**—

मू ॥ मेयाननुगतं चासत्परव्यावर्तकं च यत् ।
स्याच्चोपलक्षणं चैत्रसद्मनः काकवत्किल ॥ ८ ॥

व्या० ॥ **काकवत्** आध्यात्मिकाव्याकृतादेरेव पूर्वं विद्यमानत्वेऽपि विदेहकैवल्यसमये अविद्यमानत्वादुपलक्षणत्वं भवेदित्यर्थः ॥ ८ ॥

अ० ॥ अस्तु नाम मायाशरीरयोर्विशेषणत्वादिकं तावता ताभ्यां व्यावर्तितयोः प्राज्ञात्मनोः किमायातमित्यत आह--**तृतीयेति**—

मू ॥ तृतीयोक्तप्रकारेण मूलाज्ञानशरीरयोः ।
चित्संवेष्टकताभावे क्रमादैक्यत्रयं भवेत् ॥ ९ ॥

व्या० ॥ तृतीयनिरूपणोक्तप्रकारेणाज्ञानतत्कार्ययोः प्राज्ञविज्ञानमयरूपेश्वरजीवपरिवेष्टकत्वाभावे सिद्धे सति क्रमाद्वाच्यैक्यत्रयं भवेदित्यर्थः ॥ ९ ॥

अ० ॥ इदानीं तदैक्यत्रयं विवृणोति—**विशिष्टेति**—

मू ॥ विशिष्टैक्यं तथा चोपहितैक्यं च तथाऽपरम् ।
लक्षितैकत्वमेतेषु विशिष्टैक्यं तु विस्तरात् ॥ १० ॥
नवमे दर्शितं पूर्वं लक्ष्यं शिष्टद्वयं भवेत् ॥ १०॥ ॥

व्या ॥ **लक्षितैकत्वमिति** उपलक्षितैक्यमिति यावत् **विशिष्टैक्यन्तु** वाच्यैक्यं तावत् **पूर्वं** नवमनिरूपणे विस्तरेण दर्शितमित्युक्त्वा तत्त्वंपदलक्ष्यार्थं

र्विभजते **लक्ष्यं शिष्टत्रयं भवेदिति** नवमनिरूपणोक्ताद्वाच्यैक्यादवशिष्टमुपाहितैक्यमुपलक्षितैक्यमित्यैक्यद्वयमपि तत्वंपदयोर्लक्ष्यस्वरूपमेवेत्यर्थः ॥ १० ॥

अ० ॥ ननु, स्वात्मनो मायादिविशिष्टत्वोपलक्षितत्वाभ्यामतिरिक्तं मायाद्युपाहितत्वं नाम किञ्चिदवस्थान्तरं प्रमाणसिद्धं चेत्तदा तद्व्यावर्तकस्य मायादेरुक्तोपाधिलक्षणवत्वं तदुपहितस्याप्येकत्वं सिद्ध्येदित्याशङ्क्य तत्र यस्मिन्द्यौः पृथिवी चान्तरिक्षमोतं मनस्सह प्राणैश्च सर्वैः । तमेवैकं जानथात्मानमन्या वाचो विमुञ्चथामृतस्यैष सेतुः । एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेत्यादिकां द्युभ्वाद्युपहितैक्यसाक्षात्कारस्य अमृतत्वप्राप्तिसाधनत्वपरां श्रुतिं संगृह्य प्रमाणयति **यस्मिन्निति**—

मू ॥ यस्मिन्द्युभ्वादिकं चोतं तमात्मानं विजानतः ॥
एकत्वेनामृतत्वोक्तेर्द्युभ्वाद्युपहितात्मनः ।
साक्षिणश्चैकता सिद्धाऽव्याकृतादेरुपाधिता ॥ १२ ॥

व्या० ॥ **द्युभ्वादिकं चोतमिति** चकारेण मूलाज्ञानं परिगृह्यते अव्याकृतादेरुपाधिता च सिद्ध्येति पूर्वेणान्वयः ॥ १२ ॥

अ० ॥ ननु, द्युभ्वाद्यधिकरणभूतस्यात्मनः साक्षित्वं सिद्धञ्चेत्तदा तस्य द्युभ्वाद्युपहितत्वं तद्व्यावर्तकस्य द्युभ्वादेरुपाधित्वं च संभवेदित्याशङ्क्य तस्य तथात्वप्रतिपादकं ब्रह्मगीतावाक्यं प्रमाणयति—**एवमिति**—

मू ॥ एवं सर्वं सदा साक्षिस्वरूपे परमात्मनि ।
सर्वान्तरतमे प्रोता ओता अध्यस्तरूपतः ॥
सर्वाधिष्ठानभूतस्तु प्रत्यगात्मा स्वयंप्रभः ।
न कस्मिंश्चित्स्थितस्साक्षा सत्स्वभावस्सुरर्षभाः ॥ १४ ॥

व्या० ॥ **सर्वान्तरतम इति** सर्वेषां स्थूलभूतादीनामन्तरं सूक्ष्मभूतं अन्तरतरन्तु मूलाज्ञानं अन्तरतमस्तु प्रत्यगात्मा तस्मिञ्छेषस्सुगमः ॥ १४ ॥

अ० ॥ ननु, प्रत्यगात्मनस्साक्षित्वादिविनिर्मुक्तं किञ्चित् शुद्धस्वरूपं प्रमाणसिद्धं चेत् तच्छुद्धस्वरूपव्यावर्तकस्य अव्याकृतादेरुक्तोपलक्षणलक्षणवत्वं संभवेदित्याशङ्क्य 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा—सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिश्रुतितात्पर्यविषयीभूतस्यापास्तसर्वविशेषस्य शुद्धस्य प्रत्यगात्मनः तज्ज्ञानबाधितं जगज्जन्मादिकारणत्वं—यो भुजङ्गस्या स्रागित्यत्र स्रज-

स्तज्ज्ञानबाधितभुजङ्गवत् 'इदं सर्वं यदयमात्मा यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्' इत्यादिश्रुत्युक्तप्रकारेणात्मज्ञानेन बाधितमज्ञानादिकं वोपलक्षणं भवेदित्याह—**यत्रेति**—

मू॥ यत्र नान्यत्पश्यति स स भूमेत्यादिशास्त्रतः ।
दृग्दृश्यत्वविनिर्मुक्तप्रतीचो ज्ञानबाधितम् ॥
जगज्जन्मादिहेतुत्वं जगद्वाऽस्योपलक्षणम् ॥ १५॥ ॥

व्या० ॥ **दृग्दृश्यत्वविनिर्मुक्तप्रतीच इति** दृग्दृश्ययोर्भावः दृग्दृश्य—त्वं तेन विनिर्मुक्तस्य प्रत्यगात्मन इत्यर्थः ॥ शेषस्सुगमः ॥ १५॥ ॥

अ० ॥ इदानीमुपपादितार्थं ब्रह्मसूत्रं प्रमाणयति **इतीति**—

मू॥ इति स्वाप्ययसंपत्त्योरिति सूत्रेण दर्शितम् ॥ १६ ॥

व्या० ॥ स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हीत्यनेन सूत्रेण द्वैतादर्शनं तावत् स्वाप्ययसंपत्त्योः स्वस्मिञ्जीवे जगतोऽप्ययः स्वाप्ययस्सुषुप्त्यवस्था संपत्तिर्विदेहकैवल्यं तयोरन्यतरापेक्षमन्यतरामवस्थामपेक्ष्याविष्कृतं प्रकटीकृतं शास्त्रेणेति दर्शितं तथा हि सुषुप्तिकाले मूलाज्ञानातिरेकेणाविद्यमानं वियदादिकं तात्कालिकस्यात्मन उपलक्षणं भवति 'न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येदिति श्रुतेः. । विदेहकैवल्यसमये तु स्वरूपातिरेकेणाविद्यमानं विद्याविद्यादिकं सर्वं तदानीमवशिष्यमाणस्य शुद्धात्मन उपलक्षणं भवति 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदिति श्रुतेरित्यास्थेयम् ॥ १६ ॥

अ० ॥ एवं दृष्टिसृष्टिरीत्या आध्यात्मिकयोः जीवेशयोः उपाधिपरिवेष्टितत्वाभावात् वाच्यैक्यादित्रयमुपन्यस्य ।

अधुना मीमांसकवादवत् प्रतिकर्मव्यवस्थावादेऽपि 'स समानस्सन्नुभौ लोकावनुसञ्चरति श्लो०॥ परित्राणाय साधूनां विनाशाय च दुष्कृताम्। धर्मसंस्थापनार्थाय संभवामि युगेयुगे इत्यादिशास्त्रानुसारेण आध्यात्मिकाधिदैविकयोः तत्तच्छरीरपरिवेष्टितत्वेन भोगार्थं परलोकादिकं प्रति गमनादेरावश्यकत्वेऽपि प्रतिकर्मव्यवस्थावादे मोक्षकाले स्वात्मपरिवेष्टकशरीराद्यभावात् तदनुगुणम् मोक्षस्वरूपन्निर्धारणीयम् ।

ननु घटसंवृतमाकाशं नीयमाने घटे यथा । घटो नीयेत नाकाशस्तद्वज्जीवो नभापेमः इत्यादिश्रुत्या उपाधिपरिवेष्टितत्वेऽपि आकाशजीवयोः गमनादिनिषेधात् कथं भवदुदाहृतशास्त्रात् जीवेशकर्तृकगमनागमनप्रत्ययो भवेदिति चेत् ।

भवदुदाहृतश्रुतिस्तावत् प्राक्तृतीयनिरूपणोक्तप्रमाणानीव आकाशस्वरूपपरन्यायशास्त्रमिव च प्रथमपादेन घटेन परिवेष्टितमाकाशमिति पक्षमनूद्य तत्र तदभावं द्वितीयादिपादैर्बोधयति तत आत्माकाशयोर्निरवयवत्वं विभुत्वञ्च सिद्धं ततो दृष्टिसृष्ट्यनुसारिणी सा श्रुतिः।

अस्मदुदाहृतशास्त्रन्तु काञ्चिदधिकारिणं प्रति प्रतिकर्मव्यवस्थाप्रवर्त्तकम् तत्राकाशस्तु पञ्चीकरणप्रक्रियया सावयवः तदेकदेशस्य घटेन परिवेष्टनम् देशान्तरं प्रति गमनञ्च सम्भवेदेव तद्वादे आत्मभेदेन बन्धमोक्षयोरङ्गीकृतत्वात् आत्मनां परिच्छिन्नपरिमाणवत्त्वमनादितस्सिद्धमित्यभिप्रेत्य उभयलोकसञ्चारित्वम्बोधयति ततस्तन्मते सम्भाव्यमानम्मोक्षस्वरूपमुपपादयति **मायेति**—

मू॥ मायाशरीरयोरीशजीववेष्टकता यदि ।
स्वात्मीययोर्विनाशेऽपि देवोपाध्योश्च वर्तनात् ॥ १७ ॥
शोधितत्वपदार्थस्य ह्यौदासीन्यं विमुक्तता ॥ १७॥ ॥

व्या० ॥ **मायेति** जीवस्य स्वरूपावरणशक्तिः ईश्वरस्य सर्वनियमनशक्तिश्च परिगृह्यताम् अत्र कर्मणएव जगत्प्रकृतित्वात् नोपादानम्माया 'मायान्तु प्रकृतिं विद्यादिति' श्रुतेस्तु पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकीति श्रुत्या श्लो०॥सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपीति स्मृत्या च मायाख्येश्वरशक्तेरीश्वरस्वाभाविकत्वपरत्वावगमात् ।

शरीरपदेन ईश्वरशरीरञ्च जीवशरीरञ्च परिगृह्यते **स्वात्मीययोरिति** यत् स्वात्मीयम् स्वरूपावरणम् च लिङ्गादिकर्मप्रकृतिकं शरीरञ्च ते स्वात्मीये तयोरित्यर्थः **देवोपाध्योश्चेति** देवस्येश्वरस्य उपाधिभूतयोः सर्वनियमनशक्तितदीयशरीरयोरित्यर्थः चकारेण जीवान्तराणां तत्तत्स्वरूपावरणशक्तितत्तच्छरीरयोश्च तदन्यजीवस्वरूपज्ञानादनिवर्त्यत्वेन वर्तनादित्यर्थः । शेषः सुगमः ॥ १७॥ ॥

अ० ॥ इदानीं प्रतिकर्मव्यवस्थायामसम्भाव्यमानमैक्यत्रयन्दर्शयति **परिवेष्टनेति**—

मू ॥ परिवेष्टनपक्षेऽस्मिन्नास्त्येवोपहितैकता ॥
भिन्नत्वात्साक्षिणोस्तद्वद्वाच्ययोरपि नैकता ॥ १८॥ ॥

व्या० ॥ **साक्षिणोरिति** गजमूषिकयोः कर्णशष्कुल्युपहितनभोवन्मायान्तःकरणोपहितसाक्षिणोर्भिन्नत्वात् उपहितयोरेकत्वं न संभवतीत्युक्त्वा तन्न्यायं वाच्ययोरतिदिशति—**तद्वदिति** वाच्ययोर्भिन्नत्वान्नैकतेति संबन्धः अपिशब्दात् उपलक्षितयोरैक्याभावो दर्शितः ईशोपाधेर्जीवनात् ॥ १८॥ ॥

अ० ॥ इदानीं स्वयमेव गुरुशिष्यादिभावमापन्नस्सन्नासमाप्त्युत्तरग्रन्थं प्रतनोति **भवदिति**—

मू ॥ भवदाकाङ्क्षिताशेषविशेषास्सम्यगीरिताः ।
वद माधवतीर्थैतच्छ्रवणात्किं बभूव ते ॥ १९॥ ॥

व्या० ॥ हेशिष्याः जीवभिन्नेशविभ्रान्त्या जगदारोपितं मयीत्यारभ्य—तद्विशेषाञ्छ्रोतुमिच्छाधि नो गुरवित्यन्तेन प्रथमनिरूपणारम्भे भवद्भिः परिपृष्टा आत्मानात्मीयविशेषान्तराः आत्मानात्मीयविशेषैः सह उपदिष्टा इत्युक्त्वा—तेषामेतच्छास्त्रश्रवणात् किमभूत्तात्पर्यमिति जिज्ञासमान इव **वदेत्यादिना** पृच्छतीति—मन्मायायाः प्रभावादित्यन्तिमश्लोकादवगम्यते ॥ १९॥ ॥

अ० ॥ तत्र माधवतीर्थस्तावेदतच्छास्त्रश्रवणानुसारेण स्वतात्पर्यमाचार्याय निवेदयति—ईश इति—

मू ॥ ईश आसं सुषुप्त्यादावध्यस्ताज्ञानमोहतः ।
पञ्चाध्यासैककर्तृत्वाद्द्वितीयोऽस्म्यतो गुरो ॥ २०॥ ॥

व्या० ॥ अत इति स्वातिरिक्तस्य सर्वस्य स्वस्मिन्नेवारोपितत्वात्पारमार्थिकवस्त्वन्तराभावेनाद्वितीयोऽस्मीति दग्धपटन्यायेनानुवृत्तवासनया स्वतात्पर्यं निवेदयामास ॥ २०॥ ॥

अ० ॥ एवं तदन्येऽपि शिष्याः प्रश्नपूर्वकं स्वस्वाशयं निवेदयन्ति **साम्बयोगिन्नित्यादिना**—

मू ॥ साम्बयोगिन्वदाद्यैतच्छ्रवणाद्यदजायत ॥ २१ ॥
जाग्रत्यहं विराडासं स्वप्ने सूत्रात्मनाऽभवम् ।
सुप्तौ महेश्वरश्चासं विद्यायां निष्क्रियोऽस्म्यहम् ॥ २२ ॥
शिवानन्द तवाद्यैतच्छ्रवणान्निश्चयं वद ।
मायामयमिदं सर्वं मद्दृश्यत्वान्मृषात्मकम् ॥ २३ ॥
स्वप्ने यथा सजातीयविकलोऽस्मि तथात्र च ।
चिदानन्दमुने ब्रूहि त्वयैतच्छास्त्रतो धृतम् ॥ २४ ॥
विद्योदयेऽप्यविद्यायां न मत्तोऽन्यत्तु किञ्चन ।
सर्वेषामेकसत्वाच्च शान्तोऽस्म्युपरतोऽस्म्यहम् ॥ २५ ॥

श्रीनिवासेन्द्र तात्पर्यमेतद्ग्रन्थोद्भवं वद ।
वृत्त्यात्मकमिदं सर्वमेकस्सन्कल्पयाम्यहम् ॥ २६ ॥
क्षणेन संहराम्येक इदं कस्मै ब्रवीम्यहम् ॥ २६॥ ॥

व्या० ॥ एतानि शिष्यवचनानि प्रागुक्तदशनिरूपणोपदेशनिमित्तकत्वेन तद्व्याख्यानेनैवावगतार्थानि भवन्तीति न पृथग्व्याख्यायन्ते ॥ २६॥ ॥

अ० ॥ अधुना प्रश्नपूर्वकमन्योऽपि शिष्यः स्वतात्पर्यमावेदयति **वैद्यनाथेति**—

मू ॥ वैद्यनाथाख्य योगीन्द्र वद मे भवदाशयम् ॥ २७ ॥
नेति नेतीति शास्त्राच्च वाचारम्भणवाक्यतः ।
नेह नानेति शास्त्राच्च जगतस्स्वात्मनो विभोः ॥ २८ ॥
एका सत्तेति वादेऽस्याऽस्म्येकत्वेन स्थितस्सदा ।
सर्वोपलक्षितस्स्वात्मा मोक्षो भेदविवर्जितः ॥ २९ ॥

व्या० ॥ शास्त्राच्चेति चकारद्वयेन तत्तच्छ्रुतिमूलकसूत्रतद्भाष्याणां परिग्रहः । शेषस्सुगमः ॥ २९ ॥

अ० ॥ एवं स्वात्मजगतोरेकसत्तावादे मोक्षस्य एकरूपत्वं संप्रदर्श्य अधुना जगतः कर्मविहीनस्वाविद्याकार्यत्वे अविवेकादिदशायां क्रमान्मोक्षत्रैविद्ध्यं दर्शयति **प्रातिभासिकेति**—

मू ॥ प्रातिभासिकतायां तु पूर्वाद्भिन्नान्ब्रवीमि च ।
तत्त्वमोरत्र वाच्यैक्यत्रैविध्यात्स्वात्मनो विभोः ॥ ३० ॥
सार्वात्म्यरूपमोक्षः स्यादज्ञानादौ विनाशिते ।
वासनाभिश्च तत्कार्यैस्स्वस्यैवोपहितस्य तु ॥ ३१ ॥
साक्षित्वरूपमोक्षस्स्याद्यथा सन्न्यासिना तदा ।
शिखादियज्ञसूत्रे तु त्यक्ते ज्ञानपुरस्सरम् ॥ ३२ ॥
वासनाभिः स्नानकाले शिखाया मार्जनेन च ।
बहिश्शङ्कादिकाले च निवीताचरणेन च ॥ ३३ ॥

कर्मणोपाहितस्यास्य मुण्डिनस्साक्षिता भवेत् ॥ ३३॥ ॥

व्या० ॥ प्रातिभासिकतायामित्यादिना प्रथमतः जगदुपादानाज्ञानतत्कार्यान्तःकरणादितादात्म्यापन्नानां प्राज्ञादीनां नवमनिरूपणे विश्व त्वं स विराडसीति श्लोकोक्तप्रकारेण वाच्यैक्यत्रैविध्यज्ञानवतः त्रिविधसार्वात्म्यरूपो मोक्षः संभवतीत्युक्ता दृष्टसृष्टिपक्षे मूलाविद्यादौ तद्विलक्षणस्वात्मसाक्षात्कारेण विनष्टे सति दृष्टिविनाशाज्जायमानवासनानां स्वात्ममात्रनिष्ठत्वात् वासनातद्व्यापारमात्रोपहितस्य स्वात्मनो वासनाक्षयपर्यन्तं कादाचित्कव्यापारवत्त्वेऽपि तत्साक्ष्यात्मनाऽवस्थानरूपो मोक्षः सम्भवतीति सदृष्टान्तमाह **अज्ञानादाविति**त्यादिना जगत्कारणभूताज्ञानतत्कार्यात्मकविषयं विना प्राचीनवासनामात्रोपहितस्य स्वात्मनः कादाचित्कव्यापारवत्त्वेऽपि वासनाक्षयावसानकः तत्साक्ष्यात्मनाऽवस्थानरूपचतुर्थप्रकारो मोक्षस्संभवतीत्यर्थः ॥ ३३॥ ॥

अ० ॥ अधुना जगतः प्रतिभासिकत्वपक्षे पञ्चमं मोक्षं दर्शयति **सदे**त्यादिना--

मू ॥ सदा स्वात्मानुसन्धानाद्वासनासंक्षये ततः ॥
एकात्मनाऽवशेषश्च वासनालक्षितो भवेत् ।
वासनातानवं ब्रह्मन्मोक्ष इत्यादिशास्त्रतः ॥ ३५ ॥

व्या० ॥ स्पष्टोऽर्थः ॥ ३५ ॥

अ० ॥ अधुना प्रतिकर्मव्यवस्थावादे जीवानां तत्तदुपाधिपरिवेष्टितत्वेन तत्र प्रदर्शनीयं मोक्षस्वरूपं दर्शयति **शक्तिमदिति**--

मू ॥ शक्तिमद्ब्रह्मणो जीवा वियुक्तावयवात्मकाः ।
यथा च शीकरा नाना जलराशेस्समुद्गताः ॥ ३६ ॥

स्वर्गं गच्छन्ति भोगार्थमुत्क्रान्त्यादिश्रुतेस्तथा ।
क्षीरं क्षीरे यथा क्षिप्तं तैलं तैले जलं जले ॥ ३७ ॥
संयुक्तमेकतां याति तथात्मन्यात्मविन्मुनिः ।

इत्यादिशास्त्रतो मोक्षस्त्वाप्य एवात्र सम्भवेत् ॥ ३८ ॥
अतस्तत्परिहाराय जीवेभ्यश्चाधिदैविकात् ।
विभिन्नत्वेन शुद्धात्मरूपेणैव हि वर्तनम् ॥ ३९ ॥
कैवल्यमिति वक्तव्यं स्वान्योपाधेश्च वर्तनात् ।
बन्धमुक्तिव्यवस्थायाः पुम्भेदात्स्वीकृतत्वतः ॥ ४० ॥

व्या० ॥ **शक्तिमद्ब्रह्मणो जीवा वियुक्तावयवात्मकाः** प्रतिकर्मव्यवस्थायां फलदाता तु सर्वज्ञत्वादिहेतुभूतसर्वशक्त्याश्रयत्वेनाग्नवद्द्रव्यभूतः अग्नेः स्फुलिङ्गा इव तस्मादीश्वराद्गलितत्वे सति तदेकैकाम्शभूता जीवाः समुद्राच्छीकरा इवचेत्यर्थः शीकराणां समुद्राभेदेन पुनरवस्थानवत् जीवानां पुनरीश्वररूपेणावस्थानमेव प्रतिकर्मव्यवस्थावादीयो मोक्ष इत्युक्त्वा पक्षान्तरं दर्शयति अतइत्यादिना ॥४०

अ० ॥ इदानीमाचार्यः प्रतिकर्मव्यवस्थावादीयमोक्षवादिनो निश्चयपरीक्षार्थमाक्षिपति **नन्वित्यादिना**—

मू ॥ नन्वात्मनो विभुत्वेऽत्र न मुक्तेराप्यतेति चेत् ।
तन्निष्ठत्वादपूर्वाणामत्र स्वर्ग्यन्न कर्मजम् ॥ ४१ ॥
इति चेत्तत उत्प्लुत्याऽपूर्वं दिव्यं फलम्भवेत् ।
इति चेत्तत्फलस्यात्ता को वा चेद्विभुरेव सः ॥ ४२ ॥
विभुत्वेऽस्याऽऽत्मनानात्वं तन्मते नैव सिध्यति ।
तर्ह्यणुस्तत्र यः कश्चित् फलम्भुङ्क्तेऽस्य कर्मणः ॥ ४३ ॥
तथा चेत्कृतहानादिदोषस्यादिति चेत्तदा ।
विधौ तु परिसङ्ख्यात्वञ्जानतान्न तदागमः ॥ ४४ ॥
यद्यसत्वं प्रसज्येत धर्मादेरिष्टमेव चेत् ।
प्रतिकर्मव्यवस्थाया मूलतो हानिरापतेत् ॥ ४५ ॥
इष्टञ्चेत्तद्रक्षणार्थं स्वामिन्प्रोक्तं तथेति चेत् ।
तद्वादीयन्तु कैवल्यं तथैवेत्यवधार्यते ॥ ४६ ॥

व्या० ॥ अत्रेति पदद्वयं प्रतिकर्मव्यवस्थापरम् अत्र क्रमादाचार्यकक्षिं शिष्यः शिष्यकक्षिमाचार्यश्च चेदिति पौनःपुन्येनानुवदति **अस्रेति** विभोर्जीवस्येत्यर्थः अत्रत्यमाचार्यशिष्यसंवादरूपं श्लोकषट्कं क्रमात् स्वात्मनः विभुत्ववादाणुत्ववादयोः साधकत्वेन सर्वत्र योजयेत् ॥ स्पष्टमन्यत् ॥ ४६ ॥

अ० ॥ संप्रति द्वैतिनां तत्तत्कर्मफलभूतानि मोक्षस्वरूपाण्याह **कायेनेत्यादिना**—

मू ॥ कायेन मनसा वाचा कृतानां फलमुच्यते ।
सालोक्यञ्चापि सामीप्यं सारूप्यं साष्टर्चमित्यपि ॥
मुक्तिश्चतुर्विधा प्रोक्ता द्वैतिनान्तु यथाश्रुतम् ॥ ४७॥ ॥

व्या० ॥ **यथाश्रुतम्**—यथोपासनमित्यर्थः ॥ ४७॥ ॥

अ० ॥ इदानीं सालोक्यादिमुक्तिगतविशेषद्वयं दर्शयति **अत्रेति**—

मू ॥ अत्र मुक्तेर्विकार्यत्वं विकारत्वाद्धि कर्मणः ॥
लोकान्तरापितत्वाद्धि तथाप्यत्वं च सम्भवेत् ।
इत्येकादशधा मोक्षस्तत्तद्वादानुसारतः ॥ ४९ ॥

व्या० ॥ अत्रेति द्वैतवाद इत्यर्थः एवं अष्टाविंशश्लोकादारभ्य जगतः चिन्मात्रसत्तेति च प्रातिभासिकसत्तेति च व्यावहारिकसत्तेति च सालोक्यादिमोक्षस्य कर्मविकारत्वेऽपि अक्षय्यꣳह वै चातुर्मास्ययाजिनः सुकृतं भवतीत्यादि शास्त्रोक्तप्रकारेण नित्यत्वरूपपारमार्थिकसत्तेति च तथा प्राथमिकसत्ताद्वयवादेपि विभुः सजातीयपरिच्छेदरहितो जीव इति च पाश्चात्यसत्ताद्वयवादेऽपि मुक्तोऽप्यणुः सजातीयपरिच्छेदवान् जीव इति च वादचतुष्टयानुसारेण दर्शितं मुक्तस्वरूपं कैवल्यं एकादशविधमिति ज्ञेयम् ॥ ४९ ॥

अ० ॥ संप्रति परिपूर्णानन्दः स्वानुभवमाचार्याय निवेदयति—**चित्रमिति**—

मू ॥ चित्रं तद्भृदि मे गुरो करुणया तत्वोपदेशो द्विधा
ज्ञानं यत्क्षणभेदतो जनयतीत्याश्चर्यमत्रास्ति किम् ।

कूटस्थे किल शक्तिमत्वकरणे लोको विभात्यन्यथा
नैवेन्दाविव वक्रदृष्टिकरणे त्विन्द्वन्तरं नान्यथा ॥ ५० ॥

व्या० ॥ भो गुरो करुणया भवत्कृतः तत्त्वोपदेशो मे हृदि क्षणभेदतो द्विधा ज्ञानं जनयतीति यत् तच्चित्रमिति वदन्तं प्रत्याचार्यः पृच्छति **आश्चर्यमत्रास्ति किमिति** अत्रास्मत्कृतोपदेशस्थानियतज्ञानजनकत्वे किमाश्चर्यमिति वदते स्वाचार्याय तत्कृतोपदेशस्यानियतज्ञानोत्पादकत्वेऽपि लोकातिशायित्वं दर्शयति शिष्यः **कूटस्थ इत्यादिना** निर्विकारे प्रत्यगात्मनि शक्तिमत्वकल्पने सति मिथ्याभूतमिदं जगद्विभाति—तच्छक्तिकल्पनाभावे तु नेदं विभातीत्युक्त्वा तत्र दृष्टान्तमाह—**इन्दाविवेत्यादिना** यथा चैकस्मिन्नेवेन्दौ वक्रदृष्टिकरणे सतीदमिन्द्वन्तरं भाति तदकरणे तु न विभाति तद्वदित्यर्थः ॥ ५० ॥

अ० ॥ अधुना श्रीमच्चन्द्रिकाचार्यः स्वशिष्याणां तत्तदात्मविषयकानुभवश्रवणात् परिपूर्णपरितुष्टिं स्वस्य दर्शयति **स्वात्मेति**—

मू॥ स्वात्मतत्वानुभूतिं वश्श्रुत्वा तुष्याम्यहं मुहुः ।

व्या० ॥ स्पष्टोऽर्थः ॥ ५०॥ ॥

अ० ॥ संप्रत्याचार्याय दक्षिणाप्रदानार्थं प्रार्थयन्ति **एवमिति**—

मू॥ एवं चेत्करुणासिन्धो कृतार्थास्त्वदनुग्रहात् ॥ ५१ ॥
विद्याया दक्षिणां शाधि दास्यामो हि यथाबलम् ॥ ५१॥ ॥

व्या० ॥ यस्माद्भगवतो भवतः कृपाबलादेव लब्धा शुद्धाद्वैतस्वात्मविद्या ततस्तदर्थं तद्दक्षिणामाज्ञापयेत्यर्थः ॥ ५१॥ ॥

अ० ॥ अधुना त्वाचार्यश्शिष्यान्प्रत्याह **प्रचारयतेति**—

मू॥ प्रचारयत तां विद्यां लोकेऽस्मिंस्तदलं मम ॥ ५२ ॥

व्या० ॥ तामिति मदुपदिष्टां तरमाद्वैतस्वात्मविद्यामिति शेषस्सुगमः ॥

अ० ॥ इदानीं चन्द्रिकाचार्यः स्वनामान्तरं प्रदर्शयन्निदं शास्त्रमनुगृह्णाति **मन्मायाया इति**—

मू॥ मन्मायायाः प्रभावाद्विलसितगुरुणा प्रोक्तवाक्यैश्शिवोऽस्मी-
त्येवं मामद्वितीयं वियदिव विपुलं सर्वदा जानते ह ।

रामब्रह्मेन्द्रवाणीति च गुरुमुखतो लब्धनाम्ना मयोक्ता
श्रुत्या युक्तचाऽनुभूत्या च भुवि विजयतां निर्मला चन्द्रिकैषा ॥ ५३ ॥

व्या० ॥ **रामब्रह्मेन्द्रवाणीति** रामब्रह्मेन्द्रसरस्वतीति श्रीगुरुमुखाल्लब्ध-नाम्ना चकारेण एतदद्वैतसिद्धान्तचन्द्रिकाख्यशास्त्रकरणाच्चन्द्रिकाचार्यसंज्ञकेन मया श्रुतियुक्त्यनुभवैस्सह समीरितैषा **चन्द्रिका** इह भुवि विजयतामित्यर्थः ॥ ५३ ॥

इति श्रीपरमहंसपरिव्राजकाचार्यरामब्रह्मश्रीकृष्णानन्देन्द्रसरस्वती-
भगवत्पादशिष्यश्रीमच्चन्द्रिकाचार्याख्ययतीश्वरविरचितायां
अमृतरसझरीनामकव्याख्यानोपेतायां अद्वैतसिद्धान्त-
गुरुचन्द्रिकायां दशमं लक्ष्यैक्यनिरूपणं
संपूर्णम् ।

ओं तत्सद्ब्रह्मैवाहमस्मि ।

हरिः ओम् ।

तत्सत्

॥ ग्रन्थः समाप्तः ॥

चेन्नपुर्यां 'ओरियण्टल्' मुद्राक्षरशालायाम् मुद्रितम् ।

हे सूरिणः भवद्भिः कर्त्तव्यं विज्ञाप्यते । अद्वैतसिद्धान्तगुरु-चन्द्रिकायां यस्मिन् यस्मिन् पार्श्वे यस्यां यस्यां पंक्तौ यद्यत् वर्ण विकलाङ्गं भवति पुस्तके तत्तत्स्थलवेदनार्थं शुद्धाशुद्धपत्रिकासु तृतीय-ग्रहे तत्पूर्वाक्षरैस्सह दर्शितं। अतः पुस्तकगते एकैकस्मिन् विकलाङ्गवर्ण-देशे वस्त्रपूतस्निग्धं च द्रुमामयजलं वेणुशकलमूलदेशेन संलिप्य अन-न्तरं तत्समीकरणार्थं तत्र तत्र चतुर्थग्रहपंक्तौ दर्शितं पूर्णाङ्कं तत्तद्वर्ण-मात्रं निधाय मृदुफलकादौ तीक्ष्णेन सूक्ष्मशस्त्रेण संछिन्द्य प्राक् द्रुमामय-जलेन लेपितपुस्तकप्रदेशे वेणुशकलाग्रे निबद्धसूचिकाग्रेण गृहीत्वा योज-येत् । किञ्च यद्यद्वर्णं शिरसि बिन्दुरहितं भवति तत्र तत्र लेखिन्या गृहीतकज्जळेन वा समीकुर्यात् । यत्र यत्र गळितवर्णदर्शनार्थं तृतीय-ग्रहे या पङ्क्तिर्लिखिता तत्पङ्क्तौ चतुर्थग्रहपङ्क्तिं योजयेत् तथा कृतं चेत् यावज्जीवं पठनाय सौकर्यं भवेत् ।

॥ हरिः ओं ॥

शुद्धाशुद्धपत्रिका ॥

मूलपुस्तकस्य

पार्श्वे	पङ्क्तौ	अशुद्धं	शुद्धं
१	१८	कोण	कोणे
१४	२२	सर्वेषा	सर्वं
१७	१६	तृतीयेनो	तुतीयेना
२०	२३	सहो	सहौ
२४	१२	सत्तो	सत्ता
२४	१२	व्यादि	व्यादि
२८	४	५५	५५॥
२८	१०	इात	इति
२८	११	तादात्म्याद्धौ	तादात्म्याद्धौ
२८	२७	वेशयितुं	प्रवेशयितुं
२८	२९	मत्र्यं	मैत्र्यं
३२	१८	श्लेके	श्लो
३३	१	षट्पञ्जाशादि	त्रिषष्टितमादि
३३	९	बोधानय	बोधनाय
३५	६	नान्यस्म	नान्यस्मै
३५	२२	आद्यगु	आद्यमु
३७	१८	तेः	श्रुतेः
४७	२०	स्यात्त	सात
५१	२७	स्वरूपारकत्वेन	स्वरूपावारकत्वेन
५१	१३	प्रागभावसंज्ञः	प्राक्त्वाभावः

पार्श्व	पङ्क्ती	अशुद्धं	शुद्धं
५२	४	प्रागभावः	प्राक्त्वाभावः
५२	१४	प्रागभावः	प्राक्त्वाभावः
५५	२	प्रागभावसंज्ञः	प्राक्त्वाभावः
५८	२२	गिरीयज	गिरीयञ्च
५९	२७	चिभिन्नं	चिद्भिन्नं
६०	२८	भष्येण	भाष्येण
६५	११	आत्मग्नि	आत्मग्नि
७४	२	सप्तसप्तानि	द्विनवति
७५	१	चेमिच	चेतिच
७७	२	अन्यत्र	अन्यत्र'
७७	२	शरीरं	शरीरं
७७	२५	वगम्यतं	स्वगम्यतां
७८	४	जगदावरणाश्रयत्व	जगदावरणाश्रयत्वे
७८	१५	तमश्लोकान्तैरुदाहृतानि	भिःश्लोकैरुदाहृतानि
७९	५	पञ्चाश	त्रिपञ्चाश
७९	६	एकोन	सप्तोत्तर
७९	९	अत्रैकोनचत्वारिंशो	अत्रचतुरशीत्यु
७९	२०	इत्यादिभिः	इत्यादिना
७९	२०	प्रागुदाहृनैः	प्रागुदाहृतेन
७९	२१	व्यवहारि	व्यावहारि
८४	१३	द्वैतापत्तिरित्या	द्वैतापत्तिरित्थ
८९	२१	शाब्दावाच्य	शब्दवाच्यं
९०	१९	सौन्पिकानं	स्वान्पिकानां
९४	२६	तविहाय	तंविहाय
९५	६	प्रागभावात्मक	प्रागभावात्मका
९६	८	कारण	कारणं
९७	१०	मत	गत

पार्श्वे	पङ्क्तौ	अशुद्धं	शुद्धं
९७	१५	वस्तुसत्वतः	वस्तुगत्वतः
९७	१८	प्रागभास्व	प्रागभावस्य
९९	११	द्वतस्य	द्वैतस्य
९९	२४	प्रकारेण	प्रकारेण
१०४	२९	अधाह	अधाहि
१०६	१७	वचन	वचन
१०६	२९	श्वेताश्वरवाक्यं	श्वेताश्वतरवाक्यं
१०८	१९	अनन्द	आनन्द
१११	१३	सत्तैक	सत्तैक्य
१११	१५	सत्तैक	सत्तैक्य
११३	९	निरूपये	निरूपणे
११७	२१	नाशोऽपि	नाशेपि
११८	१०	विघ्नकृतं	नाशक
११९	१९	विघ्नकृत्	नाशक
१२३	३	इदा ि	इदानीं
१२९	२३	अद्यः	आद्यः
१३२	२३	भामात्	भानात्
१३४	१२	भ्रान्तः	श्रान्तः
१३६	२१	देवत्म	देवात्म
१३९	३	दास्व	दस्य
१३९	८	स्वस्य	स्वस्य
१४२	२२	तदवच्छिन्न	तदनवच्छिन्न
१४२	२३	जीवत्वं	जीवत्वे
१४२	२३	कतृत्व	कर्तृत्व
१४७	२५	परमत	परमतं
१४८	२५	नमो	नभो
१५२	७	आत्मनं	आत्मानं

पार्श्वे	पङ्क्तौ	अशुद्ध	शुद्धं
१५४	१५	दृष्टिवाद इति	दृष्टिवादः
१५९	७	उक्त्वा	उक्ता
१५९	१९	स्थविरं	स्थावरं
१६१	१७	यत्कञ्चत्	यत्किञ्चित्
१६६	२१	क्षयात	क्षयात
१६७	९	एता	एतां
१७०	१८	तद्वादाभिमतस्य	तद्वादाभिमता
१७१	१९	व्यवस्थावदि	व्यवस्थावाद
१७४	१५	विषयो	विषये
१७६	२२	द्रव्यापूर्व	द्रव्यापूर्वं
१७८	२५	गुह्य	गुह्यं
१७८	२९	काठकदि	काठकादि
१७९	२०	वर्त्तते	वर्त्तन
१८०	४	सुख	एतत्सुखं
१८१	१३	उदाहृतया	उदाहतायाः
१८५	२६	मायापरिणामित्वे	मायापरिणामत्वे
१८५	२५	मेति	मिति
१८५	२६	र्थः	र्त्थः
१८६	४	ऽज्ञान	ज्ञान
१८७	६	देश्यं	द्देश्यं
१९०	४	नान्योस्ति	नान्योऽतोस्ति
१९२	२८	प्रबुध्ये	प्रबुध्वे
१९४	१८	माणाः	माणा
१९६	१७	स विषयः	सर्वविषयः
१९९	१२	कमलासना	कमलासन
२०४	४	कृतत्वेऽपि	कृत्वेपि

पार्श्वे	पङ्क्तौ	अशुद्धं	शुद्धं
२०५	१९	विचित्र	विचित्रं
२०६	१४	शन्यत्वे	शून्यत्वे
२०८	१५	सापेक्षन्व	सापेक्षत्वे
२०९	६	दर्शन	दर्शनं
२११	४	संपत्यनुपपत्तिपरं	संपत्यनुपपत्त्यापत्तिपरं
२११	६	सौम्य	सोम्य
२११	७	प्राज्ञोन	प्राज्ञेन
२११	१७	संप्रतीकस्थ	सप्रतीकस्य
२१३	२७	३प्र०	तथा
२१४	१	पक्षिणे	पक्षिणो
२१५	११	अभिर्वाच्या	अनिर्वाच्या
२१५	२८	श्रेयोद्वार	श्रेयोद्वारं
२१७	१७	गौण्य	गौण्या
२२०	१५	आगणं	आमणं
२२०	१६	प्रवृत्तिवै	प्रवृत्तिर्वै
२२१	९	परात्मत:	परात्मन:
२२६	६	पादीयं	पादीयां
२२७	८	व्यवहारिक	व्यावहारिक
२२९	१३	उपपादित	उपपादितं
२३२	२१	तदुपादानविद्या	तदुपादानाविद्या
२३३	२५	मायामत्रत्व	मायामात्रत्व
२३४	१३	कथ	कथं
२३५	२१	मित्वादि	मित्यादि
२३६	१०	दृष्ट	दृष्टं
२३७	८	पुत्रादि	पुत्रादे
२३८	१४	वत्	च
२४१	१२	नान्ये	नान्य

पार्श्व	पङ्क्ति	अशुद्धं	शुद्धं
२४२	२४	तथा	तथा
२४५	२७	लाङ्गल	लाङ्गलं
२४६	२५	प्रमा	प्रामा
२४९	२	विधेयते	विधीयते
२४९	१०	ज्ञान	ज्ञानं
१४९	२८	तल्येति	तुल्येति
२५०	३	प्रामाण्ये	प्रामाण्यं
२५३	१९	नस्स्या	नस्या
२५५	७	ज्ञानाभावतः	ज्ञानाभाववतः
२६२	२६	बावगमात्	त्वावगमात्
२६३	१	ज्ञानेनेति	ज्ञानेति
२६३	६	रित्येवकारेण	:कइत्यत
२६३	१०	निदर्शनानभिज्ञा	निदर्शनानभिज्ञ
२६३	२५	प्रकाशमान	प्रकाशमानः
२८३	७	स्तस्य	स्वस्य
२८५	७	वाक्यंतद्वतं	वाक्यतद्वत
२८५	१६	श्रुत्यत्य	श्रुत्य
२८५	२२	विदंथ्यां	विद्ध्या
२८६	१०	द्रष्टाश्रोता	एषाहेद्रष्टास्पृष्टाश्रोता
२८६	२१	प्रश्नेः	प्रश्ने
२८७	३	आधर्वणिकारकाः	आधर्वणिकाः
२८७	७	तदिय	तदीय
२८७	१६	वत्स्व	वत्व
२८७	२९	करणे	करणेन
२८८	८	त्मान	त्मानं
२८८	२६	शिवंस्सं	शिवंसं
२८९	२	लेकानां	लोकानां

पार्श्वे	पङ्क्तौ	अशुद्धं	शुद्धं
२९१	२५	कि	किं
२९३	२७	आत्मोत	आत्मेति
२९९	१५	नापेक्षकं	नापेक्षिकं
३०२	१४	साम्य	सोम्य
३१०	२	वज्ञान	ज्ञान
३१०	९	अधमधिमाध	अधमाधमाधि
३११	२०	विज्ञानतः	विजानतः
३१३	२२	क्त	रक्त
३१४	२२	महीधरादि	महीधरादि
३१७	५	म्वरूपे	स्वरूपो
३२२	१५	साक	साकं
३२२	१८	वाक्यं	वाक्य
३२३	१६	व्यावर्त्तकमिवाह	व्यावर्त्तकमिवाहं
३२६	३	दृश्यो	दृययो
३२७	२९	बिम्बे	बिम्बो
३२८	२५	इ येवं	इत्येव
३३०	२०	मय	मयं
३३३	१४	जागरित	जागरितं
३३७	११	एतेः	इतेः
३३७	२४	धम	धर्म
३४१	१३	वेष्टितत्वं	वेष्टितत्व
३४१	२१	अभिप्रेतः	अभिप्रेतं
३४४	७	प्रवृत्तिस्स्वरूपतः	प्रवृत्तिस्वरूपतः
३४७	२८	मत	यद
३५१	२३	तुरीयं	अनिदं
३५४	८	कथ	कथं
३५५	१४	अज्ञानादे	अज्ञानादि

पार्श्वे	पङ्क्तौ	अशुद्धं	शुद्धं
३५६	१५	हरयः	हरयाः
३५६	२४	दीयता	दीयतां
३५६	२८	योदेशकृतोभेद इति	तयोर्देशकृतभेद
३५९	९	श्शेत्रं	श्श्रोत्रं
३६०	२१	साक्षा	साक्षी
३६२	१२	त्व	त्वं
३६३	१०	रता	स्ता
३६६	१८	भुङ्क्ते	भुङ्क्ते
३६७	१७	विकरत्वे	विकारत्वे